UNIVERSAL
LIBRARY

OU_184494

UNIVERSAL
LIBRARY

OUP—391—29-4-72—10,000.

OSMANIA UNIVERSITY LIBRARY

Call No. S294.592 K18P Accession No. T1677

Author करमारकर, A. P. ed.

Title पुराणकाव्य-स्तोत्रसुधा

This book should be returned on or before the date last marked below.

अभिसारिका

(Radha towards Krishna —P. 113)



(By Courtesy)

Kangra School of Painting—From the Art Gallery of Shrimant Rajasaheb of Aundh.

THE

# PURANIC ANTHOLOGY

# ( पुराण-काव्य-स्तोत्र-सुधा )


EDITED BY

**A. P. KARMARKAR,** M. A., LL. B., Ph. D.

*Director, Puranic Research Institute,*
*Thalakwadi, Belgaum.*


WITH A FOREWORD
*By*
Hon'ble Shri. **B. N. DATAR,** M. A., LL. B.
*Union Deputy Minister for Home Affairs,*
*New Delhi.*


V..KATARAMANA PU...ATIONS
SULTAN BAZAR,
HYDERABAD.



MIRA PUBLISHING HOUSE,
THALAKWADI, BELGAUM.
1955.

**First Published: 1955.**

***Rupees Five Only.***

Copyright Reserved.

## BY THE SAME AUTHOR

1. Mystic Teachings of the Haridāsas of Karnāṭaka, 1939. 2/-.
2. Cultural History of Karnāṭaka, 1947. 5/-.
3. Purāṇic Words of Wisdom, 1947. 2/-.
4. Kannaḍa Saṁskṛiti (In Kannaḍa). Out of Print.
5. Religions of India, Vol. I, 1950. 16/-.
6. Constitutional History of India, 1954. 5/-.

Printed by Shri. N. K. Deshpande, at the Arun Printing Press, Belgaum, and Published by Shri. J. A. Karmarkar, Managing Proprietor, Mira Publishing House, 404, Thalakwadi, Belgaum.

Most Respectfully Dedicated

TO

His Excellency Shri. **R. R. DIWAKAR,**
*Governor of Bihar.*

The Living Mystic of Karnāṭaka..
—Who has imbibed within himself all that is enshrined in the following Purāṇic Stanza:

*"The Universe is sustained by the Four Pillars of Virtue ( comprised of those ) who are kind, unaffected by pride, obliging, and have conquered their senses (Indriyas)".*
*( P. 91, 651 )*

( On the occasion of his Sixtieth Birthday Celebrations
30th September, 1954. )

## FOREWORD

Shri. A. P. Karmarkar should be warmly congratulated upon his unravelling the rich treasures of Puranic Poetry, and placing them before the world of scholars.

I am sure that they shall be found to be sufficiently varied, instructive, illuminating, and of absorbing interest.

**B. N. Datar,**
*Deputy Minister for Home Affairs,*
*New Delhi.*

# PREFACE

The Purāṇas have been a source of inspiration and illumination to the Hindus since almost the proto-Indian period. A Purāṇa means an 'ancient' lore—let it be in the field of legend, mythology or folklore. A very vast number of such Purāṇas must have been current amongst the people of ancient India. It was Vyāsa and the generations of his great disciples, that collected together all these floating traditions, gave them a colour and form, and built up the magnificent edifice of the twice-eighteen Purāṇas and Upa-Purāṇas.

The Purāṇas are replete with philosophic, mystic and material lore of the Hindus. Unlike the Iliad of Homer, the Purāṇic Ganges has been growing evermore on account of its confluence with various other smaller rivers, streams and brooklets of thought.

The Purāṇas are not a dry piece of poetry, but the emotional side of man has richly prevailed in them throughout. The forest, the autumn and spring, the battle-field, the beauty of nature and man, along with his æsthetic and philosophical outlook and mystic experiences—all these have made a direct appeal to the Purāṇic poets like Vaiśaṁpāyana, Mārkaṇḍeya, Agastya and others. Here and there are found interspersed in the Purāṇic net-work the general words of wisdom. In fact the Purāṇic poetry is unique in its elegance, grace and eloquent style. With their usual deeper insight of a poet and the vision of a mystic, the Purāṇikas have kept before us marvellous specimens of their varied composition. They have been a source of inspiration to the five Great Ācāryas like Śaṅkara, Madhva, Rāmānuja, Nimbārka and Vallabha; to individual mystics and Schools of Mysticism like the Vārakarīs of

Mahārāṣṭra, the Haridāsas of Karnāṭaka and others; and to the eminent classical poets like Bhāsa, Kālidāsa, Bhavabhūti and others. The Purāṇas fully represent the culture, imagery and intuition of the Indian mind.

The Purāṇic authors have always believed in the multiplicity or plurality of Gods, and preached the manifestation of the Divine in all the aspects of the Universe. Eventually, they show a clearly polytheistic trend in this respect— the unique outcome of which is their Stotra literature.

The Purāṇas convey the ideals of the Hindu mind. While condemning a miser, they also condemn the sentiment of vanity possessed by the rich. While condemning the world of womenfolk for their crooked nature and cunning, they have also laid bare before us their true value as Goddesses on earth and builders of society. While recommending the study of Vedānta and the practice of Yogic exercises, they have also idealised the more simple and nobler ideals of a householder's life. Above all they are meant for both the rich and the poor, and the innocent and the wiser folk of the nation. We find in them an address made to humanity from a common platform. In fact their main ideal is to create a heaven on earth rather than a heaven after death.

During the last seventeen years of my study in the field of Purāṇic research, I also tried to cull out all that is best, fine and elegant in the Purāṇas, I mean the Purāṇic Verse and Psalms. I have divided the whole sphere of Purāṇic anthology into four categories: Subhāṣitas, Pure Poetry, Stotras ( Psalms ), and Devotional Literature. The Purāṇic authors have so wonderfully made a direct appeal to the human mind of all ages and climes, that the readers irrespective of their caste, creed, sex or community shall find them all of absorbing interest.

We are extremely grateful to His Excellency Shri. R. R. Diwakar, Governor of Bihar, for having kindly given us permission to dedicate this humble work to him on the occasion of his Sixtieth Birthday Celebrations. We are equally grateful to Hon'ble Shri. B. N. Datar, Deputy Minister for Home Affairs, New Delhi, for having kindly contributed a Foreword for this work. Both these *Savants* possess a rare combination of eminent sacrifice, statesmanship and scholarship.

I am extremely thankful to Captain Dr. R. C. Shrikhande, M. B., B. S., for his constant encouragement and the excellent block of Rādhā on the Frontispiece; to my Research Assistants Shrimati Shantabai G. Ghanekar, Shri. Nanacharya Pangri, Shri. Venkannacharya Valvekar, and Shri. Ramacharya Joshi, for rendering valuable services during the preparation and publication of the work; to Master Jagadish Karmarkar for the correction of proofs; and to Shri. V. S. Deshpande for the excellent printing and get-up of the Volume.

I cannot forget the unique services rendered by Miss Mīrā and Sunandā, and their mother Mrs. Sushilābāi in offering cups of tea— always followed by pleasant smiles, even without the author's asking for the same. The Purāṇic writings possess their own peculiarities of grammar and composition. We have retained them as they are.

*Purāṇic Research Institute,*
Thalakwadi, BELGAUM.
7th April, 1955.

**A. P. Karmarkar,**
*Director.*

# CONTENTS ( विषयानुक्रमणिका )


विषयाः — पृष्ठम्

Foreword—By Hon'ble Shri. B. N. Datar, M. A., LL. B.
Union Deputy Minister for Home Affairs. ... v

Preface ... ... ... ... vi

Contents ... ... ... ... ix–xi

## प्रथमो भागः ।

### व्यवहारचातुर्ययोगः ।

१ शौनकीयनीतिसारः १
२ बृहस्पतिनीतिसारः ९
३ सर्वमान्यनीतिवचनानि ३५
४ संसारः ४२
५ पुत्रः ४३
६ स्त्री ४५
५ (अ) माता ५४
६ (ब) विद्या-विद्यार्थी ५५
७ आत्मदोषाः ५६
काम: ५६
कृपणः ५६
क्रोधः ५७
चिन्ता ५८
नीच—स्वभावः—जनः ५९
मद-मानौ ६२
मोहः ६३
मत्सरः ६३
लोभ-आशा ६३
८ सुख-दुःखम् ६६
९ दैव-कर्म ६९
१० धन-दारिद्र्यम् ७३
११ कालमहिमा ७८
१२ मित्र-शत्रुः ७९
१३ आत्मगुणाः
आत्मा ७९
उद्यमः ८०
धर्मपालनम् ८०
भावशुद्धिः ८१
सत्यपालनम् ८२
साधुवृत्तिः ८३
१४ गृहेऽपि मोक्षः ! ९३
१५ मानवजीवनम् ९४
१६ इतस्ततः ९५

## द्वितीयो भागः ।

### काव्ययोगः ।

१ आधिपत्याभिषेचनम् ९७
२ महारासवर्णनम् ९८
३ राधाकृष्णलीला ११२
४ सावित्र्युपाख्याने
वनदर्शनम् ११७
५ त्रिपुरवर्णनम् १२०
६ त्रिपुरदहनम् १२४
७ सुरनदीवर्णनम् १२६
८ शरद्वर्णनम् १२८
९ पुष्करवर्णनम् १३०
१० वाराणसीस्थित-
उद्यानवर्णनम् १३२
११ रणवर्णनम् १३४
१२ भ्रमरगीतम् १३५
१३ अशोकसुन्दरीवर्णनम् १३७
१४ स्त्रीप्रभावः १४०
१५ मदनवर्णनम् १४०

१६ मोहिनीवर्णनम् १४१
१७ पूर्वचित्तिवर्णगम् १४३
१८ वेणुगीतम् १४४
१९ युग्मगीतम् १४५
२० ताण्डवनृत्यम् १४७
२१ दक्षिणापथवर्णनम् १५१

तृतीयो भागः ।

स्तोत्रयोगः ।

१ परमेश्वरस्तवनम् १५२
२ वैराजस्तोत्रम् १५२
३ विभुस्तोत्रम १५४
४ नारायणस्तोत्रम् (ब्रह्मपारः) १५५
५ नारायणस्तोत्रम् १५६
६ यज्ञनारायणस्तोत्रम् १५६
७ ब्रह्मध्यानम् १५७
८ ब्रह्मस्तोत्रम् १५८
९ ब्रह्मस्तोत्रम् १५९
१० विष्णुकवचम् १६०
११ विष्णुध्यानम् १६२
१२ विष्णुस्तवनम् १६४
१३ विष्णुस्तवनम् १६४
१४ विष्णुस्तवनम् १६५
१५ आदिदेवस्तोत्रम् १६६
१६ पुरुषोत्तमस्तोत्रम् १६७
१७ श्रीपतिस्तवनम् १६७
१८ वासुदेवस्तोत्रम् १६८
१९ ,, (पूजाकाले) १६९
२० गोविन्दस्तवनम् १७०
२१ अष्टावक्रकृतगोविन्द-स्तवनम् १७१
२२ मत्स्यावतारस्तोत्रम् १७२
२३ वराहस्तवनम् १७३
२४ श्रीवामनस्तवः १७५
२५ चित्रकूटस्थित-रामस्तवनम् १७६
२६ श्रीरामचन्द्राष्टोत्तर-शतनामावलिः १७७
२७ श्रीकृष्णनामाष्टोत्तर-शतस्तोत्रम् १७८
२८ दशावतारस्तोत्रम् १८०
२९ गजेन्द्रमोक्षणे विष्णुस्तवः १८१
३० पापप्रशमनस्तवः १८३
३१ विष्णुसहस्रनामस्तोत्रम् १८५
३२ रुद्रस्तवः १९३
३३ शिवस्तवः १९५
३४ शङ्करस्तोत्रम् १९६
३५ शिवस्तोत्रम १९७
३६ सोमेश्वरस्तोत्रम् १९८
३७ उमाधवस्तोत्रम् १९९
३८ रतिकृतशिवस्तवः २००
३९ सोमनाथस्तोत्रम् २०१
३८ (अ) मृत्युञ्जयस्तोत्रम् २०२
३९ (अ) अष्टमूर्त्यष्टकम् २०४
४० शिवशक्तिस्तवः (पूजाकाले) २०५
४१ शिवस्तोत्रम् २०६
४२ विश्वानरकृत—महेश-स्तोत्रम् २०७
४३ द्वादशज्योतिर्लिङ्गानि २०८
४४ शिवलिङ्गस्तवनम् २०८
४५ महेश्वरकवचम् २०९
४६ शिवसहस्रनामस्तोत्रम् २०९
४७ भैरवस्तवनम् २१५
४८ कालभैरवाष्टकम् २१६
४९ अपराजितास्तवनम् २१७
५० अम्बिकास्तोत्रम् २१९

५१ कात्यायनीस्तोत्रम् २२०
५२ कामाक्षीस्तोत्रम्-ललिता २२३
५३ काली-शिवदूती-स्तवनम् २२५
५४ गङ्गास्तवनम् २२५
५५ चण्डिकास्तोत्रम् २२६
५६ गायत्रीस्तवः २२८
५७ तुलसीस्तवः २२९
५८ त्रिपुरसुन्दरीस्तोत्रम् २२९
५९ दुर्गास्तुतिः (वज्रपञ्जर-संज्ञिका) २३०
६० नवदुर्गास्तवः २३१
६१ पार्वतीस्तवनम् २३२
६२ भद्रकालीस्तोत्रम् २३३
६३ मङ्गलाष्टकम् (मङ्गलागौर्याः) २३४
६४ यमुनागङ्गास्तवः २३५
६५ राधास्तोत्रम् २३६
६६ अगस्त्यकृत-कोल्हापुरस्था-महालक्ष्मी-स्तवनम् २३८
६७ सरस्वतीस्तवनम २३८
६८ सावित्रीस्तवः २३९
६९ देवीसहस्रनामस्तोत्रम् २३९
७० अगस्त्यकृत-स्कन्दस्तवः २४६
७१ स्कन्दस्तोत्रम् २४७
७२ स्कन्दकुमारस्तवः २४८
७३ मार्कण्डेयकृतस्कन्दस्तवः २४९
७४ गणेशस्तोत्रम् २५०
७५ गणेशाष्टकम् २५१
७६ गणेशकवचम् २५२
७७ नन्दीस्तोत्रम २५३
७८ षष्टिक्षेत्रपालस्तवः २५४
७९ वीरभद्रवर्णनम् २५५
८० सूर्यस्तोत्रम् २५६
८१ रविस्तवः २५८
८२ सूर्यस्तवनम् २५९
८३ श्रीसूर्याष्टोत्तरशत-नामस्तोत्रम् २६०
८४ श्रीचन्द्राष्टोत्तरशत-नामस्तोत्रम् २६१
८५ शनिस्तवः २६२
८६ दत्तात्रेयस्तोत्रम २६३
८७ हनुमत्-स्तवः २६४
८८ शान्तिकृत-अग्नि-स्तोत्रम् २६५
८९ कल्किस्तोत्रम् २६६
९० व्यासस्तोत्रम् २६७

## चतुर्थो भागः ।

### परमार्थयोगः ।

१ परमेशस्थानवर्णनम् २६८
२ सगुण-निर्गुण-भक्तियोगः २६८
,, योगीन्द्रहरिस्तवः २७०
,, कृष्णकृतविवेचनम् ,,
३ योगसाधनम् (शिव) २७२
४ स्वर्गद्वाराणि २७५
५ मदालसासन्देशः — अलर्कं प्रति २७६
६ ,, –पुत्रान्प्रति २७६
७ वासुदेवमाहात्म्यम् २७७
८ विष्णुभक्तवर्णनम् २७८
९ फलश्रुतिः २७९

### परिशिष्टानि ।

अ अवशिष्टसुभाषितानि २८१
ब ललितासहस्रनामस्तोत्रम् २८४
क राधाकृष्णसहस्रनाम-स्तोत्रम् २९०
ड गङ्गासहस्रनामस्तोत्रम् २९७-३०४

# शुद्धिपत्रम्

| पृ. सं. | अशुद्ध | शुद्ध |
|---|---|---|
| १५—२ | स्वस्छन्दा | स्वच्छन्दा |
| २७—२२ | पुरुषं | परुषं |
| ३०—२७ | अथन | अर्थेन |
| ४०—१८ | सर्वान्यश्चतान् | सर्वान्यश्चैतान् |
| ४०—२६ | न हि प्रतीक्ष्यते | न हि प्रतीक्षते |
| ५३—४ | संशुध्दी रजसां | संशुद्धी रजसा |
| ६३—८ | तस्मादर्थमनर्थक्यं | तस्मादर्थमनर्थैक्यं |
| ६४—२२ | विद्वान्न... | विद्वान्न चेत्कान्त मूखार्णीं |
| ७३—२५ | दानान्नधनेन | दानान्न धनेन |
| ७८—४ | पपानां | पापानां |
| ७९—१७ | हितायैव | हितायैव स |
| १०५—२५ | न्तिगुण | गुणन्ति |
| १५२—१८ | विश्वात्रिहराय | विश्वार्तिहराय |
| ,, २४ | विशुद्धमण्डलं | निरुद्धमण्डलं |
| १५३—३ | क्रचिद्रू... | क्वचिद्रू... |
| १५९—१९ | व्यक्तंदेवा | व्यक्तं देवा |
| १६८—१८ | निर्गृणं | निर्गुणं |
| १८२—१८ | युगान्तशषं | युगान्तशेषं |
| २०४—९ | लोयत्रयस्य | लोकत्रयस्य |
| २०६—२८ | लोककत्रे | लोककर्त्रे |
| २७९—१६ | भक्त्यनन्ते... | भवत्यनन्ते.... |
| २८२—२२ | बालहीना | बलहीना |
| २८३—११ | यत्राश्री.... | यत्र श्री.... |

Owing to lack of types in a Reformist Poona Foundry we had to use the following: अन्ह, चिन्ह, वन्हि, आल्हाद, प्रल्हाद, जिव्हा, न्ही, instead of अह्न, चिह्न, वह्नि, आह्लाद, प्रह्लाद, जिह्वा and ह्नी.

## प्रथमो भागः ।

# व्यवहारचातुर्ययोगः ।

## १. शौनकीयनीतिसारः

[ शौनकीयनीतिशास्त्रके बारेमें प्राचीन भारतीय वाङमयमें बहुत कहा जाता है । लेकिन खुद इस विषयपर तो अभीतक कोई ग्रन्थ उपलब्ध नही है । गरुड पुराणमें शौनकीय नीतिसार है । उसमें तो राजनीतिका कोई भी संबन्ध नही मिलता है । केवल नीतिवचनों का संग्रह है । यह तो शायद दसवी या ग्यारहवी शताब्दीका होगा । ]

धर्मः प्रव्रजितस्तपः प्रचलितं सत्यं च दूरं गतं
पृथ्वी वन्ध्यफला जनाः कपटिनो लौल्ये स्थिता ब्राह्मणाः ॥
मर्त्याः स्त्रीवशगाः स्त्रियश्च चपला नीचा जना उन्नताः
हा कष्टं खलु जीवितं कलियुगे धन्या जना ये मृताः ॥१॥
धन्यास्ते ये न पश्यन्ति देशभङ्गं कुलक्षयम् ॥
परचित्तगतान्दारान्पुत्रं कुव्यसने स्थितम् ॥२॥
कुभार्यां च कुमित्रं च कुराजानं कुपुत्रकम् ॥
कुकन्यां च कुदेशं च दूरतः परिवर्जयेत् ॥३॥
कुपुत्रे निर्वृतिर्नास्ति कुभार्यायां कुतो रतिः ॥
कुमित्रे नास्ति विश्वासः कुराज्ये नास्ति जीवितम् ॥४॥
परान्नं च परस्वं च परशय्याः परस्त्रियः ॥
परवेश्मनि वासश्च शक्रादपि हरेच्छ्रियम ॥५॥
आलापाद्गात्रसंस्पर्शात्संसर्गात्सहभोजनात् ॥
आसनाच्छयनाद्यानात्पापं संक्रमते नृणाम् ॥६॥
स्त्रियो नश्यन्ति रूपेण तपः क्रोधेन नश्यति ॥
गावो दूरप्रचारेण शूद्रान्नेन द्विजोत्तमः ॥७॥
आसनादेकशय्यायां भोजनात्पंक्तिसङ्करात् ॥
ततः संक्रमते पापं घटाद्घट इवोदकम् ॥८॥

लालने बहवो दोषास्ताडने बहवो गुणाः ॥
तस्माच्छिष्यं च पुत्रं च ताडयेन्न तु लालयेत् ॥९॥

अध्वा जरा देहवतां पर्वतानां जलं जरा ॥
असंभोगश्च नारीणां वस्त्राणामातपो जरा ॥१०॥

अधमाः कलिमिच्छन्ति सन्धिमिच्छन्ति मध्यमाः ॥
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥११॥

मानो हि मूलमर्थस्य माने सति धनेन किम् ॥
प्रभ्रष्टमानदर्पस्य किं धनेन किमायुषा ॥१२॥

अधमा धनमिच्छन्ति धनमानौ हि मध्यमाः ॥
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥१३॥

वनेऽपि सिंहा न नमन्ति कर्णं
बुभुक्षिता नांशनिरीक्षणं च ॥
धनैर्विहीनाः सुकुलेषु जाता
न नीचकर्माणि समारभन्ते ॥१४॥

नाभिषेको न संस्कारः सिंहस्य क्रियते वने ॥
नित्यमूर्जितसत्त्वस्य स्वयमेव मृगेन्द्रता ॥१५॥

वणिक्प्रमादी भृतकश्च मानी
भिक्षुर्विलासी ह्यधनश्च कामी ॥
वराङ्गना चाप्रियवादिनी च
न ते च कर्माणि समारभन्ते ॥१६॥

दाता दरिद्रः कृपणोऽर्थयुक्तः
पुत्रोऽविधेयः कुजनस्य सेवा ॥
परोपकारेषु नरस्य मृत्युः
प्रजायते दुश्चरितानि पञ्च ॥१७॥

कान्तावियोगः स्वजनापमानं
ऋणस्य शेषः कुजनस्य सेवा ॥
दारिद्र्यभावाद्विमुखाश्च मित्रा
विनाग्निना पञ्च दहन्ति तीव्राः ॥१८॥

चिन्तासहस्रेषु च तेषु मध्ये
चिन्ताश्चतस्रोऽप्यसिधारतुल्याः ॥
नीचापमानं क्षुधितं कलत्रं
भार्या विरक्ता सहजोपरोधः ॥१९॥
वश्यश्च पुत्रोऽर्थकरी च विद्या
अरोगिता सज्जनसङ्गतिश्च ॥
इष्टा च भार्या वशवर्त्तिनी च
दुःखस्य मूलोद्धरणानि पञ्च ॥२०॥
कुरङ्गमातङ्गपतङ्गभृङ्ग-
मीना हताः पञ्चभिरेव पञ्च ॥
एकः प्रमाथी स कथं न घात्यो
यः सेवते पञ्चभिरेव पञ्च ॥२१॥

अधीरः कर्कशः स्तब्धः कुचेलः स्वयमागतः ॥
पञ्च विप्रा न पूज्यन्ते बृहस्पतिसमा ह्यपि ॥२२॥
आयः कर्म च वित्तं च विद्या निधनमेव च ॥
पञ्चैतानि विविच्यन्ते जायमानस्य देहिनः ॥२३॥
पर्वतारोहणे तोये गोकुले दुष्टनिग्रहे ॥
पतितस्य समुत्थाने शस्ताः पञ्च[१] गुणाः स्मृताः ॥२४॥
अभ्रच्छाया खले प्रीतिः परनारीषु सङ्गतिः ॥
पञ्चैते ह्यस्थिरा भावा यौवनानि धनानि च ॥२५॥
अस्थिरं जीवितं लोके अस्थिरं धनयौवनम् ॥
अस्थिरं पुत्रदाराद्यं धर्मः कीर्त्तिर्यशः स्थिरम् ॥२६॥
शतं जीवितमत्यल्पं रात्रिस्तस्यार्द्धहारिणी ॥
व्याधिशोकजरायासैरर्द्धं तदपि निष्फलम् ॥२७॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं हृतं
तस्यार्द्धस्थितकिञ्चिदर्द्धमधिकं बाल्यस्य काले गतम् ॥
किञ्चिद्बन्धुवियोगदुःखमरणं भूपालसेवागतं
शेषं वारितरङ्गगर्भचपलं मानेन किं मानिनाम् ॥२८॥

१. 'ह्येते' इ. पा.

अहोरात्रमयो लोके जरारूपेण सञ्चरेत् ॥
मृत्युर्ग्रसति भूतानि पवनं पन्नगो यथा ॥२९॥
गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतो न चेत् ॥
सर्वसत्त्वहितार्थाय पशोरिव विचेष्टितम् ॥३०॥

अहितहितविचारशून्यबुद्धेः
श्रुतिसमये बहुभिर्वितर्कितस्य ॥
उदरभरणमात्रतुष्टबुद्धेः
पुरुषपशोः पशोश्च को विशेषः ॥३१॥

शौर्ये तपसि दाने च यस्य न प्रथितं यशः ॥
विद्यायामर्थलाभे वा मातुरुच्चार एव सः ॥३२॥

यज्जीव्यते[१] क्षणमपि प्रथितं मनुष्यै-
र्विज्ञानविक्रमयशोभिरभग्नमानैः ॥
तन्नाम जीवितमिति प्रवदन्ति तज्ज्ञाः
काकोऽपि जीवति चिरं च बलिं च भुङ्क्ते ॥३३॥

किं जीवितेन धनमानविवर्जितेन
मित्रेण किं भवति भीतिसशंकितेन ॥
सिंहव्रतं चरत गच्छत मा विषादं
काकोऽपि जीवति चिरं च बलिं च भुङ्क्ते ॥३४॥

यो वात्मनीह न गुरौ न च भृत्यवर्गे
दीने दयां न कुरुते न च मित्रकार्ये ॥
किं तस्य सेवितफलेन मनुष्यलोके
काकोऽपि जीवति चिरं च बलिं च भुङ्क्ते ॥३५॥

यस्य त्रिवर्गशून्यानि दिनान्यायान्ति यान्ति च ॥
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥३६॥
स्वाधीनवृत्तेः साफल्यं न पराधीनवर्तिता ॥
ये पराधीनकर्माणो जीवन्तोऽपि च ते मृताः ॥३७॥

---

१. 'सञ्जीव्यते' इ. पा.

सु(स्व)पूरा वै कापुरुषाः सु(स्व)पुरो मूषिकाञ्जलिः ॥
असन्तुष्टः कापुरुषः स्वल्पकेनापि तुष्यति ॥३८॥
अभ्रच्छाया तृणादग्निर्नीचसेवा पथो जलम् ॥
वेश्याराग: खले प्रीतिः षडेते बुद्बुदोपमाः ॥३९॥
वाचा विहितसार्थेन लोको न च सुखायते ॥
जीवितं मानमूलं हि माने म्लाने कुतः सुखम् ॥४०॥
अबलस्य बलं राजा बालस्य रुदितं बलम् ॥
बलं मूर्खस्य मौनत्वं तस्करस्यानृतं बलम् ॥४१॥
यथा यथा हि पुरुषः शास्त्रं समधिगच्छति ॥
तथा तथास्य मेधा स्याद्विज्ञानं चास्य रोचते ॥४२॥
यथा यथा हि पुरुषः कल्याणे कुरुते मतिम् ॥
तथा तथा हि सर्वत्र श्लिष्यते लोकसुप्रियः ॥४३॥
लोभप्रमादविश्वासैः पुरुषो नश्यति त्रिभिः ॥
तस्माल्लोभो न कर्त्तव्यः प्रमादो नो न विश्वसेत् ॥४४॥
तावद्भयस्य भेत्तव्यं यावद्भयमनागतम् ॥
उत्पन्ने तु भये तीव्रे स्थातव्यं वै ह्यभीतवत् ॥४५॥
ऋणशेषं चाग्निशेषं व्याधिशेष तथैव च ॥
पुनः पुनः प्रवर्द्धन्ते तस्माच्छेष न कारयेत् ॥४६॥
कृते प्रतिकृतं कुर्याद्धिंसिते प्रतिहिंसितम् ॥
न तत्र दोषं पश्यामि दुष्टे दोषं समाचरेत् ॥४७॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ॥
वर्जयेत्तादृशं मित्रं मायामयमरिं तथा ॥४८॥
दुर्जनस्य हि सङ्गेन सुजनोऽपि विनश्यति ॥
प्रसन्नमपि पानीय कर्दमैः कलुषीकृतम् ॥४९॥
स भुङ्क्ते सद्द्विजो भुङ्क्ते समशेषनिरूपणम् ॥
तस्मात्सर्वप्रयत्नेन द्विजः पूज्यः प्रयत्नतः ॥५०॥
तद्भुज्यते यद्द्विजभुक्तशेषं
स बुद्धिमान्यो न करोति पापम् ॥

तत्सौहृदं यत्क्रियते परोक्षे
दम्भैर्विना यः क्रियते स धर्मः ॥५१॥
न सा सभा यत्र न सन्ति वृद्धाः
वृद्धा न ते येन वदन्ति धर्मम् ॥
धर्मः स नो यत्र न सत्यमस्ति
नैतत्सत्यं यच्छलेनानुविद्धम् ॥५२॥
ब्राह्मणोऽपि मनुष्याणामादित्यश्चैव तेजसाम् ॥
शिरोऽपि सर्वगात्राणां व्रतानां सत्यमुत्तमम् ॥५३॥
तन्मङ्गलं यत्र मनः प्रसन्नं
तज्जीवनं यन्न परस्य सेवा ॥
तदार्जितं यत्स्वजनेन भुक्तं
तदूर्जितं यत्समरे रिपूणाम् ॥५४॥
सा स्त्री या न मदं कुर्यात्स सुखी तृष्णयोज्झितः ॥
तन्मित्रं यत्र विश्वासः पुरुषः स जितेन्द्रियः ॥५५॥
तत्र मुक्तादरस्नेहो विलुप्तं यत्र सौहृदम् ॥
तदेव केवलं श्लाघ्यं यस्यात्मा क्रियते स्तुतौ ॥५६॥
नदीनामग्निहोत्राणां भारतस्य कुलस्य च ॥
मूलान्वेषो न कर्तव्यो मूलाद्दोषो न हीयते ॥५७॥
लवणजलान्ता नद्यः स्त्रीभेदान्तं च मैथुनम् ॥
पैशुन्यं जनवार्त्तान्तं वित्तं दुःखत्रयान्तकम ॥५८॥
राज्यश्रीर्ब्रह्मशापान्ता पापान्तं ब्रह्मवर्चसम् ॥
आचारं घोषवासान्तं कुलस्यान्तं स्त्रियः प्रभो[१] ॥५९॥
सर्वे क्षयान्ता निलयाः पतनान्ताः समुच्छ्रयाः ॥
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम् ॥६०॥
यदीच्छेत्पुनरागन्तुं नातिदूरमनुव्रजेत् ॥
उदकान्तान्निवर्त्तेत स्निग्धवर्णाच्च पादपात् ॥६१॥
अनायके न वस्तव्यं न चैव बहुनायके ॥
स्त्रीनायके न वस्तव्यं न तथा[२] बालनायके ॥६२॥

---

१. 'भुः' इ.अ.पा. २. "वस्तव्यं" इ. पा.

पिता रक्षति कौमारे भर्ता रक्षति यौवने ॥
पुत्रस्तु स्थविरे काले न स्त्री स्वातन्त्र्यमर्हति ॥६३॥
त्यजेद्वन्ध्यामष्टमेऽब्दे नवमे तु मृतप्रजाम् ॥
एकादशे स्त्रीजननीं सद्यश्चाप्रियवादिनीम् ॥६४॥
अनर्थित्वान्मनुष्याणां भिया परिजनस्य च ॥
अर्थादपेतमर्यादास्त्रयस्तिष्ठन्ति भर्तृषु ॥६५॥
अश्वं श्रान्तं गजं मत्तं गावः प्रथमसूतिकाः ॥
अनूदके च मण्डूकान्प्राज्ञो दूरेण वर्जयेत् ॥६६॥

अर्थातुराणां न सुहृन्न बन्धुः
कामातुराणां न भयं न लज्जा ॥
चिन्तातुराणां न सुखं न निद्रा
क्षुधातुराणां न बलं न तेजः ॥६७॥

कुतो निद्रा दरिद्रस्य परप्रेष्यवरस्य च ॥
परनारीप्रसक्तस्य परद्रव्यहरस्य च ॥६८॥
सुखं स्वपित्यनृणवान्व्याधिमुक्तश्च यो नरः ॥
सावकाशस्तु वं भुङ्क्ते यस्तु दारैर्न सङ्गतः[१] ॥६९॥
अम्भसः परिमाणेन उन्नतं कमलं भवेत् ॥
स्वस्वामिना बलवता भृत्यो भवति गर्वितः ॥७०॥
स्थानस्थितस्य पद्मस्य मित्रे वरुणभास्करौ ॥
स्थानच्युतस्य तस्यैव क्लेदशोषणकारकौ ॥७१॥
ये पदस्थस्य मित्राणि ते तस्य रिपुतां गताः ॥
भानोः पद्मे जले प्रीतिः स्थलोद्धरणशोषणः ॥७२॥
स्थानस्थितानि पूज्यन्ते पूज्यन्ते च पदे स्थिताः ॥
स्थानभ्रष्टा न पूज्यन्ते केशा दन्ता नखा नराः ॥७३॥
आचारः कुलमाख्याति देशमाख्याति भाषितम् ॥
सम्भ्रमः स्नेहमाख्याति वपुराख्याति भोजनम् ॥७४॥

१. 'नं शङ्कितः' इ.पा.

वृथा वृष्टिः समुद्रस्य वृथा तृप्तस्य भोजनम् ।।
वृथा दानं समृद्धस्य नीचस्य सुकृतं वृथा ।।७५।।
दूरस्थोऽपि समीपस्थो यो यस्य हृदये स्थितः ।।
हृदयादपि निष्क्रान्तः समीपस्थोऽपि दूरतः ।।७६।।
मुखभङ्गः स्वरो दीनो गात्रस्वेदो महद्भयम् ।।
मरणे यानि चिह्नानि तानि चिह्नानि याचके ।।७७।।
कुब्जस्य कीटघातस्य वाताग्निष्कासितस्य च ।।
शिखरे वसतस्तस्य वरं जन्म न याचितम् ।।७८।।
जगत्पतिर्हि याचित्वा विष्णुर्वामनतां गतः ।।
कोऽन्योऽधिकतरस्तस्य योऽर्थी याति न लाघवम् ।।७९।।
माता शत्रुः पिता वैरी बाला येन न पाठिताः ।।
सभामध्ये न शोभन्ते हंसमध्ये बका यथा ।।८०।।

विद्या नाम कुरूपरूपमधिकं[1] विद्यातिगुप्तं धनं[2]
विद्या साधुकरी जनप्रियकरी विद्या गुरूणां गुरुः[3] ।।
विद्या बन्धुजनार्त्तिनाशनकरी विद्या परं दैवतम्[4]
विद्या राजसु पूजिता हि मनुजो विद्याविहीनः पशुः ।।८१।।

गृहे चाभ्यन्तरे द्रव्यं लग्नं चैव तु दृश्यते ।।
अशेषं हरणीयं च विद्या न ह्रियते परैः ।।८२।।
शौनकीयं नीतिसारं विष्णुः सर्वव्रतानि च ।।
कथयामास वै पूर्वं तत्र शुश्राव शङ्करः ।।
शङ्करादश्रृणोद्व्यासो व्यासादस्माभिरेव च ।।८३।।

इति श्रीगारुडे महापुराणे पूर्वखण्डे प्रथमांशाख्ये आचारकाण्डे शौनकीयनीतिसारादिवर्णनं नाम पंचदशोत्तरशततमोऽध्यायः ।।११५।।

---

१. 'नरस्य' इ. पा.
२. 'प्रच्छन्नगुप्तं धनं' इ.पा.
३. 'भोगकरी यशःसुखकरी' इ. पा.
४. 'बन्धुजनो विदेशगमने' इ. पा.

# २. बृहस्पतिनीतिसारः

[ बृहस्पतिके अर्थशास्त्र अथवा नीतिसारविषयक ग्रंथका उल्लेख महाभारत, कौटिलीय अर्थशास्त्र, प्रतिमानाटक, बुद्धचरित, कामशास्त्र और सोमदेवका यशस्तिलक आदि ग्रंथोंमें किया गया है। तथैव एफ्. डब्ल्यु. थॉमस जिन्होंने बार्हस्पत्यसूत्रनामक ग्रंथ प्रकाशित किया है।

गरुड पुराणमें कथित बृहस्पतिनीतिसारमें अध्याय १११–११३ में राजनीतिविषयक किंचित विवेचन किया गया है। किन्तु अन्य अध्यायोंमें नीतिवचन ग्रथित किया है। तथैव भर्तृहरिनीतिशतकमेंसे ९० और १२७ श्लोकभी जिसमे उद्धृत किया है। संदर्भसे यह मालूम होता है कि यह नीतिसार ग्यारह अथवा बारह शताद्वीमें (A. D.) संस्कारीत किया होगा। ]

## अथ अष्टोत्तरशततमोऽध्यायः (१०८).

नीतिसारं प्रवक्ष्यामि अर्थशास्त्रादिसंश्रितम् ॥
राजादिभ्यो हितं पुण्यमायुः स्वर्गादिदायकम् ॥ १ ॥
सद्भिः सङ्गं प्रकुर्वीत सिद्धिकामः सदा नरः ॥
नासद्भिरिहलोकाय परलोकाय वा हितम् ॥ २ ॥
वर्जयेत्क्षुद्रसंवादं सुदुष्टस्य[1] च दर्शनम् ॥
विरोधं सह मित्रेण संप्रीतिं शत्रुसेविना ॥ ३ ॥
मूर्खशिष्योपदेशेन दुष्टस्त्रीभरणेन च ॥
दुष्टानां संप्रयोगेण पंडितोऽप्यवसीदति ॥ ४ ॥
ब्राह्मणं बालिशं क्षत्त्रमयोद्धारं विशं जडम् ॥
शूद्रमक्षरसंयुक्तं दूरतः परिवर्जयेत् ॥ ५ ॥
कालेन रिपुणा संधिः काले मित्रेण विग्रहः ॥
कार्य्यकारणमाश्रित्य कालं क्षिपति पण्डितः ॥ ६ ॥
कालः पचति भूतानि कालः संहरते प्रजाः ॥
कालः सुप्तेषु जागर्त्ति कालो हि दुरतिक्रमः ॥ ७ ॥

---

१. 'संवादमदुष्टस्य' इ. पा.

कालेषु हरते वीर्य्यं काले गर्भे च वर्तते ॥
कालो जनयते सृष्टिं पुनः कालोऽपि संहरेत् ॥ ८ ॥
कालः सूक्ष्मगतिर्नित्यं द्विविधश्चेह भाव्यते ॥
स्थूलसङ्ग्रहचारेण सूक्ष्मचारान्तरेण च ॥ ९ ॥
नीतिसारं सुरेन्द्राय इममूचे बृहस्पतिः ॥
सर्वज्ञो येन चेन्द्रोऽभूद्दैत्यान्हत्वाप्नुयाद्दिवम् ॥ १० ॥
राजर्षिब्राह्मणैः कार्यं देवविप्रादिपूजनम् ॥
अश्वमेधेन यष्टव्यं महापातकनाशनम् ॥ ११ ॥
उत्तमैः सह साङ्गत्यं पण्डितैः सह सत्कथाम् ॥
अलुब्धैः सह मित्रत्वं कुर्वाणो नावसीदति ॥ १२ ॥
परीवादं परार्थं च परिहासं परस्त्रियम् ॥
परवेश्मनि वासं च न कुर्वीत कदाचन ॥ १३ ॥
परोऽपि हितवान्बन्धुः बन्धुरप्यहितः परः ॥
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥ १४ ॥
स बन्धुर्यो हिते युक्तः स पिता यस्तु पोषकः ॥
तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ॥ १५ ॥
स भृत्यो यो विधेयस्तु तद्बीजं यत्प्ररोहति ॥
सा भार्या या प्रियं ब्रूते स पुत्रो यस्तु जीवति ॥ १६ ॥
स जीवति गुणा यस्य धर्मो यस्य स जीवति ॥
गुणधर्मविहीनो यो निष्फलं तस्य जीवनम् ॥ १७ ॥
सा भार्या या गृहे दक्षा सा भार्या या प्रियंवदा ॥
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥ १८ ॥
नित्यस्नाता सुगन्धा च नित्यं च प्रियवादिनी ॥
अल्पभुक्ताल्पभाषी च सततं मङ्गलैर्युता ॥ १९ ॥
सततं धर्मबहुला सततं च पतिप्रिया ॥
सततं प्रियवक्त्री च सततं त्वृतुकामिनी ॥ २० ॥
एतद्वादिक्रियायुक्ता सर्वसौभाग्यवर्द्धिनी ॥
यस्येदृशी भवेद्भार्या स देवेन्द्रो न मानुषः ॥ २१ ॥

यस्य भार्या विरूपाक्षी कश्मला कलहप्रिया ॥
उत्तरोत्तरवादा स्यात्सा जरा न जरा जरा ॥ २२ ॥

यस्य भार्या श्रितान्यञ्च परवेश्माभिकांक्षिणी ॥
कुक्रिया त्यक्तलज्जा च सा जरा न जरा जरा ॥ २३ ॥

यस्य भार्या गुणज्ञा च भर्तारमनुगामिनी ॥
अल्पाल्पेन तु सन्तुष्टा सा प्रिया न प्रिया प्रिया ॥ २४ ॥

दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः ॥
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥ २५ ॥

त्यज दुर्जनसंसर्गं भज साधुसमागमम् ॥
कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम् ॥ २६ ॥

व्यालीकण्ठप्रदेशा ह्यपि च फणमभृद्भीषणा या च रौद्री
या कृष्णा व्याकुलाङ्गी रुधिरनयनसंव्याकुला व्याघ्रकल्पा ॥
क्रोधे यैवोग्रवक्त्रा स्फुरदनलशिखा काकजिह्वा कराला
सेव्या न स्त्री विदग्धा परपुरगमना भ्रान्तचित्ता विरक्ता ॥२७॥

सक्तिः सुतोके सुकृतं कृतघ्ने
शीतं च वह्नौ (सीतापहौ ह्यातपयेव ?) हुमे ॥
उत्पद्यते दैववशात्कदाचि-
द्वेश्यासु रागो न भवेत्कदाचित् ॥ २८ ॥

भुजङ्गमे वेश्मनि दृष्टिदृष्टे
व्याधौ चिकित्सा विनिवर्त्तिते च ॥
देहं च बाल्यादिवयोऽन्विते च
कालावृतोऽसौ लभते धृतिं कः ॥ २९ ॥

इति श्रीगारुडे महापुराणे पूर्वखण्डे प्रथमांशाख्ये आचारकाण्डे
बृहस्पतिप्रोक्तनीतिसारनिरूपणं नामाष्टोत्तरशततमोऽध्यायः ॥ १०८ ॥

## अथ नवोत्तरशततमोऽध्यायः (१०९).

आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि ॥
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ १ ॥

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ॥
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ २ ॥
वरं हि नरके वासो न तु दुश्चरिते गृहे ॥
नरकात्क्षीयते पापं कुगृहान्न निवर्त्तते ॥ ३ ॥
चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ॥
न परीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥ ४ ॥
त्यजेद्देशमसद्वृत्तं वासं सोपद्रवं त्यजेत् ॥
त्यजेत्कृपणराजानं मित्रं मायामयं त्यजेत् ॥ ५ ॥

अर्थेन किं कृपणहस्तगतेन केन
ज्ञानेन किं बहुशठाग्रहसङ्कुलेन ॥
रूपेण किं गुणपराक्रमवर्जितेन
मित्रेण किं व्यसनकालपराङ्मुखेन ॥ ६ ॥

अदृष्टपूर्वा बहवः सहायाः
सर्वे पदस्थस्य भवन्ति मित्राः ॥
अर्थैर्विहीनस्य पदच्युतस्य
भवत्यकाले स्वजनोऽपि शत्रुः ॥ ७ ॥

आपत्सु मित्रं जानीयाद्रणे शूरं रहः शुचिम् ॥
भार्यां च विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम् ॥ ८ ॥

वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसा
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टं नृपं मन्त्रिणः ॥
पुष्पं पर्य्युषितं त्यजन्ति मधुपाः दग्धं वनान्तं मृगाः
सर्वः कार्यवशाज्जनो हि रमते कस्यास्ति को वल्लभः ॥

लुब्धमर्थप्रदानेन श्लाघ्यमञ्जलिकर्मणा ॥
मूर्खं छन्दानुवृत्त्या च याथातथ्येन पण्डितम् ॥ १० ॥
सद्भावेन हि तुष्यन्ति देवाः सत्पुरुषा द्विजाः ॥
इतरे खाद्यपानेन मानदानेन पण्डिताः ॥ ११ ॥
उत्तमं प्रणिपातेन शठं भेदेन योजयेत् ॥
नीचं स्वल्पप्रदानेन समं तुल्यपराक्रमैः ॥ १२ ॥

यस्य यस्य हि यो भावस्तस्य तस्य हितं वदन् ॥
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥ १३ ॥
नदीनां च नखीनां च शृङ्गिणां शस्त्रपाणिनाम् ॥
विश्वासो नैव गन्तव्यः स्त्रीषु राजकुलेषु च ॥ १४ ॥
अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ॥
वञ्चनं चापमानं च मतिमान्न प्रकाशयेत् ॥ १५ ॥
हीनदुर्जनसंसर्ग अत्यन्तविरहादरः ॥
स्नेहोऽन्यगेहवासश्च नारीसच्छीलनाशनम् ॥ १६ ॥
कस्य दोषः कुले नास्ति व्याधिना को न पीडितः ॥
केन न व्यसनं प्राप्तं श्रियः कस्य निरन्तराः ॥ १७ ॥

कोऽर्थं प्राप्य न गर्वितो भुवि नरः कस्यापदो नागताः
स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः ॥
कः कालस्य न गोचरान्तरगतः कोऽर्थी गतो गौरवं
को वा दुर्जनवागुरा निपतितः क्षेमेण यातः पुमान् ॥ १८ ॥

सुहृत्स्वजनबन्धुर्न बुद्धिर्यस्य न चात्मनि ॥
यस्मिन्कर्मणि सिद्धेऽपि न दृश्येत फलोदयः ॥
विपत्तौ च महद्दुःखं तद्बुधः कथमाचरेत् ॥ १९ ॥
यस्मिन्देशे न संमानं न प्रीतिर्न च बान्धवाः ॥
न च विद्यागमः कश्चित्तं देशं परिवर्जयेत् ॥ २० ॥
धनस्य यस्य राजतो भयं च नास्ति चौरतः
मृतं च यन्न मुच्यते समर्जयस्व तद्धनम् ॥ २१ ॥
यदर्जितं प्राणहरैः परिश्रमैर्मृतस्य तं वै विभजन्ति रिक्थिनः ॥
कृतं च यद्दुष्कृतमर्थलिप्सया तदेव दोषोपहतस्य यौतुकम् ॥ २२ ॥
सञ्चितं निहितं द्रव्यं परामृश्यं मुहुर्मुहुः ॥
आखोरिव कदर्य्यस्य धनं दुःखाय केवलम् ॥ २३ ॥
नग्ना व्यसनिनो रूक्षाः कपालाङ्कितपाणयः ॥
दर्शयन्तीह लोकस्य अदातुः फलमीदृशम् ॥ २४ ॥
शिक्षयन्ति च याचन्ते देहीति कृपणा जनाः ॥
अवस्थेयमदानस्य मा भूदेवं भवानपि ॥ २५ ॥

सञ्चितं क्रतुशतैर्न युज्यते
याचितं गुणवते न दीयते ।।
तत्कदर्यपरिरक्षितं धनं
चोरपार्थिवगृहे प्रयुज्यते ।। २६ ।।
न देवेभ्यो न विप्रेभ्यो बन्धुभ्यो नैव चात्मने ।।
कदर्यस्य धनं याति त्वग्नितस्कररराजसु ।। २७ ।।
अतिक्लेशेन येऽप्यर्था धर्मस्यातिक्रमेण च ।।
अरेर्वा प्रणिपातेन मा भूवस्ते कदाचन ।। २८ ।।
विद्याघातो ह्यनभ्यासः स्त्रीणां घातः कुचैलता ।।
व्याधीनां भोजनं जीर्णं शत्रोर्घातः प्रपञ्चता ।। २९ ।।
तस्करस्य वधो दण्डः कुमित्रस्याल्पभाषणम् ।।
पृथक्शय्या तु नारीणां ब्राह्मणस्यानिमन्त्रणम् ।। ३० ।।
दुर्जनाः शिल्पिनो दासा दुष्टाश्च पटहाः स्त्रियः ।।
ताडिता मार्दवं यान्ति न ते सत्कारभाजनम् ।। ३१ ।।
जानीयात्प्रेषणे भृत्यान्बान्धवान्व्यसनागमे ।।
मित्रमापदि काले च भार्याञ्च विभवक्षये ।। ३२ ।।
स्त्रीणां द्विगुण आहारः प्रज्ञा चैव चतुर्गुणा ।।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ।। ३३ ।।
न स्वप्नेन जयेन्निद्रां न कामेन स्त्रियं जयेत् ।।
न चेन्धनैर्जयेद्वह्निं न मद्येन तृषां जयेत् ।। ३४ ।।
समांसैर्भोजनैः स्निग्धैर्मद्यैर्गन्धविलेपनैः[1] ।।
वस्त्रैर्मनोरमैर्माल्यैः कामः स्त्रीषु विजृम्भते ।। ३५ ।।
ब्रह्मचर्येऽपि वक्तव्यं प्राप्तं मन्मथचेष्टितम् ।।
हृद्यं हि पुरुषं दृष्ट्वा योनिः प्रक्लिद्यते स्त्रियाः ।। ३६ ।।
सुवेषं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम् ।।
योनिः क्लिद्यति नारीणां सत्यं सत्यं हि शौनक ।। ३७ ।।
नद्यश्च नार्यश्च समस्वभावाः स्वतन्त्रभावे गमनादिके च ।।
तोयैश्च दोषैश्च निपातयन्ति नद्यो हि कूलानि कुलानि नार्यः ।। ३८ ।।

१. 'मद्यशीधुसुरासवैः' इ. पा.

नदी पातयते कूलं नारी पातयते कुलम् ॥
नारीणां च नदीनां च स्वच्छन्दा ललिता गतिः ॥ ३९ ॥

नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ॥
नान्तकः सर्वभूतानां न पुंसां वामलोचनाः ॥ ४० ॥

न तृप्तिरस्ति शिष्टानामिष्टानां प्रियवादिनाम् ॥
सुखानाञ्च सुतानाञ्च जीवितस्य वरस्य च ॥ ४१ ॥

राजा न तृप्तो धनसञ्चयेन
न सागरस्तृप्तिमगाज्जलेन ॥
न पण्डितस्तृप्यति भाषितेन
तृप्तं न चक्षुर्नृपदर्शनेन ॥ ४२ ॥

स्वकर्मधर्मार्जितजीवितानां
शास्त्रेषु दारेषु सदा रतानाम् ॥
जितेन्द्रियाणामतिथिप्रियाणां
गृहेऽपि मोक्षः पुरुषोत्तमानाम् ॥ ४३ ॥

मनोऽनुकूलाः प्रमदा रूपवत्यः स्वलङ्कृताः ॥
वासः प्रासादपृष्ठेषु स्वर्गः स्याच्छुभकर्मणः ॥ ४४ ॥

न दानेन न मानेन नार्जवेन न सेवया ॥
न शस्त्रेण न शास्त्रेण सर्वथा विषमा स्त्रियः ॥ ४५ ॥

शनैर्विद्या शनैरर्थाः शनैः पर्वतमारुहेत् ॥
शनैः कामं च धर्मं च पञ्चैतानि शनैः शनैः ॥ ४६ ॥

शाश्वतं देवपूजादि विप्रदानं च शाश्वतम् ॥
शाश्वतं सगुणा विद्या सुहृन्मित्रं च शाश्वतम् ॥ ४७ ॥

ये बालभावान्न पठन्ति विद्यां
ये यौवनस्था ह्यधनात्मदाराः ॥
ते शोचनीया इह जीवलोके
मनुष्यरूपेण मृगाश्चरन्ति ॥ ४८ ॥

पठने भोजने चित्तं न कुर्याच्छास्त्रसेवकः ॥
सुदूरमपि विद्यार्थी व्रजेद्गरुडवेगवान् ॥ ४९ ॥

ये बालभावे न पठन्ति विद्यां
कामातुरा यौवननष्टवित्ताः[१] ॥
ते वृद्धभावे परिभूयमानाः
संदह्यमानाः शिशिरे यथाऽब्जम् ॥ ५० ॥
तर्कोऽप्रतिष्ठा श्रुतयो विभिन्नाः
नासावृषिर्यस्य मतं न भिन्नम् ॥
धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥ ५१ ॥
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ॥
नेत्रवक्त्रविकाराभ्यां लक्ष्यतेऽन्तर्गतं मनः ॥ ५२ ॥
अनुक्तमप्यूहति पण्डितो जनः
परेङ्गितज्ञानफला हि बुद्धयः ॥
उदीरितोऽर्थः पशुनापि गृह्यते
हयाश्च नागाश्च वहन्ति दर्शितम् ॥ ५३ ॥
अर्थाद्भ्रष्टस्तीर्थयात्रां तु गच्छे-
त्सत्याद्भ्रष्टो रौरवं वै व्रजेच्च ॥
भोगाद्भ्रष्टः सत्यधृतिञ्च गच्छे-
द्राज्याद्भ्रष्टो मृगयायां व्रजेच्च ॥ ५४ ॥

*Ibid*, अ. १०९.

## अथ दशोत्तरशततमोऽध्यायः (११०).

यो ध्रुवाणि परित्यज्य ह्यध्रुवाणि निषेवते ॥
ध्रुवाणि तस्य नश्यन्ति ह्यध्रुवं नष्टमेव च ॥ १ ॥
वाग्यन्त्रहीनस्य[२] नरस्य विद्या
शस्त्रं यथा कापुरुषस्य हस्ते ॥
न तुष्टिमुत्पादयते शरीरे
ह्यन्धस्य दारा इव दर्शनीयाः ॥ २ ॥

---

१. 'नष्टचित्ताः' इ. पा.   २. 'प्रागल्भ्यहीनस्य' इ. पा.

भोज्ये भोजनशक्तिश्च रतिशक्तिर्वरस्त्रियः ॥
विभवे दानशक्तिश्च नाल्पस्य तपसः फलम् ॥ ३ ॥
अग्निहोत्रफला वेदाः शीलवृत्तिफलं शुभम्[1] ॥
रतिपुत्रफला दारा दत्तभुक्तफलं धनम् ॥ ४ ॥
वरयेत्कुलजां प्राज्ञो विरूपामपि कन्यकाम् ॥
सुरूपां सुनितम्बां च नाकुलीनां कदाचन ॥ ५ ॥
अर्थेनापि हि किं तेन यस्यानर्थे तु सङ्गतिः ॥
को हि नाम शिखाजातं पन्नगस्य मणिं हरेत् ॥ ६ ॥
हविर्दुष्टकुलाद्ग्राह्यं बालादपि सुभाषितम् ॥
अमेध्यात्काञ्चनं ग्राह्यं स्त्रीरत्नं दुष्कुलादपि ॥ ७ ॥
विषादप्यमृतं ग्राह्यममेध्यादपि काञ्चनम् ॥
नीचादप्युत्तमां विद्यां स्त्रीरत्नं दुष्कुलादपि ॥ ८ ॥
न राज्ञा सह मित्रत्वं न सर्पो निर्विषः क्वचित् ॥
न कुलं निर्मलं तत्र स्त्रीजनो यत्र जायते ॥ ९ ॥
कुले नियोजयेद्भक्तं पुत्रं विद्यासु योजयेत् ॥
व्यसने योजयेच्छत्रुमिष्टं धर्मे नियोजयेत् ॥ १० ॥
स्थानेष्वेव प्रयोक्तव्या भृत्याश्चाभरणानि च ॥
न हि चूडामणिः पादे शोभते वै कदाचन ॥ ११ ॥
चूडामणिः समुद्रोऽग्निर्घण्टा चाखण्डमम्बरम् ॥
अथवा पृथिवीपालो मूर्ध्निपादे प्रमादतः ॥ १२ ॥
कुसुमस्तबकस्येव द्वे गती तु मनस्विनः ॥
मूर्ध्नि वा सर्वलोकानां शीर्यतः पतितो वने ॥ १३ ॥

कनकभूषणसङ्ग्रहणोचितो
यदि मणिस्त्रपुणि प्रतिबध्यते ॥
न च विरौति न चापि स शोभते
भवति योजयितुर्वचनीयता ॥ १४ ॥

वाजिवारणलोहानां काष्ठपाषाणवाससाम् ॥
नारीपुरुषतोयानामन्तरं महदन्तरम् ॥ १५ ॥

---
१. 'श्रुतम्' इ. पा.

कदर्थितस्यापि हि धैर्यवृत्ते-
 र्न शक्यते सर्वगुणप्रमाथः ॥
अधः खलेनापि कृतस्य वन्हे-
 र्नाधः शिखा याति कदाचिदेव ॥ १६ ॥
न सदश्वः कशाघातं सिंहो न गजगर्जितम् ॥
वीरो वा परनिर्दिष्टं न सहेद्भीमनिःस्वनम् ॥ १७ ॥
यदि विभवविहीनः प्रच्युतो वाशु[१] दैवा-
 न्न तु खलजनसेवां काङ्क्षयन्नैव नीचाम् ॥
न तृणमदनकार्ये सुक्षुधार्त्तोऽस्ति सिंहः[२]
 पिबति रुधिरमुष्णं प्रायशः कुञ्जराणाम् ॥ १८ ॥
सकृद्दुष्टञ्च यो मित्रं पुनः सन्धातुमिच्छति ॥
स मृत्युमेव गृह्णीयाद्गर्भमश्वतरी यथा ॥ १९ ॥
शत्रोरपत्यानि प्रियंवदानि
 नोपेक्षितव्यानि बुधैर्मनुष्यैः ॥
तान्येव कालेषु विपत्कराणि
 विषस्य पात्राण्यतिदारुणानि ॥ २० ॥
उपकारगृहीतेन शत्रुणा शत्रुमुद्धरेत् ॥
पादलग्नं करस्थेन कण्टकेनैव कण्टकम् ॥ २१ ॥
अपकारपरान्नित्यं चिन्तयेन्न कदाचन ॥
स्वयमेव पतिष्यन्ति कूलजाता इव द्रुमाः ॥ २२ ॥
अनर्था ह्यर्थरूपाश्च अर्थाश्चानर्थरूपिणः ॥
भवन्ति ते विनाशाय दैवायत्तस्य वै सदा ॥ २३ ॥
कार्यकालोचिताऽपापा मतिः सञ्जायते हि वै ॥
सानुकूले तु दैवे शं पुंसः सर्वत्र जायते ॥ २४ ॥
धनप्रयोगकार्येषु तथा विद्यागमेषु च ॥
आहारे व्यवहारे च त्यक्तलज्जः सदा भवेत् ॥ २५ ॥
धनिनः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ॥
पञ्च यत्र न विद्यन्ते न कुर्यात्तत्र संस्थितिम् ॥ २६ ॥

१. 'वा स्वदेशात्' इ.पा. २. 'न तृणमशति सिंहः सुक्षुधार्त्तोऽपि काले' इ.पा.

लोकयात्रा भयं लज्जा दाक्षिण्यं दानशीलता ॥
पञ्च यत्र न विद्यन्ते न तत्र दिवसं वसेत् ॥ २७ ॥
कालविच्छ्रोत्रियो राजा नदी साधुश्च पञ्चमः ॥
एते यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥ २८ ॥
नैकत्र परनिष्ठास्ति ज्ञानस्य किल शौनक ॥
सर्वः सर्वं न जानाति सर्वज्ञो नास्ति कुत्रचित् ॥ २९ ॥
न सर्ववित्कश्चिदिहास्ति लोके
नात्यन्तमूर्खो भुवि चापि कश्चित् ॥
ज्ञानेन नीचोत्तममध्यमेन
योऽयं विजानाति स तेन विद्वान् ॥ ३० ॥

*Ibid*, अ. ११०.

## अथ एकादशोत्तरशततमोऽध्यायः (१११).

पार्थिवस्य तु वक्ष्यामि भृत्यानाञ्चैव लक्षणम् ॥
सर्वाणि हि महीपालः सम्यङ्नित्यं परीक्षयेत् ॥ १ ॥
राज्यं पालयते नित्यं सत्यधर्मपरायणः ॥
निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेत् ॥ २ ॥
पुष्पात्पुष्पं[१] विचिन्वीत मूलच्छेदं न कारयेत् ॥
मालाकार इवारण्ये न यथाङ्गारकारकः ॥ ३ ॥
दोग्धारः क्षीरभुञ्जाना विकृतं तन्न भुञ्जते ॥
परराष्ट्रं महीपालैर्भोक्तव्यं न च दूषयेत् ॥ ४ ॥
नोऽधश्छिन्द्यात्तु यो धेन्वाः क्षीरार्थी लभते पयः ॥
एवं राष्ट्रप्रयोगेण पीड्यमानं न वर्द्धते ॥ ५ ॥
तस्मात्सर्वप्रयत्नेन पृथिवीमनुपालयेत् ॥
पालकस्य भवेद्भूमिः कीर्तिरायुर्यशो बलम् ॥ ६ ॥
अभ्यर्च्य विष्णुं धर्मात्मा गोब्राह्मणहिते रतः ॥
प्रजाः पालयितुं शक्तः पार्थिवो विजितेन्द्रियः ॥ ७ ॥

१. ‘पुष्पं पुष्पं’ इ. पा.

ऐश्वर्यमध्रुवं प्राप्य राजा धर्मे मतिं चरेत् ॥
क्षणेन विभवो नश्येन्नात्मायत्तं धनादिकम् ॥ ८ ॥
सत्यं मनोरमाः कामाः सत्यं रम्या विभूतयः ॥
किन्तु वै वनितापाङ्गभङ्गिलोलं हि जीवितम् ॥ ९ ॥

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रभवन्ति गात्रे ॥
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोको न चात्महितमाचरतीह कश्चित् ॥ १० ॥
निःशङ्कं किं मनुष्याः कुरुत परहितं युक्तमग्रे हितं य-
न्मोदध्वं कामिनीभिर्मदनशरहता मन्दमन्दातिवृष्ट्या ॥
मा पापं संकुरुध्वं द्विजहरिपरमाः संभजध्वं सदैव
आयुर्निःशेषमेति स्खलति जलघटीभूतमृत्युच्छलेन ॥ ११ ॥

मातृवत्परदारेषु परद्रव्येषु लोष्टवत् ॥
आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः ॥ १२ ॥
एतदर्थं हि विप्रेन्द्रा राज्यमिच्छन्ति भूभृतः ॥
यदेषां सर्वकार्येषु वचो न प्रतिहन्यते ॥ १३ ॥
एतदर्थं हि कुर्वन्ति राजानो धनसञ्चयम् ॥
रक्षयित्वा तु चात्मानं यद्धनं तद्द्विजातये ॥ १४ ॥
ॐकारशब्दो विप्राणां येन राष्ट्रं प्रवर्द्धते ॥
स राजा वर्द्धते योगाद्व्याधिभिश्च न बध्यते ॥ १५ ॥
असमर्थाश्च कुर्वन्ति मुनयो द्रव्यसञ्चयम् ॥
किंपुनस्तु महीपालः पुत्रवत्पालयन्प्रजाः ॥ १६ ॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ॥
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः ॥ १७ ॥

त्यजन्ति मित्राणि धनैर्विहीनं
पुत्राश्च दाराश्च सुहृज्जनाश्च ॥
ते चार्थवन्तं पुनराश्रयन्ति
ह्यर्थो हि लोके पुरुषस्य बन्धुः ॥ १८ ॥

अन्धो हि राजा भवति यस्तु शास्त्रविवर्जितः ॥

अन्धः पश्यति चारेण शास्त्रहीनो न पश्यति ॥ १९ ॥
यस्य पुत्राश्च भृत्याश्च मन्त्रिणश्च पुरोहिताः ॥
इन्द्रियाणि प्रसुप्तानि तस्य राज्यं चिरं न हि ॥ २० ॥
येनार्जितास्त्रयोऽप्येते पुत्रा भृत्याश्च बान्धवाः ॥
जिता तेन समं भूपैश्चतुरब्धिर्वसुन्धरा ॥ २१ ॥
लंघयेच्छास्त्रयुक्तानि हेतुयुक्तानि यानि च ॥
स हि नश्यति वै राजा इह लोके परत्र च ॥ २२ ॥
मनस्तापं न कुर्वीत आपदं प्राप्य पार्थिवः ॥
समबुद्धिः प्रसन्नात्मा सुखदुःखे समो भवेत् ॥ २३ ॥
धीराः कष्टमनुप्राप्य न भवन्ति विषादिनः ॥
प्रविश्य वदनं राहोः किं नोदेति पुनः शशी ॥ २४ ॥

धिग्धिक् शरीरसुखलालितमानवेषु
मा खेदयेद्धनकृशं हि शरीरमेव ॥
सद्दारका ह्यधनपाण्डुसुताः श्रुता हि
दुःखं विहाय पुनरेव सुखं प्रपन्नाः ॥ २५ ॥

गन्धर्वविद्यामालोक्य वाद्यं च गणिकागणान् ॥
धनुर्वेदार्थशास्त्राणि लोके रक्षेच्च भूपतिः ॥ २६ ॥
कारणेन विना भृत्ये यस्तु कुप्यति पार्थिवः ॥
स गृह्णाति विषोन्मादं कृष्णसर्पविसर्जितम् ॥ २७ ॥
चापलाद्वारयेद्दृष्टिं मिथ्यावाक्यं च वारयेत् ॥
मानवे श्रोत्रिये चैव भृत्यवर्गे सदैव हि ॥ २८ ॥
लीलां करोति यो राजा भृत्यस्वजनगर्वितः ॥
शासने सर्वदा क्षिप्रं रिपुभिः परिभूयते ॥ २९ ॥
हुंकारे भ्रुकुटीं नैव सदा कुर्वीत पार्थिवः ॥
विना दोषेण यो भृत्यान्राजाऽधर्मेण शास्ति च ॥ ३० ॥
लीलासुखानि भोग्यानि त्यजेदिह महीपतिः ॥
सुखप्रवृत्तैः साध्यन्तैश्शत्रवो विग्रहे स्थितैः ॥ ३१ ॥
उद्योगः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ॥
षड्विधो यस्य उत्साहस्तस्य देवोऽपि शङ्कते ॥ ३२ ॥

उद्योगेन कृते कार्ये सिद्धिर्यस्य न विद्यते ॥
दैवं तस्य प्रमाणं हि कर्त्तव्यं पौरुषं सदा ॥ ३३ ॥

*Ibid*, अ. १११.

## अथ द्वादशोत्तरशततमोऽध्यायः (११२).

भृत्या बहुविधा ज्ञेया उत्तमाधममध्यमाः ॥
नियोक्तव्या यथार्हेषु त्रिविधेष्वेव कर्मसु ॥ १ ॥
भृत्ये परिक्षणं वक्ष्ये यस्य यस्य हि यो गुणः ॥
तमिमं संप्रवक्ष्यामि ये यथाकथितं किल ॥ २ ॥
यथा चतुर्भिः कनकं परीक्ष्यते
निघर्षणच्छेदनतापताडनैः ॥
तथा चतुर्भिर्भृतकं परीक्षयेद्
व्रतेन शीलेन कुलेन कर्मणा ॥ ३॥
कुलशीलगुणोपेतः सत्यधर्मपरायणः ॥
रूपवान्सुप्रसन्नश्च कोशाध्यक्षो विधीयते ॥ ४ ॥
मूल्यरूपपरीक्षाकृद्भवेद्रत्नपरीक्षकः ॥
बलाबलपरिज्ञाता सेनाध्यक्षो विधीयते ॥ ५ ॥
इङ्गिताकारतत्त्वज्ञो बलवान्प्रियदर्शनः ॥
अप्रमादी प्रमाथी च प्रतीहारः स उच्यते ॥ ६ ॥
मेधावी वाक्पटुः प्राज्ञः सत्यवादी जितेन्द्रियः ॥
सर्वशास्त्रसमालोकी ह्येष साधुः स लेखकः ॥ ७ ॥
बुद्धिमान्मतिमांश्चैव परचित्तोपलक्षकः ॥
क्रूरो यथोक्तवादी च एष दूतो विधीयते ॥ ८ ॥
समस्तस्मृतिशास्त्रज्ञः पण्डितोऽथ जितेन्द्रियः ॥
शौर्यवीर्यगुणोपेतो धर्माध्यक्षो विधीयते ॥ ९ ॥
पितृपैतामहो दक्षः शास्त्रज्ञः सत्यवाचकः ॥
शुचिश्च कठिनश्चैव सूपकारः स उच्यते ॥ १० ॥
आयुर्वेदकृताभ्यासः सर्वेषां प्रियदर्शनः ॥
आयुःशीलगुणोपेतो वैद्य एव विधीयते ॥ ११ ॥

वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः ॥
आशीर्वादपरो नित्यमेव राजपुरोहितः ॥ १२ ॥
लेखकः पाठकश्चैव गणकः प्रतिरोधकः ॥
आलस्ययुक्तश्चेद्राजा कर्म संवर्जयेत्सदा ॥ १३ ॥
द्विजिह्वमुद्वेगकरं क्रूरमेकान्तदारुणम् ॥
खलस्याहेश्च वदनमपकाराय केवलम् ॥ १४ ॥
दुर्जनः परिहर्त्तव्यो विद्ययाऽलङ्कृतोऽपि सन् ॥
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ १५ ॥
अकारणाविष्कृतकोपधारिणः
खलाद्भयं कस्य न नाम जायते ॥
विषं महाहेर्विषमस्य दुर्वचः
सदुःसहं संनिपतेत्सदा मुखे ॥ १६ ॥
तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनम् ॥
अर्द्धराज्यहरं भृत्यं यो हन्यात्स न हन्यते ॥ १७ ॥
शूरत्वयुक्ता मृदुमन्दवाक्या
जितेन्द्रियाः सत्यपराक्रमाश्च ॥
प्रागेव पश्चाद्विपरीतरूपा
ये ते तु भृत्या न हिता भवन्ति ॥ १८ ॥
निरालस्याः सुसन्तुष्टाः सुस्वप्नाः प्रतिबोधकाः ॥
सुखदुःखसमा धीरा भृत्या लोकेषु दुर्लभाः ॥ १९ ॥
क्षान्तिसत्यविहीनश्च क्रूरबुद्धिश्च निन्दकः ॥
दाम्भिकः कपटी चैव शठश्च स्पृहयाऽन्वितः ॥
अशक्तो भयभीतश्च राज्ञा त्यक्तव्य एव सः ॥ २० ॥
सुसन्धानानि चास्त्राणि शस्त्राणि विविधानि च ॥
दुर्गे प्रवेशितव्यानि ततः शत्रुं निपातयेत् ॥ २१ ॥
षण्मासमथ वर्षं वा सन्धिं कुर्यान्नराधिपः ॥
पश्यन्सञ्चितमात्मानं पुनः शत्रुं निपातयेत् ॥ २२ ॥
मूर्खान्नियोजयेद्यस्तु त्रयोऽप्येते महीपतेः ॥
अयशश्चार्थनाशश्च नरके चैव पातनम् ॥ २३ ॥

यत्किञ्चित्कुरुते कर्म शुभं वा यदि वाऽशुभम् ॥
तेन स्म वर्द्धते राजा सूक्ष्मतो भृत्यकार्यतः ॥ २४ ॥
तस्माद्भूमीश्वरः प्राज्ञं धर्मकामार्थसाधने ॥
नियोजयेद्धि सततं गोब्राह्मणहिताय वै ॥ २५ ॥

*Ibid*, अ. ११२.

## अथ त्रयोदशोत्तरशततमोऽध्यायः (११३).

गुणवन्तं नियुञ्जीत गुणहीनं विवर्जयेत् ॥
पण्डितस्य गुणाः सर्वे मूर्खे दोषाश्च केवलाः ॥ १ ॥
सद्भिरासीत सततं सद्भिः कुर्वीत सङ्गमम् ॥
सद्भिर्विवादं मैत्रीञ्च नासद्भिः किञ्चिदाचरेत् ॥ २ ॥
पण्डितैश्च विनीतैश्च धर्मज्ञैः सत्यवादिभिः ॥
बन्धनस्थोऽपि तिष्ठेच्च न तु राज्यं खलैः सह ॥ ३ ॥
सावशेषाणि कार्याणि कुर्वन्नर्थैश्च युज्यते ॥
तस्मात्सर्वाणि कार्याणि सावशेषाणि कारयेत् ॥ ४ ॥
मधुहेव दुहेत्सारं कुसुमञ्च न घातयेत् ॥
वत्सापेक्षी दुहेत्क्षीरं भूमिं गां चैव पार्थिवः ॥ ५ ॥
यथाक्रमेण पुष्पेभ्यश्चिनुते मधु षट्पदः ॥
तथा वित्तमुपादाय राजा कुर्वीत सञ्चयम् ॥ ६ ॥
वल्मीकं मधुजालञ्च शुक्लपक्षे तु चन्द्रमाः ॥
राजद्रव्यं च भैक्ष्यं च स्तोकं स्तोकं प्रवर्द्धते ॥ ७ ॥
अर्जितस्य क्षयं दृष्ट्वा संप्रदत्तस्य सञ्चयम् ॥
अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु ॥ ८ ॥

वनेऽपि दोषाः प्रभवन्ति रागिणां
गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ॥
अकुत्सिते कर्मणि यः प्रवर्त्तते
निवृत्तरागस्य गृहं तपोवनम् ॥ ९ ॥

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ॥
मृजया रक्ष्यते पात्रं कुलं शीलेन रक्ष्यते ॥ १० ॥

वरं विन्ध्याटव्यां निवसनमभुक्तस्य मरणं
वरं सर्पाकीर्णे शयनमथ कूपे निपतनम् ॥
वरं भ्रान्तावर्त्ते सभयजलमध्ये प्रविशनं[1]
न तु स्वीये पक्षे हि धनमणु देहीति कथनम् ॥ ११ ॥
भाग्यक्षयेषु क्षीयन्ते नोपभोगेन सम्पदः ॥
पूर्वार्जिते हि सुकृते न नश्यन्ति कदाचन ॥ १२ ॥
विप्राणां भूषणं विद्या पृथिव्या भूषणं नृपः ॥
नभसो भूषणं चन्द्रः शीलं सर्वस्य भूषणम् ॥ १३ ॥
एते ते चन्द्रतुल्याः क्षितिपतितनया भीमसेनार्जुनाद्याः
शूराः सत्यप्रतिज्ञा दिनकरवपुषः केशवेनोपगूढाः ॥
ते वै दुष्टगृहस्थाः कृपणवशगता भैक्ष्यचर्यां प्रयाताः
को वा कस्मिन्समर्थो भवति विधिवशाद्भ्रामयेत्कर्मरेखा ॥ १४ ॥
ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे ॥
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ १५ ॥
दाता बलिर्याचकको मुरारि–
र्दानं मही विप्रमुखस्य मध्ये ॥
दत्त्वा फलं बन्धनमेव लब्धं
नमोऽस्तु ते दैव यथेष्टकारिणे ॥ १६ ॥
माता यदि भवेल्लक्ष्मीः पिता साक्षाज्जनार्दनः ॥
कुबुद्धौ प्रतिपत्तिश्चेत्तस्मिन्दण्डः पतेत्सदा ॥ १७ ॥
येन येन यथा यद्वत्पुरा कर्म सुनिश्चितम् ॥
तत्तदेवान्तरे भुङ्क्ते स्वयमाहितमात्मना ॥ १८ ॥
आत्मना विहितं दुःखमात्मना विहितं सुखम् ॥
गर्भशय्यामुपादाय भुङ्क्ते वै पूर्वदैहिकम् ॥ १९ ॥
न चान्तरिक्षे न समुद्रमध्ये
न पर्वतानां विवरप्रवेशे (प्रदेशे ?) ॥

---
१. 'प्रपतनम्' इ. पा.

न मातृमूर्ध्नि प्रधृतस्तथाङ्के
त्यक्तुं क्षमः कर्म कृतं नरो हि ॥ २० ॥
दुर्गस्त्रिकूटः परिखा समुद्रो
रक्षांसि योधाः परमा च वृत्तिः ॥
शास्त्रं च वै तूशनसा प्रदिष्टं
स रावणः कालवशाद्विनष्टः ॥ २१ ॥
यस्मिन्वयसि यत्काले यद्दिवा यच्च वा निशि ॥
यन्मुहूर्त्ते क्षणे वापि तत्तथा न तदन्यथा ॥ २२ ॥
गच्छन्ति चान्तरिक्षे वा प्रविशन्ति महीतले ॥
धारयन्ति दिशः सर्वा नादत्तमुपलभ्यते ॥ २३ ॥
पुराधीता च या विद्या पुरा दत्तं च यद्धनम् ॥
पुरा कृतानि कर्माणि ह्यग्रे धावन्ति धावतः ॥ २४ ॥
कर्माण्यत्र प्रधानानि सम्यगृक्षे शुभग्रहे ॥
वसिष्ठकृतलग्नापि जानकी दुःखभाजनम् ॥ २५ ॥
स्थूलजङ्घो यदा रामः शब्दगामी च लक्ष्मणः ॥
घनकेशी यदा सीता त्रयस्ते दुःखभाजनम् ॥ २६ ॥
न पितुः कर्मणा पुत्रः पिता वा पुत्रकर्मणा ॥
स्वयं कृतेन गच्छन्ति स्वयं बद्धाः स्वकर्मणा ॥ २७ ॥
कर्मजन्यशरीरेषु रोगाः शारीरमानसाः ॥
शरा इव पतन्तीह विमुक्ता दृढधन्विभिः ॥ २८ ॥
अन्यथा शास्त्रगर्भिण्या धिया धीरोऽर्थमीहते ॥
स्वामिवत्प्राकृतं कर्म विदधाति तदन्यथा ॥ २९ ॥
बालो युवा च वृद्धश्च यः करोति शुभाशुभम् ॥
तस्यां तस्यामवस्थायां भुङ्क्ते जन्मनि जन्मनि ॥ ३० ॥
अनीक्षमाणोऽपि नरो विदेशस्थोऽपि मानवः ॥
स्वकर्मपोतवातेन नीयते यत्र तत्फलम् ॥ ३१ ॥
प्राप्तव्यमर्थं लभते मनुष्यो
देवोऽपि तं वारयितुं न शक्तः ॥

अतो न शोचामि न विस्मयो मे
ललाटलेखा न पुनः प्रयाति ॥ ३२ ॥[1]
सर्पः कूपे गजः स्कन्धे बिल आखुश्च धावति ॥
नरः शीघ्रतरादेव कर्मणः कः पलायते ॥ ३३ ॥
नाल्पा भवति सद्विद्या दीयमानापि वर्द्धते ॥
कूपस्थमिव पानीयं भवत्येव बहूदकम् ॥ ३४ ॥
येऽर्था धर्मेण ते सत्या येऽधर्मेण गताः श्रियः ॥
धर्मार्थो च महाँल्लोके तत्स्मृत्वा ह्यर्थकारणात् ॥ ३५ ॥
अन्नार्थी यानि दुःखानि करोति कृपणो जनः ॥
तान्येव यदि धर्मार्थी न भूयः क्लेशभाजनम् ॥ ३६ ॥
सर्वेषामेव शौचानामन्नशौचं विशिष्यते ॥
योऽन्नार्थैः शुचिः शौचान्न मृदा वारिणा शुचिः ॥ ३७ ॥
सत्यं शौचं मनः शौचं शौचमिन्द्रियनिग्रहः ॥
सर्वभूते दया शौचं जलशौचं च पञ्चमम् ॥ ३८ ॥
यस्य सत्यं च शौचं च तस्य स्वर्गो न दुर्लभः ॥
सत्यं हि वचनं यस्य सोऽश्वमेधाद्विशिष्यते ॥ ३९ ॥
मृत्तिकानां सहस्रेण चोदकानां शतेन हि ॥
न शुद्धयति दुराचारो भावोपहतचेतनः ॥ ४० ॥
यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ॥
विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते ॥ ४१ ॥
न प्रहृष्यति संमानैः नावमानैः प्रकुप्यति ॥
न क्रुद्धः परुषं ब्रूयादेतत्साधोस्तु लक्षणम् ॥ ४२ ॥
दरिद्रस्य मनुष्यस्य प्राज्ञस्य मधुरस्य च ॥
काले श्रुत्वा हितं वाक्यं न कश्चित्परितुष्यति ॥ ४३ ॥
न मन्त्रबलवीर्येण प्रज्ञया पौरुषेण च ॥
अलभ्यं लभ्यते मर्त्यैस्तत्र का परिवेदना ॥ ४४ ॥
अयाचितो मया लब्धो पुनर्मत्प्रेषणाद्गतः ॥
यत्रागतस्तत्र गतस्तत्र का परिवेदना ॥ ४५ ॥

---

१. 'यदस्मदीयं न तु तत्परेषाम्' इ.पा.—an additional line.

एकवृक्षे सदारात्रौ नानापक्षिसमागमः ॥
प्रभातेऽन्यदिशो यान्ति का तत्र परिवेदना ॥ ४६ ॥
एकसार्थप्रयातानां सर्वेषां यत्र गामिनाम् ॥
यस्त्वेकस्त्वरितो याति का तत्र परिवेदना ॥ ४७ ॥
अव्यक्तादीनि भूतानि व्यक्तमध्यानि शौनक ॥
अव्यक्तनिधनान्येव का तत्र परिवेदना ॥ ४८ ॥
नाप्राप्तकालो म्रियते विद्धः शरशतैरपि ॥
कुशाग्रेण तु संस्पृष्टः प्राप्तकालो न जीवति ॥ ४९ ॥
लब्धव्यान्येव लभते गन्तव्यान्येव गच्छति ॥
प्राप्तव्यान्येव प्राप्नोति दुःखानि च सुखानि च ॥ ५० ॥
तत्तत्प्राप्नोति पुरुषः किं प्रलापैः करिष्यति ॥
अचोद्यमानानि यथा पुष्पाणि च फलानि च ॥
स्वकालं नातिवर्त्तन्ते तथा कर्म पुराकृतम् ॥ ५१ ॥

शीलं कुलं नैव न चैव विद्या
ज्ञानं गुणा नैव न बीजशुद्धिः ॥
भाग्यानि पूर्वं तपसार्जितानि
काले फलन्त्यस्य यथैव वृक्षाः ॥ ५२ ॥

तत्र मृत्युर्यत्र हन्ता तत्र श्रीर्यत्र सम्पदः ॥
तत्र तत्र स्वयं याति प्रेर्यमाणः स्वकर्मभिः ॥ ५३ ॥
भूतपूर्वं कृतं कर्म कर्त्तारमनुतिष्ठति ॥
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ॥ ५४ ॥
एवं पूर्वकृतं कर्म कर्तारमनुतिष्ठति ॥
सुकृतं भुंक्ष्व चात्मीयं मूढ किं परितप्यसे ॥ ५५ ॥
यथा पूर्वकृतं कर्म शुभं वा यदि वाऽशुभम् ॥
तथा जन्मान्तरे तद्वै कर्त्तारमनुगच्छति ॥ ५६ ॥
नीचः सर्षपमात्राणि परच्छिद्राणि पश्यति ॥
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥ ५७ ॥
रागद्वेषाद्वियुक्तानां न सुखं कुत्रचिद्द्विज ॥
विचार्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः ॥ ५८ ॥

यत्र स्नेहो भयं तत्र स्नेहो दुःखस्य भाजनम् ॥
स्नेहमूलानि दुःखानि तस्मिंस्त्यक्ते महत्सुखम् ॥ ५९ ॥

शरीरमेवायतनं दुःखस्य च सुखस्य च ॥
जीवितं च शरीरं च जात्यैव सह जायते ॥ ६० ॥

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ॥
एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः ॥ ६१ ॥

सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ॥
सुखं दुःखं मनुष्याणां चक्रवत्परिवर्त्तते ॥ ६२ ॥

यद्गतं तदतिक्रान्तं यदि स्यात्तच्च दूरतः ॥
वर्त्तमानेन वर्त्तेत न स शोकेन बाधते ॥ ६३ ॥

*Ibid*, अ. ११३.

## अथ चतुर्दशोत्तरशततमोऽध्यायः (११४).

न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः ॥
कारणादेव जायन्ते मित्राणि रिपवस्तथा ॥ १ ॥

शोकत्राणं भयत्राणं प्रीतिविश्वासभाजनम् ॥
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥ २ ॥

सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ॥
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ ३ ॥

न मातरि न दारेषु न सोदर्ये न चात्मजे ॥
विश्वासस्तादृशः पुंसां यादृङ्मित्रे स्वभावजे ॥ ४ ॥

यदीच्छेच्छाश्वतीं प्रीतिं त्रीन्दोषान्परिवर्जयेत् ॥
द्यूतमर्थप्रयोगञ्च परोक्षे दारदर्शनम् ॥ ५ ॥

मात्रा स्वसा दुहित्रा वा न विविक्तासनो वसेत् ॥
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥ ६ ॥

विपरीतरतिः कामः स्वायत्तेषु न विद्यते ॥
यथोपायो वधो दण्डस्तथैव ह्यनुवर्त्तते ॥ ७ ॥

अपि कल्पानिलस्यैव तुरगस्य महोदधेः ॥
शक्यते प्रसरो बोद्धुं न ह्यरक्तस्य चेतसः ॥ ८ ॥

क्षणो नास्ति रहो नास्ति नास्ति प्रार्थयिता जनः ॥
तेन शौनक नारीणां सतीत्वमुपजायते ॥ ९ ॥
एकं वै सेवते नित्यमन्यश्चेतसि रोचते ॥
पुरुषाणामलाभेन नारी चैव पतिव्रता ॥ १० ॥

जननी यानि कुरुते रहस्यं मदनातुरा ॥
सुतैस्तानि न चिन्त्यानि शीलविप्रतिपत्तिभिः ॥ ११ ॥

पराधीना निद्रा परहृदयकृत्यानुसरणं
सदा हेला हास्यं नियतमपि शोकेन रहितम् ॥
पणे न्यस्तः कायो विटजनखुरैर्दारितगलो
बहूत्कण्ठावृत्तिर्जगति गणिकाया बहुमतः ॥ १२ ॥

अग्निरापः स्त्रियो मूर्खाः सर्पा राजकुलानि च ॥
नित्यं परोपसेव्यानि सद्यः प्राणहराणि षट् ॥ १३ ॥

किं चित्रं यदि वेद (शब्द) शास्त्रकुशलो विप्रो भवेत्पण्डितः
किं चित्रं यदि दण्डनीतिकुशलो राजा भवेद्धार्मिकः ॥
किं चित्रं यदि रूपयौवनवती साध्वी भवेत्कामिनी
तच्चित्रं यदि निर्धनोऽपि पुरुषः पापं न कुर्यात्क्वचित् ॥ १४ ॥

नात्मच्छिद्रं परे दद्याद्विद्याच्छिद्रं परस्य च ॥
गुहेत्कूर्म इवाङ्गानि परभावञ्च लक्षयेत् ॥ १५ ॥

पातालतलवासिन्य उच्चप्राकारसंस्थिताः ॥
यदि नो चिकुरोद्भेदाल्लभ्यंते कैः स्त्रियो न हि ॥ १६ ॥
समधर्मा हि मर्मज्ञस्तीक्ष्णः स्वजनकण्टकः ॥
न तथा बाधते शत्रुः कृतवैरो बहिः स्थितः ॥ १७ ॥

स पण्डितो यो ह्यनुरञ्जयेद्वै
मिष्टेन बालं विनयेन शिष्टम् ॥
अथन नारीं तपसा हि देवा–
न्सर्वांश्च लोकांश्च सुसङ्ग्रहेण ॥ १८ ॥

छलेन मित्रं कलुषेण धर्मं परोपतापेन समृद्धिभावम् ॥
सुखेन विद्यां परुषेण नारीं वाञ्छन्ति ये वै न च पण्डितास्ते ॥ १९ ॥
फलार्थी फलिनं वृक्षं यश्छिन्द्याद्दुर्मतिर्नरः ॥
निष्फलं तस्य वै कार्यं महादोषमवाप्नुयात् ॥ २० ॥
सधनो हि तपस्वी च दूरतो वै कृतश्रमः ॥
मद्यपस्त्री सतीत्येवं विप्र न श्रद्दधाम्यहम् ॥ २१ ॥
न विश्वसेदविश्वस्ते मित्रस्यापि न विश्वसेत् ॥
कदाचित्कुपितं मित्रं सर्वं गुह्यं प्रकाशयेत् ॥ २२ ॥
सर्वभूतेषु विश्वासः सर्वभूतेषु सात्त्विकः ॥
स्वभावमात्मना गूहेदेतत्साधोर्हि लक्षणम् ॥ २३ ॥
यस्मिन्कस्मिन्कृते कार्ये कर्त्तारमनुवर्त्तते ॥
सर्वथा वर्तमानोऽपि धैर्यबुद्धिं तु कारयेत् ॥ २४ ॥
वृद्धाः स्त्रियो नवं मद्यं शुष्कं मांसं त्रिमूलकम् ॥
रात्रौ दधि दिवा स्वप्नं विद्वान्षट् परिवर्जयेत् ॥ २५ ॥
विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम् ॥
विषं कुशिक्षिता विद्या अजीर्णे भोजनं विषम् ॥ २६ ॥
प्रियं गानमकुण्ठस्य नीचस्योच्चासनं प्रियम् ॥
प्रियं दानं दरिद्रस्य यूनश्च तरुणी प्रिया ॥ २७ ॥

अत्यम्बुपानं कठिनाशनञ्च
धातुक्षयो वेगविधारणञ्च ॥
दिवाशयो जागरणं च रात्रौ
षड्भिर्नराणां निवसन्ति[1] रोगाः ॥ २८ ॥
बालातपश्चाप्यतिमैथुनञ्च
श्मशानधूमः करतापनञ्च ॥
रजस्वलावक्त्रनिरीक्षणञ्च
सुदीर्घमायुर्ननु कर्षयेच्च ॥ २९ ॥

शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ॥
प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् ॥ ३० ॥

१. 'प्रभवन्ति' इ. पा.

सद्यः पक्वघृतं द्राक्षा बाला स्त्री क्षीरभोजनम् ॥
उष्णोदकं तरुच्छाया सद्यः प्राणहराणि षट् ॥ ३१ ॥

कूपोदकं वटच्छाया नारीणाञ्च पयोधरः ॥
शीतकाले भवेदुष्णमुष्णकाले च शीतलम् ॥ ३२ ॥

त्रयो बलकराः सद्यो बालाभ्यङ्गसुभोजनम् ॥
त्रयो बलहरा सद्यो ह्यध्वा वै मैथुनं ज्वरः ॥ ३३ ॥

शुष्कं मांसं पयो नित्यं भार्यामित्रैः सहैव तु ॥
न भोक्तव्यं नृपैः सार्द्धं वियोगं कुरुते क्षणात् ॥ ३४ ॥

कुचेलिनं दन्तमलोपधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम् ॥
सूर्योदये ह्यस्तमयेऽपि शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ॥ ३५ ॥

नित्यं छेदस्तृणानां धरणिविलिखनं पादयोश्चापमार्ष्टिः
दन्तानामप्यशौचं मलिनवसनता रूक्षता मूर्द्धजानाम् ॥
द्वे सन्ध्ये चापि निद्रा विवसनशयनं ग्रासहासातिरेकः
स्वाङ्गे पीठे च वाद्यं निधनमुपनयेत्केशवस्यापि लक्ष्मीम् ॥३६॥

शिरः सुधौतं चरणौ सुमार्जितौ
वराङ्गनासेवनमल्पभोजनम् ॥
अनग्नशायित्वमपर्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥ ३७ ॥

यस्य कस्य तु पुष्पस्य पाण्डरस्य विशेषतः ॥
शिरसा धार्यमाणस्य ह्यलक्ष्मीः प्रतिहन्यते ॥ ३८ ॥

दीपस्य पश्चिमा छाया छाया शय्यासनस्य च ॥
रजकस्य तु यत्तीर्थमलक्ष्मीस्तत्र तिष्ठति ॥ ३९ ॥

बालातपः प्रेतधूमः स्त्री वृद्धा तरुणं दधि ॥
आयुष्कामो न सेवेत तथा सम्मार्जनीरजः ॥ ४० ॥

गजाश्वरथधान्यानां गवां चैव रजः शुभम् ॥
अशुभं च विजानीयात्खरोष्ट्राजाविकेषु च ॥ ४१ ॥

गवां रजो धान्यरजः पुत्रस्याङ्गभवं रजः ॥
एतद्रजो महाशस्तं महापातकनाशनम् ॥ ४२ ॥
अजारजः खररजो यत्तु सम्मार्जनीरजः ॥
एतद्रजो महापापं महाकिल्बिषकारकम् ॥ ४३ ॥
शूर्पवातो नखाग्राम्बु स्नानवस्त्रमृजोदकम् ॥
केशाम्बुमार्जनीरेणुर्हन्ति पुण्यं पुरा कृतम् ॥ ४४ ॥
विप्रयोर्विप्रवन्ह्योश्च दम्पत्योः स्वामिनोस्तथा ॥
अन्तरेण न गन्तव्यं हयस्य वृषभस्य च ॥ ४५ ॥
स्त्रीषु राजाग्निसर्पेषु स्वाध्याये शत्रुसेवने ॥
भोगास्वादेषु विश्वासं कः प्राज्ञः कर्त्तुमर्हति ॥ ४६ ॥
न विश्वसेदविश्वस्तं विश्वस्तं नातिविश्वसेत् ॥
विश्वासाद्भयमुत्पन्नं मूलादपि निकृन्तति ॥ ४७ ॥
वैरिणा सह सन्धाय विश्वस्तो यदि तिष्ठति ॥
स वृक्षाग्रे प्रसुप्तो हि पतितः प्रतिबुद्ध्यते ॥ ४८ ॥
नात्यन्तं मृदुना भाव्यं नात्यन्तं क्रूरकर्मणा ॥
मृदुनैव मृदुं हन्ति दारुणेनैव दारुणम् ॥ ४९ ॥
नात्यन्तं सरलैर्भाव्यं नात्यन्तं मृदुना तथा ॥
सरलास्तत्र छिद्यन्ते कुब्जास्तिष्ठन्ति पादपाः ॥ ५० ॥
नमन्ति फलिनो वृक्षा नमन्ति गुणिनो जनाः ॥
शुष्कवृक्षाश्च मूर्खाश्च भिद्यन्ते न नमन्ति च ॥ ५१ ॥
अप्रार्थितानि दुःखानि यथैवायान्ति यान्ति च ॥
मार्जार इव लुम्पेत तथा प्रार्थयिता नरः ॥ ५२ ॥
पूर्व पश्चाच्चरन्त्यार्ये सदैव बहुसम्पदः ॥
विपरीतमनार्ये च यथेच्छसि तथा चर ॥ ५३ ॥
षट्कर्णो भिद्यते मन्त्रश्चतुःकर्णश्च धार्यते ॥
द्विकर्णस्य तु मन्त्रस्य ब्रह्माप्यन्तं न बुद्ध्यते ॥ ५४ ॥
तया गवा किं क्रियते या न दोग्ध्री न गर्भिणी ॥
कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः ॥ ५५ ॥

एकेनापि सुपुत्रेण विद्यायुक्तेन धीमता ॥
कुलं पुरुषसिंहेन चन्द्रेण गगनं यथा ॥ ५६ ॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ॥
वनं सुवासितं सर्वं सुपुत्रेण कुलं यथा ॥ ५७ ॥
एको हि गुणवान्पुत्रो निर्गुणेन शतेन किम् ॥
चन्द्रो हन्ति तमांस्येको न च ज्योतिःसहस्रकम् ॥ ५८ ॥
लालयेत्पञ्चवर्षाणि दशवर्षाणि ताडयेत् ॥
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ॥ ५९ ॥
जायमानो हरेद्दारान् वर्द्धमानो हरेद्धनम् ॥
म्रियमाणो हरेत्प्राणान्नास्ति पुत्रसमो रिपुः ॥ ६० ॥
केचिन्मृगमुखा व्याघ्राः केचिद्व्याघ्रमुखा मृगाः ॥
तत्स्वरूपपरिज्ञाने ह्यविश्वासः पदे पदे ॥ ६१ ॥
एकः क्षमवतां दोषो द्वितीयो नोपपद्यते ॥
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥ ६२ ॥
एतदेवानुमन्येत भोगा हि क्षणभंगिनः ॥
स्निग्धेषु च विदग्धस्य मतयो वै ह्यनाकुलाः ॥ ६३ ॥
ज्येष्ठः पितृसमो भ्राता मृते पितरि शौनक ॥
सर्वेषां स पिता हि स्यात्सर्वेषामनुपालकः ॥ ६४ ॥
कनिष्ठेषु च सर्वेषु समत्वेनानुवर्त्तते ॥
समोपभोगजीवेषु यथैवं तनयेषु च ॥ ६५ ॥
बहूनामल्पसाराणां समवायो हि दारुणः ॥
तृणैरावेष्टितो रज्जुस्तया नागोऽपि बध्यते ॥ ६६ ॥
अपहृत्य परस्वं हि यस्तु दानं प्रयच्छति ॥
स दाता नरकं याति यस्यार्थास्तस्य तत्फलम् ॥ ६७ ॥
देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च ॥
कुलान्याकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥ ६८ ॥
ब्रह्मघ्ने च सुरापे च चोरे भग्नव्रते तथा ॥
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ ६९ ॥

नाश्नन्ति पितरो देवाः क्षुद्रस्य वृषलीपतेः ॥
भार्याजितस्य नाश्नन्ति यस्याश्चोपपतिर्गृहे ॥ ७० ॥

अकृतज्ञमनार्यञ्च दीर्घरोषमनार्जवम् ॥
चतुरो विद्धि चाण्डालाञ्जात्या जायेत पञ्चमः ॥ ७१ ॥

नोपेक्षितव्यो दुर्बुद्धिः शत्रुरल्पोऽप्यवज्ञया ॥
वह्निरल्पोऽप्यसंहार्यः कुरुते भस्मसाज्जगत् ॥ ७२ ॥

नवे वयसि यः शान्तः स शान्त इति मे मतिः ॥
धातुषु क्षीयमाणेषु शमः कस्य न जायते ॥ ७३ ॥

पन्थान इव विप्रेन्द्र सर्वसाधारणाः श्रियः ॥
मदीया इति मत्वा वै न हि हर्षयुतो भवेत् ॥ ७४ ॥

चित्तायत्तं धातुवश्यं शरीरं
चित्ते नष्टे धातवो यान्ति नाशम् ॥
तस्माच्चित्तं सर्वदा रक्षणीयं
स्वस्थे चित्ते धातवः सम्भवन्ति ॥ ७५ ॥

इति श्रीगारुडे महापुराणे पूर्वखण्डे प्रथमांशाख्ये आचारकाण्डे
बृहस्पतिनीतिसारे चतुर्दशोत्तरशततमोऽध्यायः ॥ ११४॥

## ३. सर्वमान्यनीतिवचनानि

[ इसके बाद दन्तकथाओंकी पङ्क्तीमें भी इन नीतिवचनोंका उगम हमारी दृष्टीमें मालुम होता है। पुराणोंमें वे जहाँ-तहाँ विखरे हुअे हैं। सुभाषितोंका विविध सङ्ग्रह भी पौराणिकसाहित्योंसेही बहता है। ]

१ अकर्त्तव्यं न कर्तव्यं प्राणैः कण्ठगतैरपि ॥
कर्त्तव्यमेव कर्त्तव्यमिति धर्म्मविदो विदुः ॥ ८ ॥
पद्म, उत्तरखण्ड, अ. १७.

२ नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः
जानन्नपि हि मेधावी जडवल्लोक आचरेत् ॥ १८ ॥

विदुषामपि शिष्याणां पुत्राणां च क्रियावताम् ॥
अपृष्टमपि वक्तव्यं श्रेयः श्रद्धावतां हितम् ॥ १९ ॥

*Ibid*, पातालखण्ड, अ. ११०.

३ दशसूनासमश्चक्री दशचक्रीसमो ध्वजः ॥
दशध्वजसमा वेश्या दशवेश्यासमो नृपः ॥

*Ibid*, सृष्टिखण्ड, अ. १९; भविष्य, उ. प. २३६.

४ तण्डुलस्य यथा चर्म यथा ताम्रस्य कालिमा ॥
नश्यन्ति क्रियया वीर पुरुषस्य तथा मलः ॥ ९२ ॥

५ जीवस्य तण्डुलस्यैव सहजोऽपि मलो महान् ॥
नश्यत्येव न संदेहस्तस्मात्कर्मोदितं कुरु ॥ ९३ ॥

*Ibid*, पातालखण्ड, अ. ९९.

६ सेवाधर्मो हि गहनः योगिनामपि दुष्करः ॥ ३९ ॥
विनशंत्युपकाराणि तस्मात्सेवा सुदुष्करा ॥
स्वामी सर्पश्च वह्निश्च तप्तभावं व्रजन्ति हि ॥ ४१ ॥*

७ यथा पुण्यसमं मित्रं नास्ति शास्त्रसमो गुरुः ॥ ६७ ॥

*Ibid*, क्रियाखण्ड, अ. २२.

८ तथापि विभवे धैर्यं निर्भयत्वं च तत्परम् ॥
उपायश्चेति चत्वारः प्रशस्या दीर्घदर्शिभिः ॥ १७७ ॥ *Ibid*, अ. ५.

९ परोपकारः कर्तव्यः प्राणैरपि धनैरपि ॥ २३९ ॥

*Ibid*, उत्तरखण्ड, अ. १२८.

१० अकिञ्चनत्वं राज्यं च तुलया समतोलयन् ॥
अकिञ्चनत्वमधिकं राज्यादपि जितात्मनः ॥ २४९ ॥

११ आत्मा वै यमितो येन स यमस्तु विशिष्यते ॥ ३२४ ॥

१२ दण्डो रक्षति भूतानि दण्डः पालयते प्रजाः ॥
निवारयति पापिष्ठान्दण्डो दुर्जय एव वा ॥ ३२७ ॥

१३ श्रुतस्य हि दमो मूलं दमो धर्मः सनातनः ॥ ३३७ ॥

१४ दमेन हीनं न पुनन्ति वेदा
यद्यप्यधीताः सह षड्भिरङ्गैः ॥

सांख्यं च योगश्च कुलं च जन्म
तीर्थाभिषेकश्च निरर्थकानि ॥ ३४० ॥

१५ अमृतस्येव[१] तृप्येत अपमानस्य[२] योगवित् ॥
विषवच्च जुगुप्स्येत संमानस्य[३] सदा द्विजः ॥ ३४१ ॥

१६ अपमानात्तपोवृद्धिः संमानाच्च तपःक्षयः ॥
अर्चितः पूजितो विप्रो मुग्धा गौरिव गच्छति ॥ ३४२ ॥

*Ibid*, सृष्टिखण्ड, अ. १९.

१७ न प्रविश्य वनं कश्चिन्नृपः ख्यातोऽस्ति भूतले ॥
निखिलं यस्तिरस्कृत्य सुखं तिष्ठति निर्भयः ॥ १६५ ॥

पद्म, भूमिखण्ड, अ. ६६.

१८ धर्मार्थकाममोक्षाणां शरीरे साधनं ततः ॥
महता तु प्रयत्नेन शरीरं पालयेद्बुधः ॥ ४५ ॥

१९ गोस्त्रीद्विजानां परिरक्षणार्थं
विवाहकाले सुहृदां प्रसङ्गे ॥
प्राणात्यये सर्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥ ५० ॥ ब्रह्म, अ. १२०.

२० यावत्तिष्ठति तारुण्यं तावद्भुञ्जन्ति मानवाः ॥
सुखभोगादिकं सर्वं स्वेच्छया रमते नरः ॥ ४५ ॥

२१ ज्ञानतो वीर्यतो राजन्धनतो जन्मतस्तथा ॥
शीलतस्तु प्रधाना ये ते प्रधाना मता मम ॥ ९९ ॥

२२ न तेन स्थविरो भवति येनास्य पलितं शिरः ॥
यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः ॥ १०० ॥

२३ यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ॥
यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति ॥ १०१ ॥

२४ यथा षोढाऽफला स्त्रीषु यथा गौर्गवि चाफला ॥
यथा चाज्ञेऽफलं ज्ञानं यथा विप्रोऽनृचोऽफलः ॥ १०२ ॥

भविष्य, ब्राह्मपर्व, अ. ४.

---

१. 'अमृतेनैव' इ. पा. २. 'अपमानेन' इ. पा. ३. 'संमानाद्धि' इ. पा.

२५ नातिस्नेहः प्रसङ्गो वा कर्तव्यः क्वापि केनचित् ॥
कुर्वन्विन्देत सन्तापं कपोत इव दीनधीः ॥ ५२ ॥
भागवत, XI, अ. ७.

२६ विरुद्धशीलयोः प्रभ्वोर्विरुद्धा भजतां गतिः ॥ २ ॥ *Ibid*, X, ८८.

२७ आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः ॥
न स्वामी भृत्यतः स्वाम्यमिच्छन् यो राति चाशिषः ॥ ५ ॥
*Ibid*, VII, ४.

२८ संप्राप्य भारते जन्म सत्कर्मसु पराङ्मुखः ॥
पीयूषकलशं हित्वा विषभाण्डं स इच्छति ॥ ६ ॥ *Ibid*, V, १९.

२९ योऽध्रुवेणात्मनो नाथा न धर्मं न यशः पुमान् ॥
ईहेत भूतदयया स शोच्यः स्थावरैरपि ॥ ८ ॥

३० अहो दैन्यमहो कष्टं पारक्यैः क्षणभङ्गुरैः ॥
यान्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः ॥ १० ॥ *Ibid*, VI, १०.

३१ ननु स्वार्थपरो लोको न वेद परसंकटम् ॥
यदि वेद न याचेत नेति नाह यदीश्वरः ॥ ६ ॥ *Ibid*, VI, १०.

३२ जातस्य मृत्युर्ध्रुव एष सर्वतः
प्रतिक्रिया यस्य न चेह क्लृप्ता ॥
लोको यशश्चाथ ततो यदि ह्यमुं
मृत्युं वरं को न वृणीत युक्तम् ॥ ३२ ॥ *Ibid*, १०.

३३ दासीनां को नु सन्तापः स्वामिनः परिचर्यया ॥
अभीक्ष्णं लब्धमानानां दास्या दासीव दुर्भगाः ॥ ४१ ॥ *Ibid*, १४.

३४ यथा दारुमयी नारी यथा यन्त्रमयो मृगः ॥
एवंभूतानि मघवन्नीशतन्त्राणि विद्धि भोः ॥ १० ॥ *Ibid*, १२.

३५ कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ॥

३५ कालो देशः क्रिया कर्ता करणं कार्यमागमः ॥
द्रव्यं फलमिति ब्रह्मन्वधोक्तोऽजया हरिः ॥ ३१ ॥ *Ibid*, ११.

३६ न वै शूरा विकत्थन्ते दर्शयन्त्येव पौरुषम् ॥
न गृह्णीमो वचो राजन्नातुरस्य मुमूर्षतः ॥ २० ॥ *Ibid*, X, ५०.

३७ हिनस्ति विषमत्तारं वन्हिरद्भिः प्रशाम्यति ॥
कुलं समूलं दहति ब्रह्मस्वारणि पावकः ॥ ३४ ॥ *Ibid*, ६४.

३८ न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनाम् ॥ ४ ॥
*Ibid*, VI, ११.

३९ कालो दैवं कर्मजीवः स्वभावो
द्रव्यं क्षेत्रं प्राण आत्मा विकारः ॥
तत्सङ्घातो बीजरोहप्रवाह—
स्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥ २६ ॥ *Ibid*, X, ८३.

४० निःस्वं त्यजन्ति गणिका अकल्पं नृपतिं प्रजाः ॥
अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणम् ॥ १७ ॥

४१ खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहम् ॥
दग्धं मृगास्तथारण्यं जारो भुक्त्वा रतां स्त्रियम् ॥ ८ ॥
*Ibid*, X, ४७.

४२ एवं साधारणं देहमव्यक्तप्रभवाप्ययम् ॥
को विद्वानात्मसात्कृत्वा हन्ति जन्तूनृतेऽसतः ॥ १२ ॥
*Ibid*, X, १०.

४३ को गृहेषु पुमान्सक्तमात्मानमजितेन्द्रियः ॥
स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुम् ॥ ९ ॥

४४ कोऽन्वर्थतृष्णो विसृजेत्प्राणेभ्योऽपि य ईप्सितः ॥
यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् ॥ १० ॥

४५ कथं प्रियाया अनुकम्पितायाः
सङ्गं रहस्यं रुचिरांश्च मन्त्रान् ॥
सुहृत्सु च स्नेहसितः शिशूनां
कलाक्षराणामनुरक्तचित्तः ॥ ११ ॥

४६ पुत्रान्स्मरंस्ता दुहितृर्हृदय्या
भ्रातृन्स्वसृर्वा पितरौ च दीनौ ॥
गृहान्मनोज्ञोरुपरिच्छदांश्च
वृत्तीसु कुल्याः पशुभृत्यवर्गान् ॥ १२ ॥
*Ibid*, VII, ६.

४७ स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसङ्कटे ॥
गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ॥ ४३ ॥
*Ibid*, VIII, १९.

४८ सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः ॥
न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः ॥ ९ ॥ *Ibid*, २०.

४९ मेनेऽतिदुर्लभं पुंसां सर्वं तत्स्वप्नसंस्तुतिः ॥
विद्वान्विभवनिर्माणं तमो विशति यत्पुमान् ॥ १६ ॥ *Ibid*, IX, ४.

५० पुंसां श्लाघ्यतमं मन्ये दण्डमर्हत्तमार्पितम् ॥
यं न मातः पिता भ्राता सुहृदश्चादिशन्ति हि ॥ ४ ॥
*Ibid*, VIII, २२.

५१ मन एव मनुष्यस्य पूर्वरूपाणि शंसति ॥ ६८ ॥ *Ibid*, X, २८.

५२ सेवाधर्मो हि गहनो योगिनामपि दुष्करः ॥ ३९ ॥
विनशंत्युपकाराणि तस्मात्सेवा सुदुष्करा ॥
स्वामी सर्पश्च वह्निश्च तप्तभावं व्रजन्ति हि ॥ ४१ ॥*

५३ इदानीं तु मया ज्ञातं त्यागान्नास्ति परं सुखम् ॥
नास्ति विद्यासमं चक्षुर्नास्ति चक्षुःसमं बलम् ॥ २८ ॥

५४ नास्ति रागसमं दुःखं नास्ति त्यागात्परं सुखम् ॥
यः कामान्कुरुते सर्वान्यश्चेतान्केवलांस्त्यजेत् ॥ २९ ॥ वराह, १५३.

५५ नैकस्यार्थे बहून्हन्यादिति-शास्त्रेषु निश्चयः ॥
एकं हन्याद्बहूनां हि न पापी तेन जायते ॥ ९ ॥ वामन, अ. ५८.

५६ विरोधं नोत्तमैर्गच्छेन्नाधमैश्च सदा बुधः ॥
विवाहश्च विवादश्च तुल्यशीलैर्नृपेष्यते ॥ २२ ॥

५७ नारभेत कलिं प्राज्ञश्शुष्कवैरं च वर्जयेत् ॥
अत्यल्पहानिस्सोढव्या वैरेणार्थागमं त्यजेत् ॥ २३ ॥ विष्णु, III, १२.

५८ श्वःकार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ॥
न हि प्रतीक्षते मृत्युः कृतं वास्य न वा कृतम् ॥ ८ ॥
*Cf*. also स्कांद, नागरखण्ड, २६, १८.

५९ न कालस्य प्रियः कश्चिद्द्वेष्यो वास्य न विद्यते ॥
आयुष्ये कर्मणि क्षीणे प्रसह्य हरते जनम् ॥ १० ॥
विष्णुधर्मोत्तर, प्र. खं., अ. ११७.

६० आचारः कुलमाख्याति वपुराख्याति भोजनम् ॥
वचनं श्रुतमाख्याति स्नेहमाख्याति लोचनम् ॥१८ ॥

६१ आकारेण तथा गत्या चेष्टया भाषितैरपि ॥
नेत्रवक्त्रविकाराभ्यां ज्ञायतेऽन्तर्हितं मनः ॥ १९ ॥

६२ उज्ज्वलं सरसञ्चैव वक्रमारक्तकं तथा ॥
नेत्रं चतुर्विधं प्रोक्तं तस्य भावं पृथग्बुधाः ॥ २० ॥

६३ उज्ज्वलं मित्रसंयोगे सरसं पुत्रदर्शने ॥
वक्रं च कामिनीयोगे आरक्तं शत्रुदर्शने ॥ २१ ॥
शिव, शतरुद्रसं., अ. ३८.

६४ बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम् ॥
कूपे सिंहो मदोन्मत्तश्शशकेन निपातितः ॥ ५२ ॥ *Ibid*, खं. ४, २[illegible].

६५ पश्चात्तापो हि सर्वेषामघानां निष्कृतिः परा ॥
तेनैव कुरुते सद्यः प्रायश्चित्तं सुधीर्नरः ॥ ८५ ॥
स्कांद, ब्रह्मखं. ब्रह्मोत्तरखं., अ. २२.

६६ परेषां प्राणयात्रार्थं तत्कर्तुं युज्यते शुभाः ॥
आत्मप्राणहितार्थाय न साधूनां प्रशस्यते ॥ ४२ ॥
*Ibid*, नागरखं., अ. ५१.

६७ प्रभूणामेकचित्तेन ते भृत्या दुर्लभाः स्मृताः ॥
तेषामर्थश्च धर्मश्च कुलं चैव च तारितम् ॥ ३८ ॥

६८ प्रसन्नास्त्रिदशास्तेषां प्रभुभक्ताश्च ये नराः ॥
सेवाधर्मो हि गहनो योगिनामपि दुष्करः ॥ ३९ ॥

६९ विनशंत्युपकाराणि तस्मात्सेवा सुदुष्करा ॥
स्वामी सर्पश्च वन्हिश्च तप्तभावं व्रजन्ति हि ॥ ४० ॥ * अ. ७७.

# ४. संसारः

७० पुत्रो मित्रं तथा भ्राता अन्ये स्वजनबांधवाः ॥
पञ्चभेदास्तु सम्बन्धाः पुरुषस्य भवन्ति ते ॥ २९ ॥
पद्म, पातालखंड ८९.

७१ गृहपुत्रसुहृद्भ्रातृपितरो हि विनश्वराः ॥
द्रव्यादिकं च सुभगे तेषु सज्जेत नो बुधः ॥ १८ ॥
*Ibid*, उत्तरखंड, अ. २१६.

७२ वक्ष्यन्ति गूढमत्यर्थं सुप्तं मत्तं प्रमादतः ॥
गन्धः सर्वत्र सततमाघ्रातव्यः प्रयत्नतः ॥ ३६९ ॥

७३ गावः पश्यन्ति गन्धेन राजानश्चारचक्षुषा ॥
नैकस्तिष्ठेद्वने घोरे धर्ममेकं च चिन्तयेत् ॥ ३७० ॥

७४ न चोद्वेगस्त्वया कार्यः सर्वस्य मरणं ध्रुवम् ॥
यथा हि पथिकः कश्चिच्छायामाश्रित्य तिष्ठति ॥ ३७१ ॥

७५ विश्रम्य च पुनर्याति तद्वद्भूतसमागमः ॥
पुत्र नित्यं जगत्सर्वं तत्रैकः शोचसे कथम् ॥ ३७२ ॥
*Ibid*, सृ. खं., १८.

७६ इदानीमपि संसारे कुहरो दृश्यते नरैः ॥ ३३ ॥ भागवत, ३, ११.

७७ जलं तदुद्भवैश्छन्नं हित्वाऽज्ञो जलकाम्यया ॥
मृगतृष्णामुपाधावेद्यथाऽन्यत्रार्थदृक् स्वतः ॥ २८ ॥ *Ibid*, ७, १३.

७८ अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोऽन्यन्न निमित्तमस्ति ॥
एवं हि जन्तोरपि दुर्विभाज्यः शरीरसंयोगवियोगहेतुः ॥ ५१ ॥
*Ibid*, १०, १.

७९ वायुर्यथा घनानीकं तृणं तूलं रजांसि च ॥
संयोज्याक्षिपते भूयस्तथा भूतानि भस्मकृत् ॥ ४४ ॥ *Ibid*, १०, ८२.

८० यस्मिन्निदं प्रोतमशेषमोतं
पटो यथा तंतुवितानसंस्थः ॥
य एष संसारतरुः पुराणः
कर्मात्मकः पुष्पफले प्रसूते ॥ २१ ॥ *Ibid*, ११, १२.

८१ वेणुसंघर्षजो वन्हिर्दग्ध्वा शाम्यति तद्वनम् ॥
एवं गुणव्यत्ययजो देहः शाम्यति तत्क्रियः ॥ ७ ॥ *Ibid*, १३.

८२ भ्रातरीशकृतः पाशो नृणां यः स्नेहसंज्ञितः ॥
तं दुस्त्यजमहं मन्ये शूराणामपि योगिनाम् ॥ ६१ ॥

८३ मा राज्यश्रीरभूत्पुंसः श्रेयस्कामस्य मानद ॥
स्वजनानुत बन्धून्वा न पश्यति यथान्धदृक् ॥ ६४ ॥ *Ibid*, १०, ६४.

८४ पुत्रमित्रकलत्रार्थे राज्यभोगधनाय च ॥
आगमे निर्गमे प्राज्ञो न विषादं समाचरेत् ॥ ४७ ॥ वामन, अ. ७७.

८५ क्वचित्संभूय गच्छंति पुनरन्यत्र वानर ॥
यथा हि पान्थं गच्छन्तं पथि कश्चित्पथि स्थितः ॥ ४९ ॥
स्कांद, ब्रह्मखं. सेतुमा., अ. ४५.

८६ अधिष्ठानं समिच्छन्ति ह्यचलं निर्बले सति ॥
संसारे सर्वभूतानां तृणबिन्दुवदस्थिरे ॥ ४ ॥

८७ कदलीसारनिःसारे मृगतृष्णेव चंचले ॥
स्थावरे जंगमे सर्वे भूतग्रामे चतुर्विधे ॥ ५ ॥
*Ibid*, आवंत्यखं. रेवाखं., अ. १३३.

८८ तापत्रयमहाज्वालावन्हिभिः सततं नृणाम् ॥
सन्तप्तानां मुनिश्रेष्ठ विष्णुभक्तिसुधार्णवम् ॥ २ ॥
पद्म, उ. खं., २२४.

## ५. पुत्रः

८९ पुत्रेण लोकाञ्जयति पुत्रस्तारयते कुलम् ॥
सत्पुत्रेण महाभाग पिता माता च जन्तवः ॥ ३९ ॥

९० एकः पुत्रो वरो विद्वान्बहुभिर्निर्गुणैस्तु किम् ॥
एकस्तारयते वंशमन्ये सन्तापकारकाः ॥ ४० ॥
पद्म, भूमिखं., अ. १२.

९१ गङ्गातोयेन संपूर्णः कुम्भ एव प्रदृश्यते ॥
सुराया बिन्दुना लिप्तो मद्यकुम्भः प्रजायते ॥ ९ ॥

९२ पापस्य पापसंसर्गात्कुलं पापि प्रजायते ॥
आरनालस्य वै बिन्दुः क्षीरमध्ये प्रयाति चेत् ॥ १० ॥

९३ पश्चान्नाशयते क्षीरमात्मरूपं प्रकाशयेत् ॥
तद्वद्विनाशयेद्वंशं पापः पुत्रो न संशयः ॥ ११ ॥ *Ibid*, अ. २४.

९४ जाते पुत्रोत्तमे वंशः श्रेष्ठः स्यादधमोऽपि च ॥
पुत्रेऽधमे तु श्रेष्ठोऽपि वंशो गच्छति हीनताम् ॥ १४ ॥
*Ibid*, क्रियाखं., १९.

९५ पुत्रे समर्थे यो मूढः पुरुषः स्त्रीजनोऽथ वा ॥
न विरज्येत यो मूढः वंचितः श्रेयसा हि सः ॥ २५ ॥
*Ibid*, उत्तरखं., २१६.

९६ परोऽप्यपत्यं हितकृद्यथौषधं ॥
स्वदेहजोऽप्यामयवत् सुतोऽहितः ॥ ३७ ॥ भागवत, ७, ५.

९७ सर्वार्थसंभवो देहो जनितः पोषितो यतः ॥
न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ॥ ५ ॥

९८ यस्तयोरात्मजः कल्प आत्मना च धनेन च ॥
वृत्तिं न दद्यात्तं प्रेत्य स्वमांसं खादयन्ति हि ॥ ६ ॥ *Ibid*, १०, ४५.

९९ अपुत्रस्य गृहं शून्यं दिशः शून्या ह्यबांधवाः ॥
मूर्खस्य हृदयं शून्यं सर्वशून्यं दरिद्रता ॥ १२८ ॥

१०० मृषायं वदते लोकश्चन्दनं किल शीतलम् ॥
पुत्रगात्रपरिष्वंगश्चन्दनादपि शीतलः ॥ १२९ ॥

१०१ श्मश्रुग्रहणक्रीडंतं धूलिधूसरिताननम् ॥
पुण्यहीना न पश्यंति निजोत्सङ्गसमाहितम् ॥ १३० ॥

१०२ दिगम्बरं गतव्रीडं जटिलं धूलिधूसरम् ॥
पुण्यहीना न पश्यंति गंगाधरमिवात्मजम् ॥ १३१ ॥

१०३ वीणावाद्यस्वरो लोके सुस्वरः श्रूयते किल ॥
रुदितं बालकस्यैव तस्मादाल्हादकारकम् ॥ १३२ ॥

१०४ मृगपक्षिषु काकेषु पशूनां स्वरयोनिषु ॥
पुत्रं तेषु समस्तेषु वल्लभं ब्रुवते बुधाः ॥ १३३ ॥
स्कांद, आवन्त्यखं. रेवाखं., १०३.

## ६. स्त्री

१०५ न स्त्री दुष्यति जारेण न विप्रोऽवेदकर्मणा ॥
बलात्कारोपभुक्ता चेद्वैरिहस्तगतापि वा ॥ ६ ॥
१०६ [न संत्यजेद्दूषितां नारीमृतुकालेन शुद्धयति ॥
पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः ॥ ७ ॥
१०७ भुञ्जते मानुषाः पश्चान्नैता दुष्यन्ति केनचित् ॥
असवर्णेन यो गर्भः स्त्रीणां योनौ निषिच्यते ॥ ८ ॥
१०८ अशुद्धा तु भवेन्नारी यावच्छल्यं न मुञ्चति ॥
निःसृते तु ततः शल्ये रजसा शुद्धयते ततः ॥ ९ ॥] अग्नि, अ. ६४.
१०९ गते भर्तरि या नारी शृङ्गारं कुरुते यदि ॥
रूपं वर्णं च तत्सर्वं शवरूपेण जायते ॥ ८० ॥ पद्म, भूमिखं., ४१.
११० रूपमेव गुणः स्त्रीणां प्रथमं भूषणं शुभे ॥
शीलमेव द्वितीयं च तृतीयं सत्यमेव च ॥ ३० ॥
१११ आर्जवत्वं चतुर्थं च पञ्चमं धर्ममेव हि ॥
मधुरत्वं ततः प्रोक्तं षष्ठमेव वरानने ॥ ३१ ॥
११२ शुद्धत्वं सप्तमं बाले अन्तर्बाह्येषु योषिताम् ॥
अष्टमं हि पितुर्भावः शुश्रूषा नवमं किल ॥ ३२ ॥
११३ सहिष्णुर्दशमं प्रोक्तं रतिश्चैकादशं तथा ॥
पातिव्रत्यं तथा प्रोक्तं द्वादशं वरवर्णिनि ॥ ३३ ॥
*Ibid*, भू. खं., ३४.
११४ परस्त्रीमुखसौन्दर्यं परद्रव्यं च सर्वदा ॥
दृष्ट्वा कामाग्निसंखिन्ना दह्यन्ते मूढमानसाः ॥ ४३ ॥
*Ibid*, क्रि. खं., ४.
११५ तावत्प्रियतमा नारी यावत्तिष्ठति यौवनम् ॥
मृणालकोशां नलिनीं हेमभृङ्गो न गच्छति ॥ ५४ ॥
११६ जम्बूकीं बलवान्सिंहो विहायाङ्कगतामपि ॥
हस्तिनीं न हि किं धत्ते यत्नतः प्रतिपत्तये ॥ ५५ ॥
*Ibid*, क्रि. खं., ५.

११७ महतामपि विप्राग्य्र्य दुर्निवार्यो मनोभवः ॥
शरीरसहजो नूनमनादिर्वासनाक्रमः ॥ ३७ ॥
११८ केशकज्जलशालिन्यो दुःस्पर्शालोचनप्रियाः ॥
यस्मादग्निशिखा नार्यो दहन्ति तृणवन्नरः ॥ ३८ ॥
*Ibid*, पातालखं., १००.

११९ शास्त्रेषूक्तमसन्दिग्धं बहुवारं महाफलम् ॥
दशपुत्रसमा कन्या यापि स्याच्छीलवर्जिता ॥ १५६ ॥
१२० वाक्यमेतत्फलभ्रष्टं पुंसां ग्लानिकरं फलम् ॥
कन्या हि कृपणा शोच्या पितुर्दुःखविवर्धिनी ॥ १५७ ॥
*Ibid*, सृष्टिखं., ४५.

१२१ घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान् ॥
तस्माद् घृतं च वन्हि च नैकस्थाने च धारयेत् ॥ २१ ॥
१२२ यथैव मत्तमातङ्गं सृणिमुद्रयोगतः ॥
स्ववशां कुरुते यन्ता तथा स्त्रीणां प्ररक्षकः ॥ २२ ॥
१२३ पिता रक्षति कौमारे भर्ता रक्षति यौवने ॥
पुत्राश्च स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ २३ ॥
*Ibid*, सृ. खं., ५४.

१२४ [इह चैव स्त्रियो धन्याः शीलस्य परिरक्षणात् ॥
शीलभङ्गे च नारीणां यमलोकः सुदारुणः ॥
शीलं रक्ष्यं सदा स्त्रीभिर्दुष्टसंगविवर्जनात् ॥ ९४ ॥
१२५ शीलेन हि परः स्वर्गः स्त्रीणां वैश्य न संशयः ॥
शूद्रस्य पाकयज्ञेन निषिद्धाम्बरणेन च ॥ ९५ ॥] *Ibid*, स्वर्गखं., ३१.
१२६ पञ्चाननस्य महिषीं कथं प्राप्नोति जम्बुकः ॥
अन्धकारः कथं राजन्प्राप्नोति सवितुः प्रभाम् ॥ २६ ॥
*Ibid*, उत्तरखं., १७.

१२७ दुस्तरो मदनस्तस्मात्सर्वेषां प्राणिनामपि ॥
पुन्नारीरूपवत्कृत्वा मदनेनैव विश्वसृक् ॥ २५ ॥ ब्रह्माण्ड, उ. भा., ८.

१२८ [अतो वदामि नावज्ञा स्त्रीमात्रे क्रियतां क्वचित् ॥ ५८ ॥]
शक्तिरेव हि सर्वत्र कारणं विजयश्रियः ॥

१२९ शक्तेराधारतां प्राप्तैः स्त्रीपुंलिंगैर्न नो भयम् ॥ ५९ ॥

१३० [शक्तिस्तु सर्वतो भाति संसारस्य स्वभावतः ॥
तर्हि तस्या दुराशायाः प्रवृत्तिर्ज्ञायतां त्वया ॥ ६० ॥] *Ibid*, २१.

१३१ याभिः[१] प्रत्याहरेत्कामान्कूर्मोऽङ्गानीव सर्वशः ॥ ॥ ९६ ॥

१३२ न जातु कामः कामानामुपभोगेन शाम्यति ॥
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥ ९७ ॥

१३३ यत्पृथिव्यां व्रीहियवान्हिरण्यं पशवः स्त्रियः ॥
नालमेकस्य तत्सर्वमिति पश्यन्न मुह्यति ॥ ९८ ॥

१३४ यदा न कुरुते भावं सर्वभूतेष्वमंगलम् ॥
कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ॥ ९९ ॥

१३५ यदा परान्न बिभेति यदान्यस्मान्न बिभ्यति ॥
यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ॥ १०० ॥

१३६ या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ॥
यैषा प्राणांतिको रोगस्तां तृष्णां त्यजतः सुखम् ॥ १०१ ॥

१३७ जीर्यंति जीर्यतः केशा दंता जीर्यंति जीर्यतः ॥
जीविताशा धनाशा च जीर्यतोऽपि न जीर्यति ॥ ॥ १०२ ॥

१३८ यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ॥
तृष्णाक्षयसुखस्यैतत्कलां नार्हन्ति षोडशीम् ॥ १०३ ॥
ययातीके कहानीमें—ब्रह्माण्ड, म. भा., ६८;
वायु, ९३, ९५; etc.

१३९ सर्वेषामपि दुर्ज्ञेयं चरितं योषितामपि ॥
विशेषतोऽपि दुर्ज्ञेयं पुंश्चलीनां मनोवचः ॥ ७६ ॥

१४० वेदवेदाङ्गशास्त्रान्तं सर्वं जानाति पण्डितः ॥
कान्तं नान्तं विजानाति विशामाकाशयोषिताम् ॥ ७७ ॥

---

१. 'योभि' इ. पा.

१४१ विषादप्यप्रियो वृद्धो रत्नदोऽपि च योषिताम् ॥
युवा सर्वस्वहर्त्ता चेत्प्राणेभ्योऽपि परः प्रियः ॥ ७८ ॥
ब्रह्मवै. द्वि. भा. कृष्णजन्मखं. पू., अ. २३.

१४२ पुंश्चल्या यो हि विश्वस्तो विधिना स विडंबितः ॥
बहिष्कृतश्च यशसा धर्मेण स्वकुलेन च ॥ २७ ॥ *Ibid*, २७.

१४३ न कामिनीनां कामश्च शृङ्गारेण निवर्तते ॥
अधिकं वर्द्धते शश्वद्यथाऽग्निघृतधारया ॥ १६९ ॥ *Ibid*, २८.

१४४ स्वभाव एष नारीणां नराणामिह दूषणम् ॥
यतोऽर्थान्न प्रमाद्यन्ति प्रतिपाद्य विपश्चितः ॥ १८२ ॥

१४५ अविद्वांसमलं लोके विद्वांसमपि वा पुनः ॥
प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम् ॥ १८३ ॥

१४६ मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ॥
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥१८४॥ भविष्य, ब्राह्मप., ४.

१४७ नित्यं ददाति कामस्य छिद्रं तमनु येऽरयः ॥
योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ॥ ४ ॥ भागवत, ५, ६.

१४८ धिगप्रजां स्त्रियं पापां पत्युश्चागृहसंमताम् ॥
सुप्रजाभिः सपत्नीभिर्दासीमिव तिरस्कृताम् ॥ ४० ॥ *Ibid*, ६, १४.

१४९ शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतम् ॥
हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितम् ॥ ४१ ॥

१५० न हि कश्चित्प्रियः स्त्रीणामञ्जसा स्वाशिषात्मनाम् ॥
पतिं पुत्रं भ्रातरं वा घ्नन्त्यर्थे घातयन्ति च ॥ ४२ ॥ *Ibid*, ६, १८.

१५१ विश्वासं पण्डितो जातु कामिनीषु न याति हि ॥ ९ ॥

१५२ शालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः ॥
सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वताम् ॥ १० ॥ *Ibid*, ७, ९.

१५३ अन्येष्वर्थकृता मैत्री यावदर्थविडम्बनम् ॥
पुंभिः स्त्रीषु कृता यद्वत् सुमनस्स्विव षट्पदैः ॥ ६ ॥ *Ibid*, ४७.

१५४ व्यूढायांश्चापि पुंश्चल्यां मनोऽभ्येति नवं नवम् ॥
बुधोऽसतीं न बिभृयात्तां बिभ्रदुभयच्युतः ॥ ४८ ॥ *Ibid*, १०, ६०.

१५५ योषिद्धिरण्याभरणाम्बरादि-
द्रव्येषु माया रचितेषु मूढः ॥
प्रलोभितात्मा ह्युपभोगबुद्ध्या
पतङ्गवन्नश्यति नष्टदृष्टिः ॥ ८ ॥ *Ibid*, ११, ८.

१५६ पुंश्चल्यापहृतं चित्तं को न्वन्यो मोचितं प्रभुः ॥ १५ ॥
*Ibid*, ११, २६.

१५७ तस्मिन्कलेवरेऽमेध्ये तुच्छनिष्ठे विषज्जते ॥
अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियः ॥ २० ॥

१५८ त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहृतौ ॥
विण्मूत्रपूये रमतां कृमीणां कियदन्तरम् ॥ २१ ॥

१५९ अथापि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवित् ॥
विषयेन्द्रियसंयोगान्मनः क्षुभ्यति नान्यथा ॥ २२ ॥ *Ibid*, ११, २६.

१६० स्त्रीसङ्गमे तथा गीते द्यूते व्याख्यानसंगमे ॥
व्यवहारे तथाहारे त्वर्थानां च समागमे ॥ ६० ॥

१६१ आये व्यये तथा नित्यं त्यक्तलज्जस्तु वै भवेत् ॥ ६१ ॥
लिङ्ग, उ, ३.

१६२ परस्वे परदारेषु न कार्या बुद्धिरुत्तमैः ॥
परस्वं नरकायैव परदाराश्च मृत्यवे ॥ ४४ ॥ वामन, १४.

१६३ चतुष्पथं चैत्यतरुं श्मशानोपवनानि च ॥
दुष्टस्त्रीसंनिकर्षं च वर्जयेन्निशि सर्वदा ॥ १३ ॥

१६४ योषितो नावमन्येत न चासां विश्वसेद्बुधः ॥
न चैवेर्ष्या भवेत्तासु न धिक्कुर्यात्कदाचन ॥ ३० ॥ विष्णु, ३, १२.

१६५ किं पुस्तकेन मूढस्य निःस्त्रीकस्य धनेन किम् ॥ ३६ ॥
शिव, शतरुद्रसं., २७.

१६६ न रात्रौ विन्दते निद्रां कामाग्निपरिवेदितः ॥
दिवापि च कुतस्सौख्यमर्थोपार्जनचिंतया ॥ ५४ ॥

१६७ स्त्रीष्वध्यासितचित्तस्य ये पुंसः शुक्रबिन्दवः ॥
ते सुखाय न मन्यन्ते स्वेदजा इव ते तथा ॥ ५५ ॥

१६८ कृमिभिस्तुद्यमानस्य कुष्ठिनो वानरस्य च ॥
कंडूयनाभितापेन यद्भवेत्स्त्रीषु तद्विदः ॥ ५६ ॥

१६९ यादृशं मन्यते सौख्यं गंडे पूतिविनिर्गमात् ॥
तादृशं स्त्रीषु मन्तव्यं नाधिकं तासु विद्यते ॥ ५७ ॥

शिव, उमासं., २३.

१७० यथा कुभार्यः पुरुषश्चिन्तान्तं न प्रपद्यते ॥
तथैव विमृशंश्चाहं चिन्तान्तं न लभाम्यणु ॥ १३ ॥

स्कांद, मा. खं. कौ. खं., अ. ४.

१७१ जगदाधाररूपा हि त्वयेशोक्ताः पतिव्रताः ॥
गावो विप्राः सनिगमा अलुब्धा दानशीलिनः ॥
सत्यनिष्ठा इति स्वामिंस्तेषां मुख्यतमा सती ॥ ३४ ॥ *Ibid*, ११.

१७२ परभुक्ता यथा नारी परभुक्तामिव स्रजम् ॥
यच्च त्रिभुवनेष्वस्ति सारं तन्मम कथ्यताम् ॥ ६४ ॥

१७३ व्यसनार्णवमभ्येति जलयानैरिवार्णवम् ॥
यःमाश्रित्येंद्रियारातीन्दुर्जयानितराश्रयैः ॥ ६५ ॥

१७४ [ गेहिनो हेलया जिग्युर्दस्यून्दुर्गपतिर्यथा ॥
न केऽपि प्रभवस्तां चाप्यनुकर्तुं गृहेश्वरीम् ॥ ६६ ॥] *Ibid*, १४.

१७५ गृहेश्वरीं सद्गुणभूषितां शुभां
पङ्क्त्वंधयोगेन पतिं समेताम् ॥
न लालयेत्पूरयेन्नैव कामं
स किं पुमान्न पुमान्मे मतोऽस्ति ॥ ९५ ॥ *Ibid*, १४.

१७६ तथापि वः प्रवक्ष्यामि दुर्घटं च द्वयं ध्रुवम् ॥
शिश्नस्य निग्रहः पुत्रा जिव्हाया अपि नित्यशः ॥ २८ ॥

१७७ द्वयं यद्धि भवेद्यस्य स एव स्याज्जनार्दनः ॥ २९ ॥

*Ibid*, वैष्णवखं. वै. मा., २२.

१७८ [ अप्रीतां रोगिणीं नारीमन्तर्वत्नीं धृतव्रताम् ॥
रजस्वलामकामां च न कामेत बलात्पुमान् ॥ ३९ ॥

१७९ प्रीणनं लालनं पोषं रंजनं मार्दवं दयाम् ॥
कृत्वा वधूमुपगमेद्युवतीं प्रेमवान्पतिः ॥
युवतौ कुसुमे चैव विधेयं सुखमिच्छता ॥ ४० ॥

*Ibid*, ब्रह्मखं. ब्रह्मोत्तरखं., १.

१८० [ पतनं साहसानां च नरकस्यैव कारणम् ॥
योनिकुण्डमिदं सृष्टं कुम्भीपाकसमं भुवि ॥ ८१ ॥

१८१ नेत्ररज्ज्वा दृढैर्बद्ध्वा धर्षयन्ति मनस्विनः ॥
कुचरूपैर्महादण्डैस्ताडयमानमचेतसम् ॥ ८२ ॥

१८२ कृत्वा वै पातयंत्याशु नरकं नृपसत्तम ॥
मोहनं सर्वभूतानां नारी चैवं विनिर्मिता ॥ ८३ ॥

१८३ तावद्धत्तं मनःस्थैर्यं श्रुतं सत्यमनाकुलम् ॥
यावन्मत्ताङ्गनाग्रे च वागुरेव सुचेतसाम् ॥ ८४ ॥

१८४ तावत्तपोऽभिवृद्धिस्तु तावद्दानं दया दमः ॥
तावत्स्वाध्यायवृत्तं च तावच्छौचं धृतं व्रतम् ॥ ८५ ॥

१८५ यावत् मत्तमृगीदृष्टि चपलां न विलोकयेत् ॥
तावन्माता पिता तावद् भ्राता तावत्सुहृज्जनः ॥ ८६ ॥

१८६ तावल्लजा भयं तावत्स्वाचारस्तावदेव हि ॥
ज्ञानमौदार्यमैश्वर्यं तावदेव हि भासते ॥
यावन्मत्ताङ्गनापाशैः पतितो नैव बन्धनैः ॥८७॥ *Ibid*, धर्मारण्यखं., ३.

१८७ या भर्त्तारं परित्यज्य मिष्टमश्नाति केवलम् ॥
ग्रामेवासूकरी भूयाद्वल्गुर्वापि श्वविड्भुजा ॥ ४२ ॥

स्कांद, काशीखं., अ. ४.

१८८ धन्या सा जननी लोके धन्योऽसौ जनकः पुनः ॥
धन्यः स च पतिः श्रीमान्येषां गेहे पतिव्रता ॥ ६० ॥

१८९ पितृवंशा मातृवंशाः पतिवंशास्त्रयस्त्रयः ॥
पतिव्रतायाः पुण्येन स्वर्गसौख्यानि भुञ्जते ॥ ६१ ॥ *Ibid.*

१९० विधवानां स्तना यद्वद् हृद्येव विलयन्ति च ॥
उन्नम्योन्नम्य तत्रोच्चैस्तद्वत्खलमनोरथाः ॥ ६६ ॥

१९१ भवेत्कूलंकषा यद्वदल्पवर्षेण कन्नदी ॥
खलंधिरल्पवर्षेण तद्वत्स्यात्स्वकुलंकषा ॥ ६७ ॥

१९२ अविज्ञायान्यसामर्थ्यं स्वसामर्थ्यं प्रदर्शयेत् ॥
उपहासमवाप्नोति तथैवायमिहाचलः (विंध्य) ॥६८॥ स्कांद, काशीखं., ५॰

१९३ विधिनापि कृता संध्या कालातीताऽफला भवेत् ॥
अयमेव हि दृष्टांतो वंध्यास्त्रीमैथुनं यथा ॥ ५७ ॥ *Ibid*, ३५.

१९४ जलौकयोपमीयंते प्रमदा मन्दबुद्धिभिः ॥
मृगीदृशां जलौकानां विचारान्महदन्तरम् ॥ ८५ ॥

१९५ जलौका केवलं रक्तमाददाना तपस्विनी ॥
प्रमदा सर्वदा दत्ते चित्तं वित्तं बलं सुखम् ॥ ८६ ॥

१९६ [ दक्षा प्रजावती साध्वी प्रियवाक्यवशंवदा ॥
गुणैरमीभिः संयुक्ता सा श्रीः स्त्रीरूपधारिणी ॥] *Ibid*, अ. ३६.

१९७ त्रिशूलासिगदाशक्तिदुंदुभ्याकृतिरेखया ॥
नितंबिनी कीर्तिमती त्यागेन पृथिवीतले ॥ ७९ ॥ *Ibid*, ३७.

१९८ [ स्त्रियः पवित्राः सततं नैता दुष्यन्ति केनचित् ॥
मासि मासि रजस्तासां दुष्कृतान्यपकर्षति ॥ ३७ ॥

१९९ पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः ॥
भुञ्जते मानुषाः पञ्चान्नैता दुष्यन्ति केनचित् ॥ ३८ ॥

२०० स्त्रीणां शौचं ददौ सोमः पावकः सर्वमेध्यताम् ॥
कल्याणवाणीं गंधर्वास्तेन मेध्याः सदा स्त्रियः ॥ ३९ ॥

२०१ कन्यां भुंक्ते रजःकालेऽग्निः शशी लोमदर्शने ॥
स्तनोद्भवेषु गंधर्वास्तत्प्रागेव प्रदीयते ॥ ४० ॥

२०२ शयनासनयानानि कुणपं स्त्रीमुखं कुशाः ॥
यज्ञपात्राणि सर्वाणि न दुष्यन्ति बुधाः क्वचित् ॥ ४४ ॥ ]

२०३ वत्सः प्रस्रवणे मेध्यः शकुनिः फलपातने ॥
नार्यो रतिप्रयोगेषु श्वामृगग्रहणे शुचिः ॥ ४५ ॥

२०४ अजाश्वयोर्मुखं मेध्यं गावो मेध्यास्तु पृष्ठतः ॥
पादयोर्ब्राह्मणा मेध्याः स्त्रियो मेध्यास्तु सर्वतः ॥ ४६ ॥

२०५ [ बलात्कारोपभुक्ता वा चौरहस्तगतापि वा ॥
न त्याज्या दयिता नारी नास्यास्त्यागो विधीयते ॥ ४७ ॥ ]

२०६ आम्लेन ताम्रशुद्धिः स्याच्छुध्दिः कांस्यस्य भस्मना ॥
संशुध्दी रजसां नार्यास्तटिन्या वेगतः शुचिः ॥ ४८ ॥

२०७ [ मनसापि हि या नेह चिन्तयेत्पुरुषान्तरम् ॥
सोमया सह सौख्यानि भुंक्ते चात्रापि कीर्तितम् ॥ ४९ ॥

२०८ तदभ्यर्च्याः सुवासिन्यो भूषणाच्छादनाशनैः ॥
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥ ५० ॥ ]

२०९ यत्र नार्यः प्रमुदिता भूषणाच्छादनाशनैः ॥
रमन्ते देवतास्तत्र स्युस्तत्र सफलाः क्रियाः ॥ ५१ ॥ *Ibid*, ४०.

२१० अभोगिनौ मण्डलिनौ तत्क्षणान्मुक्तकञ्चुकौ ॥
वरमाशीविषौ स्पृष्टौ न तु पत्न्याः पयोधरौ ॥ १४४ ॥
*Ibid*, नागरखं., १४४.

२११ निर्दयत्वं तथा द्रोहं कुटिलत्वं विशेषतः ॥
अशौचं निर्घृणत्वं च स्त्रीणां दोषाः स्वभावजाः ॥ ६० ॥

२१२ अन्तर्विषमया ह्येता बहिर्भागे मनोरमाः ॥
गुञ्जाफलसमाकारा योषितः सर्वदेव हि ॥ ६१ ॥

२१३ उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ॥
मन्वादयस्तथान्येऽपि स्त्रीबुद्धेस्तत्र किंचन ॥ ६२ ॥

२१४ पीयूषमधरे वासं हृदि हालाहलं विषम् ॥
आस्वाद्यतेऽधरस्तेन हृदयं च प्रपीड्यते ॥ ६३ ॥

२१५ अलक्तको यथा रक्तो नरः कामी तथैव च ॥
हृतसारस्तथा सोऽपि पादमूले निपात्यते ॥ ६४ ॥

२१६ संसारभ्रमणं नारी प्रथमेऽपि समागमे ॥
वन्हिप्रदक्षिणन्यायव्याजेनैव प्रदर्शयेत् ॥ ६७ ॥

२१७ एतास्तु निर्घृणत्वेन निर्दयत्वेन नित्यशः ॥
विशेषाज्जाड्यकृत्येन दूषयन्ति कुलत्रयम् ॥ ६८ ॥

२१८ कुलत्रयकृतं कीर्त्या निजया धवलीकृतम् ॥
कृष्णं करोत्यकृत्येन नारी दीपशिखेव तु ॥ ६९ ॥
२१९ धर्मवृक्षस्य वाताली चित्तपद्मशशिप्रभा ॥
सृष्टा कामार्णवग्राही केन मोक्षदृढार्गला ॥ ७० ॥
२२० कारासंतानकूटस्य संसारवनवागुरा ॥
स्वर्गमार्गमहागर्ता पुंसां स्त्री वेधसा कृता ॥ ७१ ॥
२२१ वेधसा बन्धनं किंचिन्नृणामन्यदपश्यता ॥
स्त्रीरूपेण ततः कोऽपि पाशोऽयं सुदृढः कृतः ॥ ७२ ॥ *Ibid*, १५८.
२२२ परं स्त्रीणां स्वभावोऽयं सर्वासां सुरसत्तमाः ॥
अपि सह्यो वज्रपातः सपत्न्या च पुनः कथा ॥ ६ ॥ *Ibid*, १९३.
२२३ लक्ष्म्याः सर्वत्र गामिन्या दोषो नैव प्रजायते ॥
यथा सर्वमयो विष्णुर्न दोषैरनुभूयते ॥ ३९ ॥ *Ibid*, २३९.
२२४ बान्धवेषु चिरं वासो नारीणां न यशस्करः ॥
मनोरथा बान्धवानां नार्या भर्तृगृहे स्थितिः ॥ ९८ ॥
*Ibid*, प्रभासखं., ११.
२२५ अवध्याश्च स्त्रियः प्राहुस्तिर्यग्योनिगता अपि ॥ १२५ ॥
*Ibid*, प्र. क्षे. मा., ३३.
२२६ तावद्धैर्यं तपः सत्यं तावत्स्थैर्यं कुलत्रपा ॥
यावत्पश्यति नो नारीमेकान्ते च विशेषतः ॥ ७० ॥
*Ibid*, अर्बुदखं., ३६.

## ५. माता.

२२७ गर्भक्लेशे परं दुःखं माता जानाति यादृशम् ॥
वात्सल्यं चाधिकं मातुर्दृश्यते न तु पैतृकम् ॥ २१ ॥
२२८ गुरूणामेव सर्वेषां माता गुरुतरा स्मृता ॥
एकस्यापि सुतस्यैव न दृष्टा निष्कृतिः श्रुतौ ॥ २२ ॥
२२९ गते पितरि पञ्चत्वं माता पुत्रस्य निष्कृतिः ॥
न च मातृविहीनस्य ममत्वं कुरुते पिता ॥ २३ ॥

२३० विकलो मातृहीनस्य पुत्रो हि प्रोच्यते तदा ॥
यदा स वृद्धो भवति तदा भवति दुःखितः ॥
तदा शून्यं जगत्सर्वं यदा माता वियुज्यते ॥ २४ ॥
स्कांद, आवन्त्यखं. चतुराशीतिलिङ्गमा., ७६.

## ६. विद्या-विद्यार्थी

२३१ अपारे काव्यसंसारे कविरेव प्रजापतिः ॥
यथा वै रोचते विश्वं तथेदं परिवर्त्तते ॥ १० ॥ अग्नि, ३३९.

२३२ विद्यया प्राप्यते सौख्यं यशः कीर्तिस्तथाऽतुला ॥ २५ ॥

२३३ ज्ञानं स्वर्गश्च मोक्षश्च तस्माद्विद्यां प्रसाधय ॥
पूर्वं सुदुःखमूला तु पश्चाद्विद्या सुखप्रदा ॥२६॥ पद्म, भूमिखं., १२२.

२३४ न सभां प्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन् ॥
अब्रुवन्विब्रुवन्नज्ञो नरः किल्बिषमश्नुते ॥ १० ॥ भागवत, १०, ४४.

२३५ [ ईशो दुरत्ययः काल इति सत्यवती श्रुतिः ॥
वृद्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ॥ ३१ ॥

२३६ सदसस्पतीनतिक्रम्य गोपालः कुलपांसनः ॥
यथा काकः पुरोडाशं सपर्यां कथमर्हति ॥ ३४ ॥ ] *Ibid*, १०, ७४.

२३७ केवलं पाठमात्रेण यश्च संतुष्यते नरः ॥
तथा पंडितमानी च कोऽन्यस्तस्मात्पशुर्मतः ॥ ८७ ॥

२३८ न छन्दांसि वृजिनात्तारयन्ति
मायाविनं माययाऽऽवर्तमानम् ॥
नीडं शकुन्ता इव जातपक्षा-
श्छंदांस्येनं प्रजहत्यन्तकाले ॥ ८८ ॥

२३९ स्वर्गाय बद्धकक्षो यः पाठमात्रेण ब्राह्मणः ॥
स बालो मातुरङ्कस्थो ग्रहीतुं सोममिच्छति ॥ पद्म, सृ. खं., १८.

२४० सभागतानां यः सभ्यः पक्षपातं समाश्रयेत् ॥
तमाहुः कुक्कुटं देवास्तस्याप्यघं विगर्हितम् ॥ ८८ ॥ वामन, १४.

२४१ [ शब्दजातमशेषं तु धत्ते शर्वस्य वल्लभा ॥
अर्थरूपं यदखिलं धत्ते मुग्धेन्दुशेखरः ॥ ]
[ इति वायुपुराणवचनमिति मल्लिनाथः
स्वटीकायां कथयति (रघुवंश, १, १.) ]

## ७. आत्मदोषाः

२४२ आत्मदोषैर्नियच्छन्ति सर्वे दुःखसुखे जनाः ॥
मन्ये दुश्चरितं तस्मिंस्तस्येयं निष्कृतिः कृता ॥ ३० ॥ मत्स्य, २७.

## आत्मदोष–(१) कामः

२४३ उप्यमानं बहुक्षेत्रं स्वयं निर्वीर्यतामियात् ॥
न कल्पते पुनः सूत्या उप्तं बीजं च नश्यति ॥ ३३ ॥
२४४ एवं कामाशयं चित्तं कामानामतिसेवया ॥
विरज्येत यथा राजन्नाग्निवत्कामबिन्दुभिः ॥ ३४ ॥ भागवत, ७, ११.
२४५ काम एष महाशत्रुस्तमेकं निर्जयेद्दृढम् ॥
जितकामा महात्मानस्तैर्जितं निखिलं जगत् ॥ २१ ॥
२४६ एतच्च तपसो मूलं तपसो मूलमेव च ॥
सर्वदा कामविजयः सङ्कल्पविजयस्तथा ॥ २२ ॥
स्कांद, नागरखं., २३९.

## आत्मदोष–(२) कृपणः

२४७ न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक् ॥
तस्य तानिच्छतो यच्छेद्यदि सोऽपि तथाविधः ॥ ४९ ॥
२४८ स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि ॥
न राति (दाति ?) रोगिणोऽपथ्यं वाञ्छतो हि भिषक्तमः ॥ ५० ॥
भागवत, ६, ९.
२४९ किं दुःसहं न साधूनां विदुषां किमपेक्षितम् ॥
किमकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनाम् ॥ ५८ ॥
*Ibid*, १०, १.
२५० हित्वाऽन्यान्भजते यं श्रीः पादस्पर्शाशया सकृत् ॥
आत्मदोषापवर्गेण तद्याञ्चा जनमोहिनी ॥ ४६ ॥ *Ibid*, १०, २३.

२५१ प्रायेणार्थाः कदर्याणां न सुखाय कदाचन ॥
इह चात्मोपतापाय मृतस्य नरकाय च ॥ १५ ॥ *Ibid*, ११, २३.

## आत्मदोष (३)—क्रोध :

२५२ यः परेषां नरो नित्यमतिवादांस्तितिक्षति ॥
देवयानि विजानीहि तेन सर्वमिदं जितम् ॥ १ ॥
२५३ यः समुत्पतितं क्रोधं निगृह्णाति हयं यथा ॥
स यन्तेत्युच्यते सद्भिर्न यो रश्मिषु लम्बते ॥ २ ॥
२५४ यः समुत्पतितं क्रोधमक्रोधेन नियच्छति ॥
देवयानि विजानीहि तेन सर्वमिदं जितम् ॥ ३ ॥
२५५ यः समुत्पतितं क्रोधं क्षमयैव निरस्यति ॥
यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते ॥ ४ ॥
२५६ यस्तु भावयते धर्मं योऽतिमात्रं तितिक्षति ॥
यश्च तप्तो न तपति भृशं सोऽर्थस्य भाजनम् ॥ ५ ॥ मत्स्य, अ. २८.
२५७ अक्रोधनः क्रोधनेभ्यो विशिष्टः
तथा तितिक्षुरतितिक्षोर्विशिष्टः ॥
अमानुषेभ्यो मानुषश्च प्रधानो
विद्वांस्तथैवाविदुषः प्रधानः ॥ ६ ॥
२५८ आक्रोश्यमानो नाक्रोशेन्मन्युमेव तितिक्षति ॥
आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति ॥ ७ ॥
२५९ नारुन्तुदस्यान्न नृशंसवादी
न हीनतः परमभ्याददीत ॥
ययास्य वाचा पर उद्विजेत
न तां वदेद्रुशतीं पापलौल्याम् ॥ ८ ॥
२६० अरुन्तुदं पुरुषं तीव्रवाचं
वाक्कण्टकैर्वितुदन्तं मनुष्यम् ॥
विन्द्यादलक्ष्मीकतमं जनानां
मुखे निबद्धं निर्ऋतिं वहन्तम् ॥ ९ ॥

२६१ सद्भिः पुरस्तादभिपूजितः स्या-
त्सद्भिस्तथा पृष्ठतो रक्षितः स्यात् ॥
सदा सतामतिवादांस्तितिक्षेत्
सतां वृत्तं पालयन्साधुवृत्तः ॥ १० ॥
२६२ वाक्सायका वदनान्निष्पतन्ति
यैराहतः शोचति वा ऋयहानि ॥
परस्य नो मर्मसु ते पतन्ति
तान्पंडितो नावसृजेत्परेषु ॥ ११ ॥
२६३ नास्तीदृशं संवननं त्रिषु लोकेषु किञ्चन ॥
यथा मैत्री च लोकेषु दानं च मधुरा च वाक् ॥ १२ ॥
२६४ तस्मात्सान्त्वं सदा वाच्यं न वाच्यं परुषं क्वचित् ॥
पूज्यान्सम्पूजयेद्द्द्यान्नाभिशापं कदाचन ॥ १३ ॥ *Ibid*, ३६.
२६५ अकार्यं क्रियते मूढैः प्रायः क्रोधसमीरितैः ॥ ३ ॥
२६६ क्रोधेन नश्यते कीर्तिः क्रोधो हन्ति स्थिरां श्रियम् ॥
अपरिच्छन्नतत्त्वार्था पुत्रं शापितवत्यहम् ॥
विपरीतार्थबुद्धीनां सुलभो विपदोदयः ॥ ४ ॥ मत्स्य, १५८.
२६७ नास्ति क्षुधासमं दुःखं नास्ति रोगः क्षुधासमः ॥
नास्त्यरोगसमं सौख्यं नास्ति क्रोधसमो रिपुः ॥ २३ ॥
शिव, उमासं., ११.
२६८ मूढानामेव भवति क्रोधो ज्ञानवतां कुतः ॥
हन्यते तात कः केन यतः स्वकृतभुक्पुमान् ॥ १७ ॥
स्कांद, काशीखं., ४६.

## आत्मदोष (४)–चिन्ता

२६९ एकैव सार्थका चिन्ता धर्मस्यार्थे विचिन्त्यते ॥
द्वितीया सार्थका चिन्ता योगिनां धर्मनन्दिनी ॥ २९ ॥
२७० अन्या निरर्थिका चिन्ता बलतेजःप्रणाशिनी ॥
नाशयेत्सर्वसौख्यं तु रूपहानिं निदर्शयेत् ॥ ३१ ॥

२७१ तृष्णां मोहं तथा लोभमेतांश्चिन्ता हि प्रापयेत् ॥
पापमुत्पादयेच्चिन्ता चिन्तिता च दिने दिने ॥ ३२ ॥
२७२ चिन्ताव्याधिप्रकाशाय नरकाय प्रकल्पयेत् ॥
तस्माच्चिन्तां परित्यज्य चानुवर्तस्व शोभने ॥ ३३ ॥

पद्म, भूमिखं., १४.

२७३ कुटुम्बचिन्ताकुलितस्य पुंसः श्रुतं च शीलं च गुणाश्च सर्वे ॥
अपक्वकुम्भे निहिता इवाऽऽपः प्रयान्ति देहेन समं विनाशम् ॥१५८॥

*Ibid*, ६६.

२७४ युक्तमुक्तं पुराविद्भिश्चिन्तामूर्तिः सुदारुणा ॥
न भेषजैर्लङ्घनैर्वा न चान्यैरुपशाम्यति ॥ ६८ ॥
२७५ चिन्ताज्वरो मनुष्याणां क्षुधां निद्रां बलं हरेत् ॥
रूपमुत्साहबुद्धि श्रीं जीवितं च न संशयः ॥ ६९ ॥
२७६ ज्वरो व्यतीते षडहे जीर्णज्वर इहोच्यते ॥
असौ चिन्ताज्वरस्तीव्रः प्रत्यहं नवतां व्रजेत् ॥ ७० ॥
२७७ धन्यो धन्वन्तरिर्नात्र चरकश्चरतीह न ॥
नासत्यावपि नासत्यावत्र चिन्ताज्वरे किल ॥ ७१ ॥

स्कांद, काशीखं., १.

२७८ यश्चिन्ताख्यो ज्वरः पुंसामौषधैर्नापि शाम्यति ॥ ११ ॥ *Ibid*, ४७

## आत्मदोष (५) नीच-स्वभावः-जनः

२७९ अन्तर्दृढं बहिः श्लक्ष्णं बदरीफलवद्वचः ॥ १८३ ॥ पद्म, क्रि. खं., ५.
२८० गौरवेण विना वीर न सतां विक्रमो भवेत् ॥
ज्वलिष्यति कथं वह्निर्विना काष्ठं घृतादिभिः ॥ ८१ ॥
२८१ न तु सिंहसमाः श्वानः सर्वाभरणभूषिताः ॥ ८२ ॥
२८२ सरोजिनीगुणं वेत्ति भृङ्ग एव न दर्दुरः ॥ १०४ ॥
२८३ शुभ्रस्य जलदस्यापि गगनेकस्य नोदयः ॥
तथापि नो भजेदन्यं विना चन्द्रं कुमुद्वती ॥ १०५ ॥
२८४ कार्ये तु दुःखसाध्ये तु कार्यो नातिश्रमो जनैः ॥
कार्ये सिद्धे श्रमो न स्यादसिद्धे श्रम एव हि ॥ ११३ ॥ *Ibid*.

२८५ शुभमिच्छन्निजं प्राज्ञो नीचेभ्यो न हि निश्चयेत् ॥
क्षणमेकमपि प्राज्ञो नीचेभ्यो न हि निश्चयेत् ॥ १०५ ॥ *Ibid*, ६.

२८६ नारायणयशोगीतं प्रतिकण्ठं विनिःसृतम् ॥
श्रुत्वा मूढा न तृप्यन्ति श्वानो वीणाक्वणं यथा ॥ १३ ॥ *Ibid*, २३.

२८७ कार्पण्यवृत्तिः स्वजनेषु निन्दा
कुचेलता नीचजनेषु भक्तिः ॥
अतीव रोषः कटुका च वाणी
नरस्य चिन्हं नरकागतस्य ॥ १३२ ॥ *Ibid*, सृ. खं., ५१

२८८ मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै ॥
निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ॥ ९ ॥ भागवत, १, १६.

२८९ किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह ॥
वरं मुहूर्तं विदितं घटेत श्रेयसे यतः ॥ १२ ॥ *Ibid*, २, १.

२९० य उद्यतमनादृत्य कीनाशमभियाचतः ॥
क्षीयते तद्यशः स्फीतं मानश्चावज्ञया हतः ॥ १३ ॥ *Ibid*, ३, २२.

२९१ कं योजयन्मनुजोऽर्थं लभेत
निपातयन्नष्टदशं हि गर्ते ॥
एवं नराणां विषयस्पृहा च
निपातयन्निरयं त्वन्धकूपे ॥ १६ ॥

२९२ लोकः स्वयं श्रेयसि नष्टदृष्टि-
र्योऽर्थान्समीहेत निकामकामः ॥
अन्योऽन्यवैरः सुखलेशहेतो-
रनन्तदुःखं च न वेद मूढः ॥ १७ ॥ *Ibid*, ५, ५.

२९३ योऽध्रुवेणात्मनो नाथा न धर्मं न यशः पुमान् ॥
ईहेत भूतदयया स शोच्यः स्थावरैरपि ॥ ८ ॥ *Ibid*, ६, १०.

२९४ सन्ति ह्यसाधवो लोके दुर्मैत्राश्छद्मवेषिणः ॥
तेषामुदेत्यघं काले रोगः पातकिनामिव ॥ २७ ॥ *Ibid*, ७, ५.

२९५ स एव जीवन्खलु संपरेतो
वर्तेत योऽत्यन्तनृशंसितेन ॥
देहे मृते तं मनुजाः शपन्ति
गन्ता तमोऽन्धं तनुमानिनो ध्रुवम् ॥ २२ ॥ *Ibid*, १०, २.

२९६ शोकहर्षभयद्वेषलोभमोहमदान्विताः ॥
मिथो घ्नन्तं न पश्यन्ति भावैर्भावं पृथग्दृशः ॥ २७ ॥ *Ibid*, १०,४.

२९७ आयुःश्रियं यशो धर्मं लोकानाशिष एव च ॥
हन्ति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ॥ ४६ ॥ *Ibid*.

श्रीकृष्ण अजगरके मुखमें प्रवेश करते समय कहता है :

२९८ कृत्यं किमत्रास्य खलस्य जीवनं
न वा अमीषां च सतां विहिंसनम् ॥
द्वयं कथं स्यादिति संविचिन्त्य त–
ज्ज्ञात्वाविशत्तुण्डमशेषदृग्घरिः ॥ २८ ॥ *Ibid*, १०, १२

२९९ नैतद्विचित्रं मनुजार्भमायिनः
परावराणां परमस्य वेधसः ॥
अघोऽपि यत्स्पर्शनधौतपातकः
प्रापात्मसाम्यं त्वसतां सुदुर्लभम् ॥ ३८ ॥ *Ibid*.

कालिया कहता है :

३०० वयं खलाः सहोत्पत्त्या तामसा दीर्घमन्यवः ॥
स्वभावो दुस्त्यजो नाथ लोकानां यदसद्ग्रहः ॥ ५६ ॥
*Ibid*, १०, १६.

३०१ नूनं नानामदोन्नद्धाः शान्तिं नेच्छन्त्यसाधवः ॥
तेषां हि प्रशमो दण्डः पशूनां लगुडो यथा ॥ ३१ ॥ *Ibid*, १०, ६८.

३०२ योऽनित्येन शरीरेण सतां गेयं यशो ध्रुवम् ॥
नाऽऽचिनोति स्वयं कल्पः स वाच्यः शोच्य एव सः ॥ २० ॥
*Ibid*, १०, ७२.

३०३ अदान्तस्याविनीतस्य वृथा पण्डितमानिनः ॥
न गुणाय भवन्ति स्म नटस्येवाजितात्मनः ॥ २६ ॥ *Ibid*, १०, ७८.

३०४ यस्यात्मबुद्धिः कुणपे त्रिधातुके
स्वधीः कलत्रादिषु भौम इज्यधीः ॥
यत्तीर्थबुद्धिः सलिले न कर्हिचि–
ज्जनेष्वभिज्ञेषु स एव गोखरः ॥ १३ ॥ *Ibid*, १०, ८४.

३०५ कर्मण्यारभमाणानां दुःखहत्यै सुखाय च ॥
पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणाम् ॥ १८ ॥ *Ibid,* ११, ३.
३०६ कर्मण्यकोविदाः स्तब्धा मूर्खाः पण्डितमानिनः ॥
वदन्ति चाटुकान्मूढा यया माध्व्या गिरोत्सुकाः ॥ ६ ॥
एत आत्महनोऽशान्ता अज्ञाने ज्ञानमानिनः ॥
सीदन्त्यकृतकृत्या वै कालध्वस्तमनोरथाः ॥ १७ ॥ *Ibid.*
३०७ न तथा तप्यते विद्धः पुमान्बाणैः सुमर्मगैः ॥
यथा तुदन्ति मर्मस्था ह्यसतां परुषेषवः ॥ ३ ॥ *Ibid,* ११. २३.
३०८ सङ्गं न कुर्यादसतां शिश्नोदरतृपां क्वचित् ॥
तस्यानुगस्तमस्यन्धे पतत्यन्धानुगान्धवत् ॥ ३ ॥ *Ibid,* ११, २६.
३०९ परस्वभावकर्माणि यः प्रशंसति निन्दति ॥
स आशु भ्रश्यते स्वार्थादसत्याभिनिवेशतः ॥ २ ॥ *Ibid,* ११, २८

## आत्मदोष (६) मद-मानौ

३१० ऐश्वर्यं च मदश्चैव कामश्चैव महीतले ॥
त्रय एते विवेकस्य तेजो घ्नन्ति किमद्भुतम् ॥ २४ ॥

पद्म, क्रियाखं. अ. ५.

३११ कामदर्पादिशीलानामविचारितकारिणाम् ॥
आयुषा सह नश्यन्ति सम्पदो मूढचेतसाम् ॥२९॥ पद्म, पातालखं., ९९.
३१२ अल्पं दर्पबलं दैत्य स्थिरमक्रोधजं बलम् ॥
हतस्त्वं दर्पजैर्दोषैर्हित्वा यो भाषसे क्षमाम् ॥ २६८ ॥

पद्म, सृष्टिखं., ४३.

३१३ वैरानुबन्ध एतावानामृत्योरिह देहिनाम् ॥
अज्ञानप्रभवो मन्युरहंमानोपबृंहितः ॥ १३ ॥ भागवत, १०, १४.
३१४ मानापमानौ यावेतौ तावेवाहुर्विषामृते ॥
अपमानोऽमृतं तत्र मानस्तु विषमं विषम् ॥ ३ ॥ मार्कण्डेय, ४१.
३१५ अहो मदावलेपोऽयमसाराणां दुरात्मनाम् ॥
कौरवाणां महीपत्वमस्माकं किल कालजम् ॥ ४ ॥] विष्णु, ५, ३५.
३१६ विद्यामदो धनमदस्तृतीयोऽभिजनोद्भवः ॥
एते मदावलिप्तानामेत एव सतां दमाः ॥१४॥ स्कांद, नागरखं., ३७.
३१७ मद एव मनुष्याणां शरीरस्थो महारिपुः ॥
सदा स एव निग्राह्यः सुप्ते दैवे विशेषतः ॥ २६ ॥ *Ibid,* २३८.

३१८ दुर्विनीतः श्रियं प्राप्य विद्यामैश्वर्यमेव च ॥
न तिष्ठति चिरं कालं यथाहं मदगर्वितः ॥ १८ ॥ *Ibid*, २४९.

## आत्मदोष (७)—मोहः

३१९ मोहः सदाऽविवेकश्च वर्जनीयः प्रयत्नतः ॥
तेन त्यक्तो नरो ज्ञानी न ज्ञानी मोहसंश्रयात् ॥ २५ ॥
स्कांद, नागरखं., २३८.

३२० अर्थसंपद्विमोहाय बहुशोकाय चैव हि ॥
तस्मादर्थमनर्थक्यं श्रेयोऽर्थी दूरतस्त्यजेत् ॥ २६ ॥

३२१ यस्य धर्मार्थमप्यर्थास्तस्यापि न हि दृश्यते ॥
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ २७ ॥
*Ibid*, प्रभासक्षे. मा., २५९.

## आत्मदोष (८)—मत्सरः

३२२ ते तु मात्सर्यदोषेण नष्टाचाराः पतन्त्यधः ॥
मात्सर्यं सर्वनाशाय मात्सर्यं सर्वनाशकम् ॥ ३५ ॥ वराह, १४८.

## आत्मदोष (९)—लोभ—आशा

३२३ प्रमादात्सर्वभूतानि विनश्यन्ति न संशयः ॥
न च लोभेन चर्तव्यं विषमस्थं तृण क्वचित् ॥ ३६१ ॥

३२४ लोभाद्विनाशः सर्वेषामिह लोके परत्र च ॥
समुद्रमटवीं पुत्र विशन्ति लोभमोहिता. ॥ ३६२ ॥

३२५ लोभादकार्यमत्युग्रं विद्वानपि समाचरेत् ॥
लोभात्प्रमादाद्विस्रंभात्त्रिभिर्नाशो भवेन्नृणाम् ॥ ३६३ ॥

३२६ तस्माल्लोभं न कुर्वीत न प्रमादं न विश्वसेत् ॥
आत्मा हि सततं पुत्र रक्षितव्यः प्रयत्नतः ॥ ३६४ ॥
पद्म, सृ. खं., १८.

३२७ लोभात्प्रवर्तते कामः कामात्पापं प्रवर्तते ॥
पापान्मृत्युर्मृतेऽपि स्याद् दुस्तरे नरके स्थितिः ॥ ४६ ॥

३२८ विवेकस्त्रिषु लोकेषु सम्पदां परमं पदम् ॥
अविवेको हि लोकानामापदां परमं पदम् ॥ ४७ ॥
*Ibid*, क्रि., खं., ५.

३२९ लोभो हि धनहीनानां जनानां ज्ञानमाहरेत् ॥
शुचिकाले दिनाधीशः कुल्यानामिव जीवनम् ॥ ६० ॥
*Ibid*, उ. खं., २१४.

३३० असंतोषः परं पापमित्याह भगवान्हरिः ॥
लोभः पापस्य बीजोऽयं मोहो मूलं च तस्य वै ॥
असत्यं तस्य हि स्कन्धो महाशाखा सुविस्तरात् ॥ ५४ ॥
३३१ मदकौटिल्यपत्राणि कुबुद्ध्या पुष्पितः सदा ॥
अनृतं तस्य सौगन्धमज्ञानं फलमेव च ॥ ५५ ॥
३३२ कुड्यं पाषाणचौराश्च क्रूराः कूटाश्च पापिनः ॥
पक्षिणो मोहवृक्षस्य महाशाखासमाश्रिताः ॥ ५६ ॥
३३३ अज्ञानं सुफलं तस्य रसो धर्मं फलस्य हि ॥
भावोदकेन समृद्धिस्तस्य श्रद्धा ऋतुप्रिया ॥ ५७ ॥
३३४ अधर्मेषु रसस्तस्य उत्क्लेदैर्मधुरायते ॥
तादृशैश्च फलैश्चैव सफलो लोभपादपः ॥ ५८ ॥
३३५ तस्य छायां समाश्रित्य यो नरः परिवर्तते ॥
फलानि तस्य सोऽश्नाति स्वपक्वानि दिने दिने ॥ ५९ ॥
३३७ फलानां च रसेनापि अधर्मेण तु पोषितः ॥
स सम्पुष्टो भवेन्मर्त्यः पतनाय प्रयच्छति ॥ ६० ॥
३३८ यो हि विद्वान्नचेत्कान्तमूर्खाणां पथमेव हि ॥
मृषा चिन्तयते नित्यं दिवारात्रौ विमोहितः ॥ ६२ ॥
पद्म, पातालखं., ८७.

३३९ गन्धर्वनगरप्रख्याः स्वप्नमायामनोरथाः ॥ २३ ॥ भागवत, ६, १५.

३४० सप्तद्वीपाधिपतयो नृपा वैन्यगयादयः ॥
अर्थकामैर्गता नान्तं तृष्णाया इति नः श्रुतम् ॥ २३ ॥
३४१ यदृच्छयोपपन्नेन सन्तुष्टो वर्तते सुखम् ॥
नासन्तुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः ॥ २४ ॥

३४२ पुंसोऽयं संसृतेर्हेतुरसन्तोषोऽर्थकामयोः ॥
यदृच्छयोपपन्नेन सन्तोषो मुक्तये स्मृतः ॥ २५ ॥

३४३ यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्धते ॥
तत्प्रशाम्यत्यसन्तोषादम्भसेवाशुशुक्षणिः ॥ २६ ॥ भागवत, ८, १९.

३४४ देहोऽपि ममताभाक्चेत्तर्ह्यसौ नात्मवत्प्रियः ॥
यज्जीर्यत्यपि देहेऽस्मिञ्जीविताशा बलीयसी ॥ ५३ ॥

३४५ तस्मात्प्रियतमः स्वात्मा सर्वेषामपि देहिनाम् ॥
तदर्थमेव सकलं जगदेतच्चराचरम् ॥ ५४ ॥ *Ibid*, १०, १४.

३४६ आशा हि परमं दुःखं नैराश्यं परमं सुखम् ॥
यथा सञ्छिद्य कान्ताशां सुखं सुष्वाप पिङ्गला ॥ ४३ ॥
*Ibid*, ११, ८.

ऋषी सौभरि कहता है : अहो मे मोहस्यातिविस्तारः !

३४७ मनोरथानां न समाप्तिरस्ति
वर्षायुतेनाप्यथवापि लक्ष्यैः ॥
पूर्णेषु पूर्णेषु पुनर्नवाना—
मुत्पत्तयः सन्ति मनोरथानाम् ॥ ११५ ॥

३४८ आमृत्युतो नैव मनोरथानां
अतोऽस्ति विज्ञातमिदं मयाद्य ॥
मनोरथासक्तिपरस्य चित्तं
न जायते वै परमार्थसंगि ॥ ११९ ॥ विष्णु, ४, २.

३४९ ये स्वपन्ति सुखं रात्रौ तेषां कायाग्निरिध्यते ॥
आहारं प्रतिगृह्णाति ततः पुष्टिकरं परम् ॥ ३६ ॥

३५० आशापाशैः परीताङ्गा ये भवन्ति नरोर्दिताः ॥
ते रात्रौ शेरते नैव तदप्राप्तिविचिन्तया ॥ ३८ ॥

३५१ नैवाग्निर्दीप्यते तेषां जाठरश्च ततः परम् ॥
आहारं वांछते नैव तन्न तेजोऽभिवर्धनम् ॥ ३९ ॥

३५२ सर्वस्य विद्यते प्रांतो न वांछायाः कदाचन ॥
यथा यथा भवेल्लाभो वांछितस्य नृणामिह ॥
हविषा कृष्णवर्त्मेव वृद्धिं याति तथा तथा ॥ ४१ ॥

३५३ एवं ज्ञात्वा महाभागाः पुरुषेण विजानता ॥
दिवा तत्कर्म कर्तव्यं येन रात्रौ सुखं स्वपेत् ॥ ४३ ॥

स्कान्द, नागरखं., १८४.

३५४ सूची सूत्रं तथा वस्त्रे समानयति सूचिका ॥
तद्वत्संसारसूत्रस्य तृष्णासूची विधीयते ॥ २९ ॥

३५५ यथा शृङ्गं रुरोः काये वर्द्धमाने हि वर्द्धते ॥
अनंतपारा दुर्वारा तृष्णा दुःखप्रदा सदा ॥
अधर्मबहुला चैव तस्मात्तां परिवर्जयेत् ॥ ३० ॥

३५६ सन्तुष्टः को न शक्नोति फलैश्चापि हि वर्तितुम् ॥
सर्वोऽपीन्द्रियलोभेन सङ्कटान्यभिगाहते ॥ ३१ ॥

३५७ सर्वत्र संपदस्तस्य सन्तुष्टं यस्य मानसम् ॥
उपानद्गूढपादस्य ननु चर्मावृतेव भूः ॥ ३२ ॥

३५८ सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम् ॥
कुतस्तद्धनलुब्धानां सुखं चाशान्तचेतसाम् ॥ ३३ ॥

३५९ कामं कामयमानस्य यदि कामः स सिद्ध्यति ॥
तथैनमपरः कामो भूयो विध्यति बाणवत् ॥ ३४ ॥

*Ibid*, प्र. क्षे. मा., २५५.

## (८) सुख–दुःखम्

३६० सौवर्णं मदिरापूर्णाभ्यन्तरं कलशं स्थितम् ॥
सम्प्राप्य को न गृह्णाति तद्गुणग्रामवित्पुमान् ॥ २ ॥

पद्म, क्रि. खं., ४.

३६१ आत्मदेहस्य मांसानि भोक्तुं ब्रह्मन्न शक्यते ॥
देहिनां वद यद्योग्यं संतुष्टिर्जायते यतः ॥ ५ ॥

*Ibid*, क्रि. खं., २१.

३६२ स्त्रीबालवृद्धातुरराजयोगिनां
विषाग्नितोयाद्रिनिपातनादिवा ॥
दुःखस्य चैवोद्धरणं प्रशस्यते
कूपस्य खातेन समं वदन्ति ॥ २५ ॥ *Ibid*, पा. खं., १०६.

३६३ यावत्तिष्ठति तारुण्य तावद्भुञ्जन्ति मानवाः ॥
सुखभोगादिकं सर्वं स्वेच्छया रमते नरः ॥ ४५ ॥
*Ibid*. भू. खं., ५३.

३६४ असंतोषः परं दुःखं संतोषः परमं सुखम् ॥
सुखार्थी पुरुषस्तस्मात्संतुष्टः सततं भवेत् ॥ २६१ ॥
*Ibid*, सृ. खं., १९.

३६५ सुखेन दान्तः स्वपिति सुखं च प्रतिबुद्ध्यते ॥
समः सर्वेषु भूतेषु मनो यस्य प्रहृष्यति ॥ ३२१ ॥

३६६ न रथेन सुखं याति न हयेन न दन्तिना ॥
यथात्मना विनीतेन सुखं याति महापथम् ॥ ३२२ ॥ *Ibid*.

३६७ स्मरन्दीर्घमनुच्छ्वासं शर्म किं नाम विन्दते ॥
गर्भवाससमं दुःखं न भूतं न भविष्यति ॥ १० ॥ भागवत, ३, ३१.

३६८ दृश्यमाना विनार्थेन न दृश्यन्ते मनोभवाः ॥
कर्मभिर्ध्यायतो नानाकर्माणि मनसोऽभवन् ॥ २८ ॥

३६९ अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः ॥
देहिनो विविधक्लेशसंतापकृदुदाहृतः ॥ २९ ॥

३७० तस्मात्स्वस्थेन मनसा विमृश्य गतिमात्मनः ॥
द्वैते ध्रुवार्थविश्रम्भं त्यजोपशममाविश ॥ २६ ॥ *Ibid*, ६, १५.

३७१ सुखाय दुःखप्रभवेषु सज्जते (माया)
गृहेषु योषित्पुरुषश्च वञ्चितः ॥ ४७ ॥ *Ibid*, १०, ५१.

३७२ असन्तुष्टोऽसकृल्लोकानाप्नोत्यपि सुरेश्वरः ॥
अकिञ्चनोऽपि संतुष्टः शेते सर्वाङ्गविज्वरः ॥ ३२ ॥
*Ibid*, १०, ५२.

३७३ यथा दारुमयी योषिन्नृत्यते कुहकेच्छया ।।
एवमीश्वरतन्त्रोऽयमीहते सुखदुःखयोः ।। १२ ।। *Ibid*, १०, ५४.

३७४ गृहारंभो हि दुःखाय विफलश्चाध्रुवात्मनः ।।
सर्पः परकृतं वेश्म प्रविश्य सुखमेधते ।। १५ ।। *Ibid*, ११, ९.

३७५ न देहिनां सुखं किञ्चिद्विद्यते विदुषामपि ।।
तथा च दुःखं मूढानां वृथाऽहङ्करणं परम् ।। १८ ।।
*Ibid*, ११, १०.

३७६ सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः ।। ६० ।। *Ibid*, ११, २३.

३७७ दुःखेन तप्येत सुखेन हृष्येत्समेन वर्तेत सदैव धीरः ।।
दिष्टं बलीय इति मन्यमानो न संज्वरेन्नापि हृष्येत्कदाचित् ।। ८ ।।
मत्स्य, ३७

३७८ दृष्ट्वा परस्य भाग्यानि आत्मनो व्यसनं तथा ।।
तत्र मन्युर्न कर्तव्य एष धर्मः सनातनः ।। ४१ ।। वराह, १२७.

३७९ पुत्रमित्रकलत्रार्थे राज्यभोगधनाय च ।।
आगमे निर्गमे प्राज्ञो न विषादं समाचरेत् ।। ४७ ।।

३८० यथा यथा समायान्ति पूर्वकर्मविधानतः ।।
सुखदुःखानि दैत्येन्द्र नरस्तानि सहेत्तथा ।। ४८ ।।

३८१ आपदामागमं दृष्ट्वा न विषण्णो भवेद्वशी ।।
संपदं च सुविस्तीर्णां प्राप्य नो धृतिमान्भवेत् ।। ४९ ।।

३८२ धनक्षये न मुह्यन्ति न हृष्यन्ति धनागमे ।
धीराः कार्येषु च तदा भवन्ति पुरुषोत्तमाः ।। ५० ।। वामन, ७७.

३८३ दुःखेऽपि प्रियसङ्गो वै न दुःखाय प्रजायते ।। ८४ ।।
शिव, शतरुद्रसं., ३८

३८४ समुत्पन्ने च दुःखे च यस्य बुद्धिर्विशिष्यते ।।
तस्य दुःखं विनश्येत सूर्ये दृष्टे यथा तमः ।। ५१ ।।
*Ibid*, रुद्रखं., ४, १९.

३८५ गर्भवासो हि दुःखाय न सुखाय कदाचन ।। ५ ।।
स्कान्द, आवंत्यखं., रेवाखं., १४७.

३८६ सर्पः परकृतं वेश्म प्रविश्य सुखमेधते ॥
उषित्वा तत्र सौख्येन भूयोऽन्यत्तादृशं व्रजेत् ॥ २५ ॥
*Ibid*, नागरखं., १८५

## (९) दैव-कर्म

३८७ स्वमेव कर्म दैवाख्यं विद्धि देहान्तरार्जितम् ॥
तस्मात्पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥ १ ॥
३८८ प्रतिकूलं तथा दैवं पौरुषेण विहन्यते ॥
सात्त्विकात्कर्मणः पूर्वात्सिद्धिः स्यात्पौरुषं विना ॥ २ ॥
३८९ पौरुषं दैवसम्पत्त्या काले फलति भार्गव ॥
दैवं पुरुषकारश्च द्वयं पुंसः फलावहम् ॥ ३ ॥ अग्नि, २२६.
३९० [ बलेन प्रज्ञया नित्यं मन्त्रपौरुषविक्रमैः ॥
सहायैश्चैव मित्रैश्च नालभ्यं लभते नरः ॥ १२५ ॥ ]
३९१ लाभालाभे सुखे दुःखे विवाहे मृत्युजीवने ॥
भोगे रोगे वियोगे च दैवमेव हि कारणम् ॥ १२६ ॥
३९२ [ कुरूपाः कुकुला मूर्खाः कुत्सिताचारनिन्दिताः ॥
शौर्यविक्रमहीनाश्च दैवाद्राज्यानि भुञ्जते ॥ १२७ ॥ ]
पद्म, उ. खं., १२८.

३९३ वनं परित्यज्य कृशानुभीत्या
जलं प्रविष्टो नलिनीसुखार्थम् ॥
सन्दह्यते तत्र हिमानलेन
यद्यस्य कर्म न तदन्यथा स्यात् ॥ ५५ ॥
३९४ वेदादिशास्त्रमखिलं प्रपठन्तु लोकाः
कुर्वन्तु नाम सततं क्षितिपालसेवाम् ॥
उग्रं तपः प्रतिदिनं प्रतिसाधयन्तु
न श्रीस्तथापि च भजत्यति भाग्यहीनम् ॥ ५६ ॥
३९५ मस्तकोपरि तिष्ठन्ति दुःखानि च सुखानि च ॥
अन्तकाले समायान्ति हठादन्यानि सत्तम ॥ ५७ ॥ *Ibid*, क्रि खं., ५.

३९६ नूनं विचित्रो भुवि भूतवर्गः
सम्भूतभावो बहुधा विचित्रः ॥
तथा विचित्रोऽखिलकर्मयोग-
स्तत्कर्मशक्तिप्रचयो विचित्रः ॥ ३१ ॥ पद्म, पा. खं., १०२.

३९७ यथा मृत्पिण्डतः कर्ता कुरुते यद्यदिच्छति ॥
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥ ४२ ॥

३९८ यथा कृतं तथा भुङ्क्ते नित्यं विहितमात्मना ॥
आत्मना विहितं दुःखमात्मना विहितं सुखम् ॥ ४४ ॥

३९९ वित्तेन प्रज्ञया वाऽपि समर्थाः कर्तुमन्यथा ॥
स्वकृतान्युपभुञ्जन्ति दुःखानि च सुखानि च ॥
हेतुं प्राप्य नरो नित्यं कर्मपाशैश्च बध्यते ॥ ४६ ॥

४०० यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ॥
तथा शुभाशुभं कर्म कर्त्तारमनुगच्छति ॥ ४७ ॥

४०१ उपभोगादृते तस्य नाश एव न विद्यते ॥
प्राक्तनं बन्धनं कर्म कोऽन्यथा कर्तुमर्हति ॥ ४८ ॥

४०२ सुशीघ्रमपि धावन्तं विधानमनुधावति ॥
शेते सह शयानेन पुराकर्म यथाकृतम् ॥ ४९ ॥

४०३ उपतिष्ठति तिष्ठन्तं गच्छन्तमनुगच्छति ॥
करोति कुर्वतः कर्म छायेवानुविधीयते ॥ ५० ॥

४०४ यथा छायातपौ नित्यं संबद्धौ च परस्परम् ॥
तद्वत्कर्म च कर्त्ता च सुसम्बद्धौ परस्परम् ॥ ५१ ॥

४०५ येन यत्रोपभोक्तव्यं सुखं वा दुःखमेव वा ॥
स तत्र बद्ध्वा बन्धेन बलाद्दैवेन नीयते ॥ ५३ ॥

४०६ अरक्षितं भवेत्सत्यं दैवं तमेव रक्षति ॥
दैवेन नाशितं यत्तु तस्य रक्षा न दृश्यते ॥ ५६ ॥

*Ibid*, भू. खं., ८१.

४०७ दैवं हि दुरतिक्रमम् ॥ ७ ॥ *Ibid*, स्व. खं., २२.
दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् ॥ २३ ॥ भागवत, ३, ३.

४०८ विपर्ययो वा किं न स्याद्गतिर्धातुर्दुरत्यया ॥
उपस्थितो निवर्तेत निवृत्तः पुनरापतेत् ॥ ५० ॥ *Ibid*, १०, १.

४०९ एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितम् ॥
स तुल्यातिशयध्वंसं यथा मण्डलवर्तिनाम् ॥ २० ॥ *Ibid*, ११, ३.

४१० दैवाधीने शरीरेऽस्मिन्गुणभाव्येन कर्मणा ॥
वर्तमानोऽबुधस्तत्र कर्तास्मीति निबध्यते ॥ १० ॥ *Ibid*, ११, ११.

४११ जीवितं मरणं जन्तोर्गतिः स्वेनैव कर्मणा ॥ २५ ॥ *Ibid*, १२, ६

४१२ दैवं पुरुषकारश्च कालश्च पुरुषोत्तम ॥
त्रयमेतन्मनुष्यश्च पिण्डितं स्यात्फलावहम् ॥ ८ ॥

४१३ कृषेर्वृष्टिसमायोगाद् दृश्यन्ते फलसिद्धयः ॥
तास्तु काले प्रदृश्यन्ते नैवाकाले कथंचन ॥ ९ ॥

४१४ तस्मात्सदैव कर्तव्यं सधर्मं पौरुषं नरैः ॥
विपत्तावपि यस्येह परलोके ध्रुवं फलम् ॥ १० ॥

४१५ नालसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः ॥
[ तस्मात्सर्वप्रयत्नेन आचरेद्धर्ममुत्तमम् ॥ ११ ॥ ]

४१६ त्यक्त्वालसान्दैवपरान्मनुष्यान्
उत्थानयुक्तान्पुरुषान्हि लक्ष्मीः ॥
अन्विष्य यत्नाद्वृणुयान्नृपेन्द्र
तस्मात्सदोत्थानवता हि भाव्यम् ॥ १२ ॥ मत्स्य, २२१.

४१७ विपाककटु यत्कर्म तन्न शंसन्ति पण्डिताः ॥ ४४ ॥ विष्णु, ५, ३०.

अर्जुन कहता है :

४१८ अहोऽतिबलवद्दैवं विना तेन महात्मना ॥
यदसामर्थ्ययुक्तेऽपि नीचवर्गे जयप्रदम् ॥ ३१ ॥

४१९ तौ बाहू स च मे मुष्टिः स्थानं तत्सोऽस्मि चार्जुनः ॥
पुण्येनैव विना तेन गतं सर्वमसारताम् ॥ ३२ ॥ विष्णु, ५, ३८.

४२० भविष्यं यद्भवत्येव नास्ति तस्य निवर्तकः ॥
प्रारब्धाधीनमेवात्र प्रारब्धः स शिवः स्मृतः ॥ ९ ॥
शिव, कोटिरु. सं., २१.

४२१ विपरीतो यदा कालः पुरुषस्य भवेत्तदा ॥
भूतमैत्रीं प्रकुर्वन्ति सर्वकार्यार्थसिद्धये ॥ ३४ ॥

स्कांद, माहे. खं. के. खं., ९.

४२२ [ न पुत्रबांधवा दारा न समस्तः सुहृज्जनः ॥
सङ्कटेऽभ्युपगच्छन्ति व्रजन्तमेकगामिनम् ॥ ९४ ॥ ]

४२३ यदेव कर्म कैवल्यं कृतं तेन शुभाशुभम् ॥
तदेव सार्थवत्तस्य भवत्यग्रे तु गच्छतः ॥ ९५ ॥

४२४ निर्धनस्यैव चरतो न भयं विद्यते क्वचित् ॥
धनी भयैर्न मुच्येत धनं तस्मात्त्यजाम्यहम् ॥ ९६ ॥

४२५ लुब्धाः पापानि कुर्वन्ति शुद्धांशा नैव मानवाः ॥
श्रुत्वा धर्मस्य सर्वस्वं श्रुत्वा चैवावधार्य तत् ॥ ९७ ॥

*Ibid*, आवन्त्यखं. रेवाखं., २८.

४२६ स्वकर्मणोऽनुरूपं हि फलं भुञ्जन्ति जंतवः ॥
शुभेन कर्मणा भूतिर्दुःखं स्यात्पातकेन तु ॥ ३१ ॥

४२७ दृश्यन्ते चाऽभिशापाश्च पूर्वकर्मानुसञ्चिताः ॥
कष्टाः कष्टतरावस्था गताः केचिदनागसः ॥ ३५ ॥

४२८ ह्रीमन्तो नयसंयुक्ता अन्ये बहुगुणैर्युताः ॥
दुर्गमामापदं प्राप्य निजकर्मसमुद्भवम् ॥ ३८ ॥

४२९ न सञ्ज्वरन्ति ये मर्त्या धर्मनिन्दां न कुर्वते ॥
इदमेव तपो मत्वा क्षिपन्ति सुविचेतसः ॥ ३९ ॥ *Ibid*, १९८.

४३० शीतं हुताशादपि दैवयोगा-
स्सञ्जायते चन्द्रमसोऽपि तापः ॥
परिग्रहात्सौख्यसमुद्भवोऽत्र
भूतोऽभवद्भावि(वी?) न मर्त्यलोके ॥ ५७ ॥

४३१ कष्टं वने निवसतोऽत्र सदा नरस्य
नो केवलं निजतनुप्रभवं भवेच्च ॥
दैवं च पित्र्यमखिलं न विभाति कृत्यं
तस्माद् गृहे निवसतात्महितं प्रचिन्त्यम् ॥ ५४ ॥

*Ibid*, नागरखं., १४७.

## १०. धन-दारिद्र्यम्

४३२ आदरं राजसदसि धनेन लभते नरः ॥
सुभटः शत्रुसङ्ग्रामे विक्रमेण यथा जयम् ॥ ३७ ॥

४३३ गृहस्थस्तु धनं प्राप्य परां पुष्टिं व्रजत्यलम् ॥
शरत्परिणतं सस्यमनड्वानिव विट्पते ॥ ३८ ॥

४३४ धनिनं न विमुञ्चन्ति बान्धवोऽन्ये च ये जनाः ॥
मधुमत्सुमनो युक्तं पादपं मधुपा इव ॥ ३९ ॥

४३५ धनाभावेन गृहिणां कृशत्वमुपजायते ॥
सर्वतो ग्रीष्मसमये त्वम्भसां सरसामिव ॥ ४० ॥

४३६ [ तद्धनं वर्तते भूरि गृहे तव विशांपते ॥
कुतः कृशत्वमङ्गानां गोप्यं चेन्न वदाद्य मे ॥ ४१ ॥ ]

पद्म, उ. खं., २०१.

४३७ धनाद्धर्मः प्रभवति धनाच्च विपुलं यशः ॥
धनात्कुलमवाप्नोति भवेत्किं वा धनादृते ॥ २५ ॥

४३८ धनहीनं जनं दृष्ट्वा सखापि हि पलायते ॥
मेघं शरद्यम्बुहीनं खण्डं खण्डं नयेन्महत् ॥ २६ ॥

४३९ खादितुं प्राप्यते यावत्तावदेव हि बान्धवाः ॥
धनं यस्य कुलं तस्य बुद्धिस्तस्य स पण्डितः ॥ २७ ॥

४४० अर्थैर्विहीनः पुरुषो जीवन्नपि मृतोपमः ॥
धर्मार्थविद्यार्जनतो मतिर्यस्य निवर्तते ॥ २८ ॥

४४१ ज्ञेयः स मूर्खः सुतरामधिकस्याधिकं फलम् ॥
कर्तव्यः सततं धर्मश्चार्जितव्यं सदा धनम् ॥ २९ ॥

४४२ शिक्षितस्य सदा विद्या पुंभिरेवं विचक्षणैः ॥
दानाद्धनं च विद्या च वर्धते प्रतिवासरम् ॥ ३० ॥

४४३ धर्मस्तु वर्धते दानान्नधनेन विना नृणाम् ॥
काष्ठं तृणं तुषं वापि सम्प्राप्य न परित्यजेत् ॥
पुमान्सञ्चयशीलो हि कदाचिन्नावसीदति ॥ ३२ ॥

*Ibid*, क्रि. खं., ४.

४४४ चतुःसागरपर्यन्तां यो भुङ्क्ते पृथिवीमिमाम् ॥
तुल्याश्मकाञ्चनो यश्च स कृतार्थो न पार्थिवः ॥ २६५ ॥

*Ibid*, सू. खं., १९.

४४५ वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः ॥
निष्किञ्चनस्य धीरस्य सकुटुम्बस्य सीदतः ॥ ३ ॥ भागवत, ९, २१.

४४६ असतः श्रीमदान्धस्य दारिद्र्यं परमाञ्जनम् ॥
आत्मौपम्येन भूतानि दरिद्रः परमीक्षते ॥ १३ ॥

४४७ यथा कण्टकविद्धाङ्गो जन्तुर्नेच्छति तां व्यथाम् ॥
जीवसाम्यं गतो लिङ्गैर्न तथाऽऽविद्धकण्टकः ॥ १४ ॥

४४८ दरिद्रो निरहंस्तम्भो मुक्तः सर्वमदैरिह ॥
कृच्छ्रं यदृच्छयाऽऽप्नोति तद्धि तस्य परं तपः ॥ १५ ॥

४४९ नित्यं क्षुत्क्षामदेहस्य दरिद्रस्यान्नकाङ्क्षिणः ॥
इन्द्रियाण्याशु शुष्यन्ति हिंसापि विनिवर्तते ॥ १६ ॥

४५० दरिद्रस्यैव युज्यन्ते साधवः समदर्शिनः ॥
सद्भिः क्षिणोति तं वर्षं तत आराद्विशुद्ध्यति ॥ १७ ॥

४५१ [ साधूनां समचित्तानां मुकुन्दचरणैषिणाम् ॥
उपेक्ष्यैः किं धनस्तम्भैरसद्भिरसदाश्रयैः ॥ १८ ॥ ] *Ibid*, १०, १०.

४५२ अहो ऐश्वर्यमत्तानां मत्तानामिव मानिनाम् ॥
असंबद्धा गिरो रूक्षाः कः सहेतानुशासिता ॥ ३९ ॥ *Ibid*, १०, ६८.

४५३ [ हैहयो नहुषो वेनो रावणो नरकोऽपरे ॥
श्रीमदाद् भ्रंशितः स्थानाद्देवदैत्यनरेश्वराः ॥ २० ॥ ] *Ibid*, १०, ७३.

४५४ अहो ब्रह्मण्यदेवस्य दृष्टा ब्रह्मण्यता मया ॥
यद्दरिद्रतमो लक्ष्मीमाश्लिष्टो बिभ्रतोरसि ॥ १५ ॥ *Ibid*, १०, ८१.

४५५ नित्यार्जितेन वित्तेन दुर्लभेनात्ममृत्युना ॥
गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः ॥ १९ ॥

*Ibid*, ११, ३.

४५६ यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः ॥
लोभः स्वल्पोऽपि तान्हन्ति श्वित्रो रूपमिवेप्सितम् ॥ १६ ॥

४५७ अर्थस्य साधने सिद्ध उत्कर्षे रक्षणेऽव्यये ॥
नाशोपभोग आयासस्त्रासश्चिन्ता भ्रमो नृणाम् ॥ १७ ॥

४५८ स्तेयं हिंसाऽनृतं दम्भः कामः क्रोधः स्मयो मदः ॥
भेदो वैरमविश्वासः संस्पर्धा व्यसनानि च ॥ १८ ॥

४५९ एते पञ्चदशानर्था ह्यर्थमूला मता नृणाम् ॥
तस्मादनर्थमर्थाख्यं श्रेयोऽर्थी दूरतस्त्यजेत ॥ १९ ॥

४६० भिद्यन्ते भ्रातरो दाराः पितरः सुहृदस्तथा ॥
एकाः स्निग्धाः काकिणिना सद्यः सर्वेऽरयः कृताः ॥ २० ॥

४६१ अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः ॥
त्यजन्त्याशुस्पृधो घ्नन्ति सहसोऽत्सृज्य सौहृदम् ॥ २१ ॥

३६२ लब्धा जन्माऽमरप्रार्थ्यं मानुष्यं तद् द्विजाग्र्यताम् ॥
तदनादृत्य ये स्वार्थं घ्नन्ति यान्त्यशुभां गतिम् ॥ २२ ॥

४६३ स्वर्गापवर्गयोर्द्वारं प्राप्य लोकमिमं पुमान् ॥
द्रविणे कोऽनुषज्जेत मर्त्योऽनर्थस्य धामनि ॥ २३ ॥

४६४ व्यर्थयाऽर्थेहया वित्तं प्रमत्तस्य वयो बलम् ॥
कुशला येन सिद्ध्यन्ति जरठः किं नु साधयेत् ॥ २५ ॥

४६५ कस्मात्संक्लिश्यते विद्वान्व्यर्थयाऽर्थेहयाऽसकृत् ॥
कस्यचिन्मायया नूनं लोकोऽयं सुविमोहितः ॥ २६ ॥ *Ibid*, ११, २३.

४६६ यतः सत्त्व ततो लक्ष्मीः सत्त्वं भूत्यनुसारि च ॥
निःश्रीकाणां कुतः सत्त्वं विना तेन गुणाः कुतः ॥ २९ ॥

४६७ बलशौर्याद्यभावश्च पुरुषाणां गुणैर्विना ॥
लङ्घनीयः समस्तस्य बलशौर्यविवर्जितः ॥ ३० ॥

४६८ भवत्यपध्वस्तमतिर्लंघितः प्रथितः पुमान् ॥
एवमत्यन्तनिःश्रीके त्रैलोक्ये सत्त्ववर्जिते ॥ ३१ ॥ विष्णु, १, ९.

४६९ अर्थलाभेऽपि महति स्वाध्यायं न समुत्सृजेत् ॥
कुलान्यकुलतां यान्ति स्वाध्यायस्य विवर्जनात् ॥ ९० ॥

विष्णुधर्मोत्तर, द्वि. खं, ८९.

४७० नाधनस्यास्त्ययं लोको न परश्च कथंचन ॥
अभिशस्तं प्रपश्यन्ति दरिद्रं पार्श्वतः स्थितम् ॥ ७ ॥
४७१ दारिद्र्यं पातकं लोके कस्तच्छंसितुमर्हति ॥
पतितः शोच्यते सर्वैर्निर्धनश्चापि शोच्यते ॥ ८ ॥
४७२ यः कृशाश्वः कृशधनः कृशभृत्यः कृशातिथिः ॥
स वै प्रोक्तः कृशो नाम न शरीरकृशः कृशः ॥ ९ ॥
४७३ अर्थवान्दुष्कुलीनोऽपि लोके पूज्यतमो नरः ॥
शशिनस्तुल्यवंशोऽपि निर्धनः परिभूयते ॥ १० ॥
४७४ ज्ञानवृद्धा वयोवृद्धा ये च वृद्धा बहुश्रुताः ॥
ते सर्वे धनवृद्धस्य द्वारि तिष्ठन्ति किङ्कराः ॥ ११ ॥
४७५ यद्यप्ययं त्रिभुवने अर्थोऽस्माकं परान्न हि ॥
तथाप्यन्यप्रार्थितो हि तस्यैव फलदो भवेत् ॥ १२ ॥

स्कान्द, माहेश्वरखं, कौ. खं., २.

४७६ अहो गुणाः सौम्यता च विद्वत्ता जन्म सत्कुले ॥
दारिद्र्याम्बुधिमग्नस्य सर्वमेतन्न शोभते ॥ ११ ॥
४७७ विप्राः पुत्राश्च पौत्राश्च बान्धवा भ्रातरस्तथा ॥
शिष्याश्च सर्वे मनुजास्त्यजन्त्यैश्वर्यवर्जितम् ॥ १२ ॥

*Ibid*, वै.खं. वें.मा., २०.

४७८ अर्थश्चेत्सर्वथा रक्ष्य इति कैश्चिदुदाहृतम् ॥
तत्कथं न हरिश्चन्द्रोऽरक्षत्कुशिकनन्दने ॥ ३५ ॥
४७९ धर्मस्तु रक्षितः सर्वैरपि देहव्ययेन च ॥
शिबिप्रभृतिभूपालैर्दधीचिप्रमुखैर्द्विजैः ॥ ३६ ॥

*Ibid*, काशीखं., ४६.

४८० अर्थसंपद्विमोहाय विमोहो नरकाय च ॥
तस्मादर्थं प्रयत्नेन श्रेयोऽर्थी दूरतस्त्यजेत् ॥ ४१ ॥

*Ibid*, नागरखं., ३२.

४८१ न सा विद्या न तच्छिल्पं न तत्कार्यं न सा कला ॥
अर्थार्थिभिर्न तज्ज्ञानं धनिनां यन्न दीयते ॥ ४३ ॥

४८२ इह लोके च धनिनां परोऽपि स्वजनायते ॥
स्वजनोऽपि दरिद्राणां कार्यार्थे दुर्जनायते ॥ ४४ ॥

४८३ अर्थेभ्यो हि विवृद्धेभ्यः संभृतेभ्यस्ततस्ततः ॥
प्रवर्तन्ते क्रियाः सर्वाः पर्वतेभ्यो यथापगाः ॥ ४५ ॥

४८४ पूज्यते यदपूज्योऽपि यदगम्योऽपि गम्यते ॥
वन्द्यते यदवन्द्योऽपि ह्यनुबन्धो धनस्य सः ॥ ४६ ॥

४८५ अशनादिन्द्रियाणीव स्युः कार्याण्यखिलानि ह ॥
सर्वस्मात्कारणाद्वित्तं सर्वसाधनमुच्यते ॥ ४७ ॥

४८६ अर्थार्थी सर्वलोकोऽयं श्मशानमपि सेवते ॥
जनितारमपि त्यक्त्वा निःस्वः संयाति दूरतः ॥ ४८ ॥ *Ibid*, १५५.

४८७ अर्थसंपद्विमोहाय विमोहो नरकाय च ॥
तस्मादर्थमनर्थं तं मोक्षार्थी दूरतस्त्यजेत् ॥ १४ ॥

४८८ यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ॥
आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् ॥ १५ ॥

४८९ दोषहीनोऽपि धनवान्भूपालैः परिताप्यते ॥
दरिद्रः कृतदोषोऽपि सर्वत्र निरुपद्रवः ॥ १६ ॥ *Ibid*, १८५.

४९० लक्ष्म्या हीनस्य लोकस्य लोकेऽस्मिन्व्यर्थतां व्रजेत् ॥ २४ ॥

४९१ मृतो नरो गतश्रीको मृतं राष्ट्रमराजकम् ॥
मृतमश्रोत्रिये दानं मृतो यज्ञस्त्वदक्षिणः ॥ २५ ॥

४९२ लक्ष्म्या हीनस्य मर्त्यस्य बान्धवोऽपि विजायते ॥
प्रार्थयिष्यन्ति मां नूनं दृष्ट्वा तं चान्यतो व्रजेत् ॥ २६ ॥

४९३ धनहीनं नरं त्यक्त्वा कुलीनमपि चोत्तमम् ॥
गच्छति स्वजनोऽन्यत्र शुष्कं वृक्षमिवाण्डजाः ॥ २८ ॥

४९४ तत्कार्यकरणार्थाय दरिद्रोऽभ्येति चेद्गृहम् ॥
धनिनो भर्त्सयन्त्येनं समागच्छन्ति नान्तिकम् ॥ २९ ॥

४९५ कृपणोऽपि धनाढ्यश्चेदागच्छन्ति हि याचितुम् ॥
एष दास्यति मे किञ्चिदिति चित्ते नृणां भवेत् ॥ ३० ॥

४९६ मम त्वं पूर्ववंशीयः पिता ते च पितुर्मम ॥
सदा स्नेहपरश्चासीत्त्वं च स्नेहविवर्जितः ॥ ३१ ॥

४९७ एवं ब्रुवन्ति लोकेऽत्र धनिनां पुरतः स्थिताः ॥
कुलीना अपि पपानां दृश्यन्ते धनलिप्सया ॥
दरिद्रस्य मनुष्यस्य क्षितौ राज्यं प्रकुर्वतः ॥ ३२ ॥

४९८ प्रशोषः केवलं भावो हृदयस्य महामुने ॥
द्वाविमौ कण्टकौ तीक्ष्णौ शरीरपरिशोषणौ ॥
यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ॥ ३३ ॥

४९९ श्मशानमपि सेवन्ते धनलुब्धा निशागमे ॥
जनेतारमपि त्यक्त्वा नित्यं यान्ति सुदूरतः ॥ ३४ ॥

५०० सुमूर्खोऽपि भवेद्विद्वानकुलीनोऽपि सत्कुलः ॥
यस्य वित्तं भवेद्धर्म्ये विपरीतमतोऽन्यथा ॥ ३५ ॥ *Ibid,* २०९.

५०१ राज्यं हि बहु मन्यन्ते नरा विषयलोलुपाः ॥
मनीषिणस्तु पश्यन्ति तदेव नरकोपमम् ॥ ६९ ॥
*Ibid*, प्र. क्षे. मा., ३३८.

## ११. कालमहिमा

५०२ त्रयः कालकृताः पाशाः शक्यन्ते नातिवर्तितुम् ॥
विवाहो जन्ममरणं यदा यत्र तु येन च ॥ ४० ॥

५०३ यथा जलधरा व्योम्नि भ्राम्यन्ते मातरिश्वना ॥
तथेदं कर्मयुक्तेन कालेन भ्राम्यते जगत ॥ ४१ ॥ पद्म, भूमिखं., ८१.

५०४ कालस्यैव वशे सर्वं दुर्गं दुर्गतरं च यत् ॥
काले क्रुद्धे कथं कालात्त्राणं नोऽद्य भविष्यति ॥ ५ ॥

५०५ लोकेषु त्रिषु यत्किञ्चिद्बलं वै सर्वजन्तुषु ॥
कालस्य तद्वशं सर्वमिति पैतामहो विधिः ॥ ६ ॥

५०६ अस्मिन्कः प्रभवेद्योगो ह्यसन्धार्येऽमितात्मनि ॥
लङ्घने कः समर्थः स्यादृते देवं महेश्वरम् ॥ ७ ॥ मत्स्य, १३६.

# १२. मित्र–शत्रुः

५०७ आक्रोशकसमो लोके सुहृदन्यो न विद्यते ॥
यस्तु दुष्कृतमादाय सुकृतं स्वं प्रयच्छति ॥ ३४४ ॥

पद्म, सृ. खं., १९.

५०८ नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणाम् ॥
ओघेन व्यूह्यमानानां प्लवानां स्रोतसो यथा ॥ २५ ॥

५०९ कच्चित्पशव्यं निरुजं भूर्यम्बुतृणवीरुधम् ॥
बृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः ॥ २६ ॥

५१० पुंसस्त्रिवर्गो विहितः सुहृदो ह्यनुभावितः ॥
न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय कल्पते ॥ २८ ॥ भागवत, १०, ५.

५११ दातुः परीक्षा दुर्भिक्षे रणे शूरस्य जायते ॥
आपत्काले तु मित्रस्याशक्तौ स्त्रीणां कुलस्य हि ॥ १२ ॥

५१२ विनये सङ्कटे प्राप्तेऽवितथस्य परोक्षतः ॥
सुस्नेहस्य तथा तात नान्यथा सत्यमीरितम् ॥ १३ ॥

शिव, रुद्रसं. खं. ३, १७.

५१३ परेषामनपेक्ष्यैव कृतप्रतिकृतं हि यः ॥
प्रवर्तते हितायैव सुहृत्प्रोच्यते बुधैः ॥ २६ ॥

५१४ स्वार्थोद्युक्तधियो ये स्युरन्वर्थास्तेऽप्यसुंधराः ॥
मरणं प्रकृतिश्चैव जीवितं विकृतिर्यदा ॥ २७ ॥

५१५ प्राणिनां परमो लाभः केवलं भाविसौहृदम् ॥
दरिद्रा रागिणोऽसत्यप्रतिज्ञाता गुरुद्रुहः ॥ २८ ॥

५१६ मित्रावसानिनः पापाः प्रायो नरकमण्डनाः ॥
परार्थनष्टास्तदमी पञ्च संप्रति साधवः ॥ २९ ॥

स्कान्द, मा. खं, कौ. खं., १०.

# १३. आत्मगुणाः (१) आत्मा

५१७ सर्वेषामपि भूतानां नृप स्वात्मैव वल्लभः ॥
इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि ॥ ५० ॥

५१८ तद्राजेन्द्र यथा स्नेहः स्वस्वकात्मनि देहिनाम् ॥
न तथा ममतालम्बिपुत्रवित्तगृहादिषु ॥ ५१ ॥
५१९ देहात्मवादिनां पुंसामपि राजन्यसत्तम ॥
यथा देहः प्रियतमस्तथा न ह्यनु ये च तम् ॥ ५२ ॥
भागवत, १०, १४.

## आत्मगुण (२) उद्यमः

५२० विपद्यपि च प्राज्ञैर्न संत्याज्यः क्वचिदुद्यमः ॥
क्व च चञ्चुपुटस्तस्य क्व च तत्पादपीडनम् ॥ ६६ ॥
५२१ क्व च द्वयोस्तथाभूतं दूरे मोक्षणमद्भुतम् ॥
दुर्बलेऽप्युद्यमः श्रेयानिति शास्त्रेषु गीयते ॥ ६७ ॥
५२२ तस्माद्भाग्यानुसारेण फलत्येव सदोद्यमः ॥
प्रशंसन्त्युद्यमं चातो विपद्यपि मनीषिणः ॥ ६८ ॥
स्कान्द, आवन्त्यखं., च. मा., ४५.

## आत्मगुण (३) धर्मपालनम्

५२३ धर्मश्चार्थश्च कामश्च मोक्षश्चैतच्चतुष्टयम् ॥
यथोक्तं सफलं ज्ञेयं विपरीतं तु निष्फलम् ॥ २ ॥
पद्म, उत्तरखं., १२८.

५२४ घृष्यमाण इवाङ्गारो निर्मलत्वं न गच्छति ॥
स्रोतांसि यस्य सततं प्रवहन्ति गिरेरिव (नरस्य) ॥ ७३ ॥
*Ibid*, भूमिखं., ६६.

५२५ धर्मवाक्यं न च स्त्रीषु न विवाहे तथा रिपौ ॥
वञ्चने चार्थहानौ च स्वनाशेऽनृतके तथा ॥ ५१ ॥ ब्रह्म, १२०.

५२६ धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् ॥
यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥ ९ ॥ भागवत, १०, ४४.

५२७ एकः प्रसूयते जन्तुरेक एव प्रलीयते ॥
एको न भुंक्ते सुकृतमेक एव च दुष्कृतम् ॥ २१ ॥ *Ibid*, १०, ४९.

५२८ नाधर्मश्चरितो राजन्सद्यः फलति गौरिव ॥
शनैरावर्त्यमानस्तु मूलान्यपि निकृन्तति ॥ २ ॥ मत्स्य, २८.

५२९ पारलौकिककार्येषु कः प्रतीक्षितुमुत्सहे ॥
न यस्य सौहृदं ब्रह्मन्कृतानेन बलीयसा ॥ ६ ॥
५३० धर्ममार्गे त्वरा कार्या चलं यस्माद्धि जीवितम् ॥
धर्ममार्गे रतो जन्तुर्मृतोऽपि सुखमश्नुते ॥ ७ ॥
५३१ प्राणो वायुश्चलत्वं च वायोर्विदितमेव च ॥
अत्र यज्जीव्यते ब्रह्मन्क्षणमात्रं तदद्भुतम् ॥ ८ ॥

विष्णुधर्मोत्तर, प्र. खं., ११७.

५३२ धर्मश्चार्थश्च कामश्च त्रिवर्ग जीवतः फलम् ॥
धर्महीनस्य कामार्थौ वन्ध्यासुतसमावुभौ ॥ ४ ॥
५३३ धर्मादर्थस्तथा कामो धर्माल्लोकद्वयं तथा ॥
धर्म एकोऽनुयात्येनं यत्र कुत्र च गामिनम् ॥ ५ ॥
५३४ शरीरेण समं नाशं सर्वमन्यद्धि गच्छति ॥
एको हि जायते जन्तुरेक एव विपद्यते ॥ ६ ॥
५३५ धर्मस्तमनुयात्येको न सुहृन्न च बान्धवाः ॥
रूपसौभाग्यलावण्यं संपद्धर्मेण लभ्यते ॥ ७ ॥ *Ibid*, द्वि.खं., ३९.

५३६ धर्मो माता पिता धर्मो धर्मो बन्धुः सुहृत्तथा ॥
आधारः सर्वभूतानां त्रैलोक्ये सचराचरे ॥ ६ ॥

स्कांद, आवन्त्यखं., रेवाखं., १३३.

५३७ धर्मः सुदुर्लभः पुंसां विशेषेण महीक्षिताम् ॥ ६६ ॥
५३८ यदि राजा मदाविष्टः स्वधर्मं न परित्यजेत् ॥
ततो जगति कस्तस्मात्पुमानप्यधिको भवेत् ॥ ६७ ॥
५३९ ध्रुवं जन्म सदा राज्ञां मोहश्चापि सदा ध्रुवः ॥
मोहाद् ध्रुवश्च नरको राज्यं विन्दन्त्यतो बुधाः ॥ ६८ ॥

*Ibid*, प्र. क्षे. मा., ३३८.

## आत्मगुण (४)—भावशुद्धिः

५४० स्वमूर्तिः क्षालिता तीर्थे न शुद्धिमधिगच्छति ॥
अन्तर्भावप्रदुष्टस्य विशतोऽपि हुताशनम् ॥ ८५ ॥

५४१ न स्वर्गो नापवर्गश्च देहनिर्दहनं परम् ॥
भावशुद्धिः परं शौचं प्रमाणं सर्वकर्मसु ॥ ८६ ॥
५४२ अन्यथाऽऽलिङ्ग्यते कान्ता भावेन दुहिताऽन्यथा ॥
मनसा भिद्यते वृत्तिरभिन्नेष्वपि वस्तुषु ॥ ८७ ॥
५४३ अन्यथैव सती पुत्रं चिन्तयेदन्यथा पतिम् ॥
यथा यथा स्वभावस्य महाभाग उदाहृतम् ॥ ८८ ॥
५४४ परिष्वक्तोऽपि यद्भार्यां भावहीनां न कारयेत् ॥
नाद्याद्विविधमन्नाद्यं रस्यानि सुरभीणि च ॥ ८९ ॥
५४५ अभावेन नरस्तस्माद्भावः सर्वत्र कारणम् ॥
चित्तं शोधय यत्नेन किमन्यैर्बाह्यशोधनैः ॥ ९० ॥
५४६ भावतः शुचिशुद्धात्मा स्वर्गं मोक्षं च विन्दति ॥
ज्ञानामलाम्भसा पुंसः स वैराग्यमृदा पुनः ॥ ९१ ॥

पद्म, भूमिखं., ६६.

## आत्मगुण (५)–सत्यपालनम्

५४७ सत्यं पुष्पफलं विद्यादात्मवृक्षस्य गीयते ॥
वृक्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः ॥ ३९ ॥
५४८ तद्यथा वृक्ष उन्मूलः शुष्यत्युद्वर्ततेऽचिरात् ॥
एवं नष्टानृतः सद्य आत्मा शुष्येन्न संशयः ॥ ४० ॥ भागवत, ८, १९.
५४९ त्यज चिन्तां महाराज स्वसत्यमनुपालय ॥
श्मशानवद्वर्जनीयो नरः सत्यबहिष्कृतः ॥ १७ ॥
५५० नातः परतरं धर्मं वदन्ति पुरुषस्य तु ॥
यादृशं पुरुषव्याघ्र स्वसत्यपरिपालनात् ॥ १८ ॥
५५१ अग्निहोत्रमधीतं वा दानाद्याश्चाखिलाः क्रियाः ॥
भजन्ते तस्य वैफल्यं यस्य वाक्यमकारणम् ॥ १९ ॥
५५२ सत्यमत्यन्तमुदितं धर्मशास्त्रेषु धीमताम् ॥
तारणायानृतं तद्वत्पातनायाकृतात्मनाम् ॥ २० ॥
५५३ सप्ताश्वमेधानाहृत्य राजसूयं च पार्थिवः ॥
कृतिर्नाम च्युतः स्वर्गादसत्यवचनात्सकृत् ॥ २१ ॥ मार्कण्डेय, ८.

५५४ सत्येनार्कः प्रतपति सत्ये तिष्ठति मेदिनी ॥
सत्यं चोक्तं परो धर्मः स्वर्गः सत्ये प्रतिष्ठितः ॥ ४३ ॥
५५५ चक्षुःपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ॥
सत्यपूतां वदेद्वाणीं बुद्धिपूतञ्च चिन्तयेत् ॥ ४३-१॥ *Ibid*, ४१.
५५६ सत्यं मूलं ब्राह्मणानां विष्णुः सत्ये प्रतिष्ठितः ॥
तस्य मूलं तपो राज्ञि राज्यं सत्ये प्रतिष्ठितम् ॥
नाहं मिथ्या प्रवक्ष्यामि कदाचिदपि सुन्दरि ॥ ९९ ॥ वराह, १३७.
५५७ सत्ये प्रतिष्ठितो लोको धर्मः सत्ये प्रतिष्ठितः ॥
उदधिः सत्यवाक्येन मर्यादां न विलङ्घयेत् ॥ ४३ ॥
५५८ विष्णवे पृथिवीं दत्त्वा बलिः पातालमाश्रितः ॥
सत्यवाक्यं समाश्रित्य न निष्क्रामति दैत्यपः ॥ ४४ ॥
५५९ यः स्वं वाक्यं प्रतिज्ञाय न करोति यथोदितम् ॥
किं तेन न कृतं पापं चौरेणाकृतबुद्धिना ॥ ४५ ॥
स्कांद, नागरखं., ५१.

## आत्मगुण (६)—साधुवृत्तिः

५६० सुजनो न याति विकृतिं परहितनिरतो विनाशकालेऽपि ॥
छिन्नोऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य ॥ २३ ॥
५६१ दैवं परं विनश्यति तनुरपि न श्रीर्निवेदिता सत्सु ॥
अवशिष्यते हिमांशोः सैव कला शिरसि या शंभोः ॥ २४ ॥
५६२ ते साधवो भुवनमण्डलमौलिभूता
ये साधुतामनुपकारिषु दर्शयन्ति ॥
आत्मप्रयोजनवशात्कृतछिन्नदेहाः
पूर्वापकारिषु खलोऽपि हितानुरक्तः ॥ २५ ॥ पद्म, उ.खं., ७.
५६३ न ह्यसञ्चितपुण्यानां सद्भिरेकत्र सङ्गमः ॥ ३४ ॥ *Ibid*, १२८.
५६४ कुतश्चित्कारणात्साधोः क्रुद्धस्य प्रकृतिः क्षमा ॥
हुताशनप्रतप्तस्य शीतत्वमिव चाम्बुनः ॥ ५० ॥
अतः क्षमां विधायाशु विधेह्यस्मिन्ननुग्रहम् ॥
बले विवेकरहिते क्षमासारा हि साधवः ॥ ५१ ॥ *Ibid*, २१५.

५६५ भजन्ति ये यथा देवान्देवा अपि तथैव तान् ॥
छायेव कर्मसचिवाः साधवो दीनवत्सलाः ॥ २७ ॥
पद्म, पातालखं., ८४; भागवत, ११. २, ६.

५६६ कोमलं हृदयं नूनं साधूनां नवनीतवत् ॥
वन्हिसन्तापसन्तप्तं तद्यथा द्रवति स्फुटम् ॥ ३२ ॥ *Ibid*, १०१.

५६७ [ स पूज्यः सर्वलोकेषु यशो विस्तारयन्वशी ॥
सदाचारविधिप्रज्ञः सर्वेन्द्रियमनोहरः ॥ ४६ ॥
५६८ नृत्यवादित्रगीतज्ञः सुभगः प्रियदर्शनः ॥
नित्यमम्लानकुसुमो दिव्याभरणभूषितः ॥ ४७ ॥
५६९ नीलोत्पलदलश्यामो नीलकुञ्चितमूर्धजः ॥
अजघन्याः सुमध्याश्च सर्वसौभाग्यपूरिताः ॥ ४८ ॥
५७० सर्वैश्वर्यगुणोपेता यौवनेनातिगर्विताः ॥
स्त्रियः सेवन्ति तत्रस्थाः शयने रमयन्ति च ॥ ४९ ॥
५७१ वीणावेणुनिनादैश्च सुप्तः संप्रति बुध्यत ॥ ५० ॥ ]
*Ibid*, सृ. खं., १५.

५७२ वाजिवारणलोहानां काष्ठपाषाणवाससाम् ॥
नारीपुरुषतोयानामंतरं महदंतरम् ॥ ९२ ॥
५७३ अन्ये चेत्प्राकृता लोका बहुपापानि कुर्वते ॥
प्रधानपुरुषेणापि कार्यं तत्पृष्ठतो नु किम् ॥ ९३ ॥
५७४ तस्मात्सदा महद्भिश्च आत्मार्थं च परार्थतः ॥
सतां धर्मो न संत्याज्यो न्याय्यं तच्छिक्षणं तव ॥ ९७ ॥ *Ibid*, १८.

५७५ नवनीतोपमा वाणी करुणाकोमलं मनः ॥
धर्मबीजप्रसूतानामेतत्प्रत्यक्षलक्षणम् ॥ १३३ ॥ *Ibid*, ५१.

५७६ [ प्रियं च वाक्यं वक्तव्यं सर्वप्रीतिकरं विभो ॥
किं त्वया न श्रुतौ श्लोकौ यावुक्तौ वेधसा पुरा ॥
शृण्वतो देवदेवस्य व्योमकेशस्य भारत ॥ ४६ ॥ ]

५७७ यो धर्मशीलो जितमानरोषो
विद्याविनीतो न परोपतापी ॥

स्वदारतुष्टः परदारवर्जितो
न तस्य लोके भयमस्ति किंचित् ॥ ४७ ॥

५७८ न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया ॥
प्रल्हादयति च पुरुषं यथा मधुरभाषिणी वाणी ॥ ४८ ॥ *

५७९ [ तापत्रयमहाज्वालावन्हिभिः सततं नृणाम् ॥
संतप्तानां मुनिश्रेष्ठ विष्णुभक्तिसुधार्णवम् ॥ २ ॥ ]

पद्म, सृ.खं., २२४.

५८० [ अबलाबुद्धिहीनाया दोषं क्षन्तुं सदार्हसि ॥ ]
मूढस्य सततं दोषं क्षमां कुर्वन्ति साधवः ॥ ब्रह्मवै., द्वि.भा., १३.

५८१ यस्तु दुष्टैस्तु दण्डाद्यैर्वचसापि च ताडितः ॥
न च क्षोभमवाप्नोति स साधुः परिकीर्त्यते ॥ ११ ॥

५८२ ताडयेत्ताडयन्तं यो न च साधुः स पापभाक् ॥
क्षमयार्हणतां प्राप्ताः [ साधवो ब्राह्मणा वयम् ॥ ] ॥ १२ ॥

ब्रह्माण्ड, म. भा., ३२.

५८३ सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति पण्डिताः ॥
सकृत्प्रदीयते कन्या त्रीण्येतानि सकृत्सकृत् ॥ २९ ॥

भविष्य, उ.प., ४,१०२.

५८४ प्रायशः साधवो लोके परैर्द्वन्द्वेषु योजिताः ॥
न व्यथन्ति न हृष्यन्ति यत आत्मागुणाश्रयः ॥ ५० ॥

भागवत, १, १८.

५८५ शाब्दस्य हि ब्रह्मण एष पन्था
यन्नामभिर्ध्यायति धीरपार्थैः ॥
परिभ्रमंस्तत्र न विन्दतेऽर्था-
न्मायामये वासनया शयानः ॥ २ ॥

५८६ अतः कविर्नामसु यावदर्थः
स्यादप्रमत्तो व्यवसायबुद्धिः ॥
सिद्धेऽन्यथाऽर्थे न यतेत भूयः
परिश्रमं तत्र समीक्षमाणः ॥ ३ ॥

५८७ सत्यां क्षितौ किं कशिपोः प्रयासै-
बाहौ स्वसिद्धे ह्युपबर्हणैः किम् ॥
सत्यञ्जलौ किं पुरुधान्नपात्र्या
दिग्वल्कलादौ सति किं दुकूलैः ॥ ४ ॥
५८८ चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवांघ्रिपाः परभृतः सरितोऽप्यशुष्यन् ॥
रुद्धा गुहाः किमजितोऽवति नोपसन्नान्
कस्माद्भजन्ति कवयो धनदुर्मदान्धान् ॥ ५ ॥ *Ibid*, २, २.

५८९ पुत्रस्यैव तु पुत्राणां भवितैकः सतां मतः ॥
गास्यन्ति यद्यशः शुद्धं भगवद्यशसा समम् ॥ ४४ ॥
५९० योगैर्हेमेव दुर्वर्ण भावयिष्यन्ति साधवः ॥
निर्वैरादिभिरात्मानं यच्छीलमनुवर्तितुम् ॥ ४५ ॥ *Ibid*, ३, १४.

५९१ तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः ॥
कृतज्ञः को न सेवेत दुराराध्यमसाधुभिः ॥ ३६ ॥ *Ibid*, १९.

५९२ त एते साधवः साध्वि सर्वसङ्गविवर्जिताः ॥
सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते ॥ २४ ॥
५९३ सतां प्रसङ्गान्मम वीर्यसंविदो
भवन्ति हृत्कर्णरसायनाः कथाः ॥
तज्जोषणादाश्वपवर्गवर्त्मनि
श्रद्धा रतिर्भक्तिरनुक्रमिष्यति ॥ २५ ॥ *Ibid*, २५.
५९४ यदा न योगोपचितासु चेतो
मायासु सिद्धस्य विषज्जतेऽङ्ग ॥
अनन्यहेतुष्वथ मे गतिः स्या-
दात्यन्तिकी यत्र न मृत्युहासः ॥ ३० ॥ *Ibid*, २७.

५९५ ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः ॥
ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥ ३१ ॥
५९६ अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान्स्वकर्मकृत् ॥
मुक्तसङ्गस्ततो भूयानदोग्धा धर्ममात्मनः ॥ ३२ ॥ *Ibid*, २९.

५९७ तेष्वशान्तेषु मूढेषु खण्डितात्मस्वसाधुषु ॥
सङ्गं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ॥ ३४ ॥

५९८ न तथाऽस्य भवेन्मोहो बन्धश्चान्यप्रसङ्गतः ॥
योषित्सङ्गाद्यथा पुंसो यथा तत्संगिसङ्गतः ॥ ३५ ॥

५९९ प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः ॥
रोहिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः ॥ ३६ ॥ *Ibid*, ३१.

६०० यस्मिन्यदा पुष्करनाभमायया
दुरन्तयास्पृष्टधियः पृथग्दृशः ॥
कुर्वन्ति तत्र ह्यनुकम्पया कृपां
न साधवो दैवबलात्कृते क्रमम् ॥ ४८ ॥ *Ibid*, ४, ६.

६०१ गुणायनं शीलधनं कृतज्ञं
वृद्धाश्रयं संवृणुतेऽनु सम्पदः ॥ ४४ ॥ *Ibid*, २१.

६०२ न नूनं मुक्तसंङ्गानां तादृशानां द्विजर्षभ ॥
गृहेष्वभिनिवेशोऽयं पुंसां भवितुमर्हति ॥ २ ॥

६०३ महतां खलु विप्रर्षे उत्तमश्लोकपादयोः ॥
छायानिर्वृतचित्तानां न कुटुम्बे स्पृहामतिः ॥ ३ ॥ *Ibid*, ५, १.

६०४ यद्यच्छीर्षण्याचरितं तत्तदनुवर्तते लोकः ॥ १५ ॥ *Ibid*, ४.

६०५ देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः ॥
क्षिपन्त्यघं महदपि वेणुगुल्ममिवानलः ॥ १४ ॥ *Ibid*, ६, १.

६०६ आत्मनः प्रीयते नात्मा परतः स्वत एव वा ॥
लक्षयेऽलब्धकामं त्वां चिन्तया शबलं मुखम् ॥ २१ ॥ *Ibid*, १४.

६०७ स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययम् ॥
अभयं चाप्यहीनायां सङ्कल्पाद्विरमेत्कविः ॥ ५९ ॥ *Ibid*, १६.

६०८ सङ्ग्रामे वर्तमानानां कालचोदितकर्मणाम् ॥
कीर्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्रमात् ॥ ७ ॥

६०९ तदिदं कालरशनं जनाः पश्यन्ति सूरयः ॥
न हृष्यन्ति न शोचन्ति तत्र यूयमपण्डिताः ॥ ८ ॥

६१० महापुरुषपूजायाः सिद्धिः काप्यनुषंगिणी ॥ ७३ ॥ *Ibid*, १८.

६११ महीयसां पादरजोऽभिषेकं
निष्किञ्चनानां न वृणीत यावत् ॥ ३२ ॥ *Ibid*, ७, ५.

६१२ साधुषु प्रहितं तेजः प्रहर्तुः कुरुतेऽशिवम् ॥
तपो विद्या च विप्राणां निःश्रेयसकरे उभे ॥
त एव दुर्विनीतस्य कल्पेते कर्तुरन्यथा ॥ ७० ॥ *Ibid*, ९, ४.

६१३ सङ्गं त्यजेत मिथुनव्रतिनां मुमुक्षुः
सर्वात्मना न विसृजेद्बहिरिन्द्रियाणि ॥
एकश्चरन्रहसि चित्तमनन्त ईशे
युञ्जीत तद् व्रतिषु साधुषु चेत्प्रसङ्गः ॥ ५१ ॥ *Ibid*, ६.

६१४ साधूनां समचित्तानां सुतरां मत्कृतात्मनाम् ॥
दर्शनान्नो भवेद्बन्धः पुंसोऽक्ष्णोः सवितुर्यथा ॥ ४१ ॥ *Ibid*, १०, १०.

६१५ अहो येषां वरं जन्म सर्वप्राण्युपजीवनम् ॥
सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः ॥ ३३ ॥ *Ibid*, १०, २२.

६१६ न हि गोप्यं हि साधूनां कृत्यं सर्वात्मनामिह ॥
अस्तस्वपरदृष्टीनाममित्रोदास्तविद्विषाम् ॥
उदासीनोऽरिवद्वर्ज्य आत्मवत्सुहृदुच्यते ॥ ५ ॥

६१७ ज्ञात्वाऽज्ञात्वा च कर्माणि जनोऽयमनुतिष्ठति ॥
विदुषः कार्यसिद्धिः स्यात्तथा नाविदुषो भवेत् ॥ ६ ॥ *Ibid*, २४.

६१८ ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ॥
तेषां यत्स्ववचोयुक्तं बुद्धिमांस्तत्समाचरेत् ॥ ३२ ॥ *Ibid*, ३३.

६१९ कालत्रयोपपन्नानि जन्मकर्माणि मे नृप ॥
अनुक्रमन्तो नैवान्तं गच्छन्ति परमर्षयः ॥ ३९ ॥ *Ibid*, ५१.

६२० सम्यग्व्यवसितं राजन्भवता शत्रुकर्शिनी ॥
कल्याणी येन ते कीर्तिर्लोकाननुभविष्यति ॥ ७ ॥ *Ibid*, ७२.

६२१ किं दुर्मर्षं तितिक्षूणां किमकार्यमसाधुभिः ॥
किं न देयं वदान्यानां कः परः समदर्शिनाम् ॥ १९ ॥ *Ibid*.

६२२ न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥
ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ ११ ॥ *Ibid*, ८४.

६२३ वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणाम् ॥
आत्मलोकैषणां देव कालेन विसृजेद्बुधः ॥ ३८ ॥ *Ibid.*

६२४ भूतैराक्रम्यमाणोऽपि धीरो दैववशानुगैः ॥
तद्विद्वान्न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतम् ॥ ३७ ॥

६२५ प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेन्द्रियप्रियैः ॥
ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः ॥ ३९ ॥

६२६ गुणैर्गुणानुपादत्ते यथाकालं विमुञ्चति ॥
न तेषु युज्यते योगी गोभिर्गा इव गोपतिः ॥ ५० ॥ *Ibid*, ११, ७.

६२७ मुनिः प्रसन्नगम्भीरो दुर्विगाह्यो दुरत्ययः ॥
अनन्तपारो ह्यक्षोभ्यः स्तिमितोद इवार्णवः ॥ ५ ॥ *Ibid*, ८.

६२८ देहस्थोऽपि न देहस्थो विद्वान् स्वप्नाद्यथोत्थितः ॥
अदेहस्थोऽपि देहस्थः कुमतिः स्वप्नदृग्यथा ॥ ८ ॥ *Ibid*, ११.

६२९ अकिञ्चनस्य दान्तस्य शान्तस्य समचेतसः ॥
मया सन्तुष्टमनसः सर्वाः सुखमया दिशः ॥ १३ ॥ *Ibid*, १४

६३० समाहितं यस्य मनः प्रशान्तं
दानादिभिः किं वद तस्य कृत्यम् ॥
असंशयं यस्य मनो विनश्य-
द्दानादिभिश्चेदपरं किमेभिः ॥ ४७ ॥ *Ibid*, २३.

६३१ सन्तो दिशन्ति चक्षूंषि बहिरर्कः समुत्थितः ॥
देवता बान्धवाः सन्तः सन्त आत्माहमेव च ॥ ३४ ॥ *Ibid*, २६.

६३२ एतद्विद्वान्मदुदितं ज्ञानविज्ञाननैपुणम् ॥
न निन्दति न च स्तौति लोके चरति सूर्यवत् ॥ ८ ॥ *Ibid*, २८.

६३३ पुंसो ये नाभिनन्दन्ति वृत्तेनाभिजनेन च ॥
न तेषु निवसेत्प्राज्ञः श्रेयोऽर्थी पापबुद्धिषु ॥ १० ॥

६३४ ये नैनमभिजानन्ति वृत्तेनाभिजनेन च ॥
तेषु साधुषु वस्तव्यं स वासः श्रेष्ठ उच्यते ॥ ११ ॥ मत्स्य, २८.

शत्रुजितने ऋतध्वजसे कहा:

६३५ [ पराक्रमवता वीर त्वया तद्बहुलीकृतम् ॥
यदुपात्तं यशः पितृधनं वीर्यमथापि वा ॥ ९४ ॥ ]

६३६ तन्न ह्रापयते यस्तु स नरो मध्यमः स्मृतः ॥
तद्वीर्यादधिकं यस्तु पुनरन्यत्स्वशक्तितः ॥ ९५ ॥
६३७ निष्पादयन्ति तं प्राज्ञा वदन्ति नरमुत्तमम् ॥
यः पित्रा समुपात्तानि धनवीर्यं यशांसि वै ॥ ९६ ॥
६३८ न्यूनतां नयति प्राज्ञास्तमाहुः पुरुषाधमम् ॥
तन्मया ब्राह्मणत्राणं कृतमासीद्यथा त्वया ॥ ९७ ॥ मार्कण्डेय, १९.
६३९ जीवितं गुणिनः श्लाघ्यं जीवन्नपि मृतोऽगुणी ॥
गुणवान्निर्वृतिं पित्रोः शत्रूणां हृदये ज्वरम् ॥ १० ॥
६४० करोत्यात्महितं कुर्वन्विश्वासं च महाजने ॥ ॥ ११ ॥
६४१ देवताः पितरो विप्रा मित्रार्थिविभवादयः ॥
बान्धवाश्च तथेच्छन्ति जीवितं गुणिनश्चिरम् ॥ १२ ॥
६४२ परवादनिवृत्तानां दुर्गतेषु दयावताम् ॥
गुणिनां सफलं जन्म संश्रितानां विपद्गतः ॥ १३ ॥ *Ibid*, २१.
६४३ तस्माच्चरेत वै योगी सतां धर्ममदूषयन् ॥
जना यथावमन्येरन् गच्छेयुर्नैव सङ्गतिम् ॥ ४३ ॥ विष्णु, २, १३.
६४४ निःसङ्गता मुक्तिपदं यतीनां
सङ्गादशेषाः प्रभवन्ति दोषाः ॥
आरूढयोगो विनिपात्यतेऽधः
सङ्गेन योगी किमुताल्पबुद्धिः ॥ १२४ ॥ *Ibid*, ४, २.
६४५ जगत्तु धार्यते सद्भिः सतामग्र्यस्तथा भवान् ॥
तेन त्वामभियान्त्या मे क्लमो देव न विद्यते ॥ १२ ॥
विष्णुधर्मोत्तर, द्वि. खं., ३८.
६४६ इदमेव महद्धैर्यं धीराणां सुतपस्विनाम् ॥
विघ्नवन्त्यपि संप्राप्य यद्विघ्नैर्न विहन्यते ॥ ३८ ॥
शिव, रुद्रसं., ३, १३.
६४७ यादृङ्नरं च सेवेत तादृशं फलमश्नुते ॥
महतस्सेवयोच्चत्वं क्षुद्रस्य क्षुद्रतां तथा ॥ २२ ॥
६४८ सिंहस्य मंदिरे सेवा मुक्ताफलकरी मता ॥
शृगालमंदिरे सेवा त्वस्थिलाभकरी स्मृता ॥ २३ ॥

६४९ उत्तमानां स्वभावोऽयं परदुःखसहिष्णुता ॥
स्वयं दुःखं च संप्राप्तं मन्यतेऽन्यस्य वार्यते ॥ २४ ॥
६५० वृक्षाश्च हाटकं चैव चन्दनं चैक्षुकस्तथा ॥
एते भुवि परार्थे च दक्षा एवं न केचन ॥ २५ ॥
६५१ दयालुरमदस्पर्शः उपकारी जितेन्द्रियः ॥
एतैश्च पुण्यस्तम्भैश्च चतुर्भिर्धार्यते मही ॥ २६ ॥

स्कान्द, माहेश्वरखं., के.खं.,९.

६५२ स सुखी परमार्थज्ञः स विद्वान्स च पण्डितः ॥
येन मुक्तौ कामरागौ स मुक्तः स सुखी भवेत् ॥ १४० ॥

*Ibid*, ३४.

६५३ [ आपो वस्त्रं तिलास्तैलं गन्धो वा सयवा तथा ॥
पुष्पाणामधिवासेन तथा संसर्गजा गुणाः ॥ १२५ ॥ ]
६५४ मोहजालस्य यो योनिर्मूढैरिह समागमः ॥
अहन्यहनि धर्मस्य योनिः साधुसमागमः ॥ १२६ ॥
६५५ तस्मात्प्राज्ञैश्च वृद्धैश्च शुद्धभावैस्तपस्विभिः ॥
सद्भिश्च सह संसर्गः कार्यः शमपरायणैः ॥ १२७ ॥
६५६ न नीचैर्नाप्यविद्वद्भिर्नानात्मज्ञैर्विशेषतः ॥
येषां त्रीण्यवदातानि योनिर्विद्या च कर्म च ॥ १२८ ॥
६५७ तांश्च सेवेद्विशेषेण शास्त्रं येषां हि विद्यते ॥
असतां दर्शनस्पर्शसञ्जल्पासनभोजनैः ॥ १२९ ॥
६५८ धर्माचारात्प्रहीयन्ते न च सिद्ध्यन्ति मानवाः ॥
बुद्धिश्च हीयते पुंसां नीचैः सह समागमात् ॥
मध्यैश्च मध्यतां याति श्रेष्ठतां याति चोत्तमैः ॥ १३१ ॥

*Ibid*, मा.खं., कौ.खं., ४५.

६५९ दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥
न हि ज्ञानविरुद्धेषु बह्वपायेषु कर्मसु ॥ २२ ॥
६६० मूलघातिषु सज्जन्ते बुद्धिमंतो भवद्विधाः ॥
अष्टाङ्गां बुद्धिमाहुर्यां सर्वश्रेयोविघातिनीम् ॥ २३ ॥

६६१ आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः ॥
मनोदेहसमुत्थाभ्यां दुःखाभ्यामर्पितं जगत् ॥ २५ ॥

६६२ चतुर्भिः कारणैर्दुःखं शारीरं मानसं च यत् ॥
मानसं चाप्यप्रियस्य संयोगः प्रियवर्जनम् ॥ २६ ॥

६६३ स्नेहाच्च सज्जनो नित्यं जन्तुर्दुःखमुपैति च ॥
स्नेहमूलानि दुःखानि स्नेहजानि भयानि च ॥ ३३ ॥

६६४ तस्मात्स्नेहं न लिप्सेत मित्रेभ्यो धनसञ्चयात् ॥
स्वशरीरसमुत्थं च ज्ञानेन विनिवर्तयेत् ॥ ३७ ॥

६६५ ज्ञानान्वितेषु सिद्धेषु शास्त्रज्ञेषु कृतात्मसु ॥
न तेषु सज्जते स्नेहः पद्मपत्रेष्विवोदकम् ॥ ३८ ॥

६६६ या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ॥
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् ॥ ४१ ॥

६६७ अनाद्यंता तु सा तृष्णा ह्यन्तर्देहगता नृणाम् ॥
विनाशयति सम्भूता लोहं लोहमलं यथा ॥ ४२ ॥

६६८ यथैवैधःसमुत्थेन वन्हिना नाशमृच्छति ॥
तथाऽकृतात्मा लोभेन स्वोत्पन्नेन विनश्यति ॥ ४३ ॥

६६९ तस्माल्लोभो न कर्तव्यः शरीरे चात्मबन्धुषु ॥
प्राप्तेषु वा न हृष्येत नाशे वापि न शोचयेत् ॥ ४४ ॥ *Ibid.*

६७० श्रेयः प्राप्तमविघ्नेन प्रायः पुण्यात्मनां भुवि ॥
घटते धर्मसंयोगो मनोरथफलप्रदः ॥२६॥ *Ibid*, अ. मा. (पू.), ४.

६७१ मनसा चिन्तितान्कामांस्तांश्च प्राप्नोति पुष्कलान् ॥
तदैव पुरुषो मुक्तो जन्मदुःखजरादिभिः ॥ ३१ ॥
*Ibid*, आवन्त्यखं., च. लि. मा., ५५.

६७२ आरण्यकानां भवने नागराणां कुतः सुखम् ॥ ४७ ॥
*Ibid*, वै. खं., पु. मा., ८५.

६७३ कुलं विद्या धनं चैव बलिनां मदकारणम् ॥
भवादृशानां भव्यानां तानि प्रश्रयकारणम् ॥ १० ॥
*Ibid*, वै. खं., वें. मा., ३१.

६७४ यथा गङ्गा मनुष्याणां पापनाशस्य भाविनी ॥
तथा मन्दसमुद्धारस्वभावाः साधवः स्मृताः ॥ ९ ॥
*Ibid*, वै.खं.,वै.मा.,१८.

६७५ सतां साप्तपदी मैत्री तन्मे मैत्र्या प्रणोदितौ ॥ ३५ ॥
*Ibid*, काशीखं., ९.

६७६ न हि सत्यवतां किञ्चिदशुभं विद्यते क्वचित् ॥ ५८ ॥
*Ibid*, नागरखं., ५१.

६७७ अनुग्रहप्रदानेन क्षमा यस्मात्तपस्विनाम् ॥
कोकिलानां स्वरो रूपं नारीरूपं पतिव्रता ॥
विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनाम् ॥ १०८ ॥ *Ibid*, २७१.

## १४. गृहेऽपि मोक्षः

६७८ किमरण्ये त्वदान्तस्य दान्तस्यापि किमाश्रमे ॥ ३१५ ॥

६७९ आर्जवे वर्तमानस्य आश्रमैः किं प्रयोजनम् ॥ ३१६ ॥

६८० वनेऽपि दोषाः प्रभवन्ति रागिणां
गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ॥
अकुत्सिते कर्मणि यः प्रवर्तते
निवृत्तरागस्य गृहं तपोवनम् ॥ ३१७ ॥

६८१ स्वकर्मधर्मार्जितजीवितानां
स्वेष्वेव दारेषु सदा रतानाम् ॥
जितेन्द्रियाणामतिथिप्रियाणां
गृहेऽपि मोक्षः पुरुषोत्तमानाम् ॥ ३१८ ॥

६८२ न शब्दशास्त्रे निरतस्य मोक्षो
न वर्णसङ्गे निरतस्य चैव ॥
न भोजनाच्छादनतत्परस्य
न लोकचित्तग्रहणे रतस्य ॥ ३१९ ॥

६८३ एकान्तशीलस्य दृढव्रतस्य
सर्वेन्द्रियप्रीतिनिवर्तकस्य ॥
अध्यात्मयोगे गत (कृत?) मानसस्य
मोक्षो ध्रुवं नित्यमहिंसकस्य ॥ ३२० ॥

६८४ आत्मवत्सर्वभूतानि यः पश्यति स पश्यति ॥ ३५९ ॥
६८५ पुत्रार्थं मैथुनं यस्य स्वर्गार्थं यस्य जीवितम् ॥
एतद्‌द्वयं च सर्वस्वं धातूनामिव काञ्चनम् ॥ ३६० ॥
६८६ कामक्रोधौ विनिर्जित्य किमरण्यैः करिष्यति ॥
अन्नेन धार्यते देहः कुलं शीलेन धार्यते ॥ ३४७ ॥
६८७ प्राणा मित्रेण धार्यन्ते क्रोधः सत्येन धार्यते ॥
यस्तु क्रोधं समुत्पन्नं संधारयति चाऽऽत्मनः ॥३४८॥ पद्म, सृ. खं., १९.

६८८ भयं प्रमत्तस्य वनेष्वपि स्या-
द्यतः स आस्ते सह षट्सपत्नः ॥
जितेन्द्रियस्यात्मरतेर्बुधस्य
गृहाश्रमः किं नु करोत्यवद्यम् ॥ १७ ॥ *Ibid*, ५, १.

## १५. मानवजीवनम्

६८९ स एष जीवन्खलुसंपरेतो
वर्तेत योऽत्यन्तनृशंसितेन ॥
देहे मृते तं मनुजाः शपन्ति
गन्ता तमोऽन्ध तनुमानिनो ध्रुवम् ॥ २२ ॥ भागवत, १०, २.

६९० ऋतेन जीवेदनृतेन जीवेत्
मितेन जीवेत्प्रमितेन जीवेत् ॥
सत्यानृताभ्यामथवापि जीवेत्
श्ववृत्तिमेकां परिवर्जयेत्तु ॥३४॥ विष्णुध., द्वि. खं., ८२.

६९१ धिग्जन्मभाग्यरहितं धिग्जन्म धनवर्जितम् ॥
धिग्जन्म कीर्तिरहितं धिग्जन्मातिथ्यवर्जितम् ॥ ८ ॥
६९२ धिग्जन्माचाररहितं धिग्जन्म ज्ञानवर्जितम् ॥
धिग्जन्म यत्नरहितं धिग्जन्म सुखवर्जितम् ॥ ९ ॥
६९३ धिग्जन्म बन्धुरहितं धिग्जन्मख्यातिवर्जितम् ॥
नरस्य बह्वपत्यस्य धिग्जन्मैश्वर्यवर्जितम् ॥ १० ॥
स्कान्द, वैष्णवखं. वेंकटाचलमा., २०.

६९४ धिग्जीवितं शास्त्रकलोज्झितस्य
धिग्जीवितं चोद्यमवर्जितस्य ॥

धिग्जीवितं ज्ञातिपराजितस्य
धिग्जीवितं व्यर्थमनोरथस्य ॥ ६५ ॥

६९५ कथं भुनक्ति स दिवा कथं रात्रौ स्वपित्यहो ॥
रहः शर्म कथं तस्य यथाभिभवनं रिपोः ॥६६॥ *Ibid*, काशीखं.,१.

## १६. इतस्ततः

६९६ अवैष्णवो हतो विप्रो हतं श्राद्धमदक्षिणम् ॥
अब्रह्मण्यं हतं क्षेत्रमनाचारं हतं कुलम् ॥ १९ ॥

६९७ सदम्भश्च हतो धर्मः क्रोधेनैव हतं तपः ॥
अदृढं च हतं ज्ञानं प्रमादेन हतं श्रुतम् ॥ २० ॥

६९८ गुर्वभक्ता हता नारी ब्रह्मचारी तथा हतः ॥
अदीप्ताग्निर्हतो होत्रो हता बुद्धिरसाक्षिका ॥ २१ ॥

६९९ उपजीव्या हता कन्या स्वार्थे पाकक्रिया हता ॥
शूद्रभिक्षाहतो यागः कृपणस्य हतं धनम् ॥ २२ ॥

७०० अनभ्यासा हता विद्या हतो राजविरोधकृत् ॥
जीवनार्थं हतं तीर्थं जीवनार्थं हतं व्रतम् ॥ २३ ॥

७०१ असत्या च हता वाणी तथा पैशुन्यवादिनी ॥
सन्दिग्धश्च हतो मन्त्रो व्यग्रचित्तो हतो जपः ॥ २४ ॥

७०२ हतमश्रोत्रियं दानं हतो लोकश्च नास्तिकः ॥
अश्रद्धया हतं सर्वं कृतं यत्पारलौकिकम् ॥ २५ ॥

७०३ इह लोको हतो नृणां दारिद्र्येण यथा नृप ॥
मनुष्याणां तथा जन्म माघस्नानं विना हतम् ॥ २६ ॥
पद्म, उत्तरखं., २४२(आ).

७०४ द्वौ संमताविह मृत्यू दुरापौ
यद् ब्रह्मसंधारणया जितासुः ॥
कलेवरं योगरतो विजह्यात्
यदग्रणीर्वीरशयेऽनिवृत्तः ॥ ३४ ॥ भागवत, ६, १०.

७०५ कामः क्रोधश्च लोभश्च मदो मानस्तथैव च ॥
हर्षश्च शत्रवो ह्येते नाशाय कुमहीभृताम् ॥ १४ ॥

७०६ कामप्रसक्तमात्मानं स्मृत्वा पाण्डुं निपातितम् ॥
निवर्त्तयेत्तथा क्रोधादनुह्रादं हतात्मजम् ॥ १५ ॥

७०७ हृतमैलं तथा लोभान्मदाद्वेनं द्विजैर्हृतम् ॥
मानादनायुषः पुत्रं हृतं हर्षात्पुरञ्जयम् ॥ १६ ॥
७०८ एभिर्जितैर्जितं सर्वं मरुत्तेन महात्मना ॥
स्मृत्वा विवर्जयेदेतान्षड्दोषांश्च महीपतिः ॥ १७ ॥ मार्कण्डेय, २०.
७०९ धिक्तस्य जन्म यः पित्रा लोके विज्ञायते नरः ॥
यत्पुत्रात्ख्यातिमभ्येति तस्य जन्म सुजन्मनः ॥ १० ॥
७१० आत्मज्ञानी यतो धन्यो मध्यः पितृपितामहैः ॥
मातृपक्षेण मात्रा च ख्यातिं याति नराधमः ॥ १२ ॥ *Ibid*, १९.
७११ अपुत्रता मनुष्याणां श्रेयसे न कुपुत्रता ॥ ७ ॥
७१२ कुपुत्रो हृदयायासं सर्वदा कुरुते पितुः ॥
मातुश्च स्वर्गसंस्थांश्च स्वपितॄन्पातयत्यधः ॥ ८ ॥
७१३ सुहृदां नोपकाराय पितॄणां च न तृप्तये ॥
पित्रोर्दुःखाय धिग्जन्म तस्य दुष्कृतकर्मणः ॥ ९ ॥
७१४ धन्यास्ते तनया येषां सर्वलोकाभिसंमताः ॥
परोपकारिणः शान्ताः साधुकर्मण्यनुव्रताः ॥ १० ॥
७१५ अनिर्वृतं तथा मन्दं परलोकपराङ्मुखम् ॥
नरकाय न सद्वृत्यै कुपुत्रालम्बिजन्म वै ॥ ११ ॥
७१६ करोति सुहृदां दैन्यमहितानां तथा मुदम् ॥
अकाले च जरां पित्रोः कुसुतः कुरुते ध्रुवम् ॥ १२ ॥ *Ibid*, अ. ७२.
७१७ विद्याबुद्धिरविद्यायामज्ञानात्तात जायते ॥
बालोऽग्निं किं न खद्योतमसुरेश्वर मन्यते ॥ ४० ॥
७१८ तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये ॥
आयासायापरं कर्म विद्यान्या शिल्पनैपुणम् ॥ ४१ ॥
७१९ तस्माद्यतेत पुण्येषु य इच्छेन्महतीं श्रियम् ॥
यतितव्यं समत्वे च निर्वाणमपि चेच्छता ॥ ४६ ॥ विष्णु, १, १९.
७२० यंत्रेण पीडिता यद्वन्निस्साराःस्युस्तिलाः क्षणात् ॥
तथा शरीरं निःसारं योनियन्त्रनिपीडनात् ॥३८॥ शिव, उमासं., २२.

## द्वितीयो भागः ।

# का व्य यो गः ।

## १. आधिपत्याभिषेचनम्

[ Immediately after his coronation ceremony, King Prithu is said to have appointed the various Heads of all the items of the world. Here is a fine description of the same. ]

(मत्स्य, अ. ८.)

यदाऽभिषिक्तः सकलाधिराज्ये पृथुर्धरित्र्यामधिपो बभूव ।।
तदौषधीनामधिपं चकार यज्ञव्रतानां तपसां च चन्द्रम् ।। २ ।।
नक्षत्रताराद्विजवृक्षगुल्मलतावितानस्य च रुक्मगर्भः ।।
अपामधीशं वरुणं धनानां राज्ञां प्रभुं वैश्रवणं च तद्वत् ।। ३ ।।
विष्णुं रवीणामधिपं वसूनामग्निं च लोकाधिपतिश्चकार ।।
प्रजापतीनामधिपं च दक्षं चकार शक्रं मरुतामधीशम् ।। ४ ।।
दैत्याधिपानामथ दानवानां प्रह्लादमीशं च यमं पितॄणाम् ।।
पिशाचरक्षः पशुभूतयक्षवेतालराजं त्वथ शूलपाणिम् ।। ५ ।।
प्रालेयशैलं च पतिं गिरीणामीशं समुद्रं ससरिन्नदानाम् ।।
गन्धर्वविद्याधरकिन्नराणामीशं पुनश्चित्ररथं चकार ।। ६ ।।
नागाधिपं वासुकिमुग्रवीर्यं सर्पाधिपं तक्षकमादिदेश ।।
दिशां गजानामधिपं चकार गजेन्द्रमैरावतनामधेयम् ।। ७ ।।
सुपर्णमीशं पततामथाश्वराजानमुच्चैःश्रवसं चकार ।।
सिंहं मृगाणां वृषभं गवां च प्लक्षं पुनः सर्ववनस्पतीनाम् ।। ८ ।।
पितामहः पूर्वमथाभ्यषिञ्चच्चैतान्पुनः सर्वदिशाधिनाथान् ।।
पूर्वेण दिक्पालमथाभ्यषिञ्चन्नाम्ना सुधर्माणमरातिकेतुम् ।। ९ ।।
ततोऽधिपं दक्षिणतश्चकार सर्वेश्वरं शङ्खपदाभिधानम् ।।
स केतुमन्तं च दिगीशमीशश्चकार पश्चाद्भुवनाण्डगर्भः ।। १० ।।
हिरण्यरोमाणमुदग्दिगीशं प्रजापतिर्देवसुतं चकार ।।
अद्यापि कुर्वन्ति दिशामधीशाः शत्रून्दहन्तस्तु भुवोऽभिरक्षाम् ।। ११ ।।

चतुर्भिरेभिः पृथुनामधेयो नृपोऽभिषिक्तः प्रथमं पृथिव्याम् ।।
गतेन्तरे चाक्षुषनामधेये वैवस्वताख्ये च पुनःप्रवृत्ते ।।
प्रजापतिः सोऽस्य चराचरस्य बभूव सूर्यान्वयवंशचिन्हः ।। १२ ।।

## २. महारासवर्णनम्

[The Rāsa Dance of Krisna and Gopīs in Gokula has engrossed the attention of eminent writers, and men and women devotees of Lord Krisna. The Visnu and Bhāgavata Purānas seem to be the early sources of the same.]

(भागवत, १०. २९.)

भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः ।। १ ।।
तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिम्पन्नरुणेन शन्तमैः ।।
स चर्षणीनामुदगाच्छुचो मृजन् प्रियः प्रियाया इव दीर्घदर्शनः ।। २ ।।
दृष्ट्वा कुमुद्वन्तमखण्डमण्डलं रमाननाभं नवकुङ्कुमारुणम् ।।
वनं च तत्कोमलगोभिरञ्जितं जगौ कलं वामदृशां मनोहरम् ।। ३ ।।
निशम्य गीतं तदनङ्गवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः ।।
आजग्मुरन्योन्यमलक्षितोद्यमः स यत्र कान्तो जवलोलकुण्डलाः ।। ४ ।।
दुहन्त्योऽभिययुः काश्चिद् दोहं हित्वा समुत्सुकाः ।।
पयोऽधिश्रित्य संयावमनुद्वास्यापरा ययुः ।। ५ ।।
परिवेषयन्त्यस्तद्धित्वा पाययन्त्यः शिशून्पयः ।।
शुश्रूषन्त्यः पतीन्काश्चिदश्नन्त्योऽपास्य भोजनम् ।। ६ ।।
लिम्पन्त्यः प्रमृजन्त्योऽन्या अञ्जन्त्यः काश्च लोचने ।।
व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णान्तिकं ययुः ।। ७ ।।
ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृबन्धुभिः ।।
गोविन्दापहृतात्मानो न न्यवर्तन्त मोहिताः ।। ८ ।।
अन्तर्गृहगताः काश्चिद् गोप्योऽलब्धविनिर्गमाः ।।
कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ।। ९ ।।

दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ॥
ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गलाः ॥ १० ॥
तमेव परमात्मानं जारबुद्ध्याऽपि संगताः ॥
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥ ११ ॥

श्रीभगवानुवाच—

स्वागतं वो महाभागाः प्रियं किं करवाणि वः ॥
व्रजस्यानामयं कच्चिद् ब्रूतागमनकारणम् ॥ १८ ॥
रजन्येषा घोररूपा घोरसत्त्वनिषेविता ॥
प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ॥ १९ ॥
मातरः पितरः पुत्रा भ्रातरः पतयश्च वः ॥
विचिन्वन्ति ह्यपश्यन्तो मा कृढ्वं बन्धुसाध्वसम् ॥ २० ॥
दृष्टं वनं कुसुमितं राकेशकररञ्जितम् ॥
यमुनानिललीलैजत्तरुपल्लवशोभितम् ॥ २१ ॥
श्रवणाद् दर्शनाद्ध्यानान्मयि भावोऽनुकीर्तनात् ॥
न तथा सन्निकर्षेण प्रतियात ततो गृहान् ॥ २७ ॥

श्रीशुक उवाच —

इति विप्रियमाकर्ण्य गोप्यो गोविन्दभाषितम् ॥
विषण्णा भग्नसङ्कल्पाश्चिन्तामापुर्दुरत्ययाम् ॥ २८ ॥

कृत्वा मुखान्यवशुचः श्वसनेन शुष्यद्
बिम्बाधराणि चरणेन भुवं लिखन्त्यः ॥
अस्त्रैरुपात्तमषिभिः कुचकुङ्कुमानि
तस्थुर्मृजन्त्य उरुदुःखभराः स्म तूष्णीम् ॥ २९ ॥
प्रेष्ठं प्रियेतरमिव प्रतिभाषमाणं
कृष्णं तदर्थविनिवर्त्तितसर्वकामाः ॥
नेत्रे विमृज्य रुदितोपहते स्म किञ्चि—
त्संरम्भगद्गदगिरोऽब्रुवतानुरक्ताः ॥ ३० ॥

गोप्य ऊचुः—

मैवं विभोऽर्हति भवान्गदितुं नृशंसं संत्यज्य सर्वविषयांस्तव पादमूलम् ॥
भक्ता भजस्व दुरवग्रह मा त्यजास्मान् देवो यथाऽऽदिपुरुषो भजतो मुमुक्षून् ॥
यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ॥
अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥ ३२ ॥
कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन् नित्यप्रिये पतिसुतादिभिरार्तिदैः किम्
तन्नः प्रसीद परमेश्वर मा स्म छिन्द्या आशां भृतां त्वयि चिरादरविन्दनेत्र ॥
चित्तं सुखेन भवतापहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये ॥
पादौ पदं न चलतस्तव पादमूलाद यामः कथं व्रजमथो करवाम किं वा ॥३४॥
सिञ्चाङ्ग नस्त्वदधरामृतपूरकेण हासावलोककलगीतजहृच्छयाग्निम् ॥
नो चेद्वयं विरहजाग्न्युपयुक्तदेहा ध्यानेन याम पदयोः पदवीं सखे ते ॥ ३५ ॥
यर्ह्यम्बुजाक्ष तव पादतलं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य ॥
अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्ग स्थातुं त्वयाभिरमिता बत पारयामः ॥३६॥
श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या लब्ध्वापि वक्षसि पदं किलभृत्यजुष्टम् ॥
यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयासस्तद्वद् वयं च तव पादरजः प्रपन्नाः ॥ ३७ ॥
तन्नः प्रसीद वृजिनार्दन तेऽङ्घ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः ॥
त्वत्सुन्दरस्मितनिरीक्षणतीव्रकामतप्तात्मनां पुरुषभूषण देहि दास्यम् ॥ ३८ ॥
वीक्ष्यालकावृतमुखं तव कुण्डलश्रीगण्डस्थलाधरसुखं हसितावलोकम् ॥
दत्ताभयं च भुजदण्डयुगं विलोक्य वक्षःश्रियैकरमणं च भवाम दास्यः ॥३९॥
का स्त्र्यङ्ग ते कलपदायतमूर्च्छितेन सम्मोहिताऽऽर्यचरितान्न चलेत्त्रिलोक्याम् ॥
त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद् गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ॥४०॥
व्यक्तं भवान् व्रजभयार्तिहरोऽभिजातो देवो यथाऽऽदिपुरुषः सुरलोकगोप्ता ॥
तन्नो निधेहि करपङ्कजमार्तबन्धो तप्तस्तनेषु च शिरस्सु च किङ्करीणाम् ॥

श्रीशुक उवाच—

इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः ॥
प्रहस्य सदयं गोपीरात्मारामोऽप्यरीरमत् ॥ ४२ ॥
ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः ॥
उदारहासद्विजकुन्ददीधितिर्व्यरोचतैणाङ्क इवोडुभिर्वृतः ॥ ४३ ॥

उपगीयमान उद्गायन् वनिताशतयूथपः ॥
मालां बिभ्रद्वैजयन्तीं व्यचरन्मण्डयन्वनम् ॥ ४४ ॥
नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकम् ॥
रेमे तत्तरलानन्दकुमुदामोदवायुना ॥ ४५ ॥
बाहुप्रसारपरिम्भकरालकोरुनीवीस्तनालभननर्मनखाग्रपातैः ॥
क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणामुत्तम्भयन् रतिपतिं रमयाञ्चकार ॥ ४६ ॥
एवं भगवतः कृष्णाल्लब्धमाना महात्मनः ॥
आत्मानं मेनिरे स्त्रीणां मानिन्योऽभ्यधिकं भुवि ॥ ४७ ॥
तासां तत्सौभगमदं वीक्ष्य मानं च केशवः ॥
प्रशमाय प्रसादाय तत्रैवान्तरधीयत ॥ ४८ ॥

## गोपीचित्तक्षोभः

(*Ibid*, ३०.)

अन्तर्हिते भगवति सहसैव व्रजाङ्गनाः ॥
अतप्यंस्तमचक्षाणाः करिण्य इव यूथपम् ॥ १ ॥
गत्यानुरागस्मितविभ्रमेक्षितै—
र्मनोरमालापविहारविभ्रमैः ॥
आक्षिप्तचित्ताः प्रमदा रमापते—
स्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥ २ ॥
गतिस्मितप्रेक्षणभाषणादिषु
प्रियाः प्रियस्य प्रतिरूढमूर्तयः ॥
असावहं त्वित्यबलास्तदात्मिका
न्यवेदिषुः कृष्णविहारविभ्रमाः ॥ ३ ॥
गायन्त्य उच्चैरमुमेव संहता
विचिक्युरुन्मत्तकवद्वनाद्वनम् ॥
पप्रच्छुराकाशवदन्तरं बहि—
र्भूतेषु सन्तं पुरुषं वनस्पतीन् ॥ ४ ॥
दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः ॥
नन्दसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ॥ ५ ॥

कच्चित्कुरुबकाशोकनागपुन्नागचम्पकाः ॥
रामानुजो मानिनीनामितो दर्पहरस्मितः ॥ ६ ॥
कच्चित्तुलसि कल्याणि गोविन्दचरणप्रिये ॥
सह त्वालिकुलैर्बिभ्रद् दृष्टस्तेऽतिप्रियोऽच्युतः ॥ ७ ॥
मालत्यदर्शि वः कच्चिन्मल्लिके जाति यूथिके ॥
प्रीतिं वो जनयन्यातः करस्पर्शेन माधवः ॥ ८ ॥

चूतप्रियालपनसासनकोविदार—
जम्ब्वर्कबिल्वबकुलाम्रकदम्बनीपाः ॥
येऽन्ये परार्थभवका यमुनोपकूलाः
शंसन्तु कृष्णपदवीं रहितात्मनां नः ॥ ९ ॥
किं ते कृतं क्षिति तपो बत केशवांघ्रि—
स्पर्शोत्सवोत्पुलकिताङ्गरुहैर्विभासि ॥
अप्यंघ्रिसंभव उरुक्रमविक्रमाद्वा
आहो वराहवपुषः परिरम्भणेन ॥ १० ॥
अप्येणपत्न्युपगतः प्रिययेह गात्रै-
स्तन्वन् दृशां सखि सुनिर्वृतिमच्युतो वः ॥
कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः
कुन्दस्रजः कुलपतेरिह वाति गन्धः ॥ ११ ॥
बाहुं प्रियांस उपधाय गृहीतपद्मो
रामानुजस्तुलसिकालिकुलैर्मदान्धैः ॥
अन्वीहमान इह वस्तरवः प्रणामं
किं वाभिनन्दति चरन्प्रणयावलोकैः ॥ १२ ॥

पृच्छतेमा लता बाहूनप्याश्लिष्टा वनस्पतेः ॥
नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो ॥ १३ ॥
इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः ॥
लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः ॥ १३ ॥
कस्याश्चित्पूतनावन्त्याः कृष्णायन्त्यपिबत्स्तनम् ॥
तोकायित्वा रुदत्यन्या पदाऽहञ्शकटायतीम् ॥ १५ ॥

दैत्यायित्वा जहारान्यामेका कृष्णार्भभावनाम् ॥
रिङ्गयामास काऽप्यंघ्री कर्षन्ती घोषनिःस्वनैः ॥ १६ ॥
कृष्णरामायिते द्वे तु गोपायन्त्यश्च काश्चन ॥
वत्सायन्तीं हन्ति चान्या तत्रैका तु बकायतीम् ॥ १७ ॥
आहूय दूरगा यद्वत् कृष्णस्तमनुकुर्वतीम् ॥
वेणुं क्वणन्तीं क्रीडन्तीमन्या शंसन्ति साध्विति ॥ १८ ॥
कस्यांचित् स्वभुजं न्यस्य चलन्त्याहापरा ननु ॥
कृष्णोऽहं पश्यत गतिं ललितामिति तन्मनाः ॥ १९ ॥
मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं मया ॥
इत्युक्त्वैकेन हस्तेन यतन्त्युन्निदधेऽम्बरम् ॥ २० ॥
आरुह्यैका पदाऽऽक्रम्य शिरस्याहापरां नृप ॥
दुष्टाहे गच्छ जातोऽहं खलानां ननु दण्डधृक् ॥ २१ ॥
तत्रैकोवाच हे गोपा दावाग्निं पश्यतोल्बणम् ॥
चक्षूंष्याश्वपिदध्वं वो विधास्ये क्षेममञ्जसा ॥ २२ ॥
बद्धान्यया स्रजा काचित्तन्वी तत्र उलूखले ॥
भीता सुदृक् पिधायास्यं भेजे भीतिविडम्बनम् ॥ २३ ॥
एवं कृष्णं पृच्छमाना वृन्दावनलतास्तरून् ॥
व्यचक्षत वनोद्देशे पदानि परमात्मनः ॥ २४ ॥
पदानि व्यक्तमेतानि नन्दसूनोर्महात्मनः ॥
लक्ष्यन्ते हि ध्वजाम्भोजवज्राङ्कुशयवादिभिः ॥ २५ ॥
तैस्तैः पदैस्तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः ॥
वध्वाः पदैः सुपृक्तानि विलोक्यार्ताः समब्रुवन् ॥ २६ ॥
कस्याः पदानि चैतानि याताया नन्दसूनुना ॥
अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा ॥ २७ ॥
अनयाऽऽराधितो नूनं भगवान्हरिरीश्वरः ॥
यन्नो विहाय गोविन्दः प्रीतो यामनयद्रहः ॥ २८ ॥
धन्या अहो अमी आल्यो गोविन्दांघ्र्यब्जरेणवः ॥
यान् ब्रह्मेशो रमा देवी दधुर्मूर्ध्न्यघनुत्तये ॥ २९ ॥

तस्या अमूनि नः क्षोभं कुर्वन्त्युच्चैःपदानि यत् ॥
यैकापहृत्य गोपीनां रहो भुङ्क्तेऽच्युताधरम् ॥ ३० ॥
न लक्ष्यन्ते पदान्यत्र तस्या नूनं तृणाङ्कुरैः ॥
खिद्यत्सुजाताङ्घ्रितलामुन्निन्ये प्रेयसीं प्रियः ॥ ३१ ॥
इमान्यधिकमग्नानि पदानि वहतो वधूम् ॥
गोप्यः पश्यत कृष्णस्य भाराक्रान्तस्य कामिनः ॥ ३२ ॥
अत्रावरोपिता कान्ता पुष्पहेतोर्महात्मना ॥
अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः ॥
प्रपदाक्रमणे एते पश्यतासकले पदे ॥ ३३ ॥
केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतम् ॥
तानि चूडयता कान्तामुपविष्टमिह ध्रुवम् ॥ ३४ ॥
रेमे तया चात्मरत आत्मारामोऽप्यखण्डितः ॥
कामिनां दर्शयन् दैन्यं स्त्रीणां चैव दुरात्मताम् ॥ ३५ ॥
इत्येवं दर्शयन्त्यस्ताश्चेरुर्गोप्यो विचेतसः ॥
यां गोपीमनयत्कृष्णो विहायान्याः स्त्रियो वने ॥ ३६ ॥
सा च मेने तदाऽऽत्मानं वरिष्ठं सर्वयोषिताम् ॥
हित्वा गोपीः कामयाना मामसौ भजते प्रियः ॥ ३७ ॥
ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् ॥
न पारयेऽहं चलितुं नय मां यत्र ते मनः ॥ ३८ ॥
एवमुक्तः प्रियामाह स्कन्ध आरुह्यतामिति ॥
ततश्चान्तर्दधे कृष्णः सा वधूरन्वतप्यत ॥ ३९ ॥
हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज ॥
दास्यास्ते कृपणाया मे सखे दर्शय सन्निधिम् ॥ ४० ॥
अन्विच्छन्त्यो भगवतो मार्गं गोप्योऽविदूरतः ॥
ददृशुः प्रियविश्लेषमोहितां दुःखितां सखीम् ॥ ४१ ॥
तया कथितमाकर्ण्य मानप्राप्तिं च माधवात् ॥
अवमानं च दौरात्म्याद् विस्मयं परमं ययुः ॥ ४२ ॥
ततोऽविशन् वनं चन्द्रज्योत्स्ना यावद्विभाव्यते ॥
तमः प्रविष्टमालक्ष्य ततो निववृतुः स्त्रियः ॥ ४३ ॥

तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ॥
तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः ॥ ४४ ॥
पुनः पुलिनमागत्य कालिन्द्याः कृष्णभावनाः ॥
समवेता जगुः कृष्णं तदागमनकांक्षिताः ॥ ४५ ॥

## गोपीगीतम्
### (अ. ३१)

गोप्य ऊचु—

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि ॥
दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥ १ ॥
शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा ॥
सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह किं वधः ॥ २ ॥
विषजलाप्ययाद् व्यालराक्षसाद् वर्षमारुताद् वैद्युतानलात् ॥
वृषमयात्मजाद् विश्वतोभयादृषभ ते वयं रक्षिता मुहुः ॥ ३ ॥
न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् ॥
विखनसार्थितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले ॥ ४ ॥
विरचिताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात् ॥
करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥ ५ ॥
व्रजजनार्तिहन् वीर योषितां निजजनस्मयध्वंसनस्मित ॥
भज सखे भवत्किङ्करीः स्म नो जलरुहाननं चारु दर्शय ॥ ६ ॥
प्रणतदेहिनां पापकर्शनं तृणचरानुगं श्रीनिकेतनम् ॥
फणिफणार्पितं ते पदाम्बुजं कृणु कुचेषु नः कृन्धि हृच्छयम् ॥ ७ ॥
मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ॥
विधिकरीरिमा वीर मुह्यतीरधरसीधुनाऽऽप्याययस्व नः ॥ ८ ॥
तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ॥
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ॥ ९ ॥
प्रहसितं प्रियं प्रेमवीक्षणं विहरणं च ते ध्यानमङ्गलम् ॥
रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि ॥ १० ॥

चलसि यद् व्रजाच्चारयन् पशून् नलिनसुन्दरं नाथ ते पदम् ॥
शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छति ॥११॥
दिनपरिक्षये नीलकुन्तलैर्वनरुहाननं बिभ्रदावृतम् ॥
घनरजस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छसि ॥ १२ ॥
प्रणतकामदं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि ॥
चरणपङ्कजं शन्तमं च ते रमण नः स्तनेष्वर्पयाधिहन् ॥ १३ ॥
सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम् ॥
इतररागविस्मारण नृणां वितर वीर नस्तेऽधरामृतम् ॥ १४ ॥
अटति यद्भवानन्हि काननं त्रुटिर्युगायते त्वामपश्यताम् ॥
कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद् दृशाम् ॥ १५ ॥
पतिसुतान्वयभ्रातृबान्धवानतिविलङ्घ्य तेऽन्त्यच्युतागताः ॥
गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि ॥ १६ ॥
रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् ॥
बृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः ॥ १७ ॥
व्रजवनौकसां व्यक्तिरङ्ग ते वृजिनहन्त्र्यलं विश्वमङ्गलम् ॥
त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥१८॥

यत्ते सुजातचरणाम्बुरुहं स्तनेषु
भीताः शनैः प्रिय दधीमहि कर्कशेषु ॥
तेनाटवीमटसि तद् व्यथते न किंस्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥ १९ ॥

## गोपीसान्त्वनम्

### (अ. ३२)

इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा ॥
रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः ॥ १ ॥
तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः ॥
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥ २ ॥
तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः ॥
उत्तस्थुर्युगपत्सर्वास्तन्वः प्राणमिवागतम् ॥ ३ ॥

काचित्कराम्बुजं शौरेर्जगृहेऽञ्जलिना मुदा ॥
काचिद्दधार तद्बाहुमंसे चन्दनरूषितम् ॥ ४ ॥

काचिदञ्जलिना गृह्णात्तन्वी ताम्बूलचर्वितम् ॥
एका तदंघ्रिकमलं संतप्ता स्तनयोरधात् ॥ ५ ॥

एका भ्रुकुटिमाबध्य प्रेमसंरम्भविह्वला ॥
घ्नतीवैक्षत्कटाक्षेपैः संदष्टदशनच्छदा ॥ ६ ॥

अपरानिमिषद्दृग्भ्यां जुषाणा तन्मुखाम्बुजम् ॥
आपीतमपि नातृप्यत्सन्तस्तच्चरणं यथा ॥ ७ ॥

तं काचिन्नेत्ररन्ध्रेण हृदिकृत्य निमील्य च ॥
पुलकाङ्ग्युपगुह्यास्ते योगीवानन्दसंप्लुता ॥ ८ ॥

सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः ॥
जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ॥ ९ ॥

ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः ॥
व्यरोचिताधिकं तात पुरुषः शक्तिभिर्यथा ॥ १० ॥

ताः समादाय कालिन्द्या निर्विश्य पुलिनं विभुः ॥
विकसत्कुन्दमन्दारसुरभ्यनिलषट्पदम् ॥ ११ ॥

शरच्चन्द्रांशुसंदोहध्वस्तदोषातमः शिवम् ॥
कृष्णाया हस्ततरलाचितकोमलवालुकम् ॥ १२ ॥

तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथान्तं श्रुतयो यथा ययुः ॥
स्वैरुत्तरीयैः कुचकुङ्कुमाङ्कितैरचीक्लृपन्नासनमात्मबन्धवे ॥ १३ ॥

तत्रोपविष्टो भगवान्स ईश्वरो योगेश्वरान्तर्हृदि कल्पितासनः ॥
चकास गोपीपरिषद्गतोऽर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् ॥ १४ ॥

सभाजयित्वा तमनङ्गदीपनं सहासलीलेक्षणविभ्रमभ्रुवा ॥
संस्पर्शनेनाङ्ककृतांघ्रिहस्तयोः संस्तुत्य ईषत्कुपिता बभाषिरे ॥ १५ ॥

गोप्य ऊचु—

भजतोऽनुभजन्त्येक एक एतद्विपर्ययम् ॥
नोभयांश्च भजन्त्येक एतन्नो ब्रूहि साधु भोः ॥ १६ ॥

श्रीभगवानुवाच—

मिथो भजन्ति ये सख्यः स्वार्थैकान्तोद्यमा हि ते ॥
न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि नान्यथा ॥ १७ ॥
भजन्त्यभजतो ये वै करुणाः पितरो यथा ॥
धर्मो निरपवादोऽत्र सौहृदं च सुमध्यमाः ॥ १८ ॥
भजतोऽपि न वै केचिद् भजन्त्यभजतः कुतः ॥
आत्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः ॥ १९ ॥
नाहं तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तिवृत्तये ॥
यथाधनो लब्धधने विनष्टे तच्चिन्तयान्यन्निभृतो न वेद ॥ २० ॥
एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेऽबलाः ॥
मया परोक्षं भजता तिरोहितं मासूयितुं मार्हथ तत्प्रियं प्रियाः ॥ २१ ॥
न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः ॥
या माभजन् दुर्जरगेहशृङ्खलाः संवृश्च्य तद्वः प्रतियातु साधुना ॥ २२ ॥

## महारासवर्णनम्

( अ. ३३ )

इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः ॥
जहुर्विरहजं तापं तदङ्गोपचिताशिषः ॥ १ ॥
तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः ॥
स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः ॥ २ ॥
रासोत्सवः संप्रवृत्तो गोपीमण्डलमंडितः ॥
योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ॥
प्रविष्टेन गृहीतानां कण्ठे स्वनिकटं स्त्रियः ॥ ३ ॥
यं मन्येरन् नभस्तावद् विमानशतसङ्कुलम् ॥
दिवौकसां सदाराणामौत्सुक्यापहृतात्मनाम् ॥ ४ ॥
ततो दुन्दुभयो नेदुर्निपेतुः पुष्पवृष्टयः ॥
जगुर्गन्धर्वपतयः सस्त्रीकास्तद्यशोऽमलम् ॥ ५ ॥
वलयानां नूपुराणां किंकिणीनां च योषिताम् ॥
सप्रियाणामभूच्छब्दस्तुमुलो रासमण्डले ॥ ६ ॥

तत्रातिशुशुभे ताभिर्भगवान् देवकीसुतः ।।
मध्ये मणीनां हैमानां महामरकतो यथा ।। ७ ।।

पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासै—
र्भज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्डलोलैः ।।
स्विद्यन्मुख्यः कबररशनाग्रन्थयः कृष्णवध्वो
गायन्त्यस्तं तडित इव ता मेघचक्रे विरेजुः ।। ८ ।।

उच्चैर्जगुर्नृत्यमाना रक्तकण्ठ्यो रतिप्रियाः ।।
कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतम् ।। ९ ।।
काचित्समं मुकुन्देन स्वरजातीरमिश्रिताः ।।
उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति ।।
तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् ।। १० ।।
काचिद्रासपरिश्रान्ता पार्श्वस्थस्य गदाभृतः ।।
जग्राह बाहुना स्कन्धं श्लथद्वलयमल्लिका ।। ११ ।।
तत्रैकांसगतं बाहुं कृष्णस्योत्पलसौरभम् ।।
चन्दनालिप्तमाघ्राय हृष्टरोमा चुचुम्ब ह ।। १२ ।।
कस्याश्चिन्नाटचविक्षिप्तकुण्डलत्विषमण्डितम् ।।
गण्डं गण्डे सन्दधत्या अदात्ताम्बूलचर्वितम् ।। १३ ।।
नृत्यन्ती गायती काचित् कूजन्नूपुरमेखला ।।
पार्श्वस्थाच्युतहस्ताब्जं श्रान्ताधात्स्तनयोः शिवम् ।। १४ ।।
गोप्यो लब्धाच्युतं कान्तं श्रिय एकान्तवल्लभम् ।।
गृहीतकण्ठस्तद्दोर्भ्यां गायन्त्यस्तं विजह्रिरे ।। १५ ।।

कर्णोत्पलालकविटङ्ककपोलघर्म-
वक्त्रश्रियो वलयनूपुरघोषवाद्यैः ।।
गोप्यः समं भगवता ननृतुः स्वकेश—
स्रस्तस्रजो भ्रमरगायकरासगोष्ठ्याम् ।। १६ ।।

एवं परिष्वङ्गकराभिमर्श-
स्निग्धेक्षणोद्दामविलासहासैः ।।
रेमे रमेशो व्रजसुन्दरीभि-
र्यथार्भकः स्वप्रतिबिम्बविभ्रमः ।। १७ ।।

तदङ्गसङ्गप्रमुदाकुलेन्द्रियाः
केशान्दुकूलं कुचपट्टिकां वा ।।
नाञ्जः प्रतिव्योढुमलं व्रजस्त्रियो
विस्रस्तमालाभरणाः कुरूद्वह ।। १८ ।।

कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः ।।
कामार्दिताः शशाङ्कश्च सगणो विस्मितोऽभवत् ।। १९ ।।
कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः ।।
रेमे स भगवांस्ताभिरात्मारामोऽपि लीलया ।। २० ।।
तासामतिविहारेण श्रान्तानां वदनानि सः ।।
प्रामृजत्करुणः प्रेम्णा शन्तमेनाङ्ग पाणिना ।। २१ ।।

गोप्यः स्फुरत्पुरटकुण्डलकुन्तलत्विड्-
गण्डश्रिया सुधितहासनिरीक्षणेन ।।
मानं दधत्य ऋषभस्य जगुः कृतानि
पुण्यानि तत्कररुहस्पर्शप्रमोदाः ।। २२ ।।

ताभिर्युतः श्रममपोहितुमङ्गसङ्ग-
घृष्टस्रजः स कुचकुङ्कुमरञ्जितायाः ।।
गन्धर्वपालिभिरनुद्रुत आविशद् वाः
श्रान्तो गजीभिरिभराडिव भिन्नसेतुः ।। २३ ।।

सोऽम्भस्यलं युवतिभिः परिषिच्यमानः
प्रेम्णेक्षितः प्रहसतीभिरितस्ततोऽङ्ग ।।
वैमानिकैः कुसुमवर्षिभिरीड्यमानो
रेमे स्वयं स्वरतिरत्र गजेन्द्रलीलः ।। २४ ।।

ततश्च कृष्णोपवने जलस्थल—
प्रसूनगन्धानिलजुष्टदिक्तटे ।।
चचार भृङ्गप्रमदागणावृतो
यथा मदच्युद् द्विरदः करेणुभिः ।। २५ ।।

एवं शशाङ्कांशुविराजिता निशाः
स सत्यकामोऽनुरताबलागणाः ।।

सिषेव आत्मन्यवरुद्धसौरतः
सर्वाः शरत्काव्यकथारसाश्रयाः ॥ २६ ॥

राजोवाच—

संस्थापनाय धर्मस्य प्रशमायेतरस्य च ॥
अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥ २७ ॥
स कथं धर्मसेतूनां वक्ता कर्ताभिरक्षिता ॥
प्रतीपमाचरद् ब्रह्मन् परदाराभिमर्शनम् ॥ २८ ॥
आप्तकामो यदुपतिः कृतवान्वै जुगुप्सितम् ॥
किमभिप्राय एतं नः संशयं छिन्धि सुव्रत ॥ २९ ॥

श्रीशुक उवाच—

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ॥
तेजीयसां न दोषाय वन्हेः सर्वभुजो यथा ॥ ३० ॥
नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः ॥
विनशत्याचरन्मौढ्याद् यथा रुद्रोऽब्धिजं विषम् ॥ ३१ ॥
ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ॥
तेषां यत्स्ववचोयुक्तं बुद्धिमांस्तत्समाचरेत् ॥ ३२ ॥
कुशलाचरितेनैषामिह स्वार्थो न विद्यते ॥
विपर्ययेण वानर्थो निरहंकारिणां प्रभो ॥ ३३ ॥
किमुताखिलसत्त्वानां तिर्यङ्मर्त्यदिवौकसाम् ॥
ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ॥ ३४ ॥
यत्पादपङ्कजपरागनिषेवतृप्ता
योगप्रभावविधुताखिलकर्मबन्धाः ॥
स्वैरं चरन्ति मुनयोऽपि न नह्यमाना—
स्तस्येच्छयाऽऽत्तवपुषः कुत एव बन्धः ॥ ३५ ॥
गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम् ॥
योऽन्तश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक् ॥ ३६ ॥

अनुग्रहाय भूतानां मानुषं देहमास्थितः ॥
भजते तादृशीः क्रीडा यः श्रुत्वा तत्परो भवेत् ॥ ३७ ।
नासूयन्खलु कृष्णाय मोहितास्तस्य मायया ॥
मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः ॥ ३८ ॥
ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः
अनिच्छन्त्यो ययुर्गोप्यः स्वगृहान्भगवत्प्रियाः ॥ ३९ ॥
विक्रीडितं व्रजवधूभिरिदं च विष्णोः
श्रद्धान्वितोऽनुशृणुयादथ वर्णयेद्यः ॥
भक्तिं परां भगवति प्रतिलभ्य कामं
हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ॥ ४० ॥

## ३. राधाकृष्णलीला

(ब्रह्मवैवर्त, द्वि. भा., अ. १५)

[ Rādhā picks up the child Krisṇa from the shoulders of Nanda. After a while, Krisṇa assumes an elderly form. Here is a graphic description of their love scene. ]

राधावर्णनम्—

एकदा कृष्णसहितो नन्दो वृन्दावनं ययौ ॥
तत्रोपवनभाण्डीरे चारयामास गोधनम् ॥ १ ॥
सरःसु स्वादुतोयं च पाययामास तत्पपौ ॥
उवास वृक्षमूले च बालं कृत्वा स्ववक्षसि ॥ २ ॥
एतस्मिन्नंतरे कृष्णो मायामानुषविग्रहः ॥
चकार माययाऽकस्मान्मेघाच्छन्नं नभो मुने ॥ ३ ॥
मेघावृतं नभो दृष्ट्वा श्यामलं काननान्तरम् ॥
झञ्झावातं मेघशब्दं वज्रशब्दं च दारुणम् ॥ ४ ॥
वृष्टिधारामतिस्थूलां कम्पमानांश्च पादपान् ॥
दृष्ट्वैवं पतितस्कन्धान्नंदो भयमवाप ह ॥ ५ ॥

कथं यास्यामि गोवत्सान्विहाय स्वाश्रमं बत ॥
गृहं यदि न यास्यामि भविता बालकस्य किम् ॥ ६ ॥
एवं नन्दे प्रवदति रुरोद श्रीहरिस्तदा ॥
पयोभिया हरिश्चैव पितुः कण्ठं दधार सः ॥ ७ ॥
एतस्मिन्नंतरे राधा जगाम कृष्णसंनिधिम् ॥
गमनं कुर्वती राजहंसखञ्जनगञ्जनम् ॥ ८ ॥
शरत्पार्वणचन्द्राभामुष्टवक्त्रमनोहरा ॥
शरन्मध्याह्नपद्मानां शोभामोचनलोचना ॥ ९ ॥
परितस्तारकापक्ष्मविचित्रकमलोज्ज्वला ॥
खगेन्द्रचञ्चचारुश्रीशंसानाशकनासिका ॥ १० ॥
तन्मध्यस्थलशोभार्हस्थूलमुक्ताफलोज्ज्वला ॥
कबरीवेषसंयुक्ता मालतीमाल्यवेष्टिता ॥ ११ ॥
ग्रीष्ममध्याह्नमार्तण्डप्रभामुष्टिककुण्डला ॥
पक्वबिम्बफलानां च श्रीमुष्टाधरयुग्मका ॥ १२ ॥
मुक्तापंक्तिप्रभातैकदन्तपंक्तिसमुज्ज्वला ॥
ईषत्प्रफुल्लकुन्दानां सुप्रभानाशकस्मिता ॥ १३ ॥
कस्तूरीबिन्दुसंयुक्तसिन्दूरबिन्दुभूषिता ॥
कपालं मल्लिकायुक्तं बिभ्रती श्रीयुतं सती ॥ १४ ॥
सुचारुवर्तुलाकारकपोलपुलकान्विता ॥
मणिरत्नेन्द्रसाराणां हारोरःस्थलभूषिता ॥ १५ ॥
सुचारुश्रीफलयुगकठिनस्तनसङ्गता ॥
पत्रावली श्रियायुक्ता दीप्ता सद्रत्नतेजसा ॥ १६ ॥
सुचारुवर्तुलाकारमुदरं सुमनोहरम् ॥
विचित्रत्रिवलीयुक्तं निम्ननाभिं च बिभ्रती ॥ १७ ॥
सद्रत्नसाररचितमेखलाजालभूषिता ॥
कामास्त्रसारभ्रूभङ्गयोगीन्द्रचित्तमोहिनी ॥ १८ ॥
कठिनश्रोणियुगुलं धरणीधरनिन्दितम् ॥
स्थलपद्मप्रभामुष्टचरणं दधती मुदा ॥ १९ ॥

रत्नभूषणसंयुक्तं यावकद्रवसंयुतम् ॥
मणीन्द्रशोभासंमुष्टसालक्तकपुनर्भवम् ॥ २० ॥
सद्रत्नसाररचितक्वणन्मञ्जीररञ्जितम् ॥
रत्नकङ्कणकेयूरचारुशङ्खविभूषिता ॥ २१ ॥
रत्नाङ्गुलीयनिकरवन्हिशुद्धांशुकोज्ज्वला ॥
चारुचम्पकपुष्पाणां प्रभामुष्टकलेवरा ॥ २२ ॥
सहस्रदलसंयुक्तक्रीडाकमलमुज्ज्वलम् ॥
श्रीमुखश्रीदर्शनार्थं बिभ्रती रत्नदर्पणम् ॥ २४ ॥

Rādhā picks up Krisṇa from Nanda—

कृत्वा वक्षसि तं कामाच्छ्लेषं श्लेषं चुचुम्ब च ॥
पुलकांकितसर्वाङ्गी सस्मार रासमण्डलम् ॥ ३९ ॥
एतस्मिन्नन्तरे राधा मायासद्रत्नमण्डपम् ॥
ददर्श रत्नकलशशतेन च समन्वितम् ॥ ४० ॥
नानाविचित्रचित्राढ्यं चित्रकाननशोभितम् ॥
सिन्दूराकारमणिभिः स्तम्भसंघैर्विराचितम् ॥ ४१ ॥
चन्दनागुरुकस्तूरीकुङ्कुमद्रवयुक्तया ॥
संयुक्तं मालतीमालासमूहपुष्पशय्यया ॥ ४२ ॥
नानाभोगसमायुक्तं दिव्यदर्पणसंयुतम् ॥
मणीन्द्रमुक्तामाणिक्यमालाजालैर्विभूषितम् ॥ ॥ ४३ ॥
मणीन्द्रसाररचितकपाटेन समन्वितम् ॥
भूषितं भूषितैर्वस्त्रैः पताकानिकरैर्वरैः ॥ ४४ ॥
कुङ्कुमाकारमणिभिः सप्तसोपानसंयुतम् ॥
युक्तं षट्पदसंयुक्तैः पुष्पोद्यानं च पुष्पितैः॥ ४५ ॥
सा देवी मण्डपं दृष्ट्वा जगामाभ्यन्तरं मुदा ॥
ददर्श तत्र ताम्बूलं कर्पूरादिसमन्वितम् ॥ ४६ ॥
जलं च रत्नकुम्भस्थं स्वच्छं शीतं मनोहरम् ॥
सुधामधुभ्यां पूर्णानि रत्नकुम्भानि नारद ॥ ४७ ॥
पुरुषं कमनीयं च किशोरं श्यामसुन्दरं ॥
कोटिकन्दर्पलीलाभं चन्दनेन विभूषितम् ॥ ४८ ॥

शयानं पुष्पशय्यायां सस्मितं सुमनोहरम् ॥
पीतवस्त्रपरीधानं प्रसन्नवदनेक्षणम् ॥ ४९ ॥
मणीन्द्रसारनिर्माणं क्वणन्मञ्जीररञ्जितम् ॥
सद्रत्नसारनिर्माणकेयूरवलयान्वितम् ॥ ५० ॥
मणीन्द्रकुण्डलाभ्यां च गण्डस्थलविराजितम् ॥
कौस्तुभेन मणीन्द्रेण वक्षःस्थलसमुज्ज्वलम् ॥ ५१ ॥
शरत्पार्वणचन्द्रास्यप्रभामुष्टमुखोज्ज्वलम् ॥
शरत्प्रफुल्लकमलप्रभामोचनलोचनम् ॥ ५२ ॥
मालतीमाल्यसंश्लिष्टशिखिपिच्छसुशोभितम् ॥
त्रिवङ्कचूडं बिभ्रन्तं पश्यन्तं रत्नमन्दिरम् ॥ ५३ ॥
क्रोडं बालकशून्यं च दृष्ट्वा त नवयौवनम् ॥
सर्वस्मृतिस्वरूपा सा तथाऽपि विस्मयं ययौ ॥ ५४ ॥
रूपं रासेश्वरी दृष्ट्वा मुमोह सुमनोहरम् ॥
कामाच्चक्षुश्चकोराभ्यां मुखचन्द्रं पपौ मुदा ॥ ५५ ॥
निमेषरहिता राधा नवसङ्गमलालसा ॥
पुलकांकितसर्वांगी सस्मिता मदनातुरा ॥ ५६ ॥
तामुवाच हरिस्तत्र स्मेराननसरोरुहाम् ॥
नवसङ्गमयोग्यां च पश्यन्ती वक्रचक्षुषा ॥ ५७ ॥

## राधाविलासः

श्रीकृष्णस्य वचः श्रुत्वा विधाता जगतां मुने ॥
प्रणम्य राधां कृष्णं च जगाम स्वालयं मुदा ॥ १३६ ॥
गते ब्रह्मणि सा देवी सस्मिता वक्रचक्षुषा ॥
सा ददर्श हरेर्वक्त्रं चच्छाद व्रीडया मुखम् ॥ १३७ ॥
पुलकाङ्कितसर्वाङ्गी कामबाणप्रपीडिता ॥
प्रणम्य श्रीहरिं भक्त्या जगाम शयनं हरेः ॥ १३८ ॥
चन्दनागुरुपङ्कं च कस्तूरीकुङ्कुमान्वितम् ॥
ललाटे तिलकं कृत्वा ददौ कृष्णस्य वक्षसि ॥ १३९ ॥
सुधापूर्णं रत्नपात्रं मधुपूर्णं मनोहरम् ॥
प्रददौ हरये भक्त्या बुभुजे जगतीपतिः ॥ १४० ॥

ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितम् ॥
ददौ कृष्णाय सा राधा सादरं बुभुजे हरिः ॥ १४१ ॥
चखाद सस्मिता राधा हरिदत्तं सुधारसम् ॥
ताम्बूलं तेन दत्तं च बुभुजे पुरतो हरेः ॥ १४२ ॥
कृष्णश्चर्वितताम्बूलं राधिकायै मुदा ददौ ॥
चखाद परया भक्त्या पपौ तन्मुखपङ्कजम् ॥ १४३ ॥
राधाचर्विततताम्बूलं ययाचे मधुसूदनः ॥
जहास न ददौ राधा क्षमेत्युक्तं तया मुदा ॥ १४४ ॥
चन्दनागुरुकस्तूरीकुङ्कुमद्रवमुत्तमम् ॥
राधिकायाश्च सर्वाङ्गे प्रददौ माधवः स्वयम् ॥ १४५ ॥
यः कामो ध्यायते नित्यं यस्यैकचरणाम्बुजम् ॥
बभूव तस्य स वशो राधासंतोषकारणात् ॥ १४६ ॥
यद्भृत्यभृत्यैर्मदनो जितः सर्वक्षणं मुने ॥
स्वेच्छामयो हि भगवाञ्जितस्तेन कुतूहलात् ॥ १४७ ॥
करे धृत्वा च तां कृष्णः स्थापयामास वक्षसि ॥
चकार शिथिलं वस्त्रं चुम्बनं च चतुर्विधम् ॥ १४८ ॥
बभूव रतियुद्धेन विच्छिन्ना क्षुद्रघण्टिका ॥
चुम्बनेनौष्ठरागश्च ह्याश्लेषेण च पत्रकम् ॥ १४९ ॥
शृङ्गारेणैव कबरी सिन्दूरतिलकं मुने ॥
जगामालक्तकाङ्कश्च विपरीतादिकेन च ॥ १५० ॥
पुलकाङ्कितसर्वाङ्गी बभूव नवसङ्गमात् ॥
मूर्च्छामवाप सा राधा बुबुधे न दिवानिशम् ॥ १५१ ॥
प्रत्यङ्गेनैव प्रत्यङ्गमङ्गेनाङ्गं समाश्लिषत् ॥
शृङ्गाराष्टविधं कृष्णश्चकार कामशास्त्रवित् ॥ १५२ ॥
पुनस्तां च समाश्लिष्य सस्मितां वक्रलोचनाम् ॥
क्षतविक्षतसर्वाङ्गीं नखदन्तैश्चकार ह ॥ १५३ ॥
कङ्कणानां किङ्किणीनां मञ्जीराणां मनोहरः ॥
बभूव शब्दस्तत्रैव शृङ्गारसमरोद्भवः ॥ १५४ ॥

पुनस्तां च समाकृष्य शय्यायां च निवेश्य ह ॥
चकार रहितां राधां कबरीबन्धवाससा ॥ १५५ ॥
निर्जने कौतुकात्कृष्णः कामशास्त्रविशारदः ॥
चूडावेषांशुकैर्हीनं चकार तं च राधिका ॥ १५६ ॥
न कस्य कस्माद्धानिश्च तौ द्वौ कार्यविशारदौ ॥
जग्राह राधाहस्तात्तु माधवो रत्नदर्पणम् ॥ १५७ ॥
मुरलीं माधवकराज्जग्राह राधिका बलात् ॥
चित्तापहारं राधायाश्चकार माधवो बलात् ॥ १५८ ॥
जहार राधिका रासान्माधवस्यापि मानसम् ॥
निवृत्ते कामयुद्धे च सस्मिता वक्रलोचना ॥ १५९ ॥
प्रददौ मुरलीं प्रीत्या श्रीकृष्णाय महात्मने ॥
प्रददौ दर्पणं कृष्णः क्रीडाकमलमुज्ज्वलम् ॥ १६० ॥
चकार कबरीं रम्यां सिन्दूरतिलकं ददौ ॥
विचित्रपत्रकं वेषं चकारैवंविधं हरिः ॥ १६१ ॥
विश्वकर्मा न जानाति सर्वानामपि का कथा ॥
वेषं विधातुं कृष्णस्य यदा राधा समुद्यता ॥ १६२ ॥

## ४. सावित्र्युपाख्याने वनदर्शनम्

[ There is not even a single soul in India who does not know the episode of Sāvitrī, the daughter of King Aśvapati. Savitrī married Satyavān, the son of King Dyumatsena, who had lost his kingdom. Satyavān went to a forest for fetching fuel. Sāvitrī followed him. The former gives an interesting description how all the animal couples in nature are enjoying life. ]

[ चतुर्थेऽहनि मर्तव्यं तथा सत्यवता द्विजाः ॥
श्वशुरेणाभ्यनुज्ञाता तदा राजसुताऽपि सा ॥ १७ ॥
चक्रे त्रिरात्रं धर्मज्ञा प्राप्ते तस्मिंस्तदा दिने ॥
दारुपुष्पफलाहारी सत्यवांस्तु ययौ वनम् ॥ १८ ॥

श्वशुरेणाभ्यनुज्ञाता याचनाभङ्गभीरुणा ॥
सावित्र्यपि जगामाऽऽर्ता सह भर्त्रा महद्वनम् ॥ १९ ॥
चेतसा दूयमानेन गूहमाना महद्भयम् ॥
वने पप्रच्छ भर्तारं द्रुमांश्चासदृशांस्तथा ॥ २० ॥
आश्वासयामास स राजपुत्रीं क्लान्तां वने पद्मविशालनेत्राम् ॥
संदर्शनेनाथ द्रुमद्विजानां तथा मृगाणां विपिने नृवीरः ॥ २१ ॥ ]

(मत्स्य, अ. २०८)

सत्यवानुवाच—

वनेऽस्मिञ्छाद्वलाकीर्णे सहकारं मनोहरम् ॥
नेत्रघ्राणसुखं पश्य वसन्ते रतिवर्धनम् ॥ १ ॥
वनेऽप्यशोकं दृष्ट्वैनं रागवन्तं सुपुष्पितम् ॥
वसन्तो हसतीवायं मामेवाऽऽयतलोचने ॥ २ ॥
दक्षिणे दक्षिणेनैतां पश्य रम्यां वनस्थलीम् ॥
पुष्पितैः किंशुकैर्युक्तां ज्वलितानलसप्रभैः ॥ ३ ॥
सुगन्धिकुसुमामोदो वनराजिविनिर्गतः ॥
करोति वायुर्दाक्षिण्यमावयोः क्लमनाशनम् ॥ ४ ॥
पश्चिमेन विशालाक्षि कर्णिकारैः सुपुष्पितैः ॥
काञ्चनेन विभात्येषा वनराजी मनोरमा ॥ ५ ॥
अतिमुक्तलताजालरुद्धमार्गा वनस्थली ॥
रम्या सा चारुसर्वाङ्गि कुसुमोत्करभूषणा ॥ ६ ॥
मधुमत्तालिझङ्कारव्याजेन वरवर्णिनि ॥
चापाकृष्टिं करोतीव कामः पान्थजिघांसया ॥ ७ ॥
फलास्वादलसद्वक्त्रपुंस्कोकिलविनादिता ॥
विभाति चारुतिलका त्वमिवैषा वनस्थली ॥ ८ ॥
कोकिलश्चूतशिखरे मञ्जरीरेणुपिञ्जरः ॥
गदितैर्व्यक्ततां याति कुलीनश्चेष्टितैरिव ॥ ९ ॥
पुष्परेणुविलिप्ताङ्गीं प्रियामनुसरन्वने ॥
कुसुमं कुसुमं याति कूजन्कामी शिलीमुखः ॥ १० ॥

मञ्जरीं सहकारस्य कान्ता चञ्च्वग्रखण्डिताम् ॥
स्वदत्ते बहुपुष्पेऽपि पुंस्कोकिलयुवा वने ॥ ११ ॥
काकः प्रसूतां वृक्षाग्रे स्वामेकाग्रेण चञ्चुना ॥
काकीं संभावयत्येष पक्षाच्छादितपुत्रकाम् ॥ १२ ॥
भूभागं निम्नमासाद्य दयितासहितो युवा ॥
नाऽऽहारमपि चाऽऽदत्ते कामाक्रान्तः कपिञ्जलः ॥ १३ ॥
कलविङ्कस्तु रमयन्प्रियोत्सङ्गं समास्थितः ॥
मुहुर्मुहुर्विशालाक्षि उत्कण्ठयति कामिनः ॥ १४ ॥
वृक्षशाखां समारूढः शुकोऽयं सह भार्यया ॥
करेण लम्बयञ्छाखां करोति सफलामिव ॥ १५ ॥
वनेऽत्र पिशितास्वादतृप्तो निद्रामुपागतः ॥
शेते सिंहयुवा कान्ता चरणान्तरगामिनी ॥ १६ ॥
व्याघ्रयोर्मिथुनं पश्य शैलकन्दरसंस्थितम् ॥
ययोर्नेत्रप्रभालोके गुहा भिन्नेव लक्ष्यते ॥ १७ ॥
अयं द्वीपी प्रियां लेढि जिह्वाग्रेण पुनः पुनः ॥
प्रीतिमायाति च तया लिह्यमानः स्वकान्तया ॥ १८ ॥
उत्सङ्गकृतमूर्धानं निद्रापहृतचेतसम् ॥
जन्तूद्धरणतः कान्तं सुखयत्येव वानरी ॥ १९ ॥
भूमौ निपतितां रामां मार्जारो दर्शितोदरीम् ॥
नखैर्दन्तैर्दशत्येष न च पीडयते तथा ॥ २० ॥
शशकः शशकी चोभे संसुप्ते पीडिते इमे ॥
संलीनगात्रचरणे कर्णैर्व्यक्तिमुपागते ॥ २१ ॥
स्नात्वा सरसि पद्माढ्ये नागस्तु मदनप्रियः ॥
संभावयति तन्वंगि मृणालकवलैः प्रियाम् ॥ २२ ॥
कान्तप्रोथसमुत्थानैः कान्तमार्गानुगामिनी ॥
करोति कवलं मुस्तैर्वराही पोतकानुगा ॥ २३ ॥
दृढाङ्गसन्धिर्महिषः कर्दमाक्ततनुर्वने ॥
अनुव्रजति धावन्तीं प्रियामुद्धतमुत्सुकः ॥ २४ ॥

पश्य चार्वङ्गि सारङ्गं त्वं कटाक्षविभावनैः ॥
सभार्यं मां हि पश्यन्तं कौतूहलसमन्वितम् ॥ २५ ॥
पश्य पश्चिमपादेन रोही कण्डूयते मखम् ॥
स्नेहार्द्रभावात्कर्षन्ती भर्तारं शृङ्गकोटिना ॥ २६ ॥
द्रागिमां चमरीं पश्य सितवालामगच्छतीम् ॥
अन्वास्ते चमरः कामी मां च पश्यति गर्वितः ॥ २७ ॥
आतपे गवयं पश्य प्रहृष्टं भार्यया सह ॥
रोमन्थनं प्रकुर्वाणं काकं ककुदि वारयन् ॥ २८ ॥
पश्याजं भार्यया सार्धं न्यस्ताग्रचरणद्वयम् ॥
विपुले बदरीस्कन्धे बदराशनकाम्यया ॥ २९ ॥
हंसं सभार्यं सरसि विचरन्तं सुनिर्मलम् ॥
सुमुक्तस्येन्दुबिम्बस्य पश्य वै श्रियमुद्वहन् ॥ ३० ॥
सभार्यश्चक्रवाकोऽयं कमलाकरमध्यगः ॥
करोति पद्मिनीं कान्तां सुपुष्पामिव सुन्दरि ॥ ३१ ॥
मया फलोच्चयः सुभ्रु त्वया पुष्पोच्चयः कृतः ॥
इन्धनं न कृतं सुभ्रु तत्करिष्यामि सांप्रतम् ॥ ३२ ॥
त्वमस्य सरसस्तीरे द्रुमच्छायां समाश्रिता ॥
क्षणमात्रं प्रतीक्षस्व विश्रमस्व च भामिनि ॥ ३३ ॥ *Ibid*, २०९.

## ५. त्रिपुरवर्णनम्

(मत्स्य, १३९)

[ Śiva is said to have darted his arrow against Tripura, and burnt it to ashes. Here is a fine description of the magnificient town during night time just before it is set ablaze. ]

सूत उवाच—

[ तारकाख्ये हते युद्धे उत्सार्य प्रमथान्मयः ॥
उवाच दानवान्भूयो भयः स तु भयावृतान् ॥१ ॥

भोऽसुरेन्द्राधुना सर्वे निबोधध्वं प्रभाषितम् ॥
यत्कर्तव्यं मया चैव युष्माभिश्च महाबलैः ॥ २ ॥
पुष्यं समेष्यते काले चन्द्रश्चन्द्रनिभाननाः ॥
यदैकं त्रिपुरं सर्वं क्षणमेकं भविष्यति ॥ ३ ॥
कुरुध्वं निर्भयाः काले कोकिलाशंसितेन च ॥
स कालः पुष्ययोगस्य पुरस्य च मया कृतः ॥ ४ ॥
काले तस्मिन्पुरे यस्तु संभावयति संहृतिम् ॥
स एनं कारयेच्चूर्णं बलिनैकेषुणा सुरः ॥ ५ ॥
यो वः प्राणो बलं यच्च या च वो वैरिताऽसुराः ॥
तत्कृत्वा हृदये चैव पालयध्वमिदं पुरम् ॥ ६ ॥
महेश्वररथं ह्येकं सर्वप्राणेन भीषणम् ॥
विमुखीकुरुतात्यर्थं यथा नोत्सृजते शरम् ॥ ७ ॥
तत एवं कृतेऽस्माभिस्त्रिपुरस्यापि रक्षणे ॥
प्रतीक्षिष्यन्ति विवशाः पुष्ययोगं दिवौकसः ॥ ८ ॥
इति संमंत्र्य हृष्टास्ते पुरान्तर्विबुधारयः ॥
प्रदोषे मुदिता भूत्वा चेरुर्मन्मथचारताम् ॥ १४ ॥ ]
मुहुर्मुक्तोदयो भ्रान्त उदयाग्रं महामणिः ॥
तमांस्युत्सार्य भगवांश्चन्द्रो जृम्भति सोऽम्बरम् ॥ १५ ॥
कुमुदालङ्कृते हंसो यथा सरसि विस्तृते ॥
सिंहो यथा चोपविष्टो वैदूर्यशिखरे महान् ॥ १६ ॥
विष्णोर्यथा च विस्तीर्णे हारश्चोरसि संस्थितः ॥
तथावगाढे नभसि चन्द्रोऽत्रिनयनोद्भवः ॥
भ्राजते भ्राजयँल्लोकान्सृजञ्ज्योत्स्नारसं बलात् ॥ १७ ॥
शीतांशावुदिते चन्द्रे ज्योत्स्नापूर्णे पुरेऽसुराः ॥
प्रदोषे ललितं चक्रुर्गृहमात्मानमेव च ॥ १८ ॥
रथ्यासु राजमार्गेषु प्रासादेषु गृहेषु च ॥
दीपाश्चम्पकपुष्पाभा नाल्पस्नेहप्रदीपिताः ॥ १९ ॥
तदा मठेषु ते दीपाः स्नेहपूर्णाः प्रदीपिताः ॥
गृहाणि वसुमन्त्येषां सर्वरत्नमयानि च ॥
ज्वलतोऽदीपयन्दीपांश्चन्द्रोदय इव ग्रहाः (हान्) ॥ २० ॥

चंद्रांशुभिर्भासमानमन्तर्दीपैः सुदीपितम ॥
उपद्रवैः कुलमिव पीयते त्रिपुरे तमः ॥ २१ ॥
तस्मिन्पुरे वै तरुणप्रदोषे चन्द्राट्टहासे तरुणप्रदोषे ॥
रत्यर्थिनो वै दनुजा गृहेषु सहाङ्गनाभिः सुचिरं विरेमुः ॥ २२ ॥
विनोदिता ये तु वृषध्वजस्य पञ्चेषवस्ते मकरध्वजेन ॥
तत्रासुरेष्वासुरपुङ्गवेषु स्वाङ्गाङ्गनाः स्वेदयुता बभूवुः ॥ २३ ॥
कलप्रलापेषु च दानवीनां वीणाप्रलापेषु च मूर्च्छितेषु ॥
मत्तप्रलापेषु च कोकिलानां सचापबाणो मदनो ममन्थ ॥ २४ ॥
तमांसि नैशानि द्रुतं निहत्य ज्योत्स्नावितानेन जगद्धितस्य ॥
खे रोहिणीं तां च प्रियां समेत्य चन्द्रः प्रभाभिः कुरुतेऽधिराज्यम् ॥ २५ ॥
स्थित्वैव कान्तस्य तु पादमूले काचिद्वरस्त्री स्वकपोलमूले ॥
विशेषकं चारुतरं करोति तेनाऽऽननं स्वं समलङ्करोति ॥ २६ ॥
दृष्ट्वाऽऽननं मण्डलदर्पणस्थं महाप्रभा मे मुखजेति जप्त्वा ॥
स्मृत्वा वराङ्गी रमणेरितानि तेनैव भावेन रतीमवाप ॥ २७ ॥
रोमाञ्चितैर्गात्रवरैर्युवभ्यो रतानुरागाद्रमणेन चान्याः ॥
स्वयं द्रुतं यान्ति मदाभिभूताः क्षपा यथा चार्कदिनावसाने ॥ २८ ॥
पेपीयते चातिरसानुविद्धा विमार्गिताऽन्या च प्रियं प्रसन्ना ॥
काचित्प्रियस्यातिचिरात्प्रसन्ना आसीत्प्रलापेषु च संप्रसन्ना ॥ २९ ॥
गोशीर्षयुक्तैर्हरिचन्दनैश्च पङ्कांकिताक्षी च वराऽऽसुरीणाम् ॥
मनोज्ञरूपा रुचिरा बभूवुः पूर्णामृतस्येव सुवर्णकुम्भाः ॥ ३० ॥
क्षताधरोष्ठा द्रुतदोषरक्ता ललन्ति दैत्या दयितासु रक्ताः ॥
तन्त्रीप्रलापास्त्रिपुरेषु रक्ताः स्त्रीणां प्रलापेषु पुनर्विरक्ताः ॥ ३१ ॥
क्वचित्प्रवृत्तं मधुराभिगानं कामस्य बाणैः सुकृतं निधानम् ॥
आपानभूमीषु सुखप्रमेयं गेयं प्रवृत्तं त्वथ साधयन्ति ॥ ॥ ३२ ॥
गेयं प्रवृत्तं त्वथ शोधयन्ति केचित्प्रियां तत्र च साधयन्ति ॥
केचित्प्रियां संप्रति बोधयन्ति संबुध्य संबुध्य च रामयन्ति ॥ ३३ ॥
चूतप्रसूनप्रभवः सुबन्धः सूर्ये गते वै त्रिपुरे बभूव ॥
सममरी नूपुरमेखलानां शब्दश्च संबाधति कोकिलानाम् ॥ ३४ ॥

प्रियावगूढा दयितोपगूढा काचित्प्ररूढाङ्गरुहाऽपि नारी ॥
सुचारुबाष्पाङ्कुरपल्लवानां नवाम्बुसिक्ता इव भूमिरासीत् ॥ ३५ ॥
शशाङ्कपादैरुपशोभितेषु प्रासादवर्येषु वराङ्गनानाम् ॥
माधुर्यभूताभरणा महान्तः स्वना बभूवुर्मदनेषु तुल्याः ॥ ३६ ॥
पानेन खिन्ना दयितातिवेलं कपोलमाजिघ्रसि किं ममेदम् ॥
आरोह मे श्रोणिमिमां विशालां पीनोन्नतां काञ्चनमेखलाढ्याम् ॥ ३७ ॥
रथ्यासु चन्द्रोदयभासितासु सुरेन्द्रमार्गेषु च विस्तृतेषु ॥
दैत्याङ्गना यूथगता विभान्ति तारा यथा चन्द्रमसो दिवान्ते ॥ ३८ ॥
अट्टाट्टहासेषु च चामरेषु प्रेङ्खासु चान्या मदलोलभावात् ॥
संदोलयन्ते कलसंप्रहासाः प्रोवाच काञ्ची गुणसूक्ष्मनादा ॥ ३९ ॥
अम्लानमालान्वितसुन्दरीणां मर्याय एषोऽस्ति च हर्षितानाम् ॥
श्रूयन्ति वाचः कलधौतकल्पा वापीषु चान्ये कलहंसशब्दाः ॥ ४० ॥
काञ्चीकलापश्च सहाङ्गरागः प्रेङ्खासु तद्रागकृताश्च भावाः ॥
छिन्दन्ति तासामसुराङ्गनानां प्रियालयान्मन्मथमार्गणानाम् ॥ ४१ ॥
चित्राम्बरश्चोद्धृतकेशपाशः संदोल्यमानः शुशुभेऽसुरीणाम् ॥
सुचारुवेशाभरणैरुपेतस्तारागणैर्ज्योतिरिवास चन्द्रः ॥ ४२ ॥
संदोलनादुच्छ्वसितैश्छिन्नसूत्रैः काञ्चीभ्रष्टैर्मणिभिर्विप्रकीर्णैः ॥
दोलाभूमिस्तैर्विचित्रा विभाति चन्द्रस्य पार्श्वोपगतैर्विचित्रा ॥ ४३ ॥
सचन्द्रिके सोपवने प्रदोषे रुतेषु वृन्देषु च कोकिलानाम् ॥
शरव्ययं प्राप्य पुरेऽसुराणां प्रक्षीणबाणो मदनश्चचार ॥ ४४ ॥

इति तत्र पुरेऽमरद्विषाणां
सपदि हि पश्चिमकौमुदी तदाऽऽसीत् ॥
रणशिरसि पराभविष्यतां वै
भवतुरगैः कृतसंक्षया अरीणाम् ॥ ४५ ॥
चन्द्रोऽथ कुन्दकुसुमाकरहारवर्णो
ज्योत्स्नावितानरहितोऽभ्रसमानवर्णः ॥
विच्छायतां हि समुपेत्य न भाति तद्व-
द्भाग्यक्षये धनपतिश्च नरो विवर्णः ॥ ४६ ॥

चन्द्रप्रभामरुणसारथिनाऽभिभूय
संतप्तकाञ्चनरथाङ्गसमानबिम्बः ॥
स्थित्वोदयाग्रमुकुटे बहुरेव सूर्यो
भात्यम्बरे तिमिरतोयवहां तरिष्यन् ॥ ४७ ॥

## ६. त्रिपुरदहनम्

( मत्स्य, १४० )

[Here is a graphic description of the towns of Tripura in flames on account of the arrow darted against it by Śiva. One can have from this, just an idea of the probable effects of the Hydrogen Bomb on humanity in general.]

अथ नन्दीश्वरस्तूर्णं मनोमारुतवद्वली ॥
शरे त्रिपुरमायाति त्रिपुरं प्रविवेश सः ॥ ५० ॥
स मय प्रेक्ष्य गणपः प्राह काञ्चनसंनिभः ॥
विनाशस्त्रिपुरस्यास्य प्राप्तो मय सुदारुणः ॥
अनेनैव गृहेण त्वमपक्राम ब्रवीम्यहम् ॥ ५१ ॥
श्रुत्वा तन्नन्दिवचनं दृढभक्तो महेश्वरे ॥
तेनैव गृहमुख्येण त्रिपुरादपसर्पितः ॥ ५२ ॥
सोऽपीषुः पत्रपुरवद्दग्ध्वा तन्नगरत्रयम् ॥
त्रिधा इव हुताशश्च सोमो नारायणस्तथा ॥ ५३ ॥
शरतेजः परीतानि पुराणि द्विजपुंगवाः ॥
दुष्पुत्रदोषाद्दह्यन्ते कुलान्यूर्ध्वं यथा तथा ॥ ५४ ॥
मेरुकैलासकल्पानि मन्दराग्रनिभानि च ॥
सकपाटगवाक्षाणि बलिभिः शोभितानि च ॥ ५५ ॥
सप्रासादानि रम्याणि कूटागारोत्कटानि च ॥
सजलानि समाख्यानि सावलोकनकानि च ॥ ५६ ॥
बद्धध्वजपताकानि स्वर्णरौप्यमयानि च ॥
गृहाणि तस्मिंस्त्रिपुरे दानवानामुपद्रवे ॥
दह्यन्ते दहनाभानि दहनेन सहस्रशः ॥ ५७ ॥

प्रासादाग्रेषु रम्येषु वनेषूपवनेषु च ।।
वातायनगताश्चान्याश्चाऽऽकाशस्य तलेषु च ।। ५८ ।।
रमणैरुपगूढाश्च रमन्त्यो रमणैः सह ।।
दह्यन्ते दानवेन्द्राणामग्निना ह्यपि ताः स्त्रियः ।। ५९ ।।
काचित्प्रियं परित्यज्य अशक्ता गन्तुमन्यतः ।।
पुरः प्रियस्य पञ्चत्वं गताऽग्निवदने क्षयम् ।। ६० ।।
उवाच शतपत्राक्षी सास्राक्षीव कृताञ्जलिः ।।
हव्यवाहन भार्याऽहं परस्य परतापन ।।
धर्मसाक्षी त्रिलोकस्य न मां स्प्रष्टुमिहार्हसि ।। ६१ ।।
शायितं च मया देव शिवया च शिवप्रभ ।।
परेण प्रेहि मुक्त्वेदं गृहं च दयितं हि मे ।। ६२ ।।
एका पुत्रमुपादाय बालकं दानवाङ्गना ।।
हुताशनसमीपस्था इत्युवाच हुताशनम् ।। ६३ ।।
बालोऽयं दुःखलब्धश्च मया पावक पुत्रकः ।।
नार्हस्येतमुपादातुं दयितं षण्मुखप्रिय ।। ६४ ।।
काश्चित्प्रियान्परित्यज्य पीडिता दानवाङ्गनाः ।।
निपतन्त्यर्णवजले सिञ्जमानविभूषणाः ।। ६५ ।।
तात पुत्रेति मातेति मातुलेति च विह्वलम्
चक्रन्दुस्त्रिपुरे नार्यः पावकज्वालवेपिताः ।। ६६ ।।
यथा दहति शैलाग्निः साम्बुजं जलजाकरम् ।।
तथा स्त्रीवक्त्रपद्मानि चादहत्त्रिपुरेऽनलः ।। ६७ ।।

तुषारराशिः कमलाकराणां यथा दहत्यम्बुजकानि शीते ।।
तथैव सोऽग्निस्त्रिपुराङ्गनानां ददाह वक्त्रेक्षणपङ्कजानि ।। ६८ ।।
शराग्निपातात्समभिद्रुतानां तत्राङ्गनानामतिकोमलानाम् ।।
बभूव काञ्चीगुणनूपुराणामाक्रन्दितानां च रवोऽतिमिश्रः ।। ६९ ।।
दग्धार्धचन्द्राणि सवेदिकानि विशीर्णहर्म्याणि सतोरणानि ।।
दग्धानि दग्धानि गृहाणि तत्र पतन्ति रक्षार्थमिवार्णवौघे ।। ७० ।।
गृहैः पतद्भिर्ज्वलनावलीढैरासीत्समुद्रे सलिलं प्रतप्तम् ।।
कुपुत्रदोषैः प्रहतानुविद्धं यथा कुलं याति धनान्वितस्य ।। ७१ ।।

गृहप्रतापैः क्वथितं समन्तात्तदाऽर्णवे तोयमुदीर्णवेगम् ॥
वित्रासयामास तिमीन्सनक्रांस्तिमिंगिलांस्तत्क्वथितांस्तथाऽन्यान् ॥ ७२ ॥
सगोपुरो मन्दरपादकल्पः प्राकारवर्यस्त्रिपुरे च सोऽथ ॥
तैरेव सार्धं भवनैः पपात शब्दं महान्तं जनयन्समुद्रे ॥ ७३ ॥
सहस्रशृङ्गैर्भवनैर्यदा (आ) सीत्सहस्रशृङ्गः स इवाचलेशः ॥
नामावशेषं त्रिपुरं प्रजज्ञे हुताशनाहारबलिप्रयुक्तम् ॥ ७४ ॥
प्रदह्यमानेन पुरेण तेन जगत्सपातालदिवं प्रतप्तम् ॥
दुःखं महत्प्राप्य जलावमग्नं यस्मिन्महान्सौधवरो मयस्य ॥ ७५ ॥

तद्देवेशो वचः श्रुत्वा इन्द्रो वज्रधरस्तदा ॥
शशाप तद्गृहं चापि मयस्यादितिनन्दनः ॥ ७६ ॥

## ७. सुरनदीवर्णनम्
### (मत्स्य, ११६)

[ Can there be anything more enchanting than this–the Himālayan river scenery ? ]

स ददर्श नदीं पुण्यां दिव्यां हैमवतीं शुभाम् ॥
गन्धर्वैश्च समाकीर्णां नित्यं शक्रेण सेविताम् ॥ १ ॥
सुरेभमदसंसिक्तां समन्तात्तु विराजिताम् ॥
मध्येन शक्रचापाभ्यां तस्मिन्नहनि सर्वदा ॥ २ ॥
तपस्विशरणोपेतां महाब्राह्मणसेविताम् ॥
ददर्श तपनीयाभां महाराजः पुरूरवाः ॥ ३ ॥
सितहंसावलिच्छन्नां काशचामरराजिताम् ॥
साभिषिक्तामिव सतां पश्यन्प्रीतिं परां ययौ ॥ ४ ॥
पुण्यां सुशीतलां हृद्यां मनसः प्रीतिवर्धनीम् ॥
क्षयवृद्धियुतां रम्यां सोममूर्तिमिवापराम् ॥ ५ ॥
सुशीतशीघ्रपानीयां द्विजसङ्घनिषेविताम् ॥
सुतां हिमवतः श्रेष्ठां चञ्चद्वीचिविराजिताम् ॥ ६ ॥
अमृतस्वादुसलिलां तापसैरुपशोभिताम् ॥
स्वर्गारोहणनिःश्रेणीं सर्वकल्मषनाशिनीम् ॥ ७ ॥

अग्र्यां समुद्रमहिषीं महर्षिगणसेविताम् ॥
सर्वलोकस्य चौत्सुक्यकारिणीं सुमनोहराम् ॥ ८ ॥
हितां सर्वस्य लोकस्य नाकमार्गप्रदायिकाम् ॥
गोकुलाकुलतीरान्तां रम्यां शैवालवर्जिताम् ॥ ९ ॥
हंससारससंघुष्टां जलजैरुपशोभिताम् ॥
आवर्तनाभिगम्भीरां द्वीपोरुजघनस्थलीम् ॥ १० ॥
नीलनीरजनेत्राभामुत्फुल्लकमलाननाम् ॥
हिमाभफेनवसनां चक्रवाकाधरां शुभाम् ॥
बलाकापंक्तिदशनां चलन्मत्स्यावलिभ्रुवम् ॥ ११ ॥
स्वजलोद्भूतमातङ्गरम्यकुम्भपयोधराम् ॥
हंसनूपुरसंघुष्टां मृणालवलयावलीम् ॥ १२ ॥
तस्यां रूपमदोन्मत्ता गन्धर्वानुगताः सदा ॥
मध्याह्नसमये राजन्क्रीडन्त्यप्सरसां गणाः ॥ १३ ॥
तामप्सरोविनिर्मुक्तं वहन्तीं कुङ्कुमं शुभम् ॥
स्वतीरद्रुमसंभूतनानावर्णसुगन्धिनीम् ॥ १४ ॥
तरङ्गव्रातसंक्रान्तसूर्यमण्डलदुर्दृशम् ॥
सुरेभजनिताघातविकूलद्वयभूषिताम् ॥ १५ ॥
शक्रेभगण्डसलिलैर्देवस्त्रीकुचचन्दनैः ॥
संयुतं सलिलं तस्याः षट्पदैरुपसेव्यते ॥ १६ ॥
तस्यास्तीरभवा वृक्षाः सुगन्धकुसुमाञ्चिताः ॥
तथाऽपकृष्टसंभ्रान्तभ्रमरस्तनिताकुलाः ॥ १७ ॥
यस्यास्तीरे रतिं यान्ति सदा कामवशा मृगाः ॥
तपोवनाश्च ऋषयस्तथा देवाः सहाप्सराः ॥ १८ ॥
लभन्ते यत्र पूताङ्गा देवेभ्यः प्रतिमानिताः ॥
स्त्रियश्च नाकबहुलाः पद्मेन्दुप्रतिमाननाः ॥ १९ ॥
या बिभर्ति सदा तोयं देवसङ्घैरपीडितम् ॥
पुलिन्दैर्नृपसङ्घैश्च व्याघ्रवृन्दैरपीडितम् ॥ २० ॥
सतामरसपानीयां सतारगगनामलाम् ॥
स तां पश्यन्ययौ राजा सतामीप्सितकामदाम् ॥ २१ ॥

यस्यास्तीररुहैः काशैः पूर्णेन्दुचन्द्रांशुसंनिभैः ॥
राजते विविधाकारै रम्यं तीरं महाद्रुमैः ॥
या सदा विविधैर्विप्रैर्देवैश्चापि निषेव्यते ॥ २२ ॥
या च सदा सकलौघविनाशं भक्तजनस्य करोत्यचिरेण ॥
याऽनुगता सरितां हि कदम्बैर्याऽनुगता सततं हि मुनीन्द्रैः ॥ २३ ॥
या हि सुतानिव पाति मनुष्यान्या च युता सततं हिमसङ्घैः ॥
या च युता सततं सुरवृन्दैर्या च जनैः स्वहिताय श्रिता वै ॥ २४ ॥

युक्ता च केसरिगणैः करिवृन्दजुष्टा
संतानयुक्तसलिलापि सुवर्णयुक्ता ॥
सूर्यांशुतापपरिवृद्धिविवृद्धशीता
शीतांशुतुल्ययशसा ददृशे नृपेण ॥ २५ ॥

## ८. शरद्वर्णनम्

(विष्णु, ५, १०)

[ Here is an example of exquisite poetry regarding the description of the setting in ot Winter. ]

पराशर उवाच —

तयोर्विहरतोरेवं रामकेशवयोर्व्रजे ॥
प्रावृड् व्यतीता विकसत्सरोजा चाभवच्छरत् ॥ १ ॥
अवापुस्तापमत्यर्थं शफर्यः पल्वलोदके ॥
पुत्रक्षेत्रादिसक्तेन ममत्वेन यथा गृही ॥ २ ॥
मयूरा मौनमातस्थुः परित्यक्तमदा वने ॥
असारतां परिज्ञाय संसारस्येव योगिनः ॥ ३ ॥
उत्सृज्य जलसर्वस्वं विमलास्सितमूर्त्तयः ॥
तत्यजुश्चाम्बरं मेघा गृहं विज्ञानिनो यथा ॥ ४ ॥
शरत्सूर्यांशुतप्तानि ययुश्शोषं सरांसि च ॥
बह्वालम्बममत्वेन हृदयानीव देहिनाम् ॥ ५ ॥

कुमुदैश्शरदम्भांसि योग्यतालक्षणं ययुः ॥
अवबोधैर्मनांसीव समत्वममलात्मनाम् ॥ ६ ॥

तारकाविमले व्योम्नि रराजाखण्डमण्डलः ॥
चन्द्रश्चरमदेहात्मा योगी साधुकुले यथा ॥ ७ ॥

शनकैश्शनकैस्तीरं तत्यजुश्च जलाशयाः ॥
ममत्वं क्षेत्रपुत्रादिरूढमुच्चैर्यथा बुधाः ॥ ८ ॥

पूर्वं त्यक्तैस्सरोऽम्भोभिर्हंसा योगं पुनर्ययुः ॥
क्लेशैःकुयोगिनोऽशेषैरन्तरायहृता इव ॥ ९ ॥

निभृतोऽभवदत्यर्थं समुद्रः स्तिमितोदकः ॥
क्रमावाप्तमहायोगो निश्चलात्मा यथा यतिः ॥ १० ॥

सर्वत्रातिप्रसन्नानि सलिलानि तथाभवन् ॥
ज्ञाते सर्वगते विष्णौ मनांसीव सुमेधसाम् ॥ ११ ॥

बभूव निर्मलं व्योम शरदा ध्वस्ततोयदम् ॥
योगाग्निदग्धक्लेशौघं योगिनामिव मानसम् ॥ १२ ॥

सूर्यांशुजनितं तापं निन्ये तारापतिः शमम् ॥
अहंमानोद्भवं दुःखं विवेकः सुमहानिव ॥ १३ ॥

नभसोऽब्दं भुवः पङ्कं कालुष्यं चाम्भसश्शरत् ॥
इन्द्रियाणीन्द्रियार्थेभ्यः प्रत्याहार इवाहरत् ॥ १४ ॥

प्राणायाम इवाम्भोभिस्सरसां कृतपूरकैः ॥
अभ्यस्यतेऽनुदिवसं रेचका कुम्भकादिभिः ॥ १५ ॥

विमलाम्बरनक्षत्रे काले चाभ्यागते व्रजे ॥
ददर्शेन्द्रमहारम्भायोद्यतांस्तान्व्रजौकसः ॥ १६ ॥

कृष्णस्तानुत्सुकान्दृष्ट्वा गोपानुत्सवलालसान् ॥
कौतूहलादिदं वाक्यं प्राह वृद्धान्महामति. ॥ १७ ॥

कोऽयं शक्रमखो नाम येन वो हर्ष आगतः ॥
प्राह तं नन्दगोपश्च पृच्छन्तमतिसादरम ॥ १८ ॥

## ९. पुष्करवर्णनम्

(पद्म, सृष्टिखण्ड, १५.)

नानाद्रुमलताकीर्णं नानापुष्पोपशोभितं ॥
नानापक्षिरवाकीर्णं नानामृगगणाकुलम् ॥ २२ ॥
द्रुमपुष्परसामोदैर्वासितं यत्समन्ततः ॥
बुद्धिपूर्वमिव न्यस्तैः पुष्पैर्भूषितभूतलम् ॥ २३ ॥
नानागन्धरसैरन्यैः पक्वापक्वैः षडर्तुकैः ॥
फलैः सुवर्णपुष्पाढ्यैर्घ्राणदृष्टिमनोहरैः ॥ २४ ॥
जीर्णपत्रं तृणं यत्र शुष्ककाष्ठफलानि च ॥
बहिः क्षिपति जातानि मारुतोऽनुग्रहादिव ॥ २५ ॥
नानापुष्पसमूहानां गन्धमादाय मारुतः ॥
शीतलो वाति खं भूमिं दिशो यत्राभिवासयन् ॥ २६ ॥
हरितस्निग्धनिश्छिद्रैरकीटवनकोटरैः ॥
वृक्षैरनेकसंज्ञैर्यद्भूषितं शिखरान्वितैः ॥ २७ ॥
अरोगैर्दर्शनीयैश्च सुवृत्तैः कैश्चिदुज्ज्वलैः ॥
कुटुम्बमिव विप्राणामृत्विजैर्भाति सर्वशः ॥ २८ ॥
शोभन्ते धातुसंकाशैरङ्कुरैः प्रसृता द्रुमाः ॥
कुलीनैरिव निश्छिद्रैः स्वगुणैः प्रसृता नराः ॥ २९ ॥
पवनाविद्धशिखरैः स्पृशन्तीव परस्परम् ॥
आजिघ्रन्तीव चान्योन्यं पुष्पशाखावतंसकाः ॥ ३० ॥
नागवृक्षाः क्वचित्पुष्पैर्द्रुमवानीरकेशरैः ॥
नयनैरिव शोभन्ते धवलैः कृष्णतारकैः ॥ ३१ ॥
पुष्पसंपन्नशिखराः कर्णिकारद्रुमाः क्वचित् ॥
युग्मैर्युग्मैर्द्विधा चेह शोभन्ते साधुदंपती ॥ ३२ ॥
सुपुष्पप्रभवाटोपैः सिन्धुवारद्रुपङ्क्तयः ॥
मूर्तिमत्य इवाऽऽभान्ति पूजिता वनदेवताः ॥ ३३ ॥
क्वचित्क्वचित्कुन्दलताः स्वपुष्पाभरणोज्ज्वलाः ॥
दिक्षु वृक्षेषु शोभन्ते बालचन्द्रा इवोदिताः ॥ ३५ ॥

अतिक्रम्य द्रुमाग्राणि भासन्ते यूथिकालताः ॥
पुष्पिताः पुष्पनिकरैर्वीजयन्त्य इवोत्थिताः ॥ ३५ ॥
सर्जार्जुनाः क्वचिद्भान्ति वनोद्देशेषु पुष्पिताः ॥
धौतकौशेयवासोभिः प्रावृताः पुरुषा इव ॥ ३६ ॥
अतिमुक्तकवल्लीभिः पुष्पिताभिस्तथा द्रुमाः ॥
उपगूढा विराजन्ते नारीभिरिव सुप्रियाः ॥ ३७ ॥
चूताश्वतिलकाश्चैव मञ्जरीभिः करैरिव ॥
वायुघातादि चान्योन्यं ढौकन्तीवाथ सज्जनाः ॥ ३८ ॥
अपरस्परसंसक्तैः शालाशोकाश्च पल्लवैः ॥
हस्तैर्हस्तान्स्पृशन्तीव सुहृदश्चिरसङ्गताः ॥ ३९ ॥
फलपुष्पभरा नम्राः पनसाः सरलार्जुनाः ॥
अन्योन्यमर्चयन्तीव पुष्पैश्चैव फलैस्तथा ॥ ४० ॥
वायुना वेगसंश्लिष्टैः पादपाः शालबाहुभिः ॥
अभ्याशमागते लोके प्रीतिभावैरिवोत्थिताः ॥ ४१ ॥
पुष्पाणामवरोधेन स्वशोभार्थं व्रजन्ति वै ॥
वसन्तमहमासाद्य पुरुषाः स्पर्धयेव हि ॥ ॥ ४२ ॥
पुष्पशोभाभरनतैः शिखरैर्वायुकम्पितैः ॥
नृत्यन्तीव नराः प्रीताः स्रगलंकृतशेखराः ॥ ४३ ॥
भृङ्गाः पर्यन्तविक्षिप्ताः पुष्पावलिलताधृताः ॥
सवल्लीकाः प्रनृत्यन्ति मानवा इव संगताः ॥ ४४ ॥
स्वपुष्पोन्नतवल्लीभिः पादपाः क्वचिदावृताः ॥
भान्ति तारागणैश्चित्रं शरदीव नभस्तलम् ॥ ४५ ॥
द्रुमाणामथवाऽग्रेषु पुष्पिता मालतीलताः ॥
शेखरा इव शोभन्ते रचिता बुद्धिपूर्वकम् ॥ ४६ ॥
हरिताः काञ्चनच्छायाः फलिताः पुष्पिता द्रुमाः ॥
सौहृदं दर्शयन्तीव नराः साधुसमागमे ॥ ४७ ॥
पुष्पकिञ्जल्ककपिला गताः सर्वलतासु च ॥
कदम्बपुष्पसंकाशा घोषयन्तीव षट्पदाः ॥ ४८ ॥
क्वचित्पुष्पासवक्षीबाः सम्पतन्ति यतस्ततः ॥
पुंस्कोकिलगणा वृक्षगहनेष्विव सुप्रियाः ॥ ४९ ॥

शिरीषपुष्पसंकाशाः शुका मिथुनकुञ्चिताः ॥
कीर्तयन्ति गिरश्चित्राः पूजिता ब्राह्मणा यथा ॥ ५० ॥
सहचारिसुसंयुक्ता मयूराश्चित्रबर्हिणः ॥
वनान्तेष्वपि नृत्यन्ति शोभन्त इव नर्तकाः ॥ ५१ ॥
कूजन्तः पक्षिसंघाताः नानाद्रुमविचारिणः ॥
कुर्वन्ति रमणीयं वै रमणीयतरं वनम् ॥ ५२ ॥
नानामृगणाकीर्णं नित्यं प्रमुदिताण्डजम् ॥
तद्वनं नन्दनसमं मनोदृष्टिविवर्धनम् ॥ ५३ ॥

## १०. वाराणसीस्थित–उद्यानवर्णनम्

(मत्स्य, अ. १८०)

निर्जगाम च देवेशः पार्वत्या सह शङ्करः ॥
उद्यानं दर्शयामास देव्या देवः पिनाकधृक् ॥ २३ ॥

देवदेव उवाच—
प्रोत्फुल्लनानाविधगुल्मशोभितं लताप्रतानावनतं मनोहरम् ॥
विरूढपुष्पैः परितः प्रियङ्गुभिः सुपुष्पितैः कण्टकितैश्च केतकैः ॥ २४ ॥
तमालगुल्मैर्निचितं सुगन्धिभिः सकर्णिकारैर्बकुलैश्च सर्वशः ॥
अशोकपुंनागवरैः सुपुष्पितैर्द्विरेफमालाकुलपुष्पसंचयैः ॥ २५ ॥
क्वचित्प्रफुल्लाम्बुजरेणुरूषितैर्विहङ्गमैश्चारुकलप्रणादिभिः ॥
विनादितं सारसमण्डनादिभिः प्रमत्तदात्यूहरुतैश्च वल्गुभिः ॥ २६ ॥
क्वचिच्च चक्राह्वरवोपनादितं क्वचिच्च कादम्बकदम्बकैर्युतम ॥
क्वचिच्च कारण्डवनादनादितं क्वचिच्च मत्तालिकुलाकुलीकृतम् ॥ २७ ॥
मदाकुलाभिस्त्वमराङ्गनादिभिर्निषेवितं चारुसुगन्धिपुष्पम् ॥
क्वचित्सुपुष्पैः सहकारवृक्षैर्लतोपगूढैस्तिलकद्रुमैश्च ॥ २८ ॥
प्रगीतविद्याधरसिद्धचारणं प्रवृत्तनृत्याप्सरसां गणाकुलम् ॥
प्रहृष्टनानाविधपक्षिसेवितं प्रमत्तहारीतकुलोपनादितम् ॥ २९ ॥
मृगेन्द्रनादाकुलसत्त्वमानसैः क्वचित्क्वचिद्द्वंद्वकदम्बकैर्मृगैः ॥
प्रफुल्लनानाविधचारुपङ्कजैः सरस्तडागैरुपशोभितं क्वचित् ॥ ३० ॥

निबिडनिचुलनीलं नीलकण्ठाभिरामं
मदमुदितविहङ्गव्रातनादाभिरामम् ॥
कुसुमिततरुशाखालीनमत्तद्विरेफं
नवकिसलयशोभाशोभितप्रान्तशाखम् ॥ ३१ ॥

क्वचिच्च दन्तिक्षतचारुवीरुधं क्वचिल्लतालिङ्गितचारुवृक्षकम् ॥
क्वचिद्विलासालसगामिबर्हिणं निषेवितं किंपुरुषव्रजैः क्वचित् ॥ ३२ ॥

पारावतध्वनिविकूजितचारुशृङ्गैरभ्रंकषैः सितमनोहरचारुरूपैः ॥
आकीर्णपुष्पनिकुरम्बविमुक्तहासैर्विभ्राजित त्रिदशदेवकुलैरनेकैः ॥ ३३ ॥

फुल्लोत्पलागुरुसहस्रवितानयुक्तैस्तोयाशयैः समनुशोभितदेयमार्गम् ॥
मार्गान्तरागलितपुष्पविचित्रभक्तिसंबद्धगुल्मविटपैर्विहगैरुपेतम् ॥ ३४ ॥

तुङ्गाग्रैर्नीलपुष्पस्तबकभरनतप्रान्तशाखैरशोकै-
र्मत्तालिव्रातगीतश्रुतिसुखजननैर्भासितान्तर्मनोज्ञैः ॥
रात्रौ चन्द्रस्य भासा कुसुमिततिलकैरेकतां संप्रयातं
छायासुप्तप्रबुद्धस्थितहरिणकुलालुप्तदर्भाङ्कुराग्रम् ॥ ३५ ॥

हंसानां पक्षपातप्रचलितकमलस्वच्छविस्तीर्णतोयं
तोयानां तीरजातप्रविकचकदलीवाटनृत्यन्मयूखम् ॥
मायूरैः पक्षचन्द्रैः क्वचिदपि पतितै रञ्जितक्ष्माप्रदेशं
देशे देशे विकीर्णप्रमुदितविलसन्मत्तहारीतवृक्षम् ॥ ३६ ॥

सारङ्गैः क्वचिदपि सेवितप्रदेशं संछन्नं कुसुमचयैः क्वचिद्विचित्रैः ॥
हृष्टाभिः क्वचिदपि किंनराङ्गनाभिः क्षीबाभिः समधुरगीतवृक्षखण्डम् ॥३७॥

ससच्छैः क्वचिदुपलिप्तकीर्णपुष्पैरावासैः परिवृतपादपं मुनीनाम् ॥
आमूलात्फलनिचितैः क्वचिद्विशालैरुत्तुङ्गैः पनसमहीरुहैरुपेतम् ॥ ३८ ॥

फुल्लातिमुक्तकलतागृहसिद्धलीलं सिद्धाङ्गनाकनकनूपुरनादरम्यम् ॥
रम्यप्रियङ्गुतरुमञ्जरिसक्तभृङ्गं भृङ्गावलीस्खलितचारुकदम्बपुष्पम् ॥३९॥

पुष्पोत्करानिलविघूर्णितपादपाग्रमग्रेसरैर्भुवि निपातितवंशगुल्मम् ॥
गुल्मान्तरप्रसृतभीतमृगीसमूहं संमुह्यतां तनुभृतामपवर्गदातृ ॥ ४० ॥

चंद्रांशुजालधवलैस्तिलकैर्मनोज्ञैः सिन्दूरकुङ्कुमकुसुम्भनिभैरशोकैः ॥
चामीकरप्रतिसमैरथ कर्णिकारैः फुल्लारविन्दरचितं सुविशालशाखैः ॥ ४१ ॥

क्वचिद्रजतपर्णाभैः क्वचिद्विद्रुमसंनिभैः ॥
क्वचित्काञ्चनसङ्काशैः पुष्पैराचितभूतलम् ॥ ४२ ॥
पुन्नागेषु द्विजगणविरुतं रक्ताशोकस्तबकभरनमितम् ॥
रम्योपान्तश्रमहरपवनं फुल्लाब्जेषु भ्रमरविलसितम् ॥ ४३ ॥
सकलभुवनभर्त्ता लोकनाथस्तदानीं तुहिनशिखरिपुत्र्याः सार्धमिष्टैर्गणेशैः ॥
विविधतरुविशालं मत्तहृष्टान्यपुष्टमुपवनतरुरम्यं दर्शयामास देव्याः ॥ ४४ ॥
देव्युवाच —
उद्यानं दर्शितं देव शोभया परया युतम् ॥ ४५ ॥

## ११. देवासुरसङ्ग्रामे रणवर्णनम्

( मत्स्य, १५३ )

[ The after-effects of a battle. ]

तैरस्त्रैर्दानवैर्मुक्तैर्देवानीकेषु भीषणैः ॥
बाहुभिर्धरणिः पूर्णा शिरोभिश्च सकुण्डलैः ॥ १३४ ॥
उरुभिर्गजहस्ताभैः करीन्द्रैर्वाऽचलोपमैः ॥
भग्नेषादण्डचक्राक्षै रथैः सारथिभिः सह ॥ १३५ ॥
दुःसंचाराऽभवत्पृथ्वी मांसशोणितकर्दमा ॥
रुधिरौघह्रदावर्ता शवराशिशिलोच्चयैः ॥ १३६ ॥
कबन्धनृत्यसङ्कुले स्रवद्वसास्रकर्दमे
जगत्त्रयोपसंहृतौ समे समस्तदेहिनाम् ॥
शृगालगृध्रवायसाः परं प्रमोदमादधुः
क्वचिद्विकृष्टलोचनः शवस्य रौति वायसः ॥ १३७ ॥
विकृष्टपीवरान्त्रकाः प्रयान्ति जम्बुकाः क्वचित्
क्वचित्स्थितोऽतिभीषणः श्वचञ्चर्चवितो बकः ॥
मृतस्य मांसमाहरच्छ्वजातयश्च संस्थिताः
क्वचिद्वृको गजासृजं पपौ निलीयतान्त्रतः ॥ १३८ ॥
क्वचित्तुरङ्गमण्डली विकृष्यते श्वजातिभिः
क्वचित्पिशाचजातकैः प्रपीतशोणितासवैः ॥
स्वकामिनीयुतैर्द्रुतं प्रमोदमत्तसंभ्रमै-
र्ममैतदानयाऽऽननं खुरोऽयमस्तु मे प्रियः ॥ १३९ ॥

करोऽयमब्जसंनिभो ममास्तु कर्णपूरकः
सरोषमीक्षतेऽपरा वपां विना प्रियं तदा ॥
परा प्रिया ह्यवाप यद् भृतोष्णशोणितासवं
विकृष्य शवचर्म तत्प्रबद्धसान्द्रपल्लवम् ॥ १४० ॥
चकार यक्षकामिनी तरुं कुठारपाटितं
गजस्य दन्तमात्मजं प्रगृह्य कुम्भसंपुटम् ॥
विपाट्य मौक्तिकं परं प्रियप्रसादमिच्छते
समांसशोणितासवं पपुश्च यक्षराक्षसाः ॥ १४१ ॥
मृताश्वकेशवासितं रसं प्रगृह्य पाणिना
प्रियाविमुक्तजीवितं समानयासृगासवम् ॥
न पथ्यतां प्रयाति मे गतं श्मशानगोचरं
नरस्य तज्जहात्यसौ प्रशस्य किंनराननम् ॥ १४२ ॥
स नाग एष नो भयं ददाति मुक्तजीवितो
न दानवस्य शक्यते मया तदेकयाऽऽननम् ॥
इति प्रियाय वल्लभा वदन्ति यक्षयोषितः
परे कपालपाणयः पिशाचयक्षराक्षसाः ॥ १४३ ॥
वदन्ति देहि देहि मे ममातिभक्ष्यचारिणः
परेऽवतीर्य शोणितापगासु धौतमूर्तयः ॥
पितॄन् प्रतर्प्य देवताः समर्चयन्ति चाऽऽमिषै-
र्गजोडुपे सुसंस्थितास्तरन्ति शोणितं ह्रदम् ॥ १४४ ॥
इति प्रगाढसंकटे सुरासुरे सुसंगरे
भयं समुज्झ्य दुर्जया भटाः स्फुटन्ति मानिनः ॥ १४५ ॥

## १२. भ्रमरगीतम्

### ( भागवत, १०, ४७ )

[The Gopīs make the Bee their ambassador and enquire about the whereabouts of Kṛṣṇa. Is the Meghadūta an imitation of this ? ]

इति गोप्यो हि गोविन्दे गतवाक्कायमानसाः ॥
कृष्णदूते व्रजं याते उद्धवे त्यक्तलौकिकाः ॥ ५ ॥

गायन्त्यः प्रियकर्माणि रुदन्त्यश्च गतह्रियः ॥
तस्य संस्मृत्य संस्मृत्य यानि कैशोरबाल्ययोः ॥ १० ॥
काचिन्मधुकरं दृष्ट्वा ध्यायन्ती कृष्णसङ्गमम् ॥
प्रियप्रस्थापितं दूत कल्पयित्वेदमब्रवीत् ॥ ११ ॥

गोप्युवाच —

मधुप कितवबंधो मा स्पृशांघ्रि सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः ।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥ १२ ॥
सकृदधरसुधां स्वां मोहिनीं पाययित्वा
सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक् ॥
परिचरति कथं तत्पादपद्मं तु पद्मा
ह्यपि बत हृतचेता उत्तमश्लोकजल्पैः ॥ १३ ॥
किमिह बहु षडङ्घ्रे गायसि त्वं यदूना-
मधिपतिमगृहाणामग्रतो नः पुराणम् ॥
विजयसखसखीनां गीयतां तत्प्रसङ्गः
क्षपितकुचरजस्ते कल्पयन्तीष्टमिष्टाः ॥ १४ ॥
दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः
कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः ॥
चरणरज उपास्ते यस्य भूतिर्वयं का
अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः ॥ १५ ॥
विसृज शिरसि पादं वेद्म्यहं चाटुकारै-
रनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात् ॥
स्वकृत इह विसृष्टापत्यपत्यन्यलोका
व्यसृजदकृतचेताः किं नु संधेयमस्मिन् ॥ १६ ॥
मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्मा
स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ॥
बलिमपि बलिमत्त्वावेष्टयद् ध्वाङ्क्षवद्य-
स्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः ॥ १७ ॥

यदनुचरितलीला कर्णपीयूषविप्रुट्-
　सकृददनविधूतद्वन्द्वधर्मा विनष्टाः ॥
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
　बहव इह विहङ्गा भिक्षुचर्यां चरन्ति ॥ १८ ॥
वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः
　कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः ॥
ददृशुरसकृदेतत्तन्नखस्पर्शतीव्र-
　स्मररुज उपमंत्रिन् भण्यतामन्यवार्ता ॥ १९ ॥
प्रियसख पुनरागाः प्रेयसा प्रेषितः किं
　वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग ॥
नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वं
　सततमुरसि सौम्य श्रीर्वधूः साकमास्ते ॥ २० ॥
अपि बत मधुपुर्यामार्यपुत्रोऽधुनाऽऽस्ते
　स्मरति स पितृगेहान् सौम्य बंधूश्च गोपान् ॥
क्वचिदपि स कथा नः किङ्करीणां गृणीते
　भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत्कदा नु ॥ २१ ॥

श्रीशुक उवाच —

अथोद्धवो निशम्यैवं कृष्णदर्शनलालसाः ॥
सान्त्वयन् प्रियसन्देशैर्गोपीरिदमभाषत ॥ २२ ॥

## १३. अशोकसुन्दरीवर्णनम्

### (पद्म, भूमिखण्ड, १०२.)

[ Here is a fine description of the Śrī-Nandana tree (or Tree of Life). It created a beautiful woman, as per wishes of Pārvatī. She named her as Aśoka-Sundarī. All the womanly refinements are detailed here.]

पार्वत्युवाच-

गुणांश्च शंभो मम कीर्तयस्व वृक्षाधिपस्यापि शुभान्सुपुण्यान् ॥ ३७ ॥

१८

आकर्ण्य देवो वचनं बभाषे देव्यास्तु सर्वं सुतरोर्हितस्य ॥
यं यं तु कल्पयन्ति सुपुण्ययुक्ता देवोपमा देववराश्च देवि ॥ ३८ ॥
तं तं हि वृक्षः प्रददाति तेभ्यः फलाद्रसानां स च वृक्ष एकः ॥
तस्माच्च सर्वे प्रभवन्ति पुण्या दुष्प्राप्यमत्रैव तपोधिकास्ते ॥ ३९ ॥
जीवाधिकं रत्नमयं सुदिव्यं देवास्तु भुञ्जन्ति महाप्रधानाः ॥
शुश्राव देवी वचनं शिवस्य आश्चर्यभूतं मनसा विचिन्त्य ॥ ४० ॥
तस्यानुमत्या परिकल्पितं च स्त्रीभावरूपं सुगुणं सुरूपम् ॥
सर्वाङ्गरूपं सुगुणं सुरूपं तस्मात्तदा सा गिरिजा प्रलेभे ॥ ४१ ॥
विश्वस्य मोहाय यथोपविष्टा सहायरूपा मकरध्वजस्य ॥
क्रीडानिधानं सुखसिद्धिरूपं सर्वाभिपन्ना कमलायताक्षी ॥ ४२ ॥
पद्मानना पद्मकरा सुपद्मा चामीकरस्यापि यथा सुमूर्तिः ॥
प्रभासु तद्वद्विमला सुतेजा लीलासुतेजाश्च सुकुञ्चितास्ते ॥ ४३ ॥
प्रलम्बकेशाः परिसूक्ष्मबद्धाः पुष्पैः सुगन्धैः परिलेपिताश्च ॥
प्रबद्धकुन्ता दृढकेशबन्धैर्विभाति सा रूपवरेण बाला ॥ ४४ ॥
सीमन्तमार्गे च मुक्ताफलानां माला विभात्येव यथा तरूणाम् ॥
सीमन्तमूले तिलकं सुदेव्या यथोदितो दैत्यगुरुः सुतेजाः ॥ ४५ ॥
भाले सुपद्मे मृगनाभिपद्मसमुत्थतेजःप्रकरैर्विभाति ।।
सीमन्तमूले तिलकस्य तेजः प्रकाशयेद्रूपश्रियं सुलोके ॥ ४६ ॥
केशेषु मुक्ताफलके च भाले तस्याः सुशोभां विकरोति नित्यम् ॥
यथा तु चंद्रः परितो विभाति सुरम्यचेष्टैव विभाति तद्वत् ॥ ४७ ॥
सम्पूर्णचन्द्रोऽपि यथा विभाति ज्योत्स्नानिपातेन हिमांशुतेजः ॥
तस्यास्तु वक्त्रं परिभाति तद्वच्छोभाकरं विश्वविशारदं च ॥ ४८ ॥
हिमांशुरेवापि कलङ्कयुक्तः संक्षीयते नित्यकलाविहीनः ॥
संपूर्णमस्त्येव सदैव हृष्टं तस्यास्तु वक्त्रं परिनिष्कलङ्कम् ॥४९॥
गन्धं विकाशं कमले स्वकीयं ततः समालोक्य सुखं न लेभे ॥
पद्मानना सर्वगुणोपपन्ना मदीयभावैः परिनिर्मितेयम् ॥ ५० ॥
गन्धं स्वकीयं तु विपश्य पद्मं तस्या मुखाद्वापि जगत्समीरः ॥
लज्जाभियुक्तं सहसा बभूव जलं समाश्रित्य सदैव तिष्ठति ॥ ५१ ॥

कतिमतिनियतबुद्ध्या सुधियो वदन्ति समदननृपतेः कोशं समुद्रकलाभिः ॥
सुवरदशनरत्नैर्हास्यलीलाभियुक्ता अरुण-अधरबिम्बं शोभमानस्तु आस्यः ॥५२॥

शुद्धा सुनासिका तस्याः सुकर्णौ रत्नभूषितौ ॥
हेमकान्तिसमोपेतौ कपोलौ दीप्तिसंयुतौ ॥ ५३ ॥
रेखात्रयं प्रशोभेत ग्रीवायां परिसंस्थितम् ॥
सौभाग्यसंपच्छृङ्गारैस्तिस्रो रेखा इहैव हि ॥ ५४ ॥
सुस्तनौ कठिनौ पीनौ वर्तुलौ बिल्वसंनिभौ ॥
तस्याः कन्दर्पकलशावभिषेकाय कल्पितौ ॥
अंसावतीव शोभेते सुसमौ मानसान्वितौ ॥ ५५ ॥
सुभुजौ वर्तुलौ स्निग्धौ सुवर्णौ लक्षणान्वितौ ॥
सुसमौ करपद्मौ तौ पद्मवर्णौ सुशीतलौ ॥ ५६ ॥
दिव्यलक्षणसंपन्नौ पद्मस्वस्तिकसंयुतौ ॥
सरलाः पद्मसंयुक्ता अङ्गुल्यो नखसंयुताः ॥ ५७ ॥
नखानि मणिभासीनि जलबिन्दुनिभानि च ॥
पद्मगर्भप्रतिच्छन्नो वर्णस्तदङ्गसंभवः ॥ ५८ ॥
पद्मगन्धा च सर्वाङ्गे पद्मेव भाति भामिनी ॥
सर्वलक्षणसंपन्ना नगकन्या सुशोभिता ॥ ५९ ॥
रक्तोत्पलनिभौ पादौ सुशक्तौ चातिशोभनौ ॥
रत्नज्योतिःसमाकारा नखाः पादाग्रसंभवाः ॥ ६० ॥
यथोद्दिष्टं च शास्त्रेषु तथा चाङ्गे प्रदृश्यते ॥
सर्वाभरणशोभांगी हारकङ्कणनूपुरा ॥ ६१ ॥
मेखलाकटिसूत्रेण काञ्चीनादेन राजते ॥
नीलेन पट्टवस्त्रेण परां शोभां गता तु सा ॥ ६२ ॥
कञ्चुकेनापि दिव्येन सुरक्तेन गुणान्विता ॥
पार्वती कल्पिताद्भावाद्गुणं प्राप्ता महोदयम् ॥ ६३ ॥
कल्पद्रुमान्मुदं लेभे शंकरं वाक्यमब्रवीत् ॥
यथोक्तं तु त्वया देव तथा दृष्टं वनं मया ॥
यादृशं कथ्यते भावैस्तादृशं परिदृश्यते ॥ ६४ ॥

## १४. स्त्रीप्रभावः

(पद्म, उत्तरखण्ड, २४७)

[ Be cautious of a woman ! ]

ऋषिकुमार उवाच–

ब्रह्मविष्णुगिरिशादयः सुरा येऽपि सिद्धमुनयः पुराविदः ।।
तेऽपि योगबलिनो विमोहिता लीलया तदबलाभिरद्भुतम् ।। ४८ ।।
योषितां नयनतीक्ष्णसायकैर्भ्रूलताकुटिलचापनिर्गतैः ।।
धन्विना मकरकेतुना हतः कस्य नो पतति हा मनोमृगः ।। ४९ ।।
तावदेव नयधीर्विराजते तावदेव जनताभयं भवेत् ।।
तावदेव दृढचित्तता भृशं तावदेव गणना कुलस्य च ।। ५० ।।
तावदेव तपसः प्रगल्भता तावदेव यमसेवनं नृणाम् ।।
यावदेव वनितेक्षणासवैर्माद्यतेऽद्भुतमदैर्न पूरुषः ।। ५१ ।।
मोहयन्तु मदयन्तु रागिणो योषितः स्वललितैर्मनोहरैः ।।
मोहयन्ति मदयन्ति मामिमा धर्मरक्षणपरं हि कैर्गुणैः ।। ५२ ।।
मांसरक्तमलमूत्रनिर्मिते योषितां वपुषि निर्गुणेऽशुचौ ।।
कामिनश्च परिकल्प्य चारुतां हा रमन्ति सुविमूढचेतसः ।। ५३ ।।
दारुणो हि परिकीर्तितोऽङ्गनासंनिधिर्विमलबुद्धिभिर्नरैः ।।
यावदत्र न समीपगा इमास्तावदेव हि गृहं व्रजाम्यहम् ।। ५४ ।।

## १५. मदनवर्णनम्

(शिव, रुद्रसंहिता, २, २)

[ Here is the description of Cupid, the God of Love ! ]

मानसः पुरुषो मंजुराविर्भूतो महाद्भुतः ।। २३ ।।
कांचनीकृतजाताभः पीनोरस्कस्सुनासिकः ।।
सुवृत्तोरुकटीजंघो नीलवेल्लितकेशरः ।। २४ ।।
लग्नभ्रूयुगलो लोलः पूर्णचंद्रनिभाननः ।।
कपाटायतसद्वक्षो रोमराजीवराजितः ।। २५ ।।
अभ्रमातंगकाकारः पीनो नीलसुवासकः ।।
आरक्तपाणिनयनमुखपादकरोद्भवः ।। २६ ।।

क्षीणमध्यश्चारुदंतः प्रमत्तगजगंधनः ॥
प्रफुल्लपद्मपत्राक्षः केशरघ्राणतर्पणः ॥ २७ ॥
कंबुग्रीवो मीनकेतुः प्रांशुर्मकरवाहनः ॥
पंचपुष्पायुधो वेगी पुष्पकोदंडमंडितः ॥ २८ ॥
कांतः कटाक्षपातेन भ्रामयन्नयनद्वयम् ॥
सुगंधिमारुतो तात श्रृंगाररससेवितः ॥ २९ ॥

ब्रह्मा उवाच—
अनेन त्वं स्वरूपेण पुष्पबाणैश्च पंचभिः ॥
मोहयन्पुरुषांस्त्रींश्च कुरु सृष्टिं सनातनीम् ॥ ३७ ॥

## १६. मोहिनीवर्णनम्

### (ब्रह्माण्ड, उत्तरभाग, १०.)

[ God Viṣṇu is said to have assumed the form of the beautiful Moihnī. Even Śiva felt enamoured of her. Here is the description of her beauty. ]

[शर्वोऽपि सर्वतश्चक्षुर्मुहुर्व्यापारयन्क्वचित् ॥
अदृष्टपूर्वमाराममभिरामं व्यलोकयत् ॥ ५०
विकसत्कुसुमश्रेणी विनोदिमधुपालिकम् ॥
चंपकस्तबकामोदसुरभीकृतदिक्तटम् ॥ ५१ ॥
माकन्दवृन्दमाध्वीकमाद्यदुल्लोलकोकिलम् ॥
अशोकमण्डलीकांडसतांडवशिखण्डिकम् ॥ ५२ ॥
भृंगालिनवझंकारजितवल्लकिनिस्वनम् ॥
पाटलोदारसौरभ्यपाटलीकुसुमोज्ज्वलम् ॥ ५३ ॥
तमालतालहिंतालकृतमालाविलासितम् ॥
पर्यन्तदीर्धिकादीर्घपङ्कजश्रीपरिष्कृतम् ॥ ५४ ॥
वातपातचलच्चारुपल्लवोत्फुल्लपुष्पकम् ॥
सन्तानप्रसवामोदसन्तानाधिकवासितम् ॥ ५५ ॥
तत्र सर्वत्र पुष्पाढ्ये सर्वलोकमनोहरे ॥
पारिजाततरोर्मूले कान्ता काचिददृश्यत ॥ ५६ ॥]

बालार्कपाटलाकारा नवयौवनदर्पिता ॥
आकृष्टपद्मरागाभा चरणाब्जनखच्छदा ॥ ५७ ॥
यावकश्रीविनिक्षेपपादलौहित्यवाहिनी ॥
कलनिःस्वनमंजीरपदपद्ममनोहरा ॥ ५८ ॥
अनंगवीरतूणीरदर्पोन्मदनजंघिका ॥
करिशुण्डाकदलिकाकांतितुल्योरुशोभिनी ॥ ५९ ॥
अरुणेन दुकूलेन सुस्पर्शेन तनीयसा ॥
अलंकृतनितम्बाढ्या जघनाभोगभासुरा ॥ ६० ॥
नवमाणिक्यसन्नद्धहेमकांचीविराजिता ॥
नतनाभिमहावर्त्तत्रिवल्यूर्मिप्रभाञ्जरा ॥ ६१ ॥
स्तनकुड्मलहिंदोलमुक्तादामशतावृता ॥
अतिपीवरवक्षोजभारभंगुरमध्यभूः ॥ ६२ ॥
शिरीषकोमलभुजा कंकणांगदशालिनी ॥
सोर्मिकांगुलिमन्मृष्टशंखसुदरकन्धरा ॥ ६३ ॥
मुखदर्पणवृत्ताभचुबुकापाटलाधरा ॥
शुचिभिः पंक्तिभिः शुद्धैर्विद्यारूपैर्विभास्वरैः ॥ ६४ ॥
कुंदकुड्मलसच्छायैर्दंतैर्दर्शितचंद्रिका ॥
स्थूलमौक्तिकसन्नद्धनासाभरणभासुरा ॥ ६५ ॥
केतकांतर्दलद्रोणिदीर्घदीर्घविलोचना ॥
अर्धेन्दुतुलिता काले सम्यक्क्लृप्तालकच्छटा ॥ ६६ ॥
पालीवतंसमाणिक्यकुंडलामंडितश्रुतिः ॥
नवकर्पूरकस्तूरीरसामोदितवीटिका ॥ ६७ ॥
शरच्चारुनिशानाथमंडलीमधुरानना ॥
स्फुरत्कस्तूरितिलका नीलकुंतलसंहृतिः ॥ ६८ ॥
सीमंतरेखाविन्यस्तसिंदूरश्रेणिभास्वरा ॥ ६९ ॥
....तामिमां कंदुकक्रीडालोलामालोलभूषणाम् ॥ ७१ ॥

## १७. पूर्वचित्तिवर्णनम्

( भागवत, ५, २. )

[ Agnīdhra, waking up from his penance, addresses the Apsarās Pūrvacitti. ]

का त्वं चिकीर्षसि च किं मुनिवर्य शैले मायासि कापि भगवत्परदेवतायाः ॥
विज्ये विभर्षि धनुषी सुहृदात्मनोऽर्थे किं वा मृगान् मृगयसे विपिने प्रमत्तान् ॥
बाणाविमौ भगवतः शतपत्रपत्रौ शांतावपुङ्खरुचिरावतितिग्मदन्तौ ॥
कस्मै युयुंक्षसि वने विचरन्न विद्मः क्षेमाय नो जडधियां तव विक्रमोऽस्तु ॥८॥
शिष्या इमे भगवतः परितः पठन्ति गायन्ति साम सरहस्यमजस्रमीशम् ॥
युष्मच्छिखाविलुलिताः सुमनोऽभिवृष्टीः सर्वे भजन्त्यृषिगणा इव वेदशाखाः ॥
वाचं परं चरणपञ्जरतित्तिरीणां ब्रह्मन्नरूपमुखरां शृणवाम तुभ्यम् ॥
लब्धा कदम्बरुचिरङ्कविटङ्कबिम्बे यस्यामलातपरिधिः क्व च वल्कलं ते ॥
किं संभृतं रुचिरयोर्द्विज शृङ्गयोस्ते मध्ये कृशो वहसि यत्र दृशिः श्रिता मे ॥
पङ्कोऽरुणः सुरभिरात्मविषाण ईदृग् येनाश्रमं सुभग मे सुरभीकरोषि ॥११॥
लोकं प्रदर्शय सुहृत्तम तावकं मे यत्रत्य इत्थमुरसावयवावपूर्वौ ॥
अस्मद्विधस्य मनउन्नयनौ बिभर्ति बह्वद्भुतं सरसराससुधादि वक्त्रे ॥ १२ ॥
का वाऽऽत्मवृत्तिरदनाद्धविरङ्ग वाति विष्णोः कलास्यनिमिषोन्मकरौ च कर्णौ ॥
उद्विग्नमीनयुगलं द्विजपंक्तिशोचिरासन्नभृङ्गनिकरं सर इन्मुखं ते ॥ १३ ॥
योऽसौ त्वया करसरोजहतः पतङ्गो दिक्षु भ्रमन् भ्रमत एजयतेऽक्षिणी मे ॥
मुक्तं न ते स्मरसि वक्रजटावरूथं कष्टोऽनिलो हरति लम्पट एष नीवीम् ॥
रूपं तपोधन तपश्चरतां तपोघ्नं ह्येतत्तु केन तपसा भवतोपलब्धम् ॥
चर्तुं तपोऽर्हसि मया सह मित्र मह्यं किं वा प्रसीदति स वै भवभावनो मे ॥
न त्वां त्यजामि दयितं द्विजदेवदत्तं यस्मिन्मनो दृगपि नो न वियाति लग्नम् ॥
मां चारुशृङ्ग्यर्हसि नेतुमनुव्रतं ते चित्तं यतः प्रतिसरन्तु शिवाः सचिव्यः ॥१६॥

# १८. वेणुगीतम्

( भागवत, १०, २१. )

[ Krisṇa, while grazing the cows in the forest, used to play on flute. The whole world felt amused with its tunes. The Gopīs are giving a graphic description of the same. ]

गोप्य ऊचुः—

इत्थं शरत्स्वच्छजलं पद्माकरसुगन्धिना ॥
न्यविशद्वायुना वातं सगोगोपालकोऽच्युतः ॥ १ ॥
कुसुमितवनराजिशुष्मिभृङ्गद्विजकुलघुष्टसरःसरिन्महीध्रम् ॥
मधुपतिरवगाह्य चारयन् गाः सहपशुपालबलश्चुकूज वेणुम् ॥ २ ॥
तद् व्रजस्त्रिय आश्रुत्य वेणुगीतं स्मरोदयम् ॥
काश्चित्परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्णयन् ॥ ३ ॥
तद्वर्णयितुमारब्धाः स्मरन्त्यः कृष्णचेष्टितम् ॥
नाशकन्स्मरवेगेन विक्षिप्तमनसो नृप ॥ ४ ॥
बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं
बिभ्रद्वासः कनककपिशं वैजयन्तीं च मालाम् ॥
रन्ध्रान्वेणोरधरसुधया पूरयन् गोपवृन्दै-
र्वृन्दारण्यं स्वपदरमणं प्राविशद्गीतकीर्तिः ॥ ५ ॥
इति वेणुरवं राजन्सर्वभूतमनोहरम् ॥
श्रुत्वा व्रजस्त्रियः सर्वा वर्णयन्त्योऽभिरेमिरे ॥ ६ ॥
अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः ॥
वक्त्रं व्रजेशसुतयोरनुवेणु जुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ॥ ७ ॥
चूतप्रवालबर्हस्तबकोत्पलाब्जमालानुपृक्तपरिधानविचित्रवेषौ ॥
मध्ये विरेजतुरलं पशुपालगोष्ठ्यां रङ्गे यथा नटवरौ क्व च गायमानौ ॥८॥
गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधामपि गोपिकानाम् ॥
भुङ्क्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथाऽऽर्याः ॥९॥
वृन्दावनं सखि भुवो वितनोति कीर्तिं यद् देवकीसुतपदाम्बुजलब्धलक्ष्मि ॥
गोविन्दवेणुमनुमत्तमयूरनृत्यं प्रेक्ष्याद्रिसान्वपरतान्यसमस्तसत्त्वम् ॥ १० ॥

धन्याः स्म मूढमतयोऽपि हरिण्य एता या नन्दनन्दनमुपात्तविचित्रवेषम् ॥
आकर्ण्य वेणुरणितं सहकृष्णसाराः पूजां दधुर्विरचितां प्रणयावलोकैः ॥११॥
कृष्णं निरीक्ष्य वनितोत्सवरूपशीलं श्रुत्वा च तत्क्वणितवेणुविचित्रगीतम् ॥
देव्यो विमानगतयः स्मरनुन्नसारा भ्रश्यत्प्रसूनकबरा मुमुहुर्विनीव्यः ॥ १२ ॥
गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैः पिबन्त्यः ॥
शावाः स्नुतस्तनपयःकवलाः स्म तस्थुर्गोविन्दमात्मनि दृशाश्रुकलाः स्पृशन्त्यः ॥
प्रायो बताम्ब विहगा मुनयो वनेऽस्मिन् कृष्णेक्षितं तदुदितं कलवेणुगीतम् ॥
आरुह्य ये द्रुमभुजान् रुचिरप्रवालान् शृण्वन्त्यमीलितदृशो विगतान्यवाचः ॥१४॥
नद्यस्तदा तदुपधार्य मुकुन्दगीतमावर्तलक्षितमनोभवभग्नवेगाः ॥
आलिङ्गनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णन्ति पादयुगलं कमलोपहाराः ॥ १५ ॥
दृष्ट्वाऽऽतपे व्रजपशून् सहरामगोपैः संचारयन्तमनु वेणुमुदीरयन्तम् ॥
प्रेमप्रवृद्ध उदितः कुसुमावलीभिः सख्युर्व्यधात्स्ववपुषाम्बुद आतपत्रम् ॥१६॥
पूर्णाः पुलिन्द्य उरुगायपदाब्जरागश्रीकुङ्कुमेन दयितास्तनमण्डितेन ॥
तद्दर्शनस्मररुजस्तृणरुषितेन लिम्पन्त्य आननकुचेषु जहुस्तदाधिम् ॥ १७ ॥
हन्तायमद्रिरबला हरिदासवर्यो यद्रामकृष्णचरणस्पर्शप्रमोदः ॥
मानं तनोति सहगोगणयोस्तयोर्यत् पानीयसूयवसकन्दरकन्दमूलैः ॥ १८ ॥
गा गोपकैरनुवनं नयतोरुदारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः ॥
अस्पन्दनं गतिमतां पुलकस्तरूणां निर्योगपाशकृतलक्षणयोर्विचित्रम् ॥ १९ ॥

एवंविधा भगवतो या वृन्दावनचारिणः ॥
वर्णयन्त्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः ॥ २१ ॥

## १९. युग्मगीतम्

( भागवत, १०, ३५ )

[ After Krisna went to the forest, the Gopīs, suffering from the pangs of separation, went on singing about his deeds. ]

गोप्युवाच—

वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुम् ॥
कोमलाङ्गुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुन्दः ॥ २ ॥

व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः ॥
काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥ ३ ॥
हन्त चित्रमबलाः श्रृणुतेदं हारहास उरसि स्थिरविद्युत् ॥
नन्दसूनुरयमार्तजनानां नर्मदो यर्हि कूजितवेणुः ॥ ४ ॥
वृन्दशो व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस आरात् ॥
दन्तदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ॥ ५ ॥
बर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडम्बः ॥
कर्हिचित् सबल आलि स गोपैर्गाः समाह्वयति यत्र मुकुन्दः ॥ ६ ॥
तर्हि भग्नगतयः सरितो वै तत्पदाम्बुजरजोऽनिलनीतम् ॥
स्पृहयतीर्वयमिवाबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापः ॥ ७ ॥
अनुचरैः समनुवर्णितवीर्य आदिपूरुष इवाचलभूतिः ॥
वनचरो गिरितटेषु चरन्तीर्वेणुनाऽऽह्वयति गाः स यदा हि ॥ ८ ॥
वनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त्य इव पुष्पफलाढ्याः ॥
प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ॥ ९ ॥
दर्शनीयतिलको वनमालादिव्यगन्धतुलसीमधुमत्तैः ॥
अलिकुलैरलघुगीतमभीष्टमाद्रियन् यर्हि सन्धितवेणुः ॥ १० ॥
सरसि सारसहंसविहङ्गाश्चारुगीतहृतचेतस एत्य ॥
हरिमुपासत ते यतचित्ता हन्त मीलितदृशो धृतमौनाः ॥ ११ ॥
सहबलः स्रगवतंसविलासः सानुषु क्षितिभृतो व्रजदेव्यः ॥
हर्षयन् यर्हि वेणुरवेण जातहर्ष उपरम्भति विश्वम् ॥ १२ ॥
महदतिक्रमणशंकितचेता मन्दमन्दमनुगर्जति मेघः ॥
सुहृदमभ्यवर्षत् सुमनोभिश्छायया च विदधत्प्रतपत्रम् ॥ १३ ॥
विविधगोपचरणेषु विदग्धो वेणुवाद्य उरुधा निजशिक्षाः ॥
तव सुतः सति यदाधरबिम्बे दत्तवेणुरनयत्स्वरजातिः ॥ १४ ॥
सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः ॥
कवय आनतकन्धरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः ॥ १५ ॥
निजपदाब्जदलैर्ध्वजवज्रनीरजाङ्कुशविचित्रललामैः ॥
व्रजभुवः शमयन् खुरतोदं वर्ष्मधुर्यगतिरीडितवेणुः ॥ १६ ॥

व्रजति तेन वयं सविलासवीक्षणार्पितमनोभववेगाः ॥
कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं वा ॥ १७ ॥
मणिधरः क्वचिदागणयन् गा मालया दयितगन्धतुलस्याः ॥
प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन् भुजमगायत यत्र ॥ १८ ॥
क्वणितवेणुरववञ्चितचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः ॥
गुणगणार्णमनुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः ॥ १९ ॥
कुन्ददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् ॥
नन्दसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार ॥ २० ॥
मन्दवायुरुपवात्यनुकूलं मानयन्मलयजस्पर्शेन ॥
वन्दिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः ॥ २१ ॥
वत्सलो व्रजगवां यदगध्रो वन्द्यमानचरणः पथि वृद्धैः ॥
कृत्स्नगोधनमुपोह्य दिनान्ते गीतवेणुरनुगेडितकीर्तिः ॥ २२ ॥
उत्सवं श्रमरुचापि दृशीनामुन्नयन् खुररजश्छुरितस्रक् ॥
दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः ॥ २३ ॥
मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली ॥
बदरपाण्डुवदनो मृदुगण्डं मण्डयन्कनककुण्डललक्ष्म्या ॥ २४ ॥
यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनान्ते ॥
मुदितवक्त्र उपयाति दुरन्तं मोचयन्व्रजगवां दिनतापम् ॥ २५ ॥

## २०. ताण्डवनृत्यम्

### ( स्कान्द, नागरखण्ड, अ. २५४ )

[ Śiva performs the Tāṇḍava dance in Cāturmāsya just to please **भवानी**. Here is a description of the varieties of Indian music- all a creation of Śiva, which followed the dance. ]

ततो गणा नंदिमुखा रत्नानि प्रददुस्तथा ॥
भूषणानि च वासांसि मुन्यादिभ्यो यथाक्रमम् ॥ २० ॥

ततो वाद्यसहस्रेषु वादित्रेषु समंततः ॥
सर्वैर्जयेति चैवोक्ता भगवान्व्रतमादिशत् ॥ २१ ॥
भवानी हृष्टहृदया महादेवं व्यलोकयत् ॥
जया च विजया चैव जयन्ती मङ्गलारुणा ॥ २२ ॥
चतुष्टयसखीमध्ये विरराज शुभानना ॥
तस्याः सान्निध्ययोगेन जगद्भाति गुणोत्तरम् ॥ २३ ॥
यस्याः शरीरजा शोभा वर्णितु नैव शक्यते ॥
ईशोऽपि गणकोटीभिर्नानावस्त्राभिरीक्षितः ॥ २४ ॥
पिशाचभूतसंघैश्च वृतः परमशोभनः ॥
स्वर्णवेत्रधरो नन्दी बभौ कपिमुखोऽग्रतः ॥ २५ ॥
विद्याधराश्च गंधर्वाश्चित्रसेनादयस्तथा ॥
चित्रन्यस्ता इव बभुस्तत्र नागा मुनीश्वराः ॥ २६ ॥
श्रीरागप्रमुखा रागास्तस्य पुत्रा महौजसः ॥
अमूर्त्ताश्चैव ते पुत्रा हरदेवसमुद्भवाः ॥ २७ ॥
एकैकस्य च षड्भार्याः सर्वासां च पितामहः ॥
ताभिः सहैव ते रागा लीलावपुर्धरास्तथा ॥ २८ ॥
प्रादुर्बभूवुः सहसा चिंतितास्तेन शंभुना ॥
तेषां नामानि ते वच्मि शृणुष्व त्वं महाधन ॥ २९ ॥
श्रीरागः प्रथमः पुत्र ईश्वरस्य विमोहनः ॥
आसांचक्रे भ्रुवोर्मध्ये परब्रह्मप्रदायकः ॥ ३० ॥
तन्मध्यश्चैव माहेशात्समुद्भूतो गणोत्तमः ॥
द्वितीयोऽथ वसन्तोऽभूत्कटिदेशान्महायशाः ॥ ३१ ॥
महदंकश्च भूतानां चक्राच्चैव विशुद्धितः ॥
पंचमस्तु तृतीयोऽभूत्सुतो विश्वविभूषणः ॥ ३२ ॥
महेश्वरहृदो जातं चक्रं चैवमनाहतम् ॥
नासादेशात्समुद्भूतो भैरवो भैरवः स्वयम् ॥ ३३ ॥
मणिपूरकनामेदं चक्रं तद्धि विमुक्तिदम् ॥
पंचाशच्च तथा वर्णा अंका नाम महेश्वरात् ॥ ३४ ॥

राशयो द्वादश तथा नक्षत्राणि तथैव च ॥
स्वाधिष्ठानसमुद्भूता जगद्बीजसमन्विताः ॥ ३५ ॥
क्षणेन वृद्धिमायान्ति ततो रेतः प्रवर्तते ॥
रेतसस्तु जगत्सृष्टं तदीशजननेंद्रियम् ॥ ३६ ॥
आधाराच्च महान्षष्ठो नरो नारायणोऽभवत् ॥
महेशवल्लभः पुत्रो नीलो विष्णुपराक्रमः ॥ ३७ ॥
एते भूतिधरा रागा जाता भार्यासहायिनः ॥
भार्यास्तेषां समुद्भूताः शिरोभागात्पिनाकिनः ॥ ३८ ॥
षट्त्रिंशत्परिमाणेन ततस्तास्त्वं निशामय ॥
गौरी कोलाहली धीरा द्राविडी मालकौशिकी ॥ ३९ ॥
षष्ठी स्याद्देवगान्धारी श्रीरागस्य प्रिया इमाः ॥
आन्दोला कौशिकी चैव तथा चरममञ्जरी ॥ ४० ॥
गंडगिरी देवशाखा रामगिरी वसन्तगा ॥
त्रिगुणा स्तम्भतीर्था च अहिरी कुंकुमा तथा ॥ ४१ ॥
वैराटी सामवेरी च षड्भार्याः पंचमे मताः ॥
भैरवी गुर्जरी चैव भाषा वेलागुली तथा ॥ ४२ ॥
कर्णाटकी रक्तहंसा षड्भार्या भैरवानुगाः ॥
बंगाली मधुरा चैव कामोदा चाक्षिनारिका ॥ ४३ ॥
देवगिरी च देवाली मेघरागानुगा इमा ॥
त्रोटकी मोडकी चैव नराढुम्बी तथैव च ॥ ४४ ॥
मल्हारी सिन्धुमल्हारी नटनारायणानुगाः ॥
एताः हि गिरिशं नत्वा महेशं च महेश्वरीम् ॥ ४५ ॥

Musical Instruments:

स्वमूर्तिवाहनोपेताः स्वभर्तृसहिताः स्थिताः ॥
ब्रह्मा मृदंगवादेन तोषयामास शंकरम् ॥ ४६ ॥
चतुरक्षरवाद्येन सुवाद्यं चाकरोत्पुनः ॥
तालक्रियां महेशाय दर्शयामास केशवः ॥ ४७ ॥

वायवस्तत्र वाद्यं च चक्रुः सुस्वरमोजसा ।।
महेन्द्रो वंशवाद्यं च सुगिरं सुस्वरं बहुः ।। ४८ ।।
वह्निः शूर्परवं चक्रे पणवं च तथाश्विनौ ।।
उपांगवादनं चक्रे सोमः सूर्यः समंततः ।। ४९ ।।
घंटानां वादनं चक्रुर्गणाः शतसहस्रशः ।।
मुनीश्वरास्तथा देव्यः पार्वतीसहितास्तथा ।। ५० ।।
स्वर्णभद्रासनेष्वेते ह्युपविष्टा व्यलोकयन् ।।
भृंगाणां वादनं चक्रुर्वसवः समहोरगाः ।। ५१ ।।
भेरीध्वनिं तथा साध्या वाद्यान्यन्ये सुरोत्तमाः ।।
झर्झरीगोमुखादीनि साध्याश्चक्रुर्महोत्सवे ।। ५२ ।।
तन्त्रीलयसमायुक्ता गंधर्वा मधुरस्वराः ।।
सुवर्णभृंगनादं च चक्रुः सिद्धाः समंततः ।। ५३ ।।
ततस्तु भगवानासन्महानटवपुर्धरः ।।
मुकुटाः पञ्चशीर्षे तु पन्नगैश्वशोभिताः ।। ५४ ।।
जटा विमुच्य सकला भस्मोद्धूलितविग्रहः ।।
बाहुभिर्दशभिर्युक्तो हारकेयूरसंयुतः ।। ५५ ।।
त्रैलोक्यव्यापकं रूपं सूर्यकोटिसमप्रभम् ।।
कृत्वा ननर्त भगवान्भासुरं स महानगे ।। ५६ ।।
ततो वीणादिकं वाद्यं कांस्यतालादिकं धनम् ।।
वंशादिकं तु वादित्रं तोमरादिकनामकम् ।। ५७ ।।
चतुर्विधं ततो वाद्यं तुमुलं समजायत ।।
तालानां पटहादीनां हस्तकानां तथैव च ।। ५८ ।।
मानानां चैव तानानां प्रत्यक्षं रूपमाबभौ ।।
सुकण्ठं सुस्वरं मुक्तं सुगम्भीरं महास्वनम् ।। ५९ ।।
विश्वावसुर्नारदश्च तुंबुरुश्चैव गायकाः ।।
जगुर्गन्धर्वपतयोऽप्सरसो मधुरस्वराः ।। ६० ।।
ग्रामत्रयसमोपेतं स्वरसप्तकसंयुतम् ।।
दिव्यं शुद्धं च सांकल्पं तत्र गेयमवर्तत ।। ६१ ।।

पर्वतोऽपि महानादं हरपादतलाहतः ॥
भ्रमिभिर्भ्रमयंस्तत्र महीं सपुरकाननाम् ॥ ६२ ॥
हस्तकांश्चतुराशीतिं स ससर्ज सदाशिवः ॥
ललाटफलकस्वेदात्सूतमागधबंदिनः ॥ ६३ ॥
महेशहृदयाज्जाता गंधर्वा विश्वगायकाः ॥
ते मूर्त्ता देवदेवस्य सुरंगालयसंयुताः ॥ ६४ ॥
ऊर्जशुक्लचतुर्दश्यां प्रसन्ना गिरिजा तदा ॥
समाप्तव्रतचर्यः स ईश्वरोऽपि तदा बभौ ॥ ६८ ॥

## २१. दक्षिणापथवर्णनम्

### ( स्कान्द, काशीखण्ड, अ. २. )

[ Here is a very beautiful description of Dakṣiṇāpatha. ]

लवंगैलामृगमदचन्द्रचन्दनचर्चिताम् ॥ ७ ॥
ताम्बूलीरागरक्तौष्ठीं द्राक्षास्तबकसुस्तनीम् ॥
लवलीवल्लिदोर्वल्लीं कङ्कोलीपल्लवाङ्गुलिम् ॥ ८ ॥
मलयानिलनिःश्वासां क्षीरोदकवराम्बराम् ॥
त्रिकूटस्वर्णरत्नाङ्गीं सुवेलाद्रिनितम्बिनीम् ॥ ९ ॥
कावेरीगौतमीजंघां चोलचोलांशुकावृताम् ॥
सह्यदर्दुरवक्षोजां कांतीकाञ्चीविभूषणाम् ॥ १० ॥
सुकोमलमहाराष्ट्रीवाग्विलासमनोहराम् ॥
अद्यापि न महालक्ष्मीर्यां विमुञ्चति सद्गुणाम् ॥ ११ ॥
[सुदक्षदक्षिणामाशामाशानाथः प्रतस्थिवान् ॥ १२ ॥]

## तृतीयो भागः

# स्तो त्र यो गः

## १. परमेश्वरस्तवनम्

(भागवत, १२, १३)

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवै–
वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ॥
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ १ ॥
पृष्ठे भ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयना–
न्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः ॥
यत्संस्कारकलानुवर्तनवशाद् वेलानिभेनाम्भसां
यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥ २ ॥

## २. वैराजस्तोत्रम्

(वराह, ७१)

रुद्र उवाच —

नमोस्त्वनंताय विशुद्धचेतसे सरूपरूपाय सहस्रबाहवे ॥
सहस्ररश्मिप्रभवाय वेधसे विशालदेहाय विशुद्धकर्मणे ॥ १८ ॥
समस्तविश्वार्तिहराय शम्भवे सहस्रसूर्यानिलतिग्मतेजसे ॥
समस्तविद्याविधृताय चक्रिणे समस्तगीर्वाणनुते सदा नमः ॥ १९ ॥
अनादिदेवाच्युत शेषशेखर प्रभो विभो भूतपते महेश्वर ॥
मरुत्पते सर्वपते जगत्पते भुवःपते भुवनपते सदा नमः ॥ २० ॥
जलेशनारायण विश्वशङ्कर क्षितीश विश्वेश्वर विश्वलोचन ॥
शशाङ्कसूर्याच्युतवीर विश्वग प्रतर्क्यमूर्तेऽमृतमूर्तिरव्यय ॥ २१ ॥
ज्वलद्धुताशार्चिविरुद्धमण्डलं प्रपाहि नारायण विश्वतोमुख ॥
नमोऽस्तु देवार्तिहरामृताव्यय प्रपाहि मां शरणगतं सदाच्युत ॥ २२ ॥

वक्त्राण्यनेकानि विभो तवाहं पश्यामि मध्यस्तगतं पुराणम् ॥
ब्रह्माणमीशं जगतां प्रसूतिं नमोऽस्तु तुभ्यं तु पितामहाय ॥ २३ ॥
संसारचक्रभ्रमणैरनेकैः क्वचिद्भवान्देववराऽऽदिदेव ॥
सन्मार्गिभिर्ज्ञानविशुद्धसत्त्वैरुपास्यसे किं प्रणमाम्यहं त्वाम् ॥ २४ ॥
एकं भवन्तं प्रकृतेः परस्ताद्यो वेत्ति वा सर्वविदादिदेव ॥
गुणा न तेषु प्रसभं विभेद्या विशालमूर्तिर्हि सुसूक्ष्मरूपः ॥ २५ ॥
वाग्योनिमान्नो विगतेन्द्रियोऽसि विकर्मभावान्न विगतैककर्मा ॥
संसारवांस्त्वं हि न तादृशोऽसि परं वपुर्देव विशुद्धभावैः ॥ २६ ॥
संसारविच्छित्तिकरैर्यजद्भिरतोऽवगीयेत चतुर्भुजस्त्वम् ॥
परं न जानाति यतो वपुास्ते देवादयोऽप्यद्भुतकारणं तत् ॥ २७ ॥
अतोऽवतारोक्ततनुं पुराणमाराधयेयुः कमलासनाद्याः ॥
न ते वपुर्विश्वसृगब्जयोनिरेकान्ततो वेद महानुभावः ॥ २८ ॥
परं त्वहं वेद्मि कविं पुराणं भवन्तमाद्यं तपसा विशुद्धः ॥
पद्मासनो मे जनकः प्रसिद्धश्चेतः प्रसूतावसकृत्पुराणैः ॥ २९ ॥
सम्बुध्यते नाथ न मद्विधाऽपि विदुर्भवन्तं तपसा विहीनाः ॥
ब्रह्मादिभिस्तत्प्रवरैरबोध्यं त्वां देवरूपाः समनन्तनत्या ॥ ३० ॥
प्रबोधमिच्छन्ति न तेषु बुद्धेरुदारकीर्तिष्वपि वेदहीनाः ॥
जन्मान्तरैर्वेदविदां विवेकैर्बुद्धिर्भवेन्नाथ तव प्रसादात् ॥ ३१ ॥
त्वल्लब्धलाभस्य न मानुषत्वं न देव गन्धर्वगतिः शिवं स्यात् ॥
त्वं विश्वरूपोऽसि भवान्सुसूक्ष्म स्थूलोऽसि चेदं कृतकृत्यताद्य ॥ ३२ ॥
स्थूलः सुसूक्ष्मः सुलभोऽसि देव त्वद्बाह्यवृत्त्या नरके पतन्ति ॥
किमुच्यते वा भवति स्थितेऽस्मिन्नाथे तु वस्वर्कमरुन्महीभिः ॥ ३३ ॥
सत्त्वैः सतोयैः समरूपधारिण्यात्मस्वरूपे विततस्वभावे ॥
इति स्तुतीर्मे भगवाननन्त जुषस्व भक्तस्य विशेषतश्च ॥ ३४ ॥
सृष्टिं सृजस्वेति तवोदितस्य सर्वज्ञतां देहि नमोऽस्तु विष्णो ॥
चतुर्मुखो वा यदि कोटिवक्त्रो भवेन्नरः कोऽपि विशुद्धचेताः ॥ ३५ ॥
स मे गुणानामयुतैरनेकैर्वदेत्तदा देववर प्रसीद ॥
समो वियुक्तस्य विशुद्धभावस्तद्भावभावैकमनोऽनुगस्य ॥ ३६ ॥

सदा हृदिस्थोऽसि भवान्नमस्ते न सर्वगस्यास्ति पृथग्व्यवस्था ॥
इति प्रकाशं कृतमेतदीश स्तवं मया सर्वगतं विबुद्ध्वा ॥ ३७ ॥

## ३. विभुस्तोत्रम्

### ( भागवत, १२, ८ )

मार्कण्डेय उवाच—

किं वर्णये तव विभो यदुदीरितोऽसुः संस्पन्दते तमनु वाङ्मनइन्द्रियाणि ॥
स्पन्दन्ति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबन्धुः ॥

मूर्ती इमे भगवतो भगवंस्त्रिलोक्याः क्षेमाय तापविरमाय च मृत्युजित्यै ॥
नाना बिभर्ष्यवितुमन्यतनूर्यथेदं सृष्ट्वा पुनर्ग्रससि सर्वमिवोर्णनाभिः ॥ ४१ ॥

तस्यावितुः स्थिरचरेशितुरंघ्रिमूलं यत्स्थं न कर्मगुणकालरुजः स्पृशन्ति ॥
यद्वै स्तुवन्ति निनमन्ति यजन्त्यभीक्ष्णं ध्यायन्ति वेदहृदया मुनयस्तदाप्त्यै ॥

नान्यं तवांघ्र्युपनयादपवर्गमूर्तेः क्षेमं जनस्य परितोभिय ईश विद्मः ॥
ब्रह्मा बिभेत्यलमतो द्विपरार्धधिष्ण्यः कालस्य ते किमुत तत्कृतभौतिकानाम् ॥

तद्वै भजाम्यृतधियस्तव पादमूलं हित्वेदमात्मच्छदि चात्मगुरोः परस्य ॥
देहाद्यपार्थमसदन्त्यमभिज्ञमात्रं विन्देत ते तर्हि सर्वमनीषितार्थम् ॥ ४४ ॥

सत्त्वं रजस्तम इतीश तवात्मबन्धो मायामयाः स्थितिलयोदयहेतवोऽस्य ॥
लीला धृता यदपि सत्त्वमयी प्रशान्त्यै नान्ये नृणां व्यसनमोहभियश्च याम्याम् ॥

तस्मात्तवेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयितां कुशला भजन्ति ॥
यत्सात्वताः पुरुषरूपमुशन्ति सत्त्वं लोको यतोऽभयमुतात्मसुखं न चान्यत् ॥

तस्मै नमो भगवते पुरुषाय भूम्ने विश्वाय विश्वगुरवे परदेवतायै ॥
नारायणाय ऋषये च नरोत्तमाय हंसाय संयतगिरे निगमेश्वराय ॥ ४७ ॥

यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः सन्तं स्वखेष्वसुषु हृद्यपि दृक्पथेषु ॥
तन्माययाऽऽवृतमतिः स उ एव साक्षादाद्यस्तवाखिलगुरोरुपसाद्य वेदम् ॥४८॥

यद्दर्शनं निगम आत्मरहःप्रकाशं मुह्यन्ति यत्र कवयोऽजपरा यतन्तः ॥
तं सर्ववादविषयप्रतिरूपशीलं वन्दे महापुरुषमात्मनि गूढबोधम् ॥ ४९ ॥

# ४. नारायणस्तोत्रम् ( ब्रह्मपारः )

( पद्म, सृष्टिखण्ड, १४ )

रुद्र उवाच —

परं पराणां परमं पुराणं परात्परं विष्णुमनन्तवीर्यम् ॥
स्मरामि नित्यं पुरुषं वरेण्यं नारायणं त्रिप्रथमं पुराणम् ॥ १४० ॥
परापरं पूर्वजमुग्रवेगं गम्भीरगम्भीरधियां प्रधानम् ॥
नतोऽस्मि देवं हरिमीशितारं परं परं धामपरं च धाम ॥ १४१ ॥
परात्परं शुद्धपरं विशालं परापरेशं पुरुषं विशालम् ॥
नारायणं स्तौमि विशुद्धभावं परापरं सूक्ष्ममिदं ससर्ज ॥ १४२ ॥
सदास्थितत्वात्पुरुषः प्रधानो ज्ञानं प्रधानं शरणं ममास्तु ॥
नारायणं वीतमलं पुराणं परापरं विष्णुमपारपारम् ॥ १४३ ॥
पुरातनं नीतिमतां प्रधानं धृतिज्ञमाशान्तिपरं क्षितीशम् ॥
शुभं सदा स्तौमि महानुभावं सहस्रमूर्धानमनेकपादम् ॥ १४४ ॥
अनन्तबाहुं शशिसूर्यनेत्रं क्षराक्षरं क्षीरसमुद्रनिद्रम् ॥
नारायणं स्तौमि परं परेशं परात्परं यत्त्रिदशैरगम्यम् ॥ १४५ ॥
त्रिसर्गसंस्थं त्रिहुताशनेत्रं त्रितत्त्वलक्ष्यं त्रिलयं त्रिनेत्रम् ॥
नमामि नारायणमप्रमेयं कृते सितं रक्ततनुं नरेशम् ॥ १४६ ॥
त्रेतायुगे पीततनुं नरेशं तथा हरिं द्वापरतः कलौ च ॥
नमामि नारायणमप्रमेयं कृष्णं कृतात्मानमथो नमामि ॥ १४७ ॥
ससर्ज यो वक्त्रत एव विप्रं भुजान्तरे क्षत्त्रमथोरुयुग्मे ॥
वैश्यं पदाग्रेषु तथैव शूद्रान्नमामि तं विश्वतनुं पुराणम् ॥ १४८ ॥
परात्परं पारगमप्रमेयं सुधापतिं कार्यत एव कृष्णम् ॥
गदासिचक्रानुसृतोग्रपाणिं नमामि नारायणमप्रमेयम् ॥ १४९ ॥
विश्वमूर्तिं महामूर्तिं नारायणं त्रिमूर्तिकम् ॥
कवचं सर्वदेवानां नमस्ये वारिजेक्षणम् ॥ १५० ॥
सहस्त्रशीर्षं देवेशं सहस्राक्षं महाभुजम् ॥
जगत्संव्याप्य तिष्ठन्तं नमस्ये परमेश्वरम् ॥ १५१ ॥
शरण्यं शरणं देवं विष्णुं जिष्णुं सनातनम् ॥
नीलमेघप्रतीकाशं नमस्ये शार्ङ्गपाणिनम् ॥ १५२ ॥

शुद्धं सर्वगतं नित्यं व्योमरूपं सनातनम् ॥
भावाभावविनिर्मुक्तं नमस्ये सर्वगं हरिम् ॥ १५३ ॥
न चात्र किंचित्पश्यामि व्यतिरिक्तं तवाच्युत ॥
त्वन्मयं च प्रपश्यामि सर्वमेतच्चराचरम् ॥ १५४ ॥

## ५. नारायणस्तोत्रम्

( पद्म, सृष्टिखण्ड, ४३ )

[ देवा ऊचुः–
यत्त्वया विधृते देव नारसिंहमिदं वपुः ॥
एतदेवार्चयिष्यन्ति परापरविदो जनाः ॥ १८९ ॥]

ब्रह्मोवाच–
भवान्ब्रह्मा च रुद्रश्च महेन्द्रो देवसत्तम ॥
भवान्कर्ता विकर्ता च लोकानां प्रभवोऽव्ययः ॥ १९० ॥
परां च सिद्धिं च परं च सत्त्वं परं रहस्यं परमं हविश्च ॥
परं च धर्मं परमं यशश्च त्वामाहुरग्र्यं परमं पुराणम् ॥ १९१ ॥
परं च सत्यं परमं तपश्च परं पवित्रं परमं च मार्गम् ॥
परं च यज्ञं परमं च होत्रं त्वामाहुरग्र्यं परमं पुराणम् ॥ १९२ ॥
परं शरीरं परमं च ब्रह्म परं च योगं परमां च वाणिम् ॥
परं रहस्यं परमां गतिं च त्वामाहुरग्र्यं परमं पुराणम् ॥ १९३ ॥

## ६. यज्ञनारायणस्तोत्रम्

( वराह, ५ )

वराह उवाच—
नमामि नित्यं त्रिदशाधिपस्य भवस्य सूर्यस्य हुताशनस्य ॥
सोमस्य राज्ञो मरुतामनेकरूपं हरिं यज्ञतनुं नमस्ते ॥ ४९ ॥
सुभीमदंष्ट्रं शशिसूर्यनेत्रं संवत्सरद्व्यायनयुग्मकुक्षिम ॥
दर्भाङ्गरोमाणमथोग्रशक्ति सनातनं यज्ञनरं नमामि ॥ ५० ॥
द्यावापृथिव्योरिदमन्तरं हि व्याप्तं शरीरेण दिशश्च सर्वाः ॥
तमीड्यमीशं जगतां प्रसूतिं जनार्दनं तं प्रणतोऽस्मि नित्यम् ॥ ५१ ॥

सुरासुराणामजयो जयाय युगे युगे यत्स्वशरीरमाश्रम् ॥
सृजत्यनादिः परमेश्वरो यस्तं यज्ञमूर्ति प्रणतोऽस्मि नित्यम् ॥ ५२ ॥
क्वचित्सहस्रं शिरसां दधानः क्वचिन्महापर्वततुल्यकायः ॥
क्वचित्स एव त्रसरेणुतुल्यो यस्तं सदा यज्ञनरं नमामि ॥ ५३ ॥
चतुर्मुखो यः सृजते समग्रं रथाङ्गपाणिः प्रतिपालनाय ॥
क्षयाय कालानलसन्निभो यस्तं यज्ञमूर्ति प्रणतोऽस्मि नित्यम् ॥ ५४ ॥
संसारचक्रक्रमणक्रियायै य इज्यते सर्वगतः पुराणः ॥
यो योगिनां ध्यानगतोऽप्रमेयस्त यज्ञमूर्ति प्रणतोऽस्मि नित्यम् ॥ ५५ ॥
सम्यङ्मनस्यर्पितवानहं ते यदा सुदृश्यं स्वतनौ तु तत्त्वम् ॥
न चान्यदस्तीति मतिः स्थिरा मे यतस्ततो याति विशुद्धभावम् ॥५६॥
इतीरतस्तस्य हुताशनार्चिः प्रख्यं तु तेजः पुरतो बभूव ॥
तस्मिन्स राजा प्रविवेश बुद्धि कृत्वा लयं प्राप्तवान्यज्ञमूर्तौ ॥ ५७ ॥

## ७. ब्रह्मध्यानम्

( गरुड, पूर्वखण्ड, ४४ )

हरिरुवाच—

पूजयित्वा पवित्राद्यैर्ब्रह्म ध्यात्वा हरिर्भवेत् ॥
ब्रह्मध्यानं प्रवक्ष्यामि मायायन्त्रप्रमर्दकम् ॥ १ ॥
यच्छेद्वाङ्मनसा प्राज्ञस्तं यजेद् ज्ञानमात्मनि ॥
ज्ञानं महति संयच्छेद् य इच्छेद् ज्ञानमात्मनि ॥ २ ॥
देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितम् ॥
वर्जितं भूततन्मात्रैर्गुणजन्माशनादिभिः ॥ ३ ॥
स्वप्रकाशं निराकारं सदानन्दमनादि यत् ॥
नित्यं शुद्धं बुद्धमृद्धं सत्यमानन्दमद्वयम् ॥ ४ ॥
तुरीयमक्षरं ब्रह्म अहमस्मि परं पदम् ॥
अहं ब्रह्मेत्यवस्थानं समाधिरपि गीयते ॥ ५ ॥
आत्मानं रथिनं विद्धि शरीरं रथमेव तु ॥
इन्द्रियाणि हयानाहुर्विषयास्तेषु गोचराः ॥ ६ ॥

आत्मेन्द्रियमनोयुक्तो भोक्तेत्याहुर्मनीषिणः ।।
यस्तु विज्ञानवाह्येन युक्तेन मनसा सदा ।।
स तु तत्पदमाप्नोति स हि भूयो न जायते ।। ७ ।।
विज्ञानसारथिर्यस्य मनःप्रग्रहवान्नरः ।।
स्वर्धून्याः पारमाप्नोति तद्विष्णोः परमं पदम् ।। ८ ।।
अहिंसादि यमः प्रोक्तः शौचादि नियमः स्मृतः ।।
पद्माद्युक्तं आसनञ्च प्राणायामो मरुज्जयः ।। ९ ।।
प्रत्याहारो जयः प्रोक्तो ध्यानमीश्वरचिन्तनम् ।।
मनोर्धृतिर्धारणा स्यात्समाधिर्ब्रह्मणि स्थितिः ।। १० ।।
अमूर्तौ चेत् ऋणी स्यात्तु ततो मूर्ति विचिन्तयेत् ।।
हृत्पद्मकर्णिकामध्ये शङ्खचक्रगदाधरः ।। ११ ।।
श्रीवत्सकौस्तुभयुतो वनमालाश्रिया युतः
नित्यः शुद्धो बुद्धियुक्तः सत्यानन्दाव्हयः परः ।। १२ ।।
आत्माहं परमं ब्रह्म परमज्योतिरेव तु ।।
चतुर्विंशतिमूर्तिः स शालग्रामशिलास्थितः ।। १३ ।।
द्वारकादिशिलासंस्थो ध्येयः पूज्योऽपि वा हरिः ।।
मनसोऽभीप्सितं प्राप्य देवो वैमानिको भवेत् ।।
निष्कामो मुक्तिमाप्नोति मूर्ति ध्यायन् स्तुवन् जपन् ।। १४ ।।

## ८. ब्रह्मस्तोत्रम्

( पद्म, सृष्टिखण्ड, १५ )

देवा ऊचुः—

ब्रह्मणे ब्रह्मदेहाय ब्रह्मण्यायाजिताय च ।।
नमस्कुर्मः सुनियताः क्रतुवेदप्रदायिने ।। ११६ ।।
भक्तानुकम्पिने देव सृष्टिरूपाय ते नमः ।।
पञ्चास्य शुभया भक्त्या वेदजाप्यस्तुताय च ।। ११७ ।।
बहुरूपस्वरूपाय रूपाणां शतधारिणे ।।
सावित्रीपतये देव गायत्रीपतये नमः ।। ११८ ।।

पद्मासनाय पद्माय पद्मवक्त्राय ते नमः ।।
वरदाय वराहाय कूर्माय च मृगाय च ।। ११९ ।।
जटामुकुटयुक्ताय श्रवश्रुतिनिधारिणे ।।
मृगाङ्क मृगधर्माय धर्मनेत्राय ते नमः ।। १२० ।।
विश्वक्सेनाय विश्वाय विश्वेशाय नमो नमः ।।
धर्मनेत्र त्राणमस्मादधिकं कर्तुमर्हसि ।। १२१ ।।
वाङ्मनःकायभावैस्त्वां प्रपन्नाः स्म पितामह ।।
[एवं स्तुतस्तदा देवैः ब्रह्मा ब्रह्मविदां वरः ।। १२२ ।।
प्रदास्यामि स्मृतो बाढममोघं दर्शनं हि वः ।।
ब्रुवन्तु वाञ्छितं पुत्राः प्रदास्यामि न संशयः ।। १२३ ।।]

## ९. ब्रह्मस्तोत्रम्

( पद्म, सृष्टिखण्ड, ४० )

देवा ऊचुः-

नम ॐकाराङ्कुरादिप्रसूत्यै विश्वस्थानानन्तभेदस्य पूर्वम् ।।
संभूतस्यानन्तरं सत्त्वमूले संहारेच्छोस्ते नमः सत्त्वमूर्ते ।। ९ ।।
व्यक्तीनां त्वामादिभूतं महिम्ना चास्मादस्मानभिधानाद्विचिन्त्य ।।
द्यावापृथ्व्योरूर्ध्वलोकांस्तथाऽधश्चाण्डादस्मात्त्वं विभागं चकार ।।१०।।
व्यक्तं चैतद्यज्जरायुस्तवाभूदेवं विघ्नस्त्वत्प्रणीतोऽवकाशः ।।
व्यक्तदेवा जज्ञिरे यस्य देहाद्देहस्यान्तश्चारिणो देहभाजः ।। ११ ।।
द्यौस्ते मूर्धा लोचने चन्द्रसूर्यौ व्यालाः केशा श्रोत्ररन्ध्रे दिशस्ते ।।
गात्रं यज्ञः सिन्धवः सन्धयो वै पादौ भूमिस्तूदरं ते समुद्राः ।। १२ ।।
मायाकारः कारणं त्वं प्रसिद्धो वेदैः शान्तो ज्योतिरर्कस्त्वमुक्तः ।।
वेदार्थेन त्वां विवृण्वन्ति बुद्ध्या हृत्पद्मान्तःसंनिविष्टं पुराणम् ।।१३।।
त्वां चाऽऽत्मानं लब्धयोगा गृणन्ति सांख्यैर्यास्ताः सप्त सूक्ष्माः प्रणीताः।।
तासां हेतुर्याऽष्टमी चापि गीता तास्वन्तःस्थो जीवभूतस्त्वमेव ।।१४।।
दृष्ट्वा मूर्ति स्थूलसूक्ष्मां चकार ये वै भावाः कारणे केचिदुक्ताः ।।
संभूतास्ते त्वत्त एवाऽऽदिसर्गे भूयस्तास्त्वां वासनान्तेऽभ्युपेयाः ।। १५ ।।

त्वत्सङ्केतस्त्वन्तरा यो निगूढः कालोऽमेयो ध्वस्तसंख्याविकल्पः ॥
भावाभावव्यक्तिसंहारहेतुः सोऽनन्तस्त्वं तस्य कर्ता निदानम् ॥ १६ ॥
स्थूलः सर्वानर्थभूतस्ततोऽन्यः सोऽर्थः सूक्ष्मो यो हि तेभ्योऽपि गीतः ॥
स्थूला भावाश्चाऽऽवृतो यश्च तेषां तेभ्यः स्थूलस्त्वं पुराणे प्रणीतः ॥१७॥
भूतं भूतं भूतिमद्भूतभाव भावे भावे भावितं त्वं युनक्षि ॥
युक्तं युक्तं व्यक्तिभावान्निरस्य स्थाने स्थाने व्यक्तिवृत्तिं करोषि ॥
इत्थं देवो भक्तिभाजां शरण्यस्त्राता गोप्ता भावितोऽनन्तमूर्तिः ॥१८॥

## १०. विष्णुकवचम्

(गरुड, पूर्वखण्ड, अ. १९४)

हरिरुवाच—

सर्वव्याधिहरं वक्ष्ये वैष्णवं कवचं शुभम् ॥
येन रक्षा कृता शम्भोर्नात्र कार्या विचारणा ॥ १ ॥
प्रणम्य देवमीशानमजं नित्यमनामयम् ॥
देवं सर्वेश्वरं विष्णुं सर्वव्यापिनमव्ययम् ॥ २ ॥
बध्नाम्यहं प्रतीकारं नमस्कृत्य जनार्दनम् ॥
अमोघाप्रतिमं सर्वं सर्वदुःखनिवारणम् ॥ ३ ॥
विष्णुर्मामग्रतः पातु कृष्णो रक्षतु पृष्ठतः ॥
हरिर्मे रक्षतु शिरो हृदयश्च जनार्दनः ॥ ४ ॥
मनो मम हृषीकेशो जिह्वां रक्षतु केशवः ॥
पातु नेत्रे वासुदेवः श्रोत्रे सङ्कर्षणो विभुः ॥ ५ ॥
प्रद्युम्नः पातु मे घ्राणमनिरुद्धस्तु चर्म च ॥
वनमाली गलस्यान्तं श्रीवत्सो रक्षतामधः ॥ ६ ॥
पार्श्वं रक्षतु मे चक्रं वामं दैत्यनिवारणम् ॥
दक्षिणं तु गदादेवी सर्वासुरनिवारिणी ॥ ७ ॥
उदरं मुषलं पातु पृष्ठं मे पातु लाङ्गलम् ॥
ऊर्ध्वं रक्षतु मे शार्ङ्गं जङ्घे रक्षतु नन्दकः ॥ ८ ॥
पार्ष्णी रक्षतु शङ्खश्च पद्मं मे चरणावुभौ ॥
सर्वकार्यार्थसिद्ध्यर्थं पातु मां गरुडः सदा ॥ ९ ॥

वराहो रक्षतु जले विषमेषु च वामनः ॥
अटव्यां नारसिंहश्च सर्वतः पातु केशवः ॥ १० ॥
हिरण्यगर्भो भगवान् हिरण्यं मे प्रयच्छतु ॥
सांख्याचार्य्यस्तु कपिलो धातुसाम्यं करोतु मे ॥ ११ ॥
श्वेतद्वीपनिवासी च श्वेतद्वीपं नयत्वजः ॥
सर्वान् शत्रून् सूदयतु मधुकैटभसूदनः ॥ १२ ॥
विष्णुः सदा चाकर्षतु किल्बिषं मम विग्रहात् ॥
हंसो मत्स्यस्तथा कूर्मः पातु मां सर्वतो दिशम् ॥ १३ ॥
त्रिविक्रमस्तु मे देवः सर्वान्पापान् निगृह्णतु ॥
तथा नारायणो देवो बुद्धिं पालयतां मम ॥ १४ ॥
शेषो मे निर्मलं ज्ञानं करोत्वज्ञाननाशनम् ॥
वडवामुखो नाशयतु कल्मषं यत्कृतं मया ॥ १५ ॥
पद्भ्यां ददातु परमं सुखं मूर्ध्नि मम प्रभुः ॥
दत्तात्रेयः कलयतु सपुत्रपशुबान्धवम् ॥ १६ ॥
सर्वानरीन् नाशयतु रामः परशुना मम ॥
रक्षोघ्नस्तु दाशरथिः पातु नित्यं महाभुजः ॥ १७ ॥
शत्रून्हलेन मे हन्यात् रामो यादवनन्दनः ॥
प्रलम्बकेशिचाणूरपूतनाकंसनाशनः ॥
कृष्णस्य यो बालभावः स मे कामान्प्रयच्छतु ॥ १८ ॥
अन्धकारतमोघोरं पुरुषं कृष्णपिङ्गलम् ॥
पश्यामि भयसन्त्रस्तः पाशहस्तमिवान्तकम् ॥ १९ ॥
ततोऽहं पुण्डरीकाक्षमच्युतं शरणं गतः ॥
धन्योऽहं निर्भयो नित्यं यस्य मे भगवान्हरिः ॥ २० ॥
ध्यात्वा नारायणं देवं सर्वोपद्रवनाशनम् ॥
वैष्णवं कवचं बद्ध्वा विचरामि महीतले ॥ २१ ॥
अप्रधृष्योऽस्मि भूतानां सर्वदेवमयो ह्यहम् ॥
स्मरणाद्देवदेवस्य विष्णोरमिततेजसः ॥ २२ ॥
सिद्धिर्भवतु मे नित्यं यथा मन्त्रमुदाहृतम् ॥
यो मां पश्यति चक्षुर्भ्यां यं च पश्यामि चक्षुषा ॥ २३ ॥

सर्वेषां पापदुष्टानां विष्णुर्बध्नाति चक्षुषी ॥
वासुदेवस्य यच्चक्रं तस्य चक्रस्य ये त्वराः ॥ २४ ॥
ते हि छिन्दन्तु पापान्मे मम हिंसन्तु हिंसकान् ॥
राक्षसेषु पिशाचेषु कान्तारेष्वटवीषु च ॥ २५ ॥
विवादे राजमार्गेषु द्यूतेषु कलहेषु च ॥
नदीसन्तारणे घोरे संप्राप्ते प्राणसंशये ॥ २६ ॥
अग्निचौरनिपातेषु सर्वग्रहनिवारणे ॥
विद्युत्सर्पविषोद्वेगे रोगे च विघ्नसङ्कटे ॥ २७ ॥
जप्यमेतज्जपेन्नित्यं शरीरे भयमागते ॥
अयं भगवतो मन्त्रो मन्त्राणां परमो महान् ॥ २८ ॥
विख्यातं कवचं गुह्यं सर्वपापप्रणाशनम् ॥
स्वमायाकृतनिर्माणकल्पान्तगहनं महत् ॥ २९ ॥
ॐ अनाद्यनन्त ! जगद्बीज ! पद्मनाभ ! नमोऽस्तु ते ॥ ३० ॥

## ११. विष्णुध्यानम्

( विष्णु, ६, ७ )

तद्रूपं विश्वरूपस्य तस्य योगयुजा नृप ॥
चिन्त्यमात्मविशुद्ध्यर्थं सर्वकिल्बिषनाशनम् ॥ ७३ ॥
यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ॥
तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम् ॥ ७४ ॥
तस्मात्समस्तशक्तीनामाधारे तत्र चेतसः ॥
कुर्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥ ७५ ॥
शुभाश्रयः स चित्तस्य सर्वगस्याचलात्मनः ॥
त्रिभावभावनातीतो मुक्तये योगिनो नृप ॥ ७६ ॥
अन्ये तु पुरुषव्याघ्र चेतसो ये व्यपाश्रयाः ॥
अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः ॥ ७७ ॥
मूर्तं भगवतो रूपं सर्वापाश्रयनिःस्पृहम् ॥
एषा वै धारणा प्रोक्ता यच्चित्तं तत्र धार्यते ॥ ७८ ॥
यच्च मूर्तं हरे रूपं यादृक्चिन्त्यं नराधिप ॥
तच्छ्रूयतामनाधारा धारणा नोपपद्यते ॥ ७९ ॥

प्रसन्नवदनं चारुपद्मपत्रोपमेक्षणम् ॥
सुकपोलं सुविस्तीर्णललाटफलकोज्ज्वलम् ॥ ८० ॥
समकर्णान्तविन्यस्तचारुकुण्डलभूषणम् ॥
कम्बुग्रीवं सुविस्तीर्णश्रीवत्सांकितवक्षसम् ॥ ८१ ॥
वलित्रिभंगिना मग्ननाभिना ह्युदरेण च ॥
प्रलम्बाष्टभुजं विष्णुमथवापि चतुर्भुजम् ॥ ८२ ॥
समस्थितोरुजङ्घं च सुस्थितांघ्रिवराम्बुजम् ॥
चिन्तयेद्ब्रह्मभूतं तं पीतनिर्मलवाससम् ॥ ८३ ॥
किरीटहारकेयूरकटकादिविभूषितम् ॥ ८४ ॥
शार्ङ्गशङ्खगदाखड्गचक्राक्षवलयान्वितम् ॥
वरदाभयहस्तं च मुद्रिकारत्नभूषितम् ॥ ८५ ॥
चिन्तयेत्तन्मयो योगी समाधायात्ममानसम् ॥
तावद्यावद्दृढीभूता तत्रैव नृप धारणा ॥ ८६ ॥
व्रजतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म कुर्वतः ॥
नापयाति यदा चित्तात्सिद्धां मन्येत तां तदा ॥ ८७ ॥
ततः शङ्खगदाचक्रशार्ङ्गादिरहितं बुधः ॥
चिन्तयेद्भगवद्रूपं प्रशान्तं साक्षसूत्रकम् ॥ ८८ ॥
सा यदा धारणा तद्वदवस्थानवती ततः ॥
किरीटकेयूरमुखैर्भूषणैः रहितं स्मरेत् ॥ ८९ ॥
तदेकावयवं देवं चेतसा हि पुनर्बुधः ॥
कुर्यात्ततोऽवयविनि प्रणिधानपरो भवेत् ॥ ९० ॥
तद्रूपप्रत्यया चैका सन्ततिश्चान्यनिःस्पृहा ॥
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ॥ ९१ ॥
तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ॥
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते ॥ ९२ ॥
विज्ञान प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव ॥
प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः ॥ ९३ ॥

## १२. विष्णुस्तवनम्

( कूर्म, पूर्वार्ध, १७ )

अदितिरुवाच—

जयाशेषदुःखौघनाशैकहेतो जयानन्तमाहात्म्ययोगाभियुक्तम् ॥
जयानादिमध्यान्तविज्ञानमूर्ते जयाकाशकल्पामलानन्दरूप ॥ १९ ॥
नमो विष्णवे कालरूपाय तुभ्यं नमो नारसिंहाय शेषाय तुभ्यम् ॥
नमः कालरुद्राय संहारकर्त्रे नमो वासुदेवाय तुभ्यं नमस्ते ॥ २० ॥
नमो विश्वमायाविधानाय तुभ्यं नमो योगगम्याय सत्याय तुभ्यम् ॥
नमो धर्मविज्ञाननिष्ठाय तुभ्यं नमस्ते वराहाय भूयो नमस्ते ॥ २१ ॥
नमस्ते सहस्रार्कचन्द्राभमूर्त्ते नमो वेदविज्ञानधर्माभिगम्य ॥
नमो भूधरायाप्रमेयाय तुभ्यं प्रभो विश्वयोनेऽथ भूयो नमस्ते ॥ २२ ॥
नमः शम्भवे सत्यनिष्ठाय तुभ्यं नमो हेतवे विश्वरूपाय तुभ्यम् ॥
नमो योगपीठान्तरस्थाय तुभ्यं शिवायैकरूपाय भूयो नमस्ते ॥ २३ ॥

## १३. विष्णुस्तवनम्

( ब्रह्म, गौतमीमाहात्म्य, ५२ )

धन्वंतरिरुवाच—

जय विष्णो जयाचिन्त्य जय जिष्णो जयाच्युत ॥
जय गोपाल लक्ष्मीश जय कृष्ण जगन्मय ॥ २९ ॥
जय भूतपते नाथ जय पद्माशायिने ॥
जय सर्वग गोविन्द जय विश्वकृते नमः ॥ ३० ॥
जय विश्वभुजे देव जय विश्वधृते नमः ॥
जयेश सदसत्त्वं वै जय माधव धर्मिणे ॥ ३१ ॥
जय कामद काम त्वं जय राम गुणार्णव ॥
जय पुष्टिद पुष्टीश जय कल्याणदायिने ॥ ३२ ॥
जय भूतप भूतेश जय मानविधायिने ॥
जय कर्मद कर्म त्वं जय पीताम्बरच्छद ॥ ३३ ॥
जय सर्वेश सर्वस्त्व जय मङ्गलरूपिणे ॥
जय सत्त्वाधिनाथाय जय वेदविदे नमः ॥ ३४ ॥

जय जन्मद जन्मस्थ परमात्मन्नमोऽस्तु ते ॥
जय मुक्तिद मुक्तिस्त्वं जय मुक्तिद केशव ॥ ३५ ॥
जय लोकद लोकेश जय पापविनाशन ॥
जय वत्सल भक्तानां जय चक्रधृते नमः ॥ ३६ ॥
जय मानद मानस्त्वं जय लोकनमस्कृत ॥
जय धर्मद धर्मस्त्वं जय संसारपारग ॥ ३७ ॥
जय अन्नद अन्नं त्वं जय वाचस्पते नमः ॥
जय शक्तिद शक्तिस्त्वं जय जैत्रवरप्रद ॥ ३८ ॥
जय यज्ञद यज्ञस्त्वं जय पद्मदलेक्षण ॥
जय दानद दानं त्वं जय कैटभसूदन ॥ ३९ ॥
जय कीर्तिद कीर्तिस्त्वं जय मूर्तिद मूर्तिधृक् ॥
जय सौख्यद सौख्यात्मञ्जय पावनपावन ॥ ४० ॥
जय शान्तिद शान्तिस्त्वं जय शङ्करसंभव ॥
जय पानद पानस्त्वं जय ज्योतिःस्वरूपिणे ॥ ४१ ॥
जय वामन वित्तेश जय धूमपताकिने ॥
जय सर्वस्य जगतो दातृमूर्ते नमोऽस्तु ते ॥ ४२ ॥
त्वमेव लोकत्रयवर्तिजीवनिकायसंक्लेशविनाशदक्ष ॥
श्रीपुण्डरीकाक्ष कृपानिधे त्वं निधेहि पाणिं मम मूर्ध्नि विष्णो ॥४३॥

## १४. विष्णुस्तवनम्

( वराह, ८ )

व्यास उवाच—

नमामि विष्णुं त्रिदशारिनाशनं विशालवक्षःस्थलसंश्रितश्रियम् ॥
सुशासनं नीतिमतां परां गतिं त्रिविक्रमं मन्दरधारिणं सदा ॥ ४३ ॥
दामोदरं निर्जितभूतलं धिया यशोंऽशुशुभ्रं भ्रमराङ्गसप्रभम् ॥
भवे भवं दैत्यरिपुं पुरुष्टुतं नमामि विष्णुं शरणं जनार्द्दनम् ॥ ४४ ॥
त्रिधा स्थितं तिग्मरथाङ्गपाणिनं नयस्थितं युक्तमनुत्तमैर्गुणैः ॥
निःश्रेयसाख्यं क्षयितेतरं गुरुं नमामि विष्णुं पुरुषोत्तमं त्वहम् ॥ ४५ ॥
महावराहो हविषां भुजो जनो जनार्दनो मे हितकृच्चतुर्मुखः ॥
महीधरो मामुदधिप्लवे महान्स पातु विष्णुः शरणार्थिनं तु माम् ॥४६॥

मायाततं येन जगत्त्रयं कृतं यथाग्निनैकेन ततं चराचरम् ॥
चराचरस्य स्वयमेव सर्वतः स मेऽस्तु विष्णुः शरणं जगत्पतिः ॥४७॥
भवे भवे यश्च ससर्ज कं ततो जगत्प्रसूतं सचराचरं त्विदम् ॥
ततश्च रुद्रात्मवति प्रलीयते ततो हरिर्विष्णुहरस्तथोच्यते ॥ ४८ ॥
रवीन्दुपृथ्वीपवनाग्निभास्करा जलं च यस्य प्रभवन्ति मूर्तयः ॥
स सर्वदा मे भगवान्सनातनो ददातु शं विष्णुरचिन्त्यरूपधृक् ॥ ४९ ॥

## १५. आदिदेवस्तोत्रम्

( पद्म, उत्तरखण्ड, २०८ )

ब्राह्मणा ऊचुः—

नमस्तेऽतसीपुष्पसङ्काशभासं तनुं बिभ्रते पीतवासोवृताय ॥
लसत्कुण्डलप्रोतनानोपलाय श्रुतौ चञ्चलाव्यापिनीलाम्बुदाय ॥ ३५ ॥
भक्तिस्त्वदीया किल कल्पवल्ली समाश्रिता यच्छति चित्तवाञ्छितम् ॥
यथा तथैषा किल कोशला विभो जना उभे ते कृपया तवाऽऽप्नुयुः ॥ ३६ ॥
वन्दामहे ते चरणारविन्दं वृन्दारकैर्वन्दितमीश्वराद्यैः ॥
विचिन्त्यमानं हृदि योगिवृन्दैः कन्दं परानन्दभुवो विमुक्तेः ॥ ३७ ॥
प्राप्ताः कामं श्रीपतेत्वत्स्वरूपं श्रीवत्साद्यैर्लक्षितं चारुचिह्नैः ॥
वाञ्छामस्ते दासभावं तथाऽपि प्रायः सर्वैरादृतं नारदाद्यैः ॥ ३८ ॥
यत्सौख्यं ते दासभावं गतानां तन्नो लक्ष्म्या वक्षसोऽन्तर्वसन्त्याः ॥
तज्जानाति श्रीपते श्रीमहेशो नान्यो लोके येन तच्चानुभूतम् ॥ ३९ ॥
मध्येऽस्माकं श्रीपते सेवकानां नीरागाणामप्यसौ माननीयः ॥
अस्मात्त्वं ते नारदाद्या मुनीशा स्वद्भक्त्याप्त्यै लोकनाथं भजन्ते ॥४०॥
कामं ब्रह्मानन्दमाप्तोऽन्तरात्मा त्वद्दास्ये नो तृप्तिमायाति शम्भुः ॥
वारं वारं त्वद्गुणानुग्रहीता नृत्यत्युच्चैस्त्वत्परो भावयुक्तः ॥ ४१ ॥
हेतोरस्माद्देहि नः स्वस्य दास्यं यत्प्राप्तानां नोर्मयः संभवन्ति ॥
त्वच्चिह्नाङ्गौ द्वारपालौ त्वदीयौ मोहाद्भ्रष्टौ प्रापितौ तत्स्वकीयम् ॥४२॥
लोकादस्मादन्तरेण त्वदिच्छां त्वल्लोकानां नोद्यते चाऽऽशुपातः ॥
को जानीयात्तावकीमत्र मायां दुर्विज्ञेयां ब्रह्मशर्वादिदेवैः ॥ ४३ ॥

## १६. पुरुषोत्तमस्तोत्रम्

( पद्म, पातालखण्ड, २१ )

राजोवाच —

जय दीन दयाकर प्रभो जय दुःखापह मङ्गलालय ॥
जय भक्तजनार्तिनाशककृतवर्ष्मञ्जय दुष्टघातक ॥ २० ॥
अम्बरीषमथ वीक्ष्य दुःखितं विप्रशापहतसर्वमङ्गलम् ॥
धारयन्निजकरे सुदर्शनं स्वं ररक्ष जठराधिवासतः ॥ २१ ॥
दैत्यराजपितृकारितव्यथः शूलपाशजलवह्निपातनैः ॥
श्रीनृसिंहतनुधारिणा त्वया रक्षितः सपदि पश्यतः पितुः ॥ २२ ॥
ग्राहवक्त्रपतितांघ्रिमुद्भटं वारणेन्द्रमतिदुःखपीडितम् ॥
वीक्ष्य साधु करुणार्द्रमानसस्त्वं गरुत्मति कृताग्रहक्रियः ॥ २३ ॥
त्यक्तपक्षिपतिरात्तचक्रको वेगकम्पयुतमालिकाम्बरः ॥
गीयसेऽसुभिरमुष्य नक्रतो मोचकः सपदि तद्विनाशकः ॥ २४ ॥
यत्र यत्र तव सेवकार्दनं तत्र तत्र बत देहधारिणा ॥
पाल्यतेऽत्र भवता त्वया निजः पापहारिचरितैर्मनोहरैः ॥ २५ ॥
दीननाथ सुरमौलिहीरकोद्घृष्टपादतल भक्तवल्लभ ॥
पापकोटिपरदाहक प्रभो दर्शयस्व मम पादपङ्कजम् ॥ २६ ॥
पापकृद्यदि जनोऽहमागतो मानसे तव तथा हि दर्शय ॥
तावका वयमघौघनाशन विस्मृतं न हि सुरासुरार्चित ॥ २७ ॥
ये वदन्ति तव नाम निर्मल ते तरन्ति सकलाघसागरम् ॥
सच्छ्रुतिर्यदि कृता तदा मया प्राप्यतां सकलदुःखहारक ॥ २८ ॥

## १७. श्रीपतिस्तवनम्

( पद्म, उत्तरखण्ड, २११ )

मुनिरुवाच —

श्रीपते श्रीकराम्भोजसंमर्दितपदाम्बुजम् ॥
भवतो भवतापघ्नं वन्दे त्रिदशवन्दितम् ॥ ९९ ॥
त्वदीयमायया नाथ मोहिता येऽत्र जन्तवः ॥
तेषां कदाचिन्निस्तारो न कृपामन्तरेण ते ॥ १०० ॥

सत्तीर्थसेवनादीश तथा सज्जनसङ्गमात् ॥
पुंसां भक्तिस्तु येषां वै जायते कृपया तव ॥ १०१ ॥
साधुभिर्बहु उदीरितं हरे यो निशम्य गुणकीर्तनं तव ॥
कीर्तयत्यखिलपापनाशनं मातृगर्भकुहरे स नो पतेत् ॥ १०२ ॥
श्रीपते तव जनस्य मानसं दैवतस्तु पतितं महारणे ॥
गुण्ठितं च रजसा जहाति नो निर्मलत्वमिव रत्नमुत्तमम् ॥ १०३ ॥
यः पुमान्पतति ते पदाम्बुजे दण्डवत्पुलकमङ्गके दधत् ॥
सोऽन्वयं नयति तावकं पदं स्वं च वाञ्छितमशेषयोगिभिः ॥ १०४ ॥
जीव एष तव मायया विभो मोहितो भ्रमति विश्ववर्त्मसु ॥
त्वत्कृपालुलितलोचनाञ्चलैस्तत्क्षणं तरति विश्ववारिधिम् ॥ १०५ ॥

## १८. वासुदेवस्तोत्रम्

( गरुड, पूर्वखण्ड, २२६ )

सकलमुनिभिराद्यश्चिन्त्यते यो हि सिद्धो
निखिलहृदि निविष्टं वेत्ति यः सर्वसाक्षी ॥
तमजममृतमीशं वासुदेवं नतोऽस्मि
त्वभयमरणहीनं नित्यमानन्दरूपम् ॥ ५० ॥
निखिलभुवननाथं शाश्वतं सुप्रसन्नम्
अतिविमलविशुद्धं निर्गुणं भावपुष्पैः ॥
सुखमुदितसमस्तं पूजयाम्यात्मभावं
विशतु हृदयपद्मे सर्वसाक्षी चिदात्मा ॥ ५१ ॥
एवं मयोक्तं परमप्रभावमाद्यन्तहीनस्य परस्य विष्णोः ॥
तस्माद्विचिन्त्यः परमेश्वरोऽसौ विमुक्तिमार्गेण नरेण सम्यक् ॥ ५२ ॥
बोधस्वरूपं पुरुषं पुराणं आदित्यवर्णं विमलं विशुद्धम् ॥
सञ्चिन्त्य विष्णुं परमद्वितीयं कस्तत्र योगी न लयं प्रयाति ॥ ५३ ॥
इमं स्तवं यः सततं मनुष्यः पठेच्च तद्वत्प्रयतः प्रशान्तः ॥
स धौतपाप्मा विततप्रभावः प्रयाति लोकं विततं मुरारेः ॥ ५४ ॥
यः प्रार्थयत्यर्थमशेषसौख्यं धर्मञ्च कामञ्च तथैव मोक्षम् ॥
स सर्वमुत्सृज्य परं पुराणं प्रयाति विष्णुं शरणं वरेण्यम् ॥ ५५ ॥

विभुं प्रभुं विश्वधरं विशुद्धमशेषसंसारविनाशहेतुम् ॥
यो वासुदेवं विमलं प्रपन्नः स मोक्षमाप्नोति विमुक्तसङ्गः ॥ ५६ ॥

## १९. वासुदेवस्तोत्रम् (पूजाकाले)

( गरुड, पूर्वखण्ड, २२६ )

ॐ नमो भगवते वासुदेवाय नमः सर्वपापहारिणे ॥
नमो यज्ञवराहाय गोविन्दाय नमो नमः ॥
नमस्ते परमानन्द ! नमस्ते परमाक्षर ! ॥ ६ ॥

नमस्ते ज्ञानसद्भाव ! नमस्ते ज्ञानदायक ! ॥
नमस्ते परमाद्वैत ! नमस्ते पुरुषोत्तम ॥ ७ ॥

नमस्ते विश्वकृद्देव ! नमस्ते विश्वभावन ! ॥
नमस्तेऽस्तु विश्वनाथ ! नमस्ते विश्वकारण ! ॥ ८ ॥

नमस्ते मधुदैत्यघ्न ! नमस्ते रावणान्तक ! ॥
नमस्ते कंसकेशिघ्न ! नमस्ते कैटभार्दन ! ॥ ९ ॥

नमस्ते शतपत्राक्ष ! नमस्ते गरुडध्वज ! ॥
नमस्ते कालनेमिघ्न ! नमस्ते गरुडासन ॥ १० ॥

नमस्ते देवकीपुत्र ! नमस्ते वृष्णिनन्दन ! ॥
नमस्ते रुक्मिणीकान्त ! नमस्ते दितिनन्दन ! ॥
नमस्ते गोकुलावास ! नमस्ते गोकुलप्रिय ! ॥ ११ ॥

जय गोपवपुः कृष्ण ! जय गोपीजनप्रिय ! ॥
जय गोवर्द्धनाधार ! जय गोकुलवर्धन ! ॥ १२ ॥

जय रावणवीरघ्न ! जय चाणूरनाशन ! ॥
जय वृष्णिकुलोद्योत ! जय कालीयमर्दन ! ॥ १३ ॥

जय सत्य जगत्साक्षिन् ! जय सर्वार्थसाधक ॥
जय वेदान्तविद्वेद्य ! जय सर्वद ! माधव ! ॥ १४ ॥

जय सर्वाश्रयाव्यक्त ! जय सर्वद ! माधव ! ॥
जय सूक्ष्म चिदानन्द ! जय चित्तनिरञ्जन ॥ १५ ॥

जयस्तेऽस्तु निरालम्ब ! जय शान्त ! सनातन ! ॥
जय नाथ ! जगत्पुष्ट ! जय विष्णो ! नमोऽस्तु ते ॥ ३६ ॥
दिवारात्रौ च सन्ध्यायां सर्वावस्थासु चेष्टतः ॥
अचला तु हरे ! भक्तिस्तवांघ्रियुगले मम ॥ ३७ ॥
शरीरेण तथा प्रीतिर्न च धर्मादिकेषु च ॥
यथा त्वयि जगन्नाथ ! प्रीतिरात्यन्तिकी मम ॥ ३८ ॥
पूजां कर्त्तुं तथा स्तोत्रं कः शक्नोति तवाच्युत ॥
स्तुतं तु पूजितं मेऽद्य तत्क्षमस्व नमोऽस्तु ते ॥ ४० ॥

## २०. गोविन्दस्तवनम्

( वराह, ३६ )

राजोवाच—

नमामि देवं जगतां च मूर्ति गोपेन्द्रमिन्द्रानुजमप्रमेयम् ॥
ससारचक्रक्रमणैकदक्षं पृथ्वीधरं देववरं नमामि ॥ १२ ॥
भवोदधौ दुःखशतोर्म्मिभीमे जरावर्त्ते कृष्ण पातालमूले ॥
तदन्त एको ददते सुखं मे नमोऽस्तु ते गोपतयेऽप्रमेय ॥ १३ ॥
व्याध्यादियुक्तः पुरुषैर्ग्रहैश्च सङ्घट्टमानं पुनरेव देव ॥
नमोऽस्तु ते युद्धरते महात्मञ्जनार्दनोपेन्द्र समस्तबन्धो ॥ १४ ॥
त्वमुत्तमः सर्वविदां सुरेश त्वया ततं विश्वमिदं समस्तम् ॥
गोपेन्द्र मां पाहि महानुभाव भवाद्भीतं तिग्मरथाङ्गपाणे ॥ १५ ॥
परोऽसि देव प्रवरः सुराणां पुराणरूपोऽसि शशिप्रकाशः ॥
हुताशवक्त्राच्युत तीव्रभाव गोपेन्द्र मां पाहि भवे पतन्तम् ॥ १६ ॥
संसारचक्रक्रमणान्यनेकान्याविर्भवन्त्यच्युत देहिनां यत् ॥
त्वन्मायया मोहितानां सुरेश कस्ते माया तरते द्वन्द्वधामा ॥ १७ ॥
अगोत्रमस्पर्शमरूपगन्धमनामनिर्द्देशमजं वरेण्यम् ॥
गोपेन्द्र ये त्वामुपासन्ति धीरास्ते मुक्तिभाजो भवधर्ममुक्ताः ॥१८॥
शब्दातिगं व्योमरूपं विमूर्त्ति विकर्मिणं शुभभावं वरेण्यम् ॥
चक्राब्जपाणिं तु तथोपचारादुक्तं पुराणे सततं नमामि ॥ १९ ॥

त्रिविक्रमं क्रीतजगत्त्रयं च चतुर्मूर्त्ति विश्वजगत्क्षितीशम् ॥
शम्भुं विभुं भूतपतिं सुरेशं नमाम्यहं विष्णुमनन्तमूर्तिम् ॥ २० ॥

त्वं देव सर्वाणि चराचराणि सृजस्यथो संहरसे त्वमेव ॥
मां मुक्तिकामं नय देव शीघ्रं यस्मिन् गता योगिनो नोपयान्ति ॥२१॥

जयस्व गोविन्द महानुभाव जयस्व विष्णो जय पद्मनाभ ॥
जयस्व सर्वज्ञ जयाप्रमेय जयस्व विश्वेश्वर विश्वमूर्त्ते ॥ २२ ॥

## २१. अष्टावक्रकृतगोविन्दस्तोत्रम्

( ब्रह्म, द्वि. भाग, अ. २९. )

[ ध्यानाद्विरतमग्रे च पश्यन्तं बहिरेव तत् ॥
सर्वावयववक्त्रं च कृष्णं सर्वं दिगम्बरम् ॥ ३५ ॥
नाम्नाऽष्टवक्रं जटिलं ज्वलन्तं ब्रह्मतेजसा ॥
मुखतोऽग्निमुद्गिरन्तं तपोराशिमिवोत्थितम् ॥ ३६ ॥
अहो किं वा ब्रह्मतेजो मूर्त्तिमन्तमिह स्वयम् ॥
नखश्मश्रुसुदीर्घं च शान्तं तेजस्विनं परम् ॥ ३७ ॥
पुटाञ्जलियुतं भक्त्या भीतं प्रणतकन्धरम् ॥
दृष्ट्वा हसन्तीं राधां तां वारयामास माधवः ॥ ३८ ॥
प्रभावं कथयामास मुनीन्द्रस्य महात्मनः ॥
अथ प्रणम्य गोविन्दं तुष्टाव मुनिपुङ्गवः ॥
यत्स्तोत्रं च पुरा दत्तं शङ्करेण महात्मनः ॥ ३९ ॥ ]

अष्टावक्र उवाच—

गुणातीत गुणाधार गुणबीज गुणात्मक ॥
गुणीश गुणिनां बीज गुणायन नमोऽस्तु ते ॥ ४० ॥

सिद्धिस्वरूप सिद्ध्येश सिद्धबीज परात्पर ॥
सिद्धिसिद्धं गुणाधीश सिद्धानां गुरवे नमः ॥ ४१ ॥
हे वेदबीज वेदज्ञ वेदिन्वेदविदां वर ॥
वेदज्ञाताऽद्यरूपेश वेदज्ञेश नमोऽस्तु ते ॥ ४२ ॥

ब्रह्मानन्तेशशेषेन्द्रधर्मादीनामधीश्वर ॥
सर्वं सर्वेश शर्वेश बीजरूप न० ॥ ४३ ॥
प्रकृते प्राकृते प्रज्ञ प्रकृतीश परात्पर ॥
संसारवृक्ष तद्बीजफलरूप न० ॥ ४४ ॥
सृष्टिस्थित्यन्तबीजेश सृष्टिस्थित्यन्तकारण ॥
महाविराट्तरोर्बीज राधिकेश न० ॥ ४५ ॥
अहो यस्य त्रयः स्कन्धा ब्रह्मविष्णुमहेश्वराः ॥
शाखाप्रशाखा वेदाद्यास्तपांसि कुसुमानि च ॥ ४६ ॥
संसारा विफला एष प्रकृत्यङ्कुरमेत्य च ॥
तदाधार निराधार सर्वाधार न० ॥ ४७ ॥
तेजोरूप निराकार प्रत्यक्षानूह्मेव च ॥
सर्वाकारातिप्रत्यक्ष स्वेच्छामय न० ॥ ४८ ॥
[ इत्युक्त्वा स मुनिश्रेष्ठो निपत्य चरणाम्बुजे ॥
प्राणांस्तत्याज योगेन तयोः प्रत्यक्ष एव च ॥ ४९ ॥
पपात तत्र तद्देहः पादपद्मसमीपतः ॥
तत्तेजश्च समुत्तस्थौ ज्वलदग्निशिखोपमः ॥ ५० ॥
सप्ततालप्रमाणं तु चोत्थाय च पपात ह ॥
भ्रामं भ्रामं च परितो लीनं चाभूत्पदाम्बुजे ॥ ५१ ॥
अष्टावक्रकृतं स्तोत्रं प्रातरुत्थाय यः पठेत् ॥
परं निर्वाणं मोक्षं च समाप्नोति न संशयः ॥ ५२ ॥
प्राणाधिको मुमुक्षूणां स्तोत्रराजश्च नारद ॥
हरिणाऽहो पुरा दत्ता वैकुण्ठे शङ्कराय च ॥ ५३ ॥ ]

## २२. मत्स्यावतारस्तोत्रम्

( वराह, ९ )

जलोवाच—

नमोऽस्तु वेदान्तरगाप्रतर्क्य नमोऽस्तु नारायण मत्स्यरूप ॥
नमोऽस्तु ते सुस्वर विश्वमूर्त्ते नमोऽस्तु विद्याद्वयरूपधारिन् ॥२८॥

नमोऽस्तु चन्द्रार्क अनेकरूप जलान्तविश्वस्थित चारुनेत्र ॥
नमोऽस्तु विष्णो शरणं व्रजामः प्रयाहि नो मत्स्यतनुं विहाय ॥ २९ ॥
त्वया ततं विश्वमनन्तमूर्त्ते पृथङ्न ते किञ्चिदिहास्ति देव ॥
भवान्न चास्य व्यतिरिक्तमूर्त्तिस्त्वत्तो वयं ते शरणं प्रपन्नाः ॥ ३० ॥
खात्मेन्दुवह्निश्च मनश्च रूपं पुराणमूर्त्तेस्तव चाब्जनेत्र ॥
क्षमस्व शम्भो यदि भक्तिहीनं त्वया जगद्भासति देवदेव ॥ ३१ ॥
विरुद्धमेतत्तव देवरूपं सुभाषणं सुस्वनमद्रितुल्यम् ॥
पुराणदेवेश जगन्निवास शमं प्रयाह्यच्युत तीव्रभानो ॥ ३२ ॥
नमाम सर्वे शरणं प्रपन्ना भयाच्च ते रूपमिदं च दृष्ट्वा ॥
लोके समस्तं भवता विनाऽद्य न विद्यते देहगतं पुराणम् ॥ ३३ ॥

## २३. वराहस्तवनम्

( विष्णु, १, ४ )

श्रीपराशर उवाच—

एवं संस्तूयमानस्तु पृथिव्या धरणीधरः ॥
सामस्वरध्वनिः श्रीमाञ्जगर्ज परिघर्घरम् ॥ २५ ॥
ततः समुत्क्षिप्य धरां स्वदंष्ट्रया महावराहः स्फुटपद्मलोचनः ॥
रसातलादुत्पलपत्रसन्निभः समुत्थितो नील इवाचलो महान् ॥ २६ ॥
उत्तिष्ठता तेन मुखानिलाहतं तत्संभवाम्भो जनलोकसंश्रयान् ॥
प्रक्षालयामास हि तान्महाद्युतीन् सनन्दनादीनपकल्मषान्मुनीन् ॥२७॥
प्रयान्ति तोयानि खुराग्रविक्षतरसातलेऽधः कृतशब्दसन्ततिः ॥
श्वासानिलास्ताः परितः प्रयान्ति सिद्धा जना ये नियता वसन्ति ॥२८॥
उत्तिष्ठतस्तस्य जलार्द्रकुक्षेर्महावराहस्य महीं विगृह्य ॥
विधुन्वतो वेदमयं शरीरं रोमान्तरस्था मुनयः स्तुवन्ति ॥ २९ ॥
तं तुष्टुवुस्तोषपरीतचेतसो लोके जने ये निवसन्ति योगिनः ॥
सनन्दनाद्या ह्यतिनम्रकन्धरा धराधरं धीरतरोद्धतेक्षणम् ॥ ३० ॥
जयेश्वराणां परमेश केशव प्रभो गदाशङ्खधरासिचक्रधृक् ॥
प्रसूतिनाशस्थितिहेतुरीश्वरस्त्वमेव नान्यत्परमं च यत्पदम् ॥ ३१ ॥

पादेषु वेदास्तव यूपदंष्ट्रं दन्तेषु यज्ञाश्चितयश्च वक्त्रे ॥
हुताशजिह्वोऽसि तनूरुहाणि दर्भाः प्रभो यज्ञपुमांस्त्वमेव ॥ ३२ ॥
विलोचने रात्र्यहनी महात्मन्सर्वाश्रयं ब्रह्म परं शिरस्ते ॥
सूक्तान्यशेषाणि सटाकलापो घ्राणं समस्तानि हवींषि देव ॥ ३३ ॥
स्रुक्तुण्ड सामस्वरधीरनाद प्राग्वंशकायाखिलसत्रसन्धे ॥
पूर्तेष्टधर्मश्रवणोऽसि देव सनातनात्मन्भगवन्प्रसीद ॥ ३४ ॥
पदक्रमाक्रान्तभुवं भवन्तमादिस्थितिं चाक्षर विश्वमूर्ते ॥
विश्वस्य विद्मः परमेश्वरोऽसि प्रसीद नाथोऽसि परावरस्य ॥ ३५ ॥
दंष्ट्राग्रविन्यस्तमशेषमेतद्भू मण्डलं नाथ विभाव्यते ते ॥
विगाहतः पद्मवनं विलग्न सरोजिनीपत्रमिवोढपङ्कम् ॥ ३६ ॥
द्यावापृथिव्योरतुलप्रभाव यदन्तरं तद्वपुषा तवैव ॥
व्याप्तं जगद्व्याप्तिसमर्थदीप्ते हिताय विश्वस्य विभो भव त्वम् ॥३७॥

परमार्थस्त्वमेवैको नान्योऽस्ति जगतःपते ॥
तवैष महिमा येन व्याप्तमेतच्चराचरम् ॥ ३८ ॥
यदेतद्दृश्यते मूर्त्तमेतज्ज्ञानात्मनस्तव ॥
भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥ ३९ ॥
ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ॥
अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे ॥ ४० ॥
ये तु ज्ञानविधः शुद्धचेतसस्तेऽखिलं जगत् ॥
ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ॥ ४१ ॥
प्रसीद सर्व सर्वात्मन्वासाय जगतामिमां ॥
उद्धरोर्वीममेयात्मञ्छन्नो देह्यब्जलोचन ॥ ४२ ॥
सत्त्वोद्रिक्तोऽसि भगवन् गोविन्द पृथिवीमिमाम् ॥
समुद्धर भवायेश शन्नो देह्यब्जलोचन ॥ ४३ ॥
सर्गप्रवृत्तिर्भवतो जगतामुपकारिणी ॥
भवत्वेषा नमस्तेऽस्तु शन्नो देह्यब्जलोचन ॥ ४४ ॥

# २४. श्रीवामनस्तवः

( वामन, अ. ३० )

ब्रह्मोवाच—

जयाधीश जयाजेय जय सर्वगुरो हरे ॥
जन्ममृत्युजरातीत जयानन्त जयाच्युत ॥ १८ ॥
जयाजित जयाशेष जयाव्यक्तस्थिते जय ॥
परमार्थार्थसर्वज्ञ ज्ञानज्ञेयार्थनिश्चित ॥ १९ ॥
जयाशेषजगत्साक्षिञ्जगत्कर्त्तर्जगद्गुरो ॥
जगतोऽजगतश्चेश स्थितौ पालयसे जय ॥ २० ॥
जयाखिल जयाशेष जय सर्वहृदिस्थित ॥
जयादिमध्यान्तमय सर्वज्ञानमयोत्तम ॥ २१ ॥
मुमुक्षुभिरनिर्देश्य नित्यहृष्ट जयेश्वर ॥
योगिभिर्मुक्तकामैस्तु दमादिगुणभूषण ॥ २२ ॥
जयातिसूक्ष्मदुर्ज्ञेय जगन्मूल जगन्मय ॥
जय सूक्ष्मातिसूक्ष्म त्वं जय योगिन्नतीन्द्रिय ॥ २३ ॥
जय स्वमायायोगस्थ शेषभोगशयाक्षर ॥
जयैकदंष्ट्राप्रान्तेन समुद्धृतवसुन्धर ॥ २४ ॥
नृकेसरिन्सुरारातिवक्षःस्थलविदारण ॥
सांप्रतं जय विश्वात्मन्मायावामन केशव ॥ २५ ॥
स्वमायापटलच्छन्नजगद्धातर्जनार्दन ॥
जयाचिन्त्य जयानेकस्वरूपैकनिधे प्रभो ॥ २६ ॥
वर्द्धस्व वर्द्धितानेकविकारप्रकृते हरे ॥
त्वय्येषा जगती शेषसंस्थिता धर्मपद्धतिः ॥ २७ ॥
न त्वामहं न चेशानो नेन्द्राद्यास्त्रिदशा हरे ॥
ज्ञातुमीशा न ऋषयः सनकाद्या न योगिनः ॥ २८ ॥
त्वं मायापटसंवीतो जगत्यत्र जगत्पते ॥
कस्त्वां वेत्स्यति सर्वेश त्वत्प्रसादं विना नरः ॥ २९ ॥

त्वमेवाराधितो येन प्रसादसुमुख प्रभो ॥
स एष केवलं देव वेत्ति त्वां नेतरो जनः ॥ ३० ॥
नन्दीश्वरेश्वरेशान विभो वर्द्धस्व वामन ॥
प्रभवायास्य विश्वस्य विश्वात्मन्पृथुलोचन ॥ ३१ ॥

## २५. चित्रकूटस्थितश्रीरामस्तवनम्

( वराह, १२ )

दुर्जयनृप उवाच—

नमामि रामं नरनाथमच्युतं कविं पुराणं त्रिदशारिनाशनम् ॥
शिवस्वरूपं प्रभवं महेश्वरं सदा प्रपन्नार्तिहरं धृतश्रियम् ॥ ५ ॥
भवान् सदा देव समस्ततेजसां करोषि तेजांसि समस्तरूपधृक् ॥
क्षितौ भवान् पञ्चगुणस्तथा जले चतुष्प्रकारः त्रिविधोऽथ तेजसि ॥६॥
द्विधाऽथ वायौ वियति प्रतिष्ठितो भवां हरिः शद्वचरः पुमानसि ॥
भवाञ्च्छशीसूर्यहुताशनोऽसि त्वयि प्रलीनं जगदेतदुच्यते ॥ ७ ॥
भवत्प्रतिष्ठं रमते जगद्यतः ततोऽसि रामेति जगत्प्रतिष्ठितः ॥
भवार्णवे दुःखतरोर्मिसङ्कुले तथाक्षमीनग्रहनक्रभीषणे ॥ ८ ॥
न मज्जति त्वत्स्मरणप्लवो नरः स्मृतोऽसि रामेति तथा तपोवने ॥
वेदेषु नष्टेषु भवांस्तथा हरे करोषि मात्स्यं वपुरात्मनः सदा ॥ ९ ॥
युगक्षये रञ्जितसर्वदिङ्मुखे भवांस्तथाग्निर्बहुरूपधृग्विभो ॥
कौर्मं तथा स्वं वपुरास्थितः सदा युगेयुगे माधव सिन्धुमन्थने ॥ १० ॥
न चान्यदस्तीति भवत्समं क्वचिज्जनार्दनाद्यत्प्रबभूव चोत्तमम् ॥
त्वया ततं विश्वमिदं महात्मँल्लोकाखिला वेद दिशश्च सर्वाः ॥ ११ ॥
कथं त्वमाद्यं परमं तु धाम विहाय चान्यं शरणं व्रजामि ॥
भवानेकः पूर्वमासीत्ततश्च महानहं सलिलं वह्निरूपैः ॥
वायुस्तथा खं च मनोऽपि बुद्धिस्त्वत्तो गुणास्त्वत्प्रभवं च सर्वम् ॥१२॥
त्वया ततं विश्वमिदं समस्तं सनातनस्त्वं पुरुषो मतो मे ॥
समस्तविश्वेश्वर विश्वमूर्त्ते सहस्रबाहो जय देवदेव ॥ १३ ॥
नमोऽस्तु रामाय महानुभाव इति स्तुतो देववरः प्रसन्नः ॥
तदा तु राज्ञः सुप्रतीकाय मूर्ति सन्दर्शयामास ततोऽभ्युवाच ॥ १४ ॥

## २६. श्रीरामचन्द्राष्टोत्तरशतनामावलिः

( पद्म, उत्तरखण्ड, २८१ )

ॐ श्रीरामो रामचन्द्रश्च रामभद्रश्च शाश्वतः ।।
राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः ।। ३० ।।
जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः ।।
विश्वामित्रप्रियो दान्तः शरण्यत्राणतत्परः ।। ३१ ।।
वालिप्रमथनो वाग्मी सत्यवाक्सत्यविक्रमः ।।
सत्यव्रतो व्रतफलः सदा हनुमदाश्रयः ।। ३२ ।।
कौसलेयः खरध्वंसी विराधवधपण्डितः ।।
विभीषणपरित्राता दशग्रीवशिरोहरः ।। ३३ ।।
सप्ततालप्रभेत्ता च हरकोदण्डखण्डनः ।।
जामदग्न्यमहादर्पदलनस्ताडकान्तकृत् ।। ३४ ।।
वेदान्तपारो वेदात्मा भवबन्धैकभेषजः ।।
दूषणत्रिशिरोऽरिश्च त्रिमूर्तिस्त्रिगुणस्त्रयी ।। ३५ ।।
त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्तनः ।।
त्रिलोकरक्षको धन्वी दण्डकारण्यवासकृत् ।। ३६ ।।
अहल्यापावनश्चैव पितृभक्तो वरप्रदः ।।
जितेन्द्रियो जितक्रोधो जितलोभो जगद्गुरुः ।। ३७ ।।
ऋक्षवानरसङ्घाती चित्रकूटसमाश्रयः ।।
जयन्तत्राणवरदः सुमित्रापुत्रसेवितः ।। ३८ ।।
सर्वदेवाधिदेवश्च मृतवानरजीवनः ।।
मायामारीचहन्ता च महाभागो महाभुजः ।। ३९ ।।
सर्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसत्तमः ।।
महायोगी महोदारः सुग्रीवस्थिरराज्यदः ।। ४० ।।
सर्वपुण्याधिकफलः स्मृतः सर्वाघनाशनः ।।
आदिपुरुषो महापुरुषः परमः पुरुषस्तथा ।।
पुण्योदयो महासारः पुराणः पुरुषोत्तमः ।।
स्मितवक्त्रो मितभाषी पूर्वभाषी च राघवः ।। ४२ ।।

अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तरः ॥
मायामानुषचारित्रो महादेवाभिपूजितः ॥ ४३ ॥
सेतुकृज्जितवारीशः सर्वतीर्थमयो हरिः ॥
श्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्धरः ॥ ४४ ॥
सर्वयज्ञाधिपो यज्ञो जरामरणवर्जितः ॥
शिवलिङ्गप्रतिष्ठाता सर्वाघगणवर्जितः ॥ ४५ ॥
परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः ॥
परंज्योतिः परं धाम पराकाशः परात्परः ॥ ४६ ॥
परेशः पारगः पारः सर्वभूतात्मकः शिवः ॥
इति श्रीरामचन्द्रस्य नाम्नामष्टोत्तरं शतम् ॥ ४७ ॥

## २७. श्रीकृष्णनामाष्टोत्तरशतस्तोत्रम्

( ब्रह्माण्ड, मध्यभाग, ३६ )

छन्दोऽनुष्टुब्देवता तु योगः कृष्णप्रियावहः ॥
श्रीकृष्णः कमलानाथो वासुदेवः सनातनः ॥ २१ ॥
वसुदेवात्मजः पुण्यो लीलामानसविग्रहः ॥
श्रीवत्सकौस्तुभधरो यशोदावत्सलो हरिः ॥ २२ ॥
चतुर्भुजात्तचक्रासिगदाशंखाद्युदायुधः ॥
देवकीनन्दनः श्रीशो नन्दगोपप्रियात्मजः ॥ २३ ॥
यमुनावेगसंहारी बलभद्रप्रियानुजः ॥
पूतनाजीवितहरः शकटासुरभञ्जनः ॥ २४ ॥
नन्दव्रजजनानन्दी सच्चिदानन्दविग्रहः ॥
नवनीतविलिप्ताङ्गो नवनीतनटोऽनघः ॥ २५ ॥
नवनीतलवाहारी मुचुकुन्दप्रसादकृत् ॥
षोडशस्त्रीसहस्रेशस्त्रिभंगी मधुराकृतिः ॥ २६ ॥
शुकवागमृताब्धीन्दुर्गोविन्दो गोविदां पतिः ॥
वत्सपालनसञ्चारी धेनुकासुरमर्दनः ॥ २७ ॥
तृणीकृततृणावर्तो यमलार्जुनभञ्जनः ॥
उत्तालतालभेत्ता च तमालश्यामलाकृतिः ॥ २८ ॥

गोपगोपीश्वरो योगी सूर्यकोटिसमप्रभः ॥
इलापतिः परंज्योतिर्यादवेन्द्रो यदूद्वहः ॥ २९ ॥
वनमाली पीतवासाः पारिजातापहारकः ॥
गोवर्धनाचलोद्धर्त्ता गोपालः सर्वपालकः ॥ ३० ॥
अजो निरञ्जनः कामजनकः कञ्जलोचनः ॥
मधुहा मथुरानाथो द्वारकानाथको बली ॥ ३१ ॥
वृन्दावनान्तसंचारी तुलसीदामभूषणः ॥
स्यमन्तकमणेर्हर्त्ता नरनारायणात्मकः ॥ ३२ ॥
कुब्जाकृष्टाम्बरधरो मायी परमपूरुषः ॥
मुष्टिकासुरचाणूरमल्लयुद्धविशारदः ॥ ३३ ॥
संसारवैरी कंसारिर्मुरारिर्नरकान्तकः ॥
अनादिब्रह्मचारी च कृष्णाव्यसनकर्षकः ॥ ३४ ॥
शिशुपालशिरश्छेत्ता दुर्योधनकुलान्तकृत् ॥
विदुराक्रूरवरदो विश्वरूपप्रदर्शकः ॥ ३५ ॥
सत्यवाक् सत्यसंकल्पः सत्यभामारतो जयी ॥
सुभद्रापूर्वजो विष्णुर्भीष्ममुक्तिप्रदायकः ॥ ३६ ॥
जगद्गुरुर्जगन्नाथो वेणुवाद्यविशारदः ॥
वृषभासुरविध्वंसी बकारिर्बाणबाहुकृत् ॥ ३७ ॥
युधिष्ठिरप्रतिष्ठाता बर्हिबर्हावतंसकः ॥
पार्थसारथिरव्यक्तो गीतामृतमहोदधिः ॥ ३८ ॥
कालीयफणिमाणिक्यरञ्जितश्रीपदाम्बुजः ॥
दामोदरो यज्ञभोक्ता दानवेन्द्रविनाशनः ॥ ३९ ॥
नारायणः परं ब्रह्म पन्नगाशनवाहनः ॥
जलक्रीडासमासक्तगोपीवस्त्रापहारकः ॥ ४० ॥
पुण्यश्लोकस्तीर्थपादो वेदवेद्यो दयानिधिः ॥
सर्वतीर्थात्मकः सर्वग्रहरूपी परात्परः ॥ ४१ ॥
इत्येवं कृष्णदेवस्य नाम्नामष्टोत्तरं शतम् ॥
कृष्णेन कृष्णभक्तेन श्रुत्वा गीतामृतं पुरा ॥ ४२ ॥

स्तोत्रं कृष्णप्रियकरं कृतं तस्मान्मया श्रुतम् ॥
कृष्णप्रेमामृतं नाम परमानन्ददायकम् ॥ ४३ ॥
अत्युपद्रवदुःखघ्नं परमायुष्यवर्द्धनम् ॥
दानं व्रतं तपस्तीर्थं यत्कृतं त्विह जन्मनी ॥ ४४ ॥
पठतां शृण्वतां चैव कोटिकोटिगुणं भवेत् ॥
पुत्रप्रदमपुत्राणामगतीनां गतिप्रदम् ॥ ४५ ॥
धनवाहं दरिद्राणां जयेच्छूनां जयावहम् ॥
शिशूनां गोकुलानां च पुष्टिदं पुण्यवर्द्धनम् ॥ ४६ ॥
बालरोगग्रहादीनां शमनं शान्तिकारकम् ॥
अन्ते कृष्णस्मरणदं भवतापत्रयापहम् ॥ ४७ ॥
असिद्धसाधकं भद्रे जपादिकरमात्मनाम् ॥
कृष्णाय यादवेन्द्राय ज्ञानमुद्राय योगिने ॥ ४८ ॥
नाथाय रुक्मिणीशाय नमो वेदान्तवेदिने ॥
इमं मन्त्रं महादेवि जपन्नेव दिवानिशम् ॥ ४९ ॥
सर्वग्रहानुग्रहभाक्सर्वप्रियतमो भवेत् ॥
पुत्रपौत्रैः परिवृतः सर्वसिद्धिसमृद्धिमान् ॥
निषेव्य भोगानन्तेऽपि कृष्णसायुज्यमाप्नुयात् ॥ ५० ॥

## २८. दशावतारस्तोत्रम्

( वराह, १५ )

गौरमुख उवाच —

स्तोष्ये महेन्द्रं रिपुदर्पहं शिवं नारायणं ब्रह्मविदां वरिष्ठम् ॥
आदित्यचन्द्राश्वियुगस्थमाद्यं पुरातनं दैत्यहरं सदा हरिम् ॥ ९ ॥
चकार मात्स्यं वपुरात्मनो यः पुरातनं वेदविनाशकाले ॥
महामहीभृद्वपुरग्रपुच्छच्छटाहतार्चिः सुरशत्रुहाद्यः ॥ १० ॥
तथाब्धिमन्थानकृते गिरीन्द्रं दधार यः कौर्म्मवपुः पुराणम् ॥
हितेच्छयाप्तः पुरुषः पुराणः प्रपातु मां दैत्यहरः सुरेशः ॥ ११ ॥
महावराहः सततं पृथिव्यास्तलातलं प्राविशद्यो महात्मा ॥
यज्ञाङ्गसंज्ञः सुरसिद्धसंघैः प्रपातु मां दैत्यहरः पुराणः ॥ १२ ॥

नृसिंहरूपी च बभूव योऽसौ युगे युगे योगिवरोऽथ भीमः ॥
करालवक्त्रः कनकाग्रवर्चा वराशयोऽस्मानसुरान्तकोऽव्यात् ॥ १३ ॥
बलेर्मखध्वंसकृदप्रमेयो योगात्मको योगवपुः स्वरूपः ॥
स दण्डकाष्ठाजिनलक्षणः क्षितिं योऽसौ महान्क्रान्तवान्नः पुनातु ॥ १४ ॥
त्रिःसप्तकृत्वो जगतीं जिगाय कृत्वा ददौ कश्यपाय प्रचण्डः ॥
स जामदग्न्योऽभिजनस्य गोप्ता हिरण्यगर्भोऽसुरहा प्रपातु ॥ १५ ॥
चतुष्प्रकारं च वपुर्य आद्यं हैरण्यगर्भप्रतिमानलक्ष्यम् ॥
रामादिरूपैर्बहुरूपभेदं चकार सोऽस्मानसुरान्तकोऽव्यात् ॥ १६ ॥
चाणूरकंसासुरदर्पभीतेर्भीतामराणामभयाय देवः ॥
युगे युगे वासुदेवो बभूव कल्पे भवत्यद्भुतरूपकारी ॥ १७ ॥
युगे युगे कल्किनाम्ना महात्मा वर्णस्थितिं कर्त्तुमनेकरूपः ॥
सनातनो ब्रह्ममयः पुरातनो न यस्य रूपं सुरसिद्धदैत्याः ॥ १८ ॥
पश्यन्ति विज्ञानगतिं विहाय अतो यमेनापि समर्च्चयन्ति ॥
मत्स्यादिरूपाणि चराणि सोऽव्यात् पुनश्च भूयोऽपि नमोनमस्ते ॥ १९ ॥
नमोनमस्ते पुरुषोत्तमाय पुनश्च भूयोऽपि नमोनमस्ते ॥
नमोनमः कारणकारणाय नयस्व मां मुक्तिपदं नमस्ते ॥ २० ॥

## २९. गजेन्द्रमोक्षणे विष्णुस्तवः

( वामन, अ. ८५ )

ॐ नमो मूलप्रकृतये अजिताय महात्मने ॥
अनाश्रिताय देवाय निःस्पृहाय नमोऽस्तु ते ॥ ३२ ॥
नम आद्याय वामाय आर्षायादिप्रवर्त्तिने ॥
अनन्तराय चैकाय अव्यक्ताय नमोनमः ॥ ३३ ॥
नमो गुह्याय गूढाय गुणाय गुणवर्तिने ॥
अतर्क्यायाप्रमेयाय अतुलाय नमोनमः ॥ ३४ ॥
नमः शिवाय शान्ताय निश्चिन्ताय यशस्विने ॥
सनातनाय पूर्वाय पुराणाय नमोनमः ॥ ३५ ॥
नमोऽस्तु तस्मै देवाय निर्गुणाय गुणात्मने ॥
नमो जगत्प्रतिष्ठाय गोविन्दाय नमोनमः ॥ ३६ ॥

नमोऽस्तु पद्मनाभाय सांख्ययोगोद्भवाय च ॥
विश्वेश्वराय देवाय शिवाय हरये नमः ॥ ३७ ॥
नमोऽस्तु तस्मै देवाय निर्गुणाय गुणात्मने ॥
नारायणाय विश्वाय देवाय परमात्मने ॥ ३८ ॥
नमोनमः कारणवामनाय नारायणायामितविक्रमाय ॥
श्रीशाङ्र्गचक्रासिगदाधराय नमोऽस्तु तस्मै पुरुषोत्तमाय ॥ ३९ ॥
गुह्याय वेदनिलयाय महोरगाय सिंहाय दैत्यनिधनाय चतुर्भुजाय ॥
ब्रह्मेन्द्ररुद्रमुनिचारणसंस्तुताय देवोत्तमाय सकलाय नमोऽच्युताय ॥ ४० ॥
नागेन्द्रभोगशयनाय च सुप्रियाय गोक्षीरहेमशुकनीलघनोपमाय ॥
पीताम्बराय मधुकैटभनाशनाय विश्वाद्यचारुमुकुटाय नमोऽक्षराय ॥ ४१ ॥
नाभिप्रजातकमलस्थचतुर्मुखाय क्षीरोदकार्णवनिकेतयशोधराय ॥
नानाविचित्रकनकाङ्गदभूषणाय सर्वेश्वराय वरदाय नमो वराय ॥ ४२ ॥
भक्तिप्रियाय वरदीप्तसुदर्शनाय देवेन्द्रविघ्नशमनोद्यतपौरुषाय ॥
फुल्लारविन्दविमलायतलोचनाय योगेश्वराय वरदाय नमो वराय ॥ ४३ ॥
ब्रह्मायनाय त्रिदशायनाय लोकायनायात्महितायनाय ॥
नारायणायात्मविकाशनाय महावराहाय नमः सुरोऽसि ॥ ४४ ॥
कूटस्थमव्यक्तमचिन्त्यरूपं नारायणं कारणमादिदेवम् ॥
युगान्तशेषं पुरुषं पुरातनं तं देवदेवं शरणं प्रपद्ये ॥ ४५ ॥
योगेश्वरं चारुविचित्रमौलिमज्ञेयमग्र्यं प्रकृतेः परस्थम् ॥
क्षेत्रज्ञमात्मप्रभवं वरेण्यं त वासुदेवं शरणं प्रपद्ये ॥ ४६ ॥
अदृश्यमव्यक्तमचिन्त्यमव्ययं ब्रह्मर्षयो ब्रह्ममयं सनातनम् ॥
वदन्ति यं वै पुरुषं सनातनं तं देवगुह्यं शरणं प्रपद्ये ॥ ४७ ॥
यदक्षरं ब्रह्म वदन्ति सर्वगं निशम्य यं मृत्युमुखात्प्रमुच्यते ॥
तमीश्वरं तृप्तमनुत्तमैर्गुणैः परायणं विष्णुमुपैमि शाश्वतम् ॥ ४८ ॥
कार्यं क्रियाकारणमप्रमेयं हिरण्यनाभं वरपद्मनाभम् ॥
महाबलं देवनिधिं सुरेशं व्रजामि विष्णुं शरणं जनार्दनम् ॥ ४९ ॥
किरीटकेयूरमहार्हनिष्कैर्मण्युत्तमालङ्कृतसर्वगात्रम् ॥
पीताम्बरं काञ्चनभक्तिचित्रं मालाधरं केशवमभ्युपैमि ॥ ५० ॥

तारोद्भवं वेदविदां वरिष्ठं योगात्मनां सांख्यविदां वरिष्ठम् ॥
आदित्यरुद्राश्विवसुप्रभावं प्रभुं प्रपद्येऽच्युतमात्मभूतम् ॥ ५१ ॥
श्रीवत्साङ्कं महादेवं देवगुह्यं मनोरमम् ॥
प्रपद्ये सूक्ष्ममतुलं वरेण्यमभयप्रदम् ॥ ५२ ॥
प्रभवं सर्वभूतानां निर्गुणं परमेश्वरम् ॥
प्रपद्ये मुक्तसङ्गानां यतीनां परमां गतिम् ॥ ५३ ॥
भगवन्तं गुणाध्यक्षमक्षरं पुष्करेक्षणम् ॥
शरण्यं शरणं भक्त्या प्रपद्ये भक्तवत्सलम् ॥ ५४ ॥
त्रिविक्रमं त्रिलोकेशं सर्वेषां प्रपितामहम् ॥
योगात्मानं महात्मानं प्रपद्येऽहं जनार्दनम् ॥ ५५ ॥
आदिदेवमजं शम्भुं व्यक्ताव्यक्तं सनातनम् ॥
नारायणमणीयांसं प्रपद्ये ब्राह्मणप्रियम् ॥ ५६ ॥
नमो हराय देवाय नमः सर्वसहाय च ॥
प्रपद्ये देवदेवेशमणीयांसं तनोः सदा ॥ ५७ ॥
एकाय लोकतत्त्वाय परतः परमात्मने ॥
नमः सहस्रशिरसे अनन्ताय महात्मने ॥ ५८ ॥
त्वमेव शरणं देवमृषयो वेदपारगाः ॥
कीर्तयन्ति च यं सर्वे ब्रह्मादीनां परायणम् ॥ ५९ ॥
नमस्ते पुण्डरीकाक्ष भक्तानामभयप्रद ॥
सुब्रह्मण्य नमस्तेऽस्तु त्राहि मां शरणागतम् ॥ ६० ॥

## ३०. पापप्रशमनस्तवः

( वामन, ८८ )

पुलस्त्य उवाच—

द्वितीय पापशमनं स्तवं वक्ष्यामि ते मुने ॥
येन सम्यगधीतेन पापनाशं तु गच्छति ॥ १ ॥
मत्स्यं नमस्ये देवेशं कूर्मं देवेशमेव च ॥
हयशीर्षं नमस्येऽहं भवं विष्णुं त्रिविक्रमम् ॥ २ ॥
नमस्ये माधवेशानौ हृषीकेशकुमारिलौ ॥
नारायणं नमस्येऽहं नमस्ते गरुडासन ॥ ३ ॥

जयेशं नरसिंहं च रूपधारं कुरुध्वजम् ॥
कामपालमखण्डं च नमस्ये ब्राह्मणप्रियम् ॥ ४ ॥
अजितं विश्वकर्माणं पुण्डरीकं द्विजप्रियम् ॥
हरिं शम्भुं नमस्ये च ब्रह्माणं सप्रजापतिम् ॥ ५ ॥
नमस्ये शूलबाहुं च देवं चक्रधरं तथा ॥
शिवं विष्णुं सुवर्णाक्षं गोपतिं पीतवाससम् ॥ ६ ॥
नमस्ये च गदापाणिं नमस्ये च कुशेशयम् ॥
अर्धनारीश्वरं देवं नमस्ये पापनाशनम् ॥ ७ ॥
गोपालं च सवैकुण्ठं नमस्ये चापधारिणम् ॥
नमस्ये विष्णुरूपं च ज्येष्ठेशं पञ्चमं तथा ॥ ८ ॥
उपशान्तं नमस्येऽहं मार्कण्डेयं सजम्बुकम् ॥
नमस्ये पद्मकिरणं नमस्ये वडवामुखम् ॥ ९ ॥
कार्तिकेयं नमस्येऽहं बाह्लिकं शंखिनं तथा ॥
नमस्ये पद्मकिरणं नमस्ये च कुशेशयम् ॥ १० ॥
नमस्ये स्थाणुमनघं नमस्ये वनमालिनम् ॥
नमस्ये लाङ्गलीशं च नमस्येऽहं श्रियःपतिम् ॥ ११ ॥
नमस्ये च त्रिणयनं नमस्ये हव्यवाहनम् ॥
नमस्ये च त्रिसौपर्णं नमस्ये धरणीधरम् ॥ १२ ॥
त्रिणाचिकेतं ब्रह्माणं नमस्ये शशिभूषणम् ॥
कपर्दिनं नमस्ये च सर्वामयविनाशनम् ॥ १३ ॥
नमस्ये शशिनं सूर्यं ध्रुवं रुद्रं महौजसम् ॥
पद्मनाभं हिरण्याक्षं नमस्ये स्कन्दमव्ययम् ॥ १४ ॥
नमस्येऽहं भीमहंसौ नमस्ये हाटकेश्वरम् ॥
सदा हंसं नमस्ये च नमस्ये प्राणतर्पणम् ॥ १५ ॥
नमस्ये रुक्मकवचं महायोगिनमीश्वरम् ॥
नमस्ये श्रीनिवासं च नमस्ये पुरुषोत्तमम् ॥ १६ ॥
नमस्ये च चतुर्बाहुं नमस्ये च सुधाधिपम् ॥
वनस्पतिं मधुपतिं नमस्ये मनुमव्ययम् ॥ १७ ॥

श्रीकण्ठं वासुदेवं च नीलकण्ठं सदाशिवम् ॥
नमस्ये शर्वमनघं गौरीशं लकुडेश्वरम् ॥ १८ ॥
मनोहरं च कृष्णेशं नमस्ये चक्रपाणिनम् ॥
यशोधनं महाबाहुं नमस्ये च कुशप्रियम् ॥ १९ ॥
भूधरं छादितगदं सुनेत्रं सुरशंसिनम् ॥
भद्राक्षं वीरभद्रं च नमस्ये शङ्कुकर्णिनम् ॥ २० ॥
वृषध्वजं महेश च विश्वमित्रं शशिप्रभम् ॥
उपेन्द्रं च सगोविन्दं नमस्ये पङ्कजप्रियम् ॥ २१ ॥
सहस्रशिरसं देवं नमस्ये कुन्दमालिनम् ॥
कालाग्नि रुद्रदेवेशं नमस्ये कृत्तिवाससम् ॥ २२ ॥
नमस्ये छागलेशं च नमस्ये पङ्कजासनम् ॥
सहस्राक्षं कोकनदं नमस्ये हरिशङ्करम् ॥ २३ ॥
अगस्त्यं गरुडं विष्णुं कपिलं ब्रह्मवाङ्मयम् ॥
सनातनं च ब्रह्माणं नमस्ये ब्रह्मतत्परम् ॥ २४ ॥
अप्रतर्क्यं चतुर्बाहुं सहस्रांशुं तपोमयम् ॥
नमस्ये धर्मराजानं देव गरुडवाहनम् ॥ २५ ॥
सर्वभूतगतं शान्तं निर्मलं सर्वलक्षणम् ॥
महायोगिनमव्यक्तं नमस्ये पापनाशनम् ॥ २६ ॥
निरञ्जनं निराकारं निर्गुणं निलयं पदम् ॥
नमस्ये पापहर्त्तारं शरण्यं शरणं व्रजे ॥ २७ ॥
एतत्पवित्रं परमं पुराणं प्रोक्तं त्वगस्त्येन महर्षिणा च ॥
धन्यं यशस्यं बहुपापनाशनं संकीर्तनात्स्मरणात्स्पर्शनाच्च ॥ २८ ॥

## ३१. विष्णुसहस्रनामस्तोत्रम्

( गरुड, पूर्वखण्ड, आचारकाण्ड, १५ )

[ ॐ अस्य श्रीविष्णुस्तोत्रनामस्तोत्रमन्त्रस्य मार्कण्डेयऋषिः विष्णुर्देवता अनुष्टुप्छन्दः सर्वकामाप्त्यर्थे जपे विनियोगः ॥ अथ ध्यानम् ॥
सजलजलदनीलं दर्शितोदारशीलं करतलधृतशैलं वेणुवाद्ये रसालम् ॥
व्रजजनकुलपालं कामिनीकेलिलोलं तरुणतुलसिमालं नौमि गोपालबालम् ॥]

रुद्र उवाच—संसारसागराद्घोरान्मुच्यते किं जपन्प्रभो । नरस्तन्मे परं जप्यं कथय त्वं जनार्द्दन ॥ १ ॥ हरिरुवाच—परेश्वरं परं ब्रह्म परमात्मानमव्ययम् । विष्णुं नामसहस्रेण स्तुवन्मुक्तो भवेन्नरः ॥ २ ॥ यत्पवित्रं परं जप्यं कथयामि वृषध्वज ! । शृणुष्वावहितो भूत्वा सर्वपापविनाशनम् ॥ ३ ॥ ॐ वासुदेवो महाविष्णुर्वामनो वासवो वसुः । बालचन्द्रनिभो बालो बलभद्रो बलाधिपः ॥ ४ ॥ बलिबन्धनकृद्वेधा (११) वरेण्यो वेदवित्कविः । वेदकर्त्ता वेदरूपो वेद्यो वेदपरिप्लुतः ॥ ५ ॥ वेदाङ्गवेत्ता वेदेशो (२०) बलाधारो बलार्दनः । अविकारो वरेशश्च वरुणो वरुणाधिपः ॥ ६ ॥ वीरहा च बृहद्वीरो वन्दितः परमेश्वरः (३०) । आत्मा च परमात्मा च प्रत्यगात्मा वियत्परः ॥७॥ पद्मनाभः पद्मनिधिः पद्महस्तो गदाधरः । परमः (४०) परभूतश्च पुरुषोत्तम ईश्वरः ॥ ८ ॥ पद्मजङ्घः पुण्डरीकः पद्ममालाधरः प्रियः । पद्माक्षः पद्मगर्भश्च पर्जन्यः (५०) पद्मसंस्थितः ॥ ९ ॥ अपारः परमार्थश्च पराणां च परः प्रभुः । पण्डितः पण्डितेभ्यश्च पवित्रः पापमर्दकः ॥ १० ॥ शुद्धः (६०) प्रकाशरूपश्च पवित्रः परिरक्षकः । पिपासावर्जितः पाद्यः पुरुषः प्रकृतिस्तथा ॥ ११ ॥ प्रधानं पृथिवीपद्मं पद्मनाभः (७०) प्रियप्रदः । सर्वेशः सर्वगः सर्वः सर्ववित्सर्वदः परः ॥ १२ ॥ सर्वश्च जगतो धाम सर्वदर्शी च सर्वभृत् (८०) । सर्वानुग्रहकृद्देवः सर्वभूतहृदि स्थितः ॥ १३ ॥ सर्वपूज्यश्च सर्वाद्यः सर्वदेवनमस्कृतः । सर्वस्य जगतो मूलं सकलो निष्कलोऽनलः (९०) ॥ १४ ॥ सर्वगोप्ता सर्वनिष्ठः सर्वकारणकारणम् । सर्वध्येयः सर्वमित्रः सर्वदेवस्वरूपधृक् ॥ १५ ॥ सर्वाध्यक्षः सुराध्यक्षः सुरासुरनमस्कृतः । दुष्टानां चासुराणां च सर्वदा घातकोऽन्तकः (१०१) ॥ १६ ॥ सत्यपालश्च सन्नाभः सिद्धेशः सिद्धवन्दितः । सिद्धसाध्यः सिद्धसिद्धः साध्यसिद्धो हृदीश्वरः ॥ १७ ॥ शरणं जगतश्चैव (११०) श्रेयः क्षेमस्तथैव च । शुभकृच्छोभनः सौम्यः सत्यः सत्यपराक्रमः ॥ १८ ॥ सत्यस्थः सत्यसङ्कल्पः सत्यवित्सत्य(त्प)दस्तथा (१२१) । धर्मो धर्म्मी च कर्म्मी च सर्वकर्म्मविवर्जितः ॥ १९ ॥ कर्म्मकर्त्ता च कर्मैव क्रियाकार्य्यं तथैव च । श्रीपतिर्नृपतिः (१३१) श्रीमान्सर्वस्य पतिरूर्जितः ॥२०॥ स देवानां पतिश्चैव वृष्णीनां पतिरीडितः । पतिर्हिरण्यगर्भस्य त्रिपुरान्तपतिस्तथा ॥२१॥ पशूनां च पतिः प्रायो वसूनां पतिरेव च (१४०)।

पतिराखण्डलस्यैव वरुणस्य पतिस्तथा ॥ २२ ॥ वनस्पतीनां च पतिरनिलस्य पतिस्तथा । अनलस्य पतिश्चैव यमस्य पतिरेव च ॥ २३ ॥ कुबेरस्य पतिश्चैव नक्षत्राणां पतिस्तथा । ओषधीनां पतिश्चैव वृक्षाणां च पतिस्तथा (१५०) ॥ २४ ॥ नागानां पतिरर्कस्य दक्षस्य पतिरेव च । सुहृदां च पतिश्चैव नृपाणां च पतिस्तथा ॥ २५ ॥ गन्धर्वाणां पतिश्चैव वसूनां पतिरुत्तमः । पर्वतानां पतिश्चैव निम्नगानां पतिस्तथा ॥ २६ ॥ सुराणां च पतिः श्रेष्ठः (१६०) कपिलस्य पतिस्तथा । लतानां च पतिश्चैव वीरुधां च पतिस्तथा ॥ २७ ॥ मुनीनां च पतिश्चैव सूर्य्यस्य पतिरुत्तमः । पतिश्चन्द्रमसः श्रेष्ठः शुक्रस्य पतिरेव च ॥ २८ ॥ ग्रहाणां च पतिश्चैव राक्षसानां पतिस्तथा । किन्नराणां पतिश्चैव (१७०) द्विजानां पतिरुत्तमः ॥ २९ ॥ सरितां च पतिश्चैव समुद्राणां पतिस्तथा । सरसां च पतिश्चैव भूतानां च पतिस्तथा ॥ ३० ॥ वेतालानां पतिश्चैव कूष्माण्डानां पतिस्तथा । पक्षिणां च पतिः श्रेष्ठः पशूनां पतिरेव च ॥ ३१ ॥ महात्मा (१८०) मङ्गलो मेयो मन्दरो मन्दरेश्वरः । मेरुर्माता प्रमाणं च माधवो मलवर्जितः ॥ ३२ ॥ मालाधरो (१९०) महादेवो महादेवेन पूजितः । महाशान्तो महाभागो मधुसूदन एव च ॥ ३३ ॥ महावीर्य्यो महाप्राणो मार्कण्डेयप्रवन्दितः (२००) । मायात्मा मायया बद्धो मायया तु विवर्जितः ॥ ३४ ॥ मुनिस्तुतो मुनिर्मैत्रो (२१०) महाना(रा)सो महाहनुः । महाबाहुर्महादन्तो मरणेन विवर्जितः ॥ ३५ ॥ महावक्त्रो महात्मा च महाकायो महोदरः । महापादो महाग्रीवो महामानी महामनाः ॥ ३६ ॥ महामतिर्महाकीर्त्तिर्महारूपो (२२०) महासुरः । मधुश्च माधवश्चैव महादेवो महेश्वरः ॥ ३७ ॥ मखेष्टो मखरूपी च माननीयो (२३०) मखेश्वरः । महावातो महाभागो महेशोऽतीतमानुषः ॥ ३८ ॥ मानवश्च मनुश्चैव मानवानां प्रियंकरः । मृगश्च मृगपूज्यश्च (२४०) मृगाणां च पतिस्तथा ॥ ३९ ॥ बुधस्य तु पतिश्चैव पतिश्चैव बृहस्पतेः । पतिः शनैश्चरस्यैव राहोः केतोः पतिस्तथा ॥ ४० ॥ लक्ष्मणो लक्षणश्चैव लम्बोष्ठो ललितस्तथा ॥ (२५०) । नानालङ्कारसंयुक्तो नानाचन्दनचर्च्चितः ॥ ४१ ॥ नानारसोज्ज्वलद्वक्त्रो नानापुष्पोपशोभितः । रामो रमापतिश्चैव सभार्य्यः परमेश्वरः ॥ ४२ ॥ रत्नदो रत्नहर्त्ता च (२६०) रूपी रुपविवर्जितः ।

महारूपोग्ररूपश्च सौम्यरूपस्तथैव च ॥ ४३ ॥ नीलमेघनिभः शुद्धः कालमेघनिभस्तथा । धूम्रवर्णः पीतवर्णो नानारूपो (२७०) ह्यवर्णकः ॥ ४४ ॥ विरूपो रूपदश्चैव शुक्लवर्णस्तथैव च । सर्ववर्णो महायोगी यज्ञो (याज्यो) यज्ञकृदेव च ॥ ४५ ॥ सुवर्णवर्णवांश्चैव सुवर्णाख्यस्तथैव च (२८०) । सुवर्णावयवश्चैव सुवर्णः स्वर्णमेखलः ॥ ४६ ॥ सुवर्णस्य प्रदाता च सुवर्णेशस्तथैव च । सुवर्णस्य प्रियश्चैव सुवर्णाढ्यस्तथैव च ॥ ४७ ॥ सुपर्णी च महापर्णः सुपर्णस्य च कारणम् (२९०) । वैनतेयस्तथादित्य आदिरादिकरः शिवः ॥ ४८ ॥ कारणं महतश्चैव प्रधानस्य च कारणम् । बुद्धीनां कारणं चैव कारणं मनसस्तथा ॥ ४९ ॥ कारणं चेतसश्चैव (३००) अहङ्कारस्य कारणम् । भूतानां कारणं तद्वत्कारणं च विभावसोः ॥ ५० ॥ आकाशकारणं तद्वत्पृथिव्याः कारणं परम् । अण्डस्य कारणं चैव प्रकृतेः कारणं तथा ॥ ५१ ॥ देहस्य कारणं चैव चक्षुषश्चैव कारणम् । श्रोत्रस्य कारणं (३१०) तद्वत्कारणं च त्वचस्तथा ॥५२॥ जिह्वायाः कारणं चैव प्राणस्येव च कारणम । हस्तयोः कारणं तद्वत्पादयोः कारणं तथा ॥ ५३ ॥ वाचश्च कारणं तद्वत्पायोश्चैव तु कारणम् । इन्द्रस्य कारणं चैव कुबेरस्य च कारणम् ॥ ५४ ॥ यमस्य कारणं चैव (३२०) ईशानस्य च कारणम् । यक्षाणां कारणं चैव रक्षसां कारणं परम् ॥ ५५ ॥ नृपाणां कारणं श्रेष्ठं धर्मस्यैव तु कारणम् । जन्तूनां कारणं चैव वसूनां कारणं परम् ॥ ५६ ॥ मनूनां कारणं चैव पक्षिणां कारणं परम् । मुनीनां कारणं श्रेष्ठं (३३०) योगिनां कारणं परम् ॥ ५७ ॥ सिद्धानां कारणं चैव यक्षाणां कारणं परम् । कारणं किन्नराणां च गन्धर्वाणां च कारणम् ॥ ५८ ॥ नदानां कारणं चैव नदीनां कारणं परम् । कारणं च समुद्राणां वृक्षाणां कारणं तथा ॥ ५९ ॥ कारणं वीरुधां चैव (३४०) लोकानां कारणं तथा । पातालकारणं चैव देवानां कारणं तथा ॥ ६० ॥ सर्पाणां कारणं चैव श्रेयसां कारणं तथा । पशूनां कारणं चैव सर्वेषां कारणं तथा ॥ ६१ ॥ देहात्मा चेन्द्रियात्मा च आत्मा (३५०) बुद्धिस्तथैव च । मनसश्च तथैवात्मा चात्माहङ्कारचेतसः ॥ ६२ ॥ जाग्रतः स्वपतश्चात्मा (३६०) महदात्मा परस्तथा । प्रधानस्य परात्मा च आकाशात्मा ह्यपां तथा ॥ ६३ ॥ पृथिव्याः परमात्मा च रसस्यात्मा तथैव च ।

गन्धस्य परमात्मा च रूपस्यात्मा परस्तथा ॥ ६४ ॥ शब्दात्मा चैव (३७०) वागात्मा स्पर्शात्मा पुरुषस्तथा । श्रोत्रात्मा च त्वगात्मा च जिह्वायाः परमस्तथा ॥ ६५ ॥ घ्राणात्मा चैव हस्तात्मा पादात्मा परमस्तथा (३८०) । उपस्थस्य तथैवात्मा पाय्वात्मा परमस्तथा ॥ ६६ ॥ इन्द्रात्मा चैव ब्रह्मात्मा रुद्रा(शान्ता)त्मा च मनोस्तथा । दक्षप्रजापतेरात्मा सत्या( स्रष्टा )त्मा परमस्तथा ॥ ६७ ॥ ईशात्मा (३९०) परमात्मा च रौद्रात्मा मोक्षविद्यतिः । यत्नवांश्च तथा यत्नश्चर्म्मी खड्गयसुरान्तकः ॥ ६८ ॥ ह्रीप्रवर्त्तनशीलश्च यतीनां च हिते रतः । यतिरूपी च (४००) योगी च योगिध्येयो हरिः शितिः ॥ ६९ ॥ संविन्मेधा च कालश्च ऊष्मा वर्षा म(न)तिस्तथा (४१०) । संवत्सरो मोक्षकरो मोहप्रध्वंसकस्तथा ॥७०॥ मोहकर्त्ता च दुष्टानां माण्डव्यो वडवामुखः । संवर्त्तकः कालकर्त्ता गौतमो भृगुरंगिराः (४२०) ॥ ७१ ॥ अत्रिर्वसिष्ठः पुलहः पुलस्त्यः कुत्स एव च । याज्ञवल्क्यो देवलश्च व्यासश्चैव पराशरः ॥७२॥ शर्म्मदश्चैव (४३०) गाङ्गेयो हृषीकेशो बृहच्छ्रवाः । केशवः क्लेशहन्ता च सुकर्णः कर्णवर्जितः ॥ ७३ ॥ नारायणो महाभागः प्राणस्य पतिरेव च (४४०) । अपानस्य पतिश्चैव व्यानस्य पतिरेव च ॥ ७४ ॥ उदानस्य पतिः श्रेष्ठः समानस्य पतिस्तथा । शब्दस्य च पतिः श्रेष्ठः स्पर्शस्य पतिरेव च ॥ ७५ ॥ रूपाणां च पतिश्चाद्यः खड्गपाणिर्हलायुधः (४५०) । चक्रपाणिः कुण्डली च श्रीवत्साङ्कस्तथैव च ॥ ७६ ॥ प्रकृतिः कौस्तुभग्रीवः पीताम्बरधरस्तथा । सुमुखो दुर्मुखश्चैव मुखेन तु विवर्जितः ॥ ७७ ॥ अनन्तोऽनन्तरूपश्च (४६१) सुनखः सुरमन्दरः । सुकपोलो विभुर्जिष्णुर्भ्राजिष्णुश्चेषुधीस्तथा ॥७८॥ हिरण्यकशिपोर्हन्ता हिरण्याक्षविमर्दकः (४७०) । निहन्ता पूतनायाश्च भास्करान्तविनाशनः ॥ ७९ ॥ केशिनो दलनश्चैव मुष्टिकस्य विमर्दकः । कंसदानवभेत्ता च चाणूरस्य प्रमर्दकः ॥८०॥ अरिष्टस्य निहन्ता च अक्रूरप्रिय एव च । अक्रूरः क्रूररूपश्च (४८०) अक्रूरप्रियवन्दितः ॥८१॥ भगहा भगवान् भानुस्तथा भागवतः स्वयम् । उद्धवश्चोद्धवस्येशो ह्युद्धवेन विचिन्तितः ॥८२॥ चक्रधृक् चञ्चलश्चैव (४९०) चलाचलविवर्जितः । अहङ्कारो मतिश्चित्तं गगनं पृथिवी जलम् ॥ ८३ ॥ वायुश्चक्षुस्तथा श्रोत्रं (५००) जिह्वा च घ्राणमेव च । वाक्पाणिपादजवनः पायूपस्थस्तथैव च ॥ ८४ ॥ शङ्करश्चैव खर्वश्च क्षान्तिदः क्षान्तिकृन्नरः (५११) । भक्तप्रियस्तथा भर्त्ता

भक्तिमान् भक्तिवर्द्धनः ॥ ८५ ॥ भक्तस्तुतो भक्तपरः कीर्त्तिदः कीर्त्तिवर्द्धनः । कीर्त्तिर्दीप्तिः (५२०) क्षमा कान्तिर्भक्तिश्चैव (५३०) दया परा ॥ ८६ ॥ दानं दाता च कर्त्ता च देवदेवप्रियः शुचिः । शुचिमान्सुखदो (५३०) मोक्षः कामश्चार्थः सहस्रपात् ॥ ८७ ॥ सहस्रशीर्षा वैद्यश्च मोक्षद्वारं तथैव च । प्रजाद्वारं सहस्राक्षः सहस्रकर एव च (५४०) ॥ ८८ ॥ शुक्रश्च सुकिरीटी च सुग्रीवः कौस्तुभस्तथा । प्रद्युम्नश्चानिरुद्धश्च हयग्रीवश्च सूकरः ॥ ८९ ॥ मत्स्यः परशुरामश्व (५५०) प्रह्लादो बलिरेव च । शरण्यश्चैव नित्यश्च बुद्धो मुक्तः शरीरभृत् ॥ ९० ॥ खरदूषणहन्ता च रावणस्य प्रमर्दनः । सीतापतिश्च (५६०) वर्द्धिष्णुर्भरतश्च तथैव च ॥ ९१ ॥ कुम्भेन्द्रजिन्निहन्ता च कुम्भकर्णप्रमर्दनः । नरान्तकान्तकश्चैव देवान्तकविनाशनः ॥९२॥ दुष्टासुरनिहन्ता च शम्बरारिस्तथैव च । नरकस्य निहन्ता च त्रिशीर्षस्य विनाशनः (५७०) ॥ ९३ ॥ यमलार्जुनभेत्ता च तपो हितकरस्तथा । वादित्रं चैव वाद्यं च बुद्धश्चैव वरप्रदः ॥ ९४ ॥ सारः सारप्रियः सौरः कालहन्तृनिकृन्तनः (५८०) । अगस्त्यो देवलश्चैव नारदो नारदप्रियः ॥९५॥ प्राणोऽपानस्तथा व्यानो रजः सत्त्वं तमः (५९०) शरत । उदानश्च समानश्च भेषजं च भिषक् तथा ॥९६॥ कूटस्थः स्वच्छरूपश्च सर्वदेहविवर्जितः । चक्षुरिन्द्रियहीनश्च वागिन्द्रियविवर्जितः (६००) ॥ ९७ ॥ हस्तेन्द्रियविहीनश्च पादाभ्यां च विवर्जितः । पायूपस्थविहीनश्च मरुतापविवर्जितः ॥ ९८ ॥ प्रबोधेन विहीनश्च बुद्धया चैव विवर्जितः । चेतसा विगतश्चैव प्राणेन च विवर्जितः ॥ ९९ ॥ अपानेन विहीनश्च व्यानेन च विवर्जितः (६१०) । उदानेन विहीनश्च समानेन विवर्जितः ॥ १०० ॥ आकाशेन विहीनश्च वायुना परिवर्जितः । अग्निना च विहीनश्च उदकेन विवर्जितः ॥ १०१ ॥ पृथिव्या च विहीनश्च शब्देन च विवर्जितः । स्पर्शेन च विहीनश्च सर्वरूपविवर्जितः । (६२०) ॥ १०२ ॥ रागेण विगतश्चैव अघेन परिवर्जितः । शोकेन रहितश्चैव वचसा परिवर्जितः ॥ १०३ ॥ रजोविवर्जितश्चैव विकारैः षड्भिरेव च । कामेन वर्जितश्चैव क्रोधेन परिवर्जितः ॥ १०४ ॥ लोभेन विगतश्चैव दम्भेन च विवर्जितः । सूक्ष्मश्चैव (६३०) सुसूक्ष्मश्च स्थूलात्स्थूलतरस्तथा ॥१०५॥ विशारदो बलाध्यक्षः सर्वस्य क्षोभकस्तथा । प्रकृतेः क्षोभकश्चैव महतः क्षोभकस्तथा ॥ १०६ ॥ भूतानां क्षोभकश्चैव बुद्धेश्च क्षोभकस्तथा । इन्द्रियाणां

क्षोभकश्चैव (६४०) विषयक्षोभकस्तथा ।।१०७।। ब्रह्मणः क्षोभकश्चैव रुद्रस्य क्षोभकस्तथा । अगम्यश्चक्षुरादेश्च श्रोत्रागम्यस्तथैव च ।। १०८ ।। त्वचा न गम्यः कूर्मश्च जिह्वाऽग्राह्यस्तथैव च । घ्राणेन्द्रियागम्य एव वाचाऽग्राह्यस्तथैव च (६५०) ।। १०९ ।। अगम्यश्चैव पाणिभ्यां पादागम्यस्तथैव च । अग्राह्यो मनसश्चैव बुद्धया ग्राह्यो हरिस्तथा ।। ११० ।। अहं बुद्धया तथा ग्राह्यश्चेतसा ग्राह्य एव च । शङ्खपाणिश्चाव्ययश्च गदापाणिस्तथैव च (६६०) ।। १११ ।। शार्ङ्गपाणिश्च कृष्णश्च ज्ञानमूर्त्तिः परन्तपः । तपस्वी ज्ञानगम्यो हि ज्ञानी ज्ञानविदेव च ।। ११२ ।। ज्ञेयश्च ज्ञेयहीनश्च (६७०) ज्ञप्तिश्चैतन्यरूपकः । भावो भाव्यो भवकरो भावनो भवनाशनः ।। ११३ ।। गोविन्दो गोपतिर्गोपः (६८०) सर्वगोपीसुखप्रदः । गोपालो गोपतिश्चैव गोमतिर्गोधरस्तथा ।। ११४ ।। उपेन्द्रश्च नृसिंहश्च शौरिश्चैव जनार्दनः । आरणेयो (६९०) बृहद्भानुर्बृहद्दीप्तिस्तथैव च ।।११५।। दामोदरस्त्रिकालश्च कालज्ञः कालवर्जितः । त्रिसन्ध्यो द्वापरं त्रेता प्रजाद्वारं (७००) त्रिविक्रमः ।। ११६ ।। विक्रमो दण्डहस्तश्च ह्येकदण्डी त्रिदण्डधृक् । सामभेदस्तथोपायः सामरूपी च सामगः ।।११७।। सामवेदो (७१०) ह्यथर्वश्च सुकृतः सुतरूपणः । अथर्ववेदविच्चैव ह्यथर्वाचार्य्य एव च ।।११८।। ऋग्रूपो चैव ऋग्वेद ऋग्वेदेषु प्रतिष्ठितः । यजुर्वेत्ता यजुर्वेदो (७२०) यजुर्वेदविदेकपात् ।। ११९ ।। बहुपाच्च सुपाच्चैव तथैव च सहस्रपात् । चतुष्पाच्च द्विपाच्चैव स्मृतिर्न्यायोपमो बली (७३०) ।। १२० ।। संन्यासी चैव संन्यासश्चतुराश्रम एव च । ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।। १२१ ।। ब्राह्मणः क्षत्रियो वैश्यः (७४०) शूद्रो वर्णस्तथैव च । शीलदः शीलसम्पन्नो दुःशीलपरिवर्जितः ।।१२२।। मोक्षोऽध्यात्मसमाविष्टः स्तुतिः स्तोता च पूजकः । पूज्यो (७५०) वाक् करणं चैव वाच्यश्चैव तु वाचकः ।।१२३।। वेत्ता व्याकरणं चैव वाक्यं चैव च वाक्यवित् । वाक्यगम्यस्तीर्थवासी (७६०) तीर्थस्तीर्थी च तीर्थवित् ।।१२४।। तीर्थादिभूतः सांख्यश्च निरुक्तं त्वधिदैवतम् । प्रणवः प्रणवेशश्च प्रणवेन प्रवन्दितः (७७०) ।। १२५ ।। प्रणवेन च लक्ष्यो वै गायत्री च गदाधरः । शालग्रामनिवासी च (७८०) शालग्रामस्तथैव च ।।१२६।। जलशायी योगशायी शेषशायी कुशेशयः । महीभर्त्ता च (७९०) कार्य्यं च कारणं पृथिवीधरः ।। १२७ ।। प्रजापतिः शाश्वतश्च काम्यः कामयिता विराट् । सम्राट् पूषा (८००) तथा स्वर्गो

रथस्थः सारथिर्बलम् ॥ १२८ ॥ धनी धनप्रदो धन्यो यादवानां हिते रतः । अर्जुनस्य प्रियश्चैव ह्यर्जुनो (८१०) भीम एव च ॥१२९॥ पराक्रमो दुर्विषहः सर्वशास्त्रविशारदः । सारस्वतो महाभीष्मः पारिजातहरस्तथा ॥ १३० ॥ अमृतस्य प्रदाता च क्षीरोदः क्षीर एव च । इन्द्रात्मजस्तस्य गोप्ता गोवर्द्धनधरस्तथा ॥ १३१ ॥ कंसस्य नाशनस्तद्वद्धस्तिपो हस्तिनाशनः । शिपिविष्टः प्रसन्नश्च सर्वलोकार्त्तिनाशनः ॥ १३२ ॥ मुद्रो (८३०) मुद्राकरश्चैव सर्वमुद्राविवर्जितः । देही देहस्थितश्चैव देहस्य च नियामकः ॥ १३३ ॥ श्रोता श्रोत्रनियन्ता च श्रोतव्यः श्रवणं तथा । त्वक्स्थितश्च (८४०) स्पर्शयिता स्पृश्यं च स्पर्शनं तथा ॥१३४॥ रूपद्रष्टा च चक्षुःस्थो नियन्ता चक्षुषस्तथा । दृश्यं चैव तु जिह्वास्थो रसज्ञश्च नियामकः (८५०) ॥ १३५ ॥ घ्राणस्थो घ्राणकृद् घ्राता घ्राणेन्द्रियनियामकः । वाक्स्थो वक्ता च वक्तव्यो वचनं वाङ्नियामकः ॥ १३६ ॥ प्राणिस्थः (८६०) शिल्पकृच्छिल्पो हस्तयोश्च नियामकः । पदव्यश्चैव गन्ता च गन्तव्यं गमनं तथा ॥ १३७ ॥ नियन्ता पादयोश्चैव पाद्यभाक्च विसर्गकृत् (८७०) । विसर्गस्य नियन्ता च ह्युपस्थस्थः सुखं तथा ॥१३८॥ उपस्थस्य नियन्ता च तदानन्दकरश्च ह । शत्रुघ्नः कार्त्तवीर्यश्च दत्तात्रेयस्तथैव च ॥१३९॥ अलर्कस्य हितश्चैव कर्तवीर्यनिकृन्तनः (८८०) । कालनेमिर्महानेमिर्मेघो मेघपतिस्तथा ॥१४०॥ अन्नप्रदोऽन्नरूपी च ह्यन्नादोऽन्नप्रवर्तकः । धूमकृद्धूमरूपश्च (८९०) देवकीपुत्र उत्तमः ॥ १४१ ॥ देवक्यानन्दनो नन्दो रोहिण्याः प्रिय एव च । वसुदेवप्रियश्चैव वसुदेवसुतस्तथा ॥१४२॥ दुन्दुभिर्हासरूपश्च पुष्पहासस्तथैव च (९००) । अट्टहासप्रियश्चैव सर्वाध्यक्षः क्षरोऽक्षरः ॥१४३॥ अच्युतश्चैव सत्येशः सत्यायाश्च प्रियो वरः । रुक्मिण्याश्च पतिश्चैव रुक्मिण्या वल्लभस्तता ॥१४४॥ गोपीनां वल्लभश्चैव (९१०) पुण्यश्लोकश्च विश्रुतः । वृषाकपिर्यमो गुह्यो मङ्गलश्च बुधस्तथा ॥१४५॥ राहुः केतुर्ग्रहो ग्राहो (९२०) गजेन्द्रमुखमेलकः । ग्राहस्य विनिहन्ता च ग्रामणी रक्षकस्तथा ॥१४८॥ किन्नरश्चैव सिद्धश्च छन्दःस्वच्छन्द एव च । विश्वरूपो विशालाक्षो (९३०) दैत्यसूदन एव च ॥१४७॥ अनन्तरूपो भूतस्थो देवदानवसंस्थितः । सुषुप्तिस्थः सुषुप्तिश्च स्थानं स्थानान्त एव च ॥१४८॥ जगत्स्थश्चैव जागर्त्ता स्थानं जागरितं तथा (९४०) । स्वप्नस्थः स्वप्नवित्स्वप्नस्थानं स्वप्नस्तथैव च ॥१४९॥ जाग्रत्स्वप्नसुषुप्तैश्च विहीनो वै चतुर्थकः ।

विज्ञानं वेद्यरूपं च जीवो जीवयिता तथा (९५०) ॥ १५० ॥ भुवनाधिपति-
श्चैव भुवनानां नियामकः । पातालवासी पातालं सर्वज्वरविनाशनः ॥१५१॥
परमानन्दरूपी च धर्म्माणां च प्रवर्त्तकः । सुलभो दुर्लभश्चैव प्राणायामपर-
स्तथा (९६०) ॥ १५२ ॥ प्रत्याहारो धारकश्च प्रत्याहारकरस्तथा । प्रभा
कान्तिस्तथा ह्यर्चिः शुद्धः स्फटिकसन्निभः ॥१५३॥ अग्राह्यश्चैव गौरश्च सर्वः
(९७०) शुचिरभिष्टुतः । वषट्कारो वषड् वौषट् स्वधा स्वाहा रतिस्तथा
॥१५४॥ पक्ता नन्दयिता (९८०) भोक्ता बोद्धा भावयिता तथा । ज्ञानात्मा
चैव ऊहात्मा भूमा सर्वेश्वरेश्वरः ॥१५५॥ नदी नन्दी च नन्दीशो (९९०)
भारतस्तरुनाशनः । चक्रपः श्रीपतिश्चैव नृपाणां चक्रवर्त्तिनाम् ॥ १५६ ॥
ईशश्च सर्वदेवानां द्वारकासंस्थितस्तथा । पुष्करः पुष्कराध्यक्षः पुष्करद्वीप एव
च (१०००) ॥१५७॥ भरतो जनको जन्यः सर्वाकारविवर्जितः । निराकारो
निर्निमित्तो निरातङ्को निराश्रयः (१००८) ॥ १५८ ॥ इति नामसहस्रं ते
वृषभध्वज कीर्त्तितम् । देवस्य विष्णोरीशस्य सर्वपापविनाशनम् ॥ १५९ ॥
पठन्द्विजश्च विष्णुत्वं क्षत्त्रियो जयमाप्नुयात । वैश्यो धनं सुखं शूद्रो
विष्णुभक्तिसमन्वितः ॥ १६० ॥

## ३२. रुद्रस्तवः

( कूर्म, उत्तरार्द्ध, ५ )

मुनय ऊचुः—

त्वामेकमीशं पुरुषं पुराणं प्राणेश्वरं रुद्रमनन्तयोगम् ॥
नमाम सर्वे हृदि सन्निविष्टं प्रचेतसं ब्रह्ममयं पवित्रम् ॥ २१ ॥
पश्यन्ति त्वां मुनयो ब्रह्मयोनिं दान्ताः शान्ता निर्मलं रुक्मवर्णम् ॥
ध्यात्वात्मस्थमचलं स्वे शरीरे कविं परेभ्यः परमं परञ्च ॥ २२ ॥
त्वत्तः प्रसूता जगतः प्रसूतिः सर्वानुभूस्त्वं परमाणुभूतः ॥
अणोरणीयान्महतो महीयांस्त्वामेव सर्वं प्रवदन्ति सन्तः ॥ २३ ॥
हिरण्यगर्भो जगदन्तरात्मा त्वत्तोऽस्ति जातः पुरुषः पुराणः ॥
सञ्जायमानो भवता निसृष्टो यथाविधानं सकलं स सद्यः ॥ २४ ॥
त्वत्तो वेदाः सकलाः संप्रसूतास्त्वय्येवान्ते संस्थितिं ते लभन्ते ॥
पश्यामस्त्वां जगतो हेतुभूतं नृत्यन्तं स्वे हृदये सन्निविष्टम् ॥ २५ ॥

त्वय्येवेदं भ्राम्यते ब्रह्मचक्रं मायावी त्वं जगतामेकनाथः ॥
नमामस्त्वां शरणं संप्रपन्ना योगात्मानं रुद्रमनन्तशक्तिम् ॥ २६ ॥

पश्यामस्त्वां परमाकाशमध्ये नृत्यन्तं ते महिमानं स्मरामः ॥
सर्वात्मानं बहुधा सन्निविष्टं ब्रह्मानन्दं चानुभूयानुभूय ॥ २७ ॥

ओङ्कारस्ते वाचको मुक्तिबीजं त्वमक्षरं प्रकृतौ गूढरूपम् ॥
तत्त्वां सत्यं प्रवदन्तीह सन्तः स्वयं प्रभं भवतो यत्प्रभावम् ॥ २८ ॥

स्तुवन्ति त्वां सततं सर्ववेदा नमन्ति त्वामृषयः क्षीणदोषाः ॥
शान्तात्मानः सत्यसन्धं वरिष्ठं विशन्ति त्वां यतयो ब्रह्मनिष्ठाः ॥२९॥

भुवो नाशो नादिमान्विश्वरूपो ब्रह्मा विष्णुः परमेष्ठी वरिष्ठः ॥
स्वात्मानन्दमनुभूयाविशन्ते स्वयं ज्योतिरचला नित्यमुक्ताः ॥३०॥

एको रुद्रस्त्वं करोषीह विश्वं त्वं पालयस्यखिलं विश्वरूपम् ॥
त्वामेवान्ते निलयं विन्दतीदं नमामस्त्वां शरणं संप्रपन्नाः ॥ ३१ ॥

एको वेदो बहुशाखो ह्यनन्तस्त्वामेवैकं बोधयत्येकरूपम् ॥
वन्द्यं त्वां ये शरणं संप्रपन्ना मायामेतां ते तरन्तीह विप्राः ॥ ३२ ॥

त्वामेकमाहुः कविमेकरुद्रं ब्रह्मं गृणन्तं हरिमग्निमीशम् ॥
रुद्रं नित्यमनिलं चेकितानं धातारमादित्यमनेकरूपम् ॥ ३३ ॥

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ॥
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषोत्तमोऽसि ॥ ३४ ॥

त्वमेव विष्णुश्चतुराननस्त्वं त्वमेव रुद्रो भगवानधीशः ॥
त्वं विश्वनाथः प्रकृतिः प्रतिष्ठा सर्वेश्वरस्त्वं परमेश्वरोऽसि ॥ ३५ ॥

त्वामेकमाहुः पुरुषं पुराणमादित्यवर्णं तमसः परस्तात् ॥
चिन्मात्रमव्यक्तमनन्तरूपं खं ब्रह्म शून्यं प्रकृतिर्गुणाश्च ॥ ३६ ॥

यदन्तरा सर्वमिदं विभाति यदव्ययं निर्मलमेकरूपम् ॥
किमप्यचिन्त्यं तव रूपमेतत्तदन्तरा यत्प्रतिभाति तत्त्वम् ॥ ३७ ॥

योगेश्वरं भद्रमनन्तशक्ति परायणं ब्रह्मतनुं पुराणम् ॥
नमाम सर्वे शरणार्थिनस्त्वां प्रसीद भूताधिपते महेश ॥ ३८ ॥

त्वत्पादपद्मस्मरणादशेषसंसारबीजं निलयं प्रयाति ।।
मनो नियम्य प्रणिधाय कायं प्रसादयामो वयमेकमीशम् ।। ३९ ।।
नमो भवायाथ भवोद्भवाय कालाय सर्वाय हराय तुभ्यम् ।।
नमोऽस्तु रुद्राय कपर्दिने ते नमोऽग्नये देव नमः शिवाय ।। ४० ।।

## ३३. शिवस्तवः

### ( कूर्म, पूर्वार्ध, ३३ )

शंकुकर्ण उवाच—

नमामि नित्यं परतः परस्ताद्गोप्तारमेकं पुरुषं पुराणम् ।।
व्रजामि योगेश्वरमीशितारमादित्यमग्निं कलिलाधिरूढम् ।। ३६ ।।
त्वां ब्रह्मपारं हृदि सन्निविष्टं हिरण्मयं योगिनमादिहीनम् ।।
व्रजामि रुद्रं शरणं दिविस्थं महामुनिं ब्रह्मपरं पवित्रम् ।। ३७ ।।
सहस्रपादाक्षिशिरोऽभियुक्तं सहस्रबाहुं तमसः परस्तात् ।।
त्वां ब्रह्मपारं प्रणमामि शम्भुं हिरण्यगर्भाधिपतिं त्रिनेत्रम् ।। ३८ ।।
यतः प्रसूतिर्जगतो विनाशो येनाहृतं सर्वमिदं शिवेन ।।
तं ब्रह्मपारं भगवन्तमीशं प्रणम्य नित्यं शरणं प्रपद्ये ।। ३९ ।।
अलिङ्गमालोकविहीनरूपं स्वयं प्रभुं चित्प्रतिमैकरुद्रम ।।
तं ब्रह्मपार परमेश्वरं त्वां नमस्करिष्ये न यतोऽन्यदस्ति ।। ४० ।।
यं योगिनस्त्यक्तसबीजयोगाल्लब्ध्वा समाधिं परमात्मभूताः ।।
पश्यन्ति देवं प्रणतोऽस्मि नित्यं तद्ब्रह्मपारं भवतः स्वरूपम् ।।४१।।
न यत्र नामानि विशेषक्लृप्तिर्न संदृशे तिष्ठति यत्स्वरूपम् ।।
तं ब्रह्मपारं प्रणतोऽस्मि नित्यं स्वयंभुवं त्वां शरणं प्रपद्ये ।। ४२ ।।
यद्वेदवेदाभिरता विदेहं स ब्रह्मविज्ञानमभेदमेकम ।।
पश्यन्त्यनेकं भवतः स्वरूपं तद्ब्रह्मपारं प्रणमामि नित्यम् ।। ४३ ।।
यतः प्रधानं पुरुषः पुराणो विवर्त्तते यं प्रणमन्ति देवाः ।।
नमामि तं ज्योतिषि संनिविष्टं कालं बृहन्तं भवतः स्वरूपम् ।। ४४ ।।
व्रजामि नित्यं शरणं महेशं स्थाणुं प्रपद्ये गिरिशं पुराणम् ।।
शिवं प्रपद्ये हरमिन्दुमौलिं पिनाकिनं त्वां शरणं व्रजामि ।। ४५ ।।

# ३४. शङ्करस्तोत्रम्

( पद्म, सृष्टिखण्ड, २८ )

श्रीरामोवाच —

कृत्स्नस्य योऽस्य जगतः सचराचरस्य कर्ता कृतस्य च तथा सुखदुःखहेतुः ।।
संहारहेतुरपि यः पुनरन्तकाले तं शकरं शरणदं शरणं व्रजामि ।। १५७ ।।
यं योगिनो विगतमोहतमोरजस्का भक्त्यैकतानमनसो विनिवृत्तकामाः ।।
ध्यायन्ति निश्चलधियोऽमितदिव्यभावं तं शंकरं शरणदं शरणं व्रजामि ।।
यश्चेन्दुखण्डममलं विलसन्मयूखं बद्ध्वा सदा प्रियतमां शिरसा बिभर्ति ।।
यश्चार्धदेहमददाद्गिरिराजपुत्र्यै तं शंकरं शरणदं शरणं व्रजामि ।। १५९ ।।
योऽयं सकृद्विमलचारुविलोलतोयां गङ्गां महोर्मिविषमां गगनात्पतन्तीम् ।।
मूर्ध्नाऽऽददे स्रजमिव प्रतिलोलपुष्पां तं शंकरं शरणदं शरणं व्रजामि ।।१६०।।
कैलासशैलशिखरं प्रति कम्प्यमानं कैलासशृङ्गसदृशेन दशाननेन ।।
यः पादपद्मपरिवादनमादधानस्त शंकरं शरणदं शरणं व्रजामि ।।१६१।।
येनासकृद्दितिसुताः समरे निरस्ता विद्याधरोरगगणाश्च वरैः समग्राः ।।
संयोजिता मुनिवराः फलमूलभक्षास्तं शंकरं शरणदं शरणं व्रजामि ।।१६२।।
दग्ध्वाऽध्वरं च नयने च तथा भगस्य पूष्णस्तथा दशनपंक्तिमपातयच्च ।।
तस्तम्भ यः कुलिशयुक्तमहेन्द्रहस्तं तं शंकरं शरणदं शरणं व्रजामि ।।१६३।।
एनस्कृतोऽपि विषयेष्वपि सक्तभावा ज्ञानान्वयश्रुतगुणैरपि नैव युक्ताः ।।
यं संश्रिताः सुखभुजः पुरुषा भवन्ति तं शंकरं शरणद शरणं व्रजामि ।।१६४।।
अत्रिप्रसूतिरविकोटिसमानतेजाः संत्रासनं विबुधदानवसत्तमानाम् ।।
यः कालकूटमपिबत्समुदीर्णवेगं तं शंकरं शरणदं शरणं व्रजामि ।। १६५ ।।
ब्रह्मेन्द्ररुद्रमरुतां च सषण्मुखानां योऽदाद्वरांश्च बहुशो भगवान्महेशः ।।
नन्दिं च मृत्युवदनात्पुनरुज्जहार तं शंकरं शरणदं शरणं व्रजामि ।। १६६ ।।
आराधितः सुतपसा हिमवन्निकुञ्जे धूम्रव्रतेन मनसाऽपि परैरगम्यः ।।
संजीविनीं समददाद्भृगवे महात्मा तं शंकरं शरणदं शरणं व्रजामि ।। १६७ ।।
नानाविधैर्गजबिडालसमानवक्त्रैर्दक्षाध्वरप्रमथनैर्बलिभिर्गणौघैः ।।
योऽभ्यर्च्यतेऽमरगणैश्च सलोकपालैस्तं शंकरं शरणदं शरणं व्रजामि ।।१६८।।

क्रीडार्थमेव भगवान्भुवनानि सप्त नानानदीविहगपादपमण्डितानि ॥
सब्रह्मकानि व्यसृजत्सुकृताहितानि त शंकरं शरणदं शरणं व्रजामि ॥१६९॥
यस्याखिलं जगदिदं वशवर्ति नित्यं योऽष्टाभिरेव तनुभिर्भुवनानि भुङ्क्ते ॥
यः कारणं सुमहतामपि कारणानां तं शंकरं शरणदं शरणं व्रजामि ॥१७०॥
शङ्खेन्दुकुन्दधवलं वृषभप्रवीरमारुह्य यः क्षितिधरेन्द्रसुतानुयातः ॥
यात्यम्बरे हिमविभूतिविभूषिताङ्गस्तं शंकरं शरणदं शरणं व्रजामि ॥१७१॥
शान्तं मुनिं यमनियोगपरायणं तैर्भीमैर्यमस्य पुरुषैः प्रतिनीयमानम् ॥
भक्त्या न तं स्तुतिपरं प्रसभं ररक्ष तं शंकरं शरणदं शरणं व्रजामि ॥१७२॥
यः सव्यपाणिकमलाग्रनखेन देवस्तत्पञ्चमं प्रसभमेव पुरः सुराणाम् ॥
ब्राह्मं शिरस्तरुणपद्मनिभं चकर्त तं शंकरं शरणदं शरणं व्रजामि ॥१७३॥
यस्य प्रणम्य चरणौ वरदस्य भक्त्या स्तुत्वा च वाग्भिरमलाभिरतन्द्रिताभिः ॥
दीप्तैस्तमांसि नुदते स्वकरैर्विवस्वांस्तं शंकरं शरणदं शरणं व्रजामि ॥१७४॥
ये त्वां सुरोत्तमगुरुं पुरुषा विमूढा जायन्ति नास्य जगतः सचराचरस्य ॥
ऐश्वर्यमाननिगमानुशयेन पश्चात्ते यातनां त्वनुभवन्त्यविशुद्धचित्ताः ॥१७५॥

## ३५. शिवस्तोत्रम्

( पद्म, सृष्टिखण्ड, ४३ )

अन्धक उवाच—

नमोऽस्तु शंभो भवनाशहेतो नमोऽस्तु ते देववर प्रसीद ॥
त्वं भूजलाग्नीरनभोऽर्कसोमयज्वाष्टमूर्तिर्भवभावनोऽलम् ॥८९॥

त्वां वै बाणो बाहुवाद्येन तोष्य प्राप्तश्चैश्यं स्वे पुरे त्वत्सुरक्ष्यम् ॥
रक्षोऽधीशो बाहुभिस्तोल्य शैलं युष्मत्कान्तक्लिष्टरूपो ह्यनीषीत् ॥९०॥
प्राप्तोऽप्यैश्यं सर्वरक्षोगणानां पुत्रं चापि प्रोर्जितं शक्रबन्धम् ॥ ९१ ॥

भवभयहर हर परम उदार मम सुखकरण निखिलसुरसार ॥
जितमरुदभिमतवितरणपार तव पदकमलमिहारणमार ॥ ९२ ॥

तवेश पादपङ्कजं करोति यो नरो हृदि
स देश तस्य वाञ्छितं ददासि भक्तिभावितः ॥

मुनीश्वराः पुरा हरं भवन्तमेवमादरा-
त्प्रपूज्य लिङ्गरूपिणं समापिता मनोरथान् ॥ ९३ ॥
भवोद्भवैकरूपिणं प्रपञ्चपञ्चकाकृतिं
विचिन्त्य वृक्षकोटरस्थ एष जीवजीवनम् ॥
भवेद्भवांघ्रिचिन्तनाप्तसर्वकाम ईश्वर
त्वदीय किङ्करान्विते पदे पदे शमागतः ॥ ९४ ॥

## ३६. सोमेश्वरस्तोत्रम्

( ब्रह्म, गौतमीमा., ५२ )

बृहस्पतिरुवाच—

सूक्ष्मं परं ज्योतिरनन्तरूपमोंकारमात्रं प्रकृतेः परं यत् ॥
चिद्रूपमानन्दमयं समस्तमेवं वदन्तीश मुमुक्षवस्त्वाम् ॥ ७४ ॥
आराधयन्त्यत्र भवन्तमीशं महामखैः पञ्चभिरप्यकामाः ॥
संसारसिन्धोः परमाप्तकामा विशन्ति दिव्यं भुवनं वपुस्ते ॥ ७५ ॥
सर्वेषु सत्त्वेषु समत्वबुद्ध्या संवीक्ष्य षट्सूर्मिषु शान्तिभावाः ॥
ज्ञानेन ते कर्मफलानि हित्वा ध्यानेन ते त्वां प्रविशन्ति शंभो ॥७६॥
न जातिधर्माणि न वेदशास्त्रं न ध्यानयोगे व समाधिधर्मः ॥
रुद्रं शिवं शंकरं शान्तचित्तं भक्त्या देवं सोममहं नमस्ये ॥७७॥
मूर्खोऽपि शंभो तव पादभक्त्या समाप्नुयान्मुक्तिमयीं तनुं ते ॥
ज्ञानेषु यज्ञेषु तपःसु चैव ध्यानेषु होमेषु महाफलेषु ॥ ७८ ॥
संपन्नमेतत्फलमुत्तमं यत्सोमेश्वरे भक्तिरहर्निशं यत् ॥
सर्वस्य जीवस्य सदा प्रियस्य फलस्य दृष्टस्य तथा श्रुतस्य ॥ ७९ ॥
स्वर्गस्य मोक्षस्य जगन्निवास सोपानपंक्तिस्तव भक्तिरेषा ॥
त्वत्पादसंप्राप्तिफलाप्तये तु सोपानपंक्तिं न वदन्ति धीराः ॥ ८० ॥
तस्माद्दयालो मम भक्तिरस्तु नैवास्त्युपायस्तव रूपरेषा ॥
आत्मीयमालोक्य महत्त्वमीश पापेषु चास्मासु कुरु प्रसादम् ॥ ८१ ॥
स्थूलं च सूक्ष्मं त्वमनादि नित्यं पिता च माता यदसच्च सच्च ॥
एवं स्तुतो यः श्रुतिभिः पुराणैर्नमामि सोमेश्वरमीशितारम् ॥ ८२ ॥

## ३७. उमाधवस्तोत्रम्

( ब्रह्म, गौतमीमा., ५३ )

राम उवाच—

नमामि शंभुं पुरुषं पुराणं नमामि सर्वज्ञमपारभावम् ॥
नमामि रुद्रं प्रभुमक्षयं तं नमामि शर्वं शिरसा नमामि ॥ १९५ ॥

नमामि देवं परमव्ययं तमुमापतिं लोकगुरुं नमामि ॥
नमामि दारिद्र्यविदारकं तं नमामि रोगापहरं नमामि ॥ १९६ ॥

नमामि कल्याणमचिन्त्यरूपं नमामि विश्वोद्भवबीजरूपम् ॥
नमामि विश्वस्थितिकारणं तं नमामि संहारकरं नमामि ॥ १९७ ॥

नमामि गौरीप्रियमव्ययं तं नमामि नित्यं क्षरमक्षरं तम् ॥
नमामि चिद्रूपममेयभावं त्रिलोचनं तं शिरसा नमामि ॥ १९८ ॥

नमामि कारुण्यकरं भवस्य भयङ्करं वाऽपि सदा नमामि ॥
नमामि दातारमभीप्सितानां नमामि सोमेशमुमेशमादौ ॥ १९९ ॥

नमामि वेदत्रयलोचनं तं नमामि मूर्तित्रयवर्जितं तम् ॥
नमामि पुण्यं सदसद्व्यतीतं नमामि तं पापहरं नमामि ॥ २०० ॥

नमामि विश्वस्य हिते रतं तं नमामि रूपाणि बहूनि धत्ते ॥
यो विश्वगोप्ता सदसत्प्रणेता नमामि तं विश्वपतिं नमामि ॥२०१॥

यज्ञेश्वरं संप्रति हव्यकव्यं तथा गतिं लोकसदाशिवो यः ॥
आराधितो यश्च ददाति सर्वं नमामि दानप्रियमिष्टदेवम् ॥ २०२ ॥

नमामि सोमेश्वरमस्वतन्त्रमुमापतिं तं विजयं नमामि ॥
नमामि विघ्नेश्वरनन्दिनाथं पुत्रप्रियं तं शिरसा नमामि ॥ २०३ ॥

नमामि देवं भवदुःखशोकविनाशनं चन्द्रधरं नमामि ॥
नमामि गङ्गाधरमीशमीड्यमुमाधवं देववरं नमामि ॥ २०४ ॥

नमाम्यजादीशपुरन्दरादिसुरासुरैरर्चितपादयुग्मम् ॥
नमामि देवीमुखवादनानामीक्षार्थमक्षित्रितयं न ऐच्छत् ॥ २०५ ॥

पञ्चामृतैर्गन्धसुधूपदीपैर्विचित्रपुष्पैर्विविधैश्च मन्त्रैः ॥
अन्नप्रकारैः सकलोपचारैः संपूजितं सोममहं नमामि ॥ २०६ ॥

## ३८. रतिकृतशिवस्तवः
( मत्स्य, अ. १५४ )

[ ज्वलत्यहर्निशं भीमो दुश्चिकित्स्यमुखात्मकः ॥
विलोक्य हरहुङ्कारज्वालाभस्मकृतं स्मरम् ॥ २५५ ॥
विललाप रतिः क्रूरं बन्धुना मधुना सह ॥
ततो विलप्य बहुशो मधुना परिसान्त्विता ॥ २५६ ॥
जगाम शरण देवमिन्दुमौलिं त्रिलोचनम् ॥
भृङ्गानुयातां संगृह्य पुष्पितां सहकारजाम् ॥ २५७ ॥
लतां पवित्रकस्थाने प्राणौ परभृतां सखीम् ॥
निर्बध्य हि जटाजूटं कुटिलैरलकं रतिः ॥ २५८ ॥
उद्धृत्य गात्रं शुभ्रेण हृद्येन स्मरभस्मना ॥
जानुभ्यामवनीं गत्वा प्रोवाचेन्दुविभूषणम् ॥ २५९ ॥ ]

रतिरुवाच—

नमः शिवायास्तु निरामयाय नमः शिवायास्तु मनोमयाय ॥
नमः शिवायास्तु सुरार्चिताय तुभ्यं सदा भक्तकृपापराय ॥२६०॥
नमो भवायास्तु भवोद्भवाय नमोऽस्तु ते ध्वस्तमनोभवाय ॥
नमोऽस्तु ते गूढमहाव्रताय नमोऽस्तु मायागहनाश्रयाय ॥ २६१ ॥
नमोऽस्तु शर्वाय नमः शिवाय नमोऽस्तु सिद्धाय पुरातनाय ॥
नमोऽस्तु कालाय नमः कलाय नमोऽस्तु ते ज्ञानवरप्रदाय ॥ २६२ ॥
नमोऽस्तु ते कालकलातिगाय नमो निसर्गामलभूषणाय ॥
नमोऽस्त्वमेयान्धकमर्दकाय नमः शरण्याय नमोऽगुणाय ॥ २६३ ॥
नमोऽस्तु ते भीमगणानुगाय नमोऽस्तु नानाभुवनादिकर्त्रे ॥
नमोऽस्तु नानाजगतां विधात्रे नमोऽस्तु ते चित्रफलप्रयोक्त्रे ॥ २६४ ॥
सर्वावसाने ह्यविनाशनेत्रे नमोऽस्तु चित्राध्वरभागभोक्त्रे ॥
नमोऽस्तु भक्ताभिमतप्रदात्रे नमः सदा ते भवसङ्गहर्त्रे ॥ २६५ ॥
अनन्तरूपाय सदैव तुभ्यमसह्यकोपाय नमोऽस्तु तुभ्यम् ॥
शशाङ्कचिह्नाय तदैव तुभ्यममेयमानाय नमः स्तुताय ॥२६६॥
वृषेन्द्रयानाय पुरान्तकाय नमः प्रसिद्धाय महौषधाय ॥
नमोऽस्तु भक्त्याऽभिमतप्रदाय नमोऽस्तु सर्वार्तिहराय तुभ्यम् ॥२६७॥

चराचराचारविचारवर्यमाचार्यमुत्प्रेक्षितभूतसर्गम् ॥
त्वामिन्दुमौलिं शरणं प्रपन्ना प्रियाप्रमेयं महतां महेशम् ॥ २६८ ॥
प्रयच्छ मे कामयशःसमृद्धिं पुनः प्रभो जीवतु कामदेवः ॥
प्रियं विना त्वां प्रियजीवितेषु त्वत्तोऽपरः को भुवनेष्विहास्ति ॥२६९॥
प्रभुः प्रियायाः प्रसवः प्रियाणां प्रणीतपर्यायपरापरार्थः ॥
त्वमेवमेको भुवनस्य नाथो दयालुरुन्मूलितभक्तभीतिः ॥ २७० ॥

## ३७. सोमनाथस्तवनम्

( ब्रह्म, गौतमीमा., ४७ )

दत्त उवाच—

संसारकूपे पतितोऽस्मि दैवान्मोहेन गुप्तो भवदुःखपङ्के ॥
अज्ञाननाम्ना तमसाऽऽवृतोऽहं परं न विन्दामि सुराधिनाथ ॥ ७ ॥
भिन्नस्त्रिशूलेन बलीयसाऽहं पापेन चिन्ताक्षुरपाटितश्च ॥
तप्तोऽस्मि पञ्चेन्द्रियतीव्रतापैः श्रान्तोऽस्मि संतारय सोमनाथ ॥८॥
बद्धोऽस्मि दारिद्र्यमयैश्च बन्धैर्हतोऽस्मि रोगानलतीव्रतापैः ॥
क्रान्तोऽस्म्यहं मृत्युभुजङ्गमेन भीतो भृशं किं करवाणि शंभो ॥९॥
भवाभवाभ्यामतिपीडितोऽहं तृष्णाक्षुधाभ्यां च रजस्तमोभ्याम् ॥
ईदृक्षया जरया चाभिभूतः पश्यावस्थां कृपया मेऽद्य नाथ ॥१०॥
कामेन कोपेन च मत्सरेण दम्भेन दर्पादिभिरप्यनेकैः ॥
एकैकशः कष्टगतोऽस्मि विद्धस्त्वं नाथवद्वारय नाथ शत्रून् ॥११॥
कस्यापि कश्चित्पतितस्य पुंसो दुःखप्रणोदी भवतीति सत्यम् ॥
विना भवन्तं मम सोमनाथ कुत्रापि कारुण्यवचोऽपि नास्ति ॥१२॥
तावत्स कोपो भयमोहदुःखान्यज्ञानदारिद्र्यरुजस्तथैव ॥
कामादयो मृत्युरपीह यावन्नमः शिवायेति न वच्मि वाक्यम् ॥१३॥
न मेऽस्ति धर्मो न च मेऽस्ति भक्तिर्नाहं विवेको [illegible] कुतो मे ॥
दाताऽसि तेनाऽऽशु शरण्य चित्ते निधेहि सोमे[illegible] मदीये ॥१४॥
याचे न चाहं सुरभूपतित्वं हृत्पद्ममध्ये मम सोमनाथ ॥
श्रीसोमपादाम्बुजसंनिधानं याचे विचार्यैव च तत्कुरुष्व ॥१५॥
यथा तवाहं विदितोऽस्मि पापस्तथाऽपि विज्ञापनमाश्रृणुष्व ॥

संश्रूयते यत्र वचः शिवेति तत्र स्थितिः स्यान्मम सोम नित्यम् ॥१६॥
गौरीपते शङ्कर सोमनाथ विश्वेश कारुण्यनिधेऽखिलात्मन् ॥
संस्तूयते यत्र सदेति तत्र केषामपि स्यात्कृतिनां निवासः ॥ १७ ॥

## ३८. मृत्युञ्जयस्तोत्रम्

( पद्म, उत्तरखण्ड, २३७ )

मार्कण्डेय उवाच–

रत्नसानुशरासनं रजताद्रिशृङ्गनिकेतनं
शिञ्जिनीकृतपन्नगेश्वरमच्युतानलसायकम् ॥
क्षिप्रदग्धपुरत्रय त्रिदशालयैरभिवन्दितं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ७५ ॥
पञ्चपादपपुष्पगन्धिपदाम्बुजद्वयशोभितं
भाललोचनजातपावकदग्धमन्मथविग्रहम् ॥
भस्मदिग्धकलेवरं भवनाशिनं भवमव्ययं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ७६ ॥
मत्तवारणमुख्यचर्मकृतोत्तरीयमनोहरं
पङ्कजासन-पद्मलोचन-पूजितांघ्रि-सरोरुहम् ॥
देवसिन्धुतरङ्गिणीकरसिक्तशीतजटाधरम्
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ७७ ॥
कुण्डलीकृतकुण्डलीश्वरकुण्डलं वृषवाहनं
नारदादिमुनीश्वरस्तुतवैभवं भुवनेश्वरम् ॥
अन्धकान्तकमाश्रितामरपादपं शमनान्तकं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ७८ ॥
यक्षराजसखं भगाक्षिहरं भुजङ्गविभूषणं
[illegible]तापरिष्कृतचारुवामकलेवरम् ॥
क्ष्वेडनीलग[illegible]परश्वधधारिणं मृगधारिणं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ७९ ॥
भेषजं भवरोगिणामखिलापदामपहारिणं
दक्षयज्ञविनाशिनं त्रिगुणात्मकं त्रिविलोचनम् ॥

भुक्तिमुक्तिफलप्रदं निखिलाघसंघनिबर्हणं ।
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ८० ॥
भक्तवत्सलमर्चतां निधिमक्षयं हरिदम्बरं ।
सर्वभूतपतिं परात्परमप्रमेयमनूपमम् ॥
भूमिवारिनभोहुताशनसोमपालितस्वाकृतिं ।
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥८१॥
विश्वसृष्टिविधायिनं पुनरेव पालनतत्परं ।
संहरन्तमथ प्रपञ्चमशेषलोकनिवासिनम् ॥
क्रीडयन्तमहर्निशं गणनाथयूथसमावृतं ।
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥८२॥
रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिम् ॥
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥८३॥
कालकण्ठं कलामूर्ति कालाग्नि कालनाशनम् ॥
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥८४॥
नीलकण्ठं विरूपाक्षं निर्मलं निरुपद्रवम् ॥
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥८५॥
वामदेवं महादेवं लोकनाथं जगद्गुरुम् ॥
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥८६॥
देवदेवं जगन्नाथं देवेशमृषभध्वजम् ॥
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥८७॥
अनन्तमव्ययं शान्तमक्षमालाधरं हरम् ॥
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥८८॥
आनन्दं परमं नित्यं कैवल्यपदकारणम् ॥
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥८९॥
स्वर्गापवर्गदातारं सृष्टिस्थित्यन्तकारिणम् ॥
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥९०॥

वसिष्ठ उवाच —
मार्कण्डेयकृतं स्तोत्रं यः पठेच्छिवसंनिधौ ॥
तस्य मृत्युभयं नास्ति सत्यं सत्यं वदाम्यहम् ॥९१॥

इति स्तुतो महादेवो मार्कण्डेयेन धीमता ।।
आयुः प्रादादपर्यन्तमनेकप्रलयावधि ।। ९२ ।।
मार्कंण्डेयो महातेजा देवदेवप्रसादतः ।।
अमृतत्वमनुप्राप्य ददर्श प्रलयान्बहून् ।।९३।।

## ३९. अष्टमूर्त्यष्टकम् (शिवः)

( शिव, रुद्रसं., युद्धखण्ड., ५० )

भार्गव उवाच –

त्वं भाभिराभिरभिभूय तमस्समस्तमस्तं नयस्यभिमतानि निशाचराणाम् ।।
देदीप्यसे दिनमणे गगने हिताय लोकत्रयस्य जगदीश्वर तन्नमस्ते ।।२४।।

लोकेऽतिवेलमतिवेलमहामहोभिर्निर्मासिकौ च गगनेऽखिललोकनेत्रः ।।
विद्राविताखिलतमास्सुतमो हिमांशो पीयूषपूरपरिपूरित तन्नमस्ते ।।२५।।

त्वं पावने पथि सदा गतिरप्युपास्यः कस्त्वां विना भुवनजीवन जीवतीह ।।
स्तब्धप्रभञ्जनविवर्द्धितसर्वजन्तोः सतोषिताहिकुल सर्वग वै नमस्ते ।।२६।।

विश्वैकपावक न तावकपावकैक शक्ते ऋते मृतवतामृतदिव्यकार्यं ।।
प्राणिष्यदो जगदहो जगदन्तरात्मंस्त्वं पावकः प्रतिपदं शमदो नमस्ते ।।२७।।

पानीयरूप परमेश जगत्पवित्र चित्रं विचित्रसुचरित्रकरोऽसि नूनम् ।।
विश्वं पवित्रममलं किल विश्वनाथ पानीयगाहनत एतदतो नतोऽस्मि ।।२८।।

आकाश रूपबहिरन्तरुतावकाश-दानाद्विकस्वरमिहेश्वर विश्वमेतत् ।।
त्वत्तस्सदा सदय संश्वसिति स्वभावात्संकोचमेति भवतोऽस्मि नतस्ततस्त्वाम्।।
विश्वम्भरात्मक बिभर्षि विभोऽत्र विश्वं को विश्वनाथ भवतोऽन्यतमस्तमोऽरिः
स त्वं विनाशय तमो मम चाहिभूष स्तव्यात्परः परतरं प्रणतस्ततस्त्वाम् ।।

आत्मस्वरूप तव रूपपरंपराभिराभिस्ततं हर चराचररूपमेतत् ।।
सर्वान्तरात्मनिलयप्रतिरूपरूप नित्यं नतोऽस्मि परमात्मजनोऽष्टमूर्त्ते ।।३१।।
इत्यष्टमूर्तिभिरिमाभिरुमाभिवन्द्य युक्तो करोषि खलु विश्वजनीनमूर्त्ते ।।
एतत्ततं सुविततं प्रणतप्रणीत सर्वार्थसार्थपरमार्थ ततो नतोऽस्मि ।।३२।।

## ४०. शिवशक्तिस्तवः (पूजाकाले)

( शिव, वायवीयसं., ३१. )

जय जय जगदेकनाथ शंभो प्रकृतिमनोहरनित्यचित्स्वभाव: ॥
अतिगतकलुषप्रपञ्चवाचामपि मनसां पदवीमतीततत्त्वम् ॥२॥

स्वभावनिर्मलाभोग जय सुन्दरचेष्टित ॥
स्वात्मतुल्यमहाशक्ते जय शुद्धगुणार्णव ॥३॥

नम: परमदेवाय नम: परमहेतवे ॥
नमश्शिवाय शान्ताय नमश्शिवतराय ते ॥१०॥
त्वदधीनमिदं कृत्स्नं जगद्धि ससुरासुरम् ॥११॥
अतस्त्वद्विहितामाज्ञां क्षमते कोऽतिवर्तितुम ॥१२॥

अय पुनर्जनो नित्य भवदेकसमाश्रय: ॥
भवानतोऽनुगृह्यास्मै प्रार्थितं संप्रयच्छतु ॥१३॥
जयाम्बिके जगन्मातर्जय सर्वजगन्मयि ॥
जयानवधिकैश्वर्ये जयानुपमविग्रहे ॥१४॥

जय वाङ्मनसातीते जयाचिदध्वान्तभञ्जिके ॥
जय जन्मजराहीने जय कालोत्तरोत्तरे ॥१५॥
जयानेकविधानस्थे जय विश्वेश्वरप्रिये ॥
जय विश्वसुराराध्ये जय विश्वविजृंभिणि ॥१६॥
जय मङ्गलदिव्यांगि जय मङ्गलदीपिके ॥
जय मङ्गलचारित्रे जय मङ्गलदायिनि ॥१७॥
नम: परमकल्याणगुणसञ्चयमूर्त्तये ॥
त्वत्त: खलु समुत्पन्नं जगत्त्वय्येव लीयते ॥१८॥
त्वद्विनात: फलं दातुमीश्वरोऽपि न शक्नुयात् ॥
जन्मप्रभृति देवेशि जनोऽयं त्वदुपाश्रित: ॥१९॥
अतोऽस्य तव भक्तस्य निर्वर्तय मनोरथम् ॥
पञ्चवक्त्रो दशभुज: शुद्धस्फटिकसन्निभ: ॥२०॥
वर्णब्रह्म कलादेहो देवस्सकलनिष्कल: ॥
शिवभक्तिसमारूढ: शान्त्यतीतस्सदाशिव: ॥२१॥

भक्त्या मयार्चितो मह्यं प्रार्थितं शं प्रयच्छतु ॥
सदाशिवाङ्कमारूढा शक्तिरिच्छा शिवाह्वया ॥२२॥
जननी सर्वलोकानां प्रयच्छतु मनोरथम् ॥
शिवयोर्दयिता पुत्रौ देवौ हेरम्बषण्मुखौ ॥२३॥
शिवानुभावौ सर्वज्ञौ शिवज्ञानामृताशिनौ ॥
तृप्तौ परस्परं स्निग्धौ शिवाभ्यां नित्यसत्कृतौ ॥२४॥
सत्कृतौ च सदा देवौ ब्रह्माद्यैस्त्रिदशैरपि ॥
सर्वलोकपरित्राणं कर्तुमभ्युदितौ सदा ॥२५॥
स्वेच्छावतारं कुर्वन्तौ स्वांशभेदैरनेकशः ॥
ताविमौ शिवयोः पार्श्वे नित्यमित्थं मयार्चितौ ॥
तयोराज्ञां पुरस्कृत्य प्रार्थितं मे प्रयच्छताम् ॥२६॥
शुद्धस्फटिकसङ्काशमीशानाख्यं सदाशिवम् ॥
मूर्द्धाभिमानिनी मूर्तिः शिवस्य परमात्मनः ॥२७॥
शिवार्चनरतं शान्तं शान्त्यतीतं खमास्थितम् ॥
पञ्चाक्षरान्तिमं बीजं कलाभिः पञ्चभिर्युतम् ॥ २८ ॥
प्रथमावरणे पूर्वं शक्त्या सह समर्चितम् ॥
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥२९॥
बालसूर्यप्रतीकाशं पुरुषाख्यं पुरातनम् ॥
पूर्ववक्त्राभिमानं च शिवस्य परमेष्ठिनः ॥३०॥
शान्त्यात्मकं मरुत्संस्थं शंभोः पादार्चने रतम् ॥
प्रथमं शिवबीजेषु कलासु च चतुष्कलम् ॥३१॥
पूर्वभागे मया भक्त्या शक्त्या सह समर्चितम् ॥
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥३२॥

## ४१. शिवस्तोत्रम्

( शिव, रुद्रसंहिता. )

सन्ध्यावाच—

निराकारं ज्ञानगम्यं परं यन्नैव स्थूलं नापि सूक्ष्मं न चोच्चम् ॥
अंन्तश्चिन्त्यं योगिभिस्तस्य रूपं तस्मै तुभ्यं लोककर्त्रे नमोऽस्तु ॥१॥

शर्वं शान्तं निर्मलं निर्विकारं ज्ञानागम्यं स्वप्रकाशेऽविकारम् ॥
खाध्वप्रख्यं ध्वान्तमार्गात्परस्ताद्रूपं यस्य त्वां नमामि प्रसन्नम् ॥१३॥
एकं शुद्धं दीप्यमानं विनाजां चिदानन्दं सहजं चाविकारी ॥
नित्यानन्दं सत्यभूतिप्रसन्नं यस्य श्रीदं रूपमस्मै नमस्ते ॥१४॥
विद्याकारोद्भावनीय प्रभिन्नं सत्वच्छन्दं ध्येयमात्मस्वरूपम् ॥
सारं पारं पावनानां पवित्रं तस्मै रूपं यस्य चैवं नमस्ते ॥१५॥
यत्त्वाकारं शुद्धरूपं मनोज्ञं रत्नाकल्पं स्वच्छकर्पूरगौरम् ॥
इष्टाभीती शूलमुण्डं दधानं हस्तैर्नमो योगयुक्ताय तुभ्यम् ॥१६॥

## ४२. विश्वानरकृतमहेशस्तोत्रम्

( स्कान्द, काशीखण्ड, पू., अ. १० )

विश्वानर उवाच—

एकं ब्रह्मैवाद्वितीयं समस्तं सत्यं सत्यं नेह नानास्ति किञ्चित् ॥
एको रुद्रो न द्वितीयोऽवतस्थे तस्मादेकं त्वां प्रपद्ये महेशम् ॥१२६॥
एकः कर्ता त्वं हि सर्वस्य शंभो नानारूपेष्वेकरूपोऽस्यरूपः ॥
यद्वत्प्रत्यप्स्वर्क एकोऽप्यनेकस्तस्मान्नान्यं त्वां विनेशं प्रपद्ये ॥१२७॥
रज्जौ सर्पः शुक्तिकायां च रूप्यं नैरः पूरस्तन्मृगाख्ये मरीचौ ॥
यद्वत्तद्वद्विष्वगेष प्रपञ्चो यस्मिञ्ज्ञाते तं प्रपद्ये महेशम् ॥१२८॥
तोये शैत्यं दाहकत्वं च वह्नौ तापो भानौ शीतभानौ प्रसादः ॥
पुष्पे गन्धो दुग्धमध्येऽपि सर्पिर्यत्तच्छंभो त्वं ततस्त्वां प्रपद्ये ॥१२९॥
शब्दं गृह्णास्यश्रवास्त्वं हि जिघ्रेरघ्राणस्त्वं व्यंघ्रिरायासि दूरात् ॥
व्यक्षः पश्येस्त्वं रसज्ञोऽप्यजिह्वः कस्त्वां सम्यग्वेत्त्यतस्त्वां प्रपद्ये ॥१३०॥
नो वेदस्त्वामीशसाक्षाद्धि वेद नो वा विष्णुर्नो विधाताऽखिलस्य ॥
नो योगीन्द्रानेन्द्रमुख्याश्च देवा भक्तो वेद त्वामतस्त्वां प्रपद्ये ॥१३१॥
नो ते गोत्रं नेश जन्मापि नाख्या नो वा रूपं नैव शीलं न देशः ॥
इत्थं भूतोऽपीश्वरस्त्वं त्रिलोक्याः सर्वान्कामान्पूरयेस्तद्भजे त्वाम् ॥
त्वत्तः सर्वं त्वं हि सर्वं स्मरारे त्वं गौरीशस्त्वं च नग्नोऽतिशान्तः ॥
त्वं वै वृद्धस्त्वं युवा त्वं च बालस्तत्त्वं यत्किं नास्त्यतस्त्वां नतोऽस्मि ॥

## ४३. द्वादशज्योतिर्लिङ्गानि

( स्कान्द, अवन्तिक्षेत्रमा, १. १. ३२; etc. )

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ॥
उज्जयिन्यां महाकालमोङ्कारममलेश्वरम् ॥१॥
परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करः ॥
सेतुबन्धे च रामेशं नागेशं दारुकावने ॥ २ ॥
वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे ॥
हिमालये तु केदारं घुश्मेशं तु शिवालये ॥३॥
एतानि ज्योर्तिलिङ्गानि सायं प्रातः पठेन्नरः ॥
सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥४॥

## ४४. शिवलिङ्गस्तवनम्

( कूर्म, पूर्वार्द्धं, ३६ )

अनादिमूलसंसाररोगवैद्याय शम्भवे ॥
नमः शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥७८॥
प्रलयार्णवसंस्थाय प्रलयोद्भूतिहेतवे ॥
नमः शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥७९॥
ज्वालामालाप्रतीकाय ज्वलनस्तम्भरूपिणे ॥
नमः शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥८०॥
आदिमध्यान्तहीनाय स्वभावामलदीप्तये ॥
नमः शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥८१॥
प्रधान–पुरुषेशाय व्योमरूपाय वेधसे ॥
नमः शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥८२॥
निर्विकाराय सत्याय नित्यायातुलतेजसे ॥
वेदान्तसाररूपाय कालरूपाय ते नमः ॥८३॥
नमः शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥
एवं संस्तूयमानस्तु व्यक्तो भूतः महेश्वरः ॥८४॥

## ४५. महेश्वरकवचम्

( ब्रह्मवैवर्त, ब्रह्मखण्ड, १९ )

महेश्वर उवाच—

शृणु वक्ष्यामि हे वत्स कवचं परमाद्भुतम् ॥
अहं तुभ्यं प्रदास्यामि गोपनीयं सुदुर्लभम् ॥ ४४ ॥
पुरा दुर्वाससे दत्तं त्रैलोक्यविजयाय च ॥
ममैवेदं च कवचं भक्त्या यो धारयेत्सुधीः ॥ ४५ ॥
जेतुं शक्नोति त्रैलोक्यं भगवन्नवलीलया ॥
संसारपावनस्यास्य कवचस्य प्रजापतिः ॥ ४६ ॥
ऋषिश्छन्दश्च गायत्री देवोऽहं च महेश्वरः ॥
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ॥ ४७ ॥
पञ्चलक्षजपेनैव सिद्धिदं कवचं भवेत् ॥
यो भवेत्सिद्धकवचो मम तुल्यो भवेद्भुवि ॥
तेन सा सिद्धियोगेन तपसा विक्रमेण च ॥ ४८ ॥
शंभुर्मे मस्तकं पातु मुखं पातु महेश्वरः ॥
दन्तपंक्ति नीलकण्ठोऽप्यधरोष्ठं हरः स्वयम् ॥ ४९ ॥
कण्ठं पातु चन्द्रचूडः स्कन्धौ वृषभवाहनः ॥
वक्षःस्थलं नीलकण्ठः पातु पृष्ठं दिगम्बरः ॥ ५० ॥
सर्वाङ्गं पातु विश्वेशः सर्वदिक्षु च सर्वदा ॥
स्वप्ने जागरणे चैव स्थाणुर्मे पातु सन्ततम् ॥ ५१ ॥
इति ते कथितं बाण कवचं परमाद्भुतम् ॥
यस्मै कस्मै न दातव्यं गोपनीयं प्रयत्नतः ॥ ५२ ॥
यत्फलं सर्वतीर्थानां स्नानेन लभते नरः ॥
तत्फलं लभते नूनं कवचस्यैव धारणात् ॥ ५३ ॥

## ४६. शिवसहस्रनामस्तोत्रम्

( शिव, ४ कोटिरुद्रसं., अ. ३५; लिङ्ग, पूर्वार्द्ध, ९८; etc. )

ॐ नमःशिवाय ॥ सूत उवाच ॥ श्रूयतां भो ऋषिश्रेष्ठा येन तुष्टो महेश्वरः ॥ तदहं कथयाम्यद्य शैवं नामसहस्रकम् ॥१॥ भवः शिवो हरो रुद्रः

पुरुषः पद्मलोचनः ।। अथितव्यस्सदाचारश्शर्वश्शम्भुर्महेश्वरः ।।२।। [ ईश्वरः स्थाणुरीशानः सहस्राक्षः सहस्रपात् ।। वरीयान् वरदो वन्द्यः शङ्कर. परमेश्वरः ।। गङ्गाधरः शूलधरः परार्थैकप्रयोजनः ।। सर्वज्ञः सर्वदेवादिगिरिधन्वा जटाधरः ।। ] चन्द्रापीडश्चन्द्रमौलिर्विश्वं विश्वंभरेश्वरः ।। वेदान्तसारसन्दोहः कपाली नीललोहितः ।।३।। ध्यानाधारोऽपरिच्छेद्यो गौरीभर्त्ता गणेश्वरः ।। अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गस्स्वर्गसाधनः ।।४।। ज्ञानगम्यो दृढप्रज्ञो देवदेवस्त्रिलोचनः ।। वामदेवो महादेवो पाण्डुः परिदृढो दृढः ।।५।। विश्वरूपो विरूपाक्षो वागीशः शुचिरन्तरः ।। सर्वप्रणयसंवादी वृषाङ्को वृषवाहनः ।।६।। ईशः पिनाकी खट्वाङ्गी चित्रवेशश्चिरन्तनः । तमोहरो महायोगी गोप्ता ब्रह्माण्डहृज्जटी ।।७।। कालकालः कृत्तिवासाः सुभगः प्रणवात्मकः । उन्मत्तवेषश्चक्षुष्यो दुर्वासाः स्मरशासनः ।।८।। दिव्यायुधः स्कन्दगुरुः परमेष्ठी परायणः । अनादिमध्यनिधनो गिरीशो गिरिबान्धवः ।।९।। कुबेरबन्धुः श्रीकण्ठो लोकवर्णोत्तमोत्तमः । समाधिवेद्यो कोदण्डी नीलकण्ठः परश्वधी ।।१०।। विशालाक्षो मृगव्याधस्सुरेशस्सूर्यतापनः । धर्माध्यक्षः क्षमाक्षेत्रं भगवान्भगनेत्रभित् ।।११।। उग्रः पशुपतिस्तार्क्ष्यः प्रियभक्तः प्रियंवदः । दान्तो दयाकरो दक्षः कपर्दी कामशासनः ।। १२ ।। श्मशाननिलयस्सूक्ष्मश्श्मशानस्थो महेश्वरः । लोककर्ता भूतपतिर्महाकर्ता महौषधिः ।।१३।। गोनर्दोऽमृतरः सौम्यो महाज्योतिर्महामतिः तेजोमयोऽमृतमयोऽन्नमयश्च सुधापतिः ।।१४।। उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः । नीतिस्सुनीतिश्शुद्धात्मा सोमस्सोमरतस्सुखी ।।१५।। अजातशत्रुरालोकसंभाव्यो हव्यवाहनः । लोककारो वेदकारस्सूत्रकारस्सनातनः ।।१६।। महर्षिः कपिलाचार्यो विश्वदीप्तिस्त्रिलोचनः । पिनाकपाणिर्भूदेवस्स्वस्तिदः स्वस्तिकृत सदा ।।१७।। त्रिधामा सौभगः शर्वः सर्वज्ञः सर्वगोचरः । ब्रह्मधृग्विश्वसृक् स्वर्गः कर्णिकारप्रियः कविः ।।१८।। शाखो विशाखो गोशाखश्शिवो भिषगनुत्तमः । गंगाप्लवोदको भव्यः पुष्कलः स्थपतिः स्थिरः ।।१९।। विजितात्मा विधेयात्मा भूतवाहनसारथिः । सगणो गणकार्यश्च सुकीर्त्तिश्छिन्नसंशयः ।।२०।। कामदेवः कामपालो भस्मोद्धूलितविग्रहः । भस्मप्रियो भस्मशायी कामी कान्तः कृतागमः ।।२१।। समावर्त्तो निवृत्तात्मा धर्मयुक्तः सदाशिवः । चतुर्मुखश्चतुर्बाहुर्दुरावासो दुरासदः ।।२२।। दुर्लभो दुर्गमो दुर्गः सर्वायुधविशारदः । अध्यात्मयोगनिलयस्सुतन्तुस्तन्तुवर्द्धनः ।।२३।। शुभाङ्गो

लोकसारङ्गो जगदीशोऽमृताशनः। भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रहः ॥२४॥ असाधुः साधुसाध्यश्च भृत्यमर्कटरूपधृक्। हिरण्यरेतास्तरणिर्मरीचिर्महिमालयः ॥२५॥ महाह्रदो महागर्तस्सिद्धवृन्दारवन्दितः। व्याघ्रचर्मधरो व्याली महाभूतो महानिधिः ॥ २६ ॥ अमृताङ्गोऽमृतवपुः पाञ्चजन्यः प्रभञ्जनः। पञ्चविंशतितत्त्वज्ञः पारिजातः परावरः ॥२७॥ सुलभस्सुव्रतश्शूरो वाङ्मयैकनिधिर्निधिः। वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः ॥२८॥ आश्रमः क्षपणः क्षामो ज्ञानवानचलाचलः। प्रमाणभूतो दुर्ज्ञेयस्सुपर्णो वायुवाहनः ॥२९॥ धनुर्धरो धनुर्वेदो गुणराशिर्गुणाकरः। सत्यस्सत्यपरोऽदीनो धर्मो गोधर्मशासनः ॥३०॥ अनन्तदृष्टिरानन्दो दण्डो दमयिता दमः। अभिवाद्यो महाचार्यो विश्वकर्मविशारदः ॥३१॥ वीतरागो विनीतात्मा तपस्वी भूतभावनः। उन्मत्तवेषः प्रच्छन्नो जितकामो जितप्रियः ॥३२॥ कल्याणप्रकृतिः कल्पः सर्वलोकप्रजापतिः। तरस्वी तारको धीमान्प्रधानप्रभुरव्ययः ॥३३॥ लोकपालोऽन्तरात्मा च कल्पादिः कमलेक्षणः। वेदशास्त्रार्थतत्त्वज्ञो नियमी नियमाश्रयः ॥३४॥ चन्द्रः सूर्यः शनिः केतुर्विरामो विद्रुमच्छविः। भक्तिगम्यः परं ब्रह्म मृगबाणार्पणोऽनघः ॥३५॥ अद्रिराजालयः कान्तः परमात्मा जगद्गुरुः। सर्वकर्माचलस्त्वष्टा मङ्गल्यो मङ्गलावृतः ॥ ३६ ॥ महातपा दीर्घतपः स्थविष्ठः स्थविरो ध्रुवः। अहः संवत्सरो व्याप्तिः प्रमाणं परमं तपः ॥३७॥ संवत्सरकरो मन्त्रः प्रत्ययः सर्वतापनः। अजः सर्वेश्वरस्सिद्धो महातेजा महाबलः ॥३८॥ योगी योग्यो महारेतास्सिद्धिस्सर्वादिरग्निदः। वसुर्वसुमनाः सत्यः सर्वपापहरो हरः ॥३९॥ सुकीर्तिः शोभनस्स्रग्वी वेदाङ्गो वेदविन्मुनिः। भ्राजिष्णुर्भोजनं भोक्ता लोकनाथो दुराधरः ॥४०॥ अमृतश्शाश्वतश्शान्तो बाणहस्तः प्रतापवान्। कमण्डलुधरो धन्वी वेदाङ्गो वेदविन्मुनिः ॥४१॥ अतीन्द्रियो महामायस्सर्वावासश्चतुष्पथः। कालयोगी महानादो महोत्साहो महाबलः ॥४२॥ महाबुद्धिर्महावीर्यो भूतचारी पुरन्दरः। निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ॥४३॥ अनिर्देश्यवपुः श्रीमान्सर्वहार्यमितोगतिः। बहुश्रुतो महामायो नियतात्मा भवोद्भवः ॥३४॥ ओजस्तेजो द्युतिधरो नर्तकः सर्वकामकः। नृत्यप्रियो नित्यनृत्यः प्रकाशात्मा प्रतापनः ॥४५॥ बुद्धस्पष्टाक्षरो मन्त्रस्समानस्सारसंप्लवः। युगादिकृद्युगावर्त्तो गंभीरो वृषवाहनः ॥ ४६ ॥ इष्टो विशिष्टश्शिष्टेष्टः शरभः शरभो धनुः। तीर्थरूपस्तीर्थनामा

तीर्थकृस्यस्तु तीर्थदः ॥ ४७ ॥ अपां निधिरधिष्ठानं दुर्जयो जयकालवित्। प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥४८॥ विमोचनस्सुरगणो विद्येशो बिन्दुसंश्रयः। वातरूपोऽमलोन्मायी विकर्त्ता गहनो गुहः ॥४९॥ करणं कारणं कर्त्ता सर्वबन्धविमोचनः। व्यवसायो व्यवस्थानः स्थानदो जगदादिजः ॥५०॥ गुरुदो ललितो भेदो नवमात्मनि संस्थितः। वीरेश्वरो वीरभद्रो वीरासनविधिर्गुरुः ॥५१॥ वीरचूडामणिर्वेत्ता चिदानन्दो नदीश्वरः। आज्ञाधरस्त्रिशूली च शिपिविष्टः शिवालयः ॥५२॥ वालखिल्यो महावीरस्तिग्मांशुर्बधिरः खगः। अभिरामस्सुशरणस्सुब्रह्मण्यः सुधापतिः ॥ ५३ ॥ मघवा कौशिको गोमान्विरामः सर्वसाधनः। ललाटाक्षो विश्वदेहस्सारस्संसारचक्रभृत् ॥५४॥ अमोघदण्डी मध्यस्थो हरिणो ब्रह्मवर्चसी। परमार्थः परमायस्संचयो व्याघ्रकोऽनलः ॥५५॥ रुचिर्वररुचिर्वन्द्यो वाचस्पतिरहस्पतिः। रविर्विरोचनः स्कन्दः शास्ता वैवस्वतो यमः ॥५६॥ युक्तिरुन्नतकीर्तिश्च सानुरागः पुरञ्जनः। कैलासाधिपतिः कान्तस्सविता रविलोचनः ॥५७॥ विश्वोत्तमो वीतभयो विश्वभर्त्ता निवारितः। नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः ॥५८॥ दूरश्रवो विश्वसहो ध्येयो दुःस्वप्ननाशनः। उत्तारणो दुष्कृतिहा विज्ञेयो दुस्सहो भवः ॥५९॥ अनादिर्भूर्भुवो लक्ष्मीः किरीटी त्रिदशाधिपः। विश्वगोप्ता विश्वकर्त्ता सुवीरो रुचिराङ्गदः ॥६०॥ जननो जनजन्मादिः प्रीतिमान्नीतिमान्ध्रुवः। वसिष्ठः कश्यपो भानुर्भीमो भीमपराक्रमः ॥६१॥ प्रणवस्सत्पथाचारो महाकोशो महाधनः। जन्माधिपो महादेवस्सकलागमपारगः ॥६२॥ तत्त्वं तत्त्वविवेकात्मा विभुर्विष्णुर्विभूषणः। ऋषिर्ब्राह्मण ऐश्वर्यं जन्ममृत्युजरातिगः ॥६३॥ पंचतत्त्वसमुत्पत्तिर्विश्वेशो विमलोदयः। अनाद्यन्तो ह्यात्मयोनिर्वत्सलो भूतलोकधृक् ॥६४॥ गायत्रीवल्लभः प्रांशुर्विश्वावासः प्रभाकरः ॥ शिशुर्गिरिरतस्सम्राट् सुषेणस्सुरशत्रुहा ॥६५॥ अनेमिरिष्टनेमिश्च मुकुन्दो विगतज्वरः। स्वयंज्योतिर्महाज्योतिस्तनुज्योतिरचंचलः ॥ ६६ ॥ पिङ्गलः कपिलश्मश्रुर्भालनेत्रस्त्रयीतनुः। ज्ञानस्कंधो महानीतिर्विश्वोत्पत्तिरुपप्लवः ॥६७॥ भगो विवस्वानादित्यो गतपारो बृहस्पतिः। कल्याणगुणनामा च पापहा पुण्यदर्शनः ॥६८॥ उदारकीर्तिरुद्योगी सद्योगी सदसत्त्रपः। नक्षत्रमाली नाकेशः स्वाधिष्ठानः षडाश्रयः ॥ ६९ ॥ पवित्रः पापनाशश्च मणिपूरो

मभोगतिः । हृत्पुण्डरीकमासीनश्शक्रश्शान्तिर्वृषाकपिः ॥७०॥ उष्णो गृहपतिः कृष्णस्समर्थोऽनर्थनाशनः ॥ अधर्मशत्रुरज्ञेयः पुरुहूतः पुरश्रुतः ॥७१॥ ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः । जगद्धितैषी सुगतः कुमारः कुशलागमः ॥७२॥ हिरण्यवर्णो ज्योतिष्मान्नानाभूतरतो ध्वनिः । आरोग्यो नमनाध्यक्षो विश्वामित्रो धनेश्वरः ॥७३॥ ब्रह्मज्योतिर्वसुर्धामा महाज्योतिरनुत्तमः ॥ मातामहो मातरिश्वा नभस्वान्नागहारधृक् ॥७४॥ पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः पराशरः । निरावरणनिर्वारो विरिञ्चो विष्टरश्रवाः ॥७५॥ आत्मभूरनिरुद्धोऽत्रिर्ज्ञानमूर्तिर्महायशाः । लोकवीराग्रणीर्वीरश्चन्द्रस्सत्यपराक्रमः ॥७६॥ व्यालकल्पो महाकल्पः कल्पवृक्षः कलाधरः । अलंकरिष्णुरचलो रोचिष्णुर्विक्रमोन्नतः ॥७७॥ आयुः शब्दपतिर्वाग्मी प्लवनश्शिखिसारथिः । असंसृष्टोऽतिथिश्शत्रुः प्रमाथी पादपासनः ॥७८॥ वसुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः । जप्यो जराविशमनो लोहितश्च तनूनपात् ॥७९॥ पृषदश्वो नभोयोनिस्सुप्रतीकस्तमिस्रहा । निदाघस्तपनो मेघभक्षः परपुरंजयः ॥८०॥ सुखानिलस्सुनिष्पन्नस्सुरभिश्शिशिरात्मकः । वसन्तो माधवो ग्रीष्मो नभस्यो बीजवाहनः ॥८१॥ अंगिरा गुरुरात्रेयो विमलो विश्ववाहनः । पावनः पुरजिच्छक्रस्त्रैविद्यो नववाहनः ॥८२॥ मनोबुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः । जमदग्निर्जलनिधिर्धिगालो विश्वगालवः ॥८३॥ अघोरोऽनुत्तरो यज्ञश्रेष्ठो निःश्रेयसप्रदः । शैलो गगनकुन्दाभो दानवारिररिन्दमः ॥८४॥ चामुण्डो जनकश्चारुर्निश्शल्यो लोकशल्यधृक् । चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः ॥८५॥ आम्नायोऽथ समाम्नायस्तीर्थदेवश्शिवालयः । बहुरूपो महारूपस्सर्वरूपश्चराचरः ॥८६॥ न्यायनिर्मायको न्यायो न्यायगम्यो निरञ्जनः । सहस्रमूर्द्धा देवेन्द्रस्सर्वशास्त्रप्रभञ्जनः ॥८७॥ मुण्डो विरूपो विकृतो दण्डी नादी गुणोत्तमः । पिंगलाक्षो हि बह्वक्षो नीलग्रीवो निरामयः ॥८८॥ सहस्रबाहुस्सर्वेशश्शरण्यस्सर्वलोकधृक् । पद्मासनः परंज्योतिः पारंपर्यफलप्रदः ॥८९॥ पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः परावरज्ञो वरदो वरेण्यश्च महास्वनः ॥९०॥ देवासुरगुरुर्देवो देवासुरनमस्कृतः । देवासुरमहामित्रो देवासुरमहेश्वरः ॥९१॥ देवासुरेश्वरो दिव्यो देवासुरमहाश्रयः । देवदेवोऽनयोऽचिन्त्यो देवतात्मात्मसम्भवः ॥९२॥ सद्यो महासुरव्याधो देवसिंहो दिवाकरः । विबुधाग्रचरः श्रेष्ठः सर्वदेवोत्तमोत्तमः ॥९३॥ शिवज्ञानरतः श्रीमाञ्छिखी श्रीपर्वतप्रियः । वज्रहस्तस्सिद्धखड्गो नरसिंह-

निपातनः ॥९४॥ ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः । नन्दी नन्दीश्वरोऽनन्तो नग्नव्रतधरश्शुचिः ॥९५॥ लिङ्गाध्यक्षः सुराध्यक्षो युगाध्यक्षो युगापहः । स्वधामा स्वगतः स्वर्गी स्वरः स्वरमयः स्वनः ॥९६॥ बाणाध्यक्षो बीजकर्त्ता कर्मकृद्धर्मसम्भवः । दम्भो लोभोऽथ वै शम्भुस्सर्वभूतमहेश्वरः ॥ ९७ ॥ श्मशाननिलयस्त्र्यक्षस्सेतुरप्रतिमाकृतिः । लोकोत्तरस्फुटो लोकः त्र्यम्बको नागभूषणः ॥९८॥ अन्धकारिर्मखद्वेषी विष्णुकन्धरपातनः । हीनदोषोऽक्षयगुणो दक्षारिः पूषदन्तभित् ॥९९॥ पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः ॥ सन्मार्गपप्रियो धूर्त्तः पुण्यकीर्त्तिरनामयः ॥१००॥ मनोजवस्तीर्थकरो जटिलो नियमेश्वरः । जीवितान्तकरो नित्यो वसुरेता वसुप्रदः ॥१०१॥ सद्गतिः सिद्धिदः सिद्धः सज्जातिः खलकण्टकः । कलाधरो महाकालभूतः सत्यपरायणः ॥ १०२ ॥ लोकलावण्यकर्त्ता च लोकोत्तरसुखालयः । चन्द्रसंजीवनश्शास्ता लोकग्राह्यो महाधिपः ॥१०३॥ लोकबन्धुर्लोकनाथः कृतज्ञः कृत्तिभूषितः । अनपायोऽक्षरः कान्तः सर्वशास्त्रभृतांवरः ॥१०४॥ तेजोमयो द्युतिधरो लोकमानी घृणार्णवः । शुचिस्मितः प्रसन्नात्मा ह्यजेयो दुरतिक्रमः ॥१०५॥ ज्योतिर्मयो जगन्नाथो निराकारो जलेश्वरः । तुंबवीणो महाकायो विशोकश्शोकनाशनः ॥ १०६ ॥ त्रिलोकपस्त्रिलोकेशः सर्वशुद्धिरधोक्षजः । अव्यक्तलक्षणो देवो व्यक्तोऽव्यक्तो विशांपतिः ॥१०७॥ परः शिवो वसुर्नासासारो मानधनो यमः । ब्रह्मा विष्णुः प्रजापालो हंसो हंसगतिर्वयः ॥१०८॥ वेधा विधाता धाता च स्रष्टा हर्त्ता चतुर्मुखः । कैलासशिखरावासी सर्वावासी सदा गतिः ॥१०९॥ हिरण्यगर्भो द्रुहिणो भूतपालोऽथ भूपतिः । सद्योगी योगविद्योगी वरदो ब्राह्मणप्रियः ॥११०॥ देवप्रियो देवनाथो देवज्ञो देवचिन्तकः । विषमाक्षो विरूपाक्षो वृषदो वृषवर्धनः ॥१११॥ निर्ममो निरहंकारो निर्मोहो निरुपद्रवः । दर्पहा दर्पदो दृप्तः सर्वार्थपरिवर्त्तकः ॥११२॥ सहस्राचिर्भूतभूषः स्निग्धाकृतिरदक्षिणः । भूतभव्यभवन्नाथो विभवो भूतिनाशनः ॥११३॥ अर्थोऽनर्थो महाकोशः परकार्य्यैकपण्डितः । निष्कण्टकः कृतानन्दो निर्व्याजो व्याजमर्दनः ॥११४॥ सत्त्ववान्सात्त्विकः सत्यः कृतस्नेहः कृतागमः । अकम्पितो गुणग्राही नैकात्मा नैककर्मकृत् ॥ ११५ ॥ सुप्रीतः सुखदः सूक्ष्मः सुकरो दक्षिणानिलः । नन्दिस्कन्दो धरो धुर्य्यः प्रकटः प्रीतिवर्धनः ॥ ११६ ॥ अपराजितः सर्वसहो गोविन्दः सर्ववाहनः ।

अधृतः स्वधृतः सिद्धः पूतमूर्तिर्यशोधनः ॥११७॥ वाराहश्रृङ्गधृक् श्रृङ्गी बलवानेकनायकः । श्रुतिप्रकाशः श्रुतिमानेकबन्धुरनेकधृक् ॥११८॥ श्रीवत्सलः शिवारंभः शान्तभद्रः समो यशः । भूशयो भूषणो भूतिर्भूतिकृद्भूतभावनः ॥११९॥ अकंपो भक्तिकायस्तु कालहानिः कलाविभुः । सत्यव्रतो महात्यागी नित्यः शान्तिपरायणः ॥१२०॥ परार्थवृत्तिर्वरदो विरक्तस्तु विशारदः । शुभदः शुभकर्त्ता च शुभनामा शुभः स्वयम् ॥१२१॥ अनर्थितो गुणग्राही ह्यकर्ता कनकप्रभः । स्वभावभद्रो मध्यस्थः शत्रुघ्नो विघ्ननाशनः ॥१२२॥ शिखण्डी कवची शूली जटी मुण्डी च कुण्डली । अमृत्युः सर्वदृक् सिंहस्तेजोराशिर्महामणिः ॥१२३॥ असंख्येयोऽप्रमेयात्मा वीर्य्यवान् कार्य्यकोविदः । वेद्यश्च वै वियोगात्मा सर्वाचारी मुनीश्वरः ॥१२४॥ अनुत्तमो दुराधर्षो मधुरः प्रियदर्शनः । सुरेशः स्मरणः सर्वः शब्दः प्रतपतां वरः ॥१२५॥ कालभक्षः कलङ्कारिः कङ्कणी कृतवासुकिः । महेष्वासो महीभर्त्ता निष्कलङ्को विश्रृङ्खलः ॥१२६॥ द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धिसाधनः । निवृत्तः संवृतः शिल्पो व्यूढोरस्को महाभुजः ॥१२७॥ एकज्योतिर्निरातंको नरो नारायणप्रियः । निर्लेपो निष्प्रपञ्चात्मा निर्व्यङ्गो व्यङ्गनाशनः ॥१२८॥ स्तव्यः स्तुतिप्रियः स्तोता व्यासमूर्तिरनाकुलः । निरवद्यपदोपायो विद्याराशिरविक्रमः ॥१२९॥ प्रशान्तबुद्धिरक्षुद्रः क्षुद्रहा नित्यसुन्दरः । वैयाघ्रधुर्य्यो धात्रीशः संकल्पः शर्वरीपतिः ॥१३०॥ परमार्थगुरुर्दृष्टिः गुरुराश्रितवत्सलः । रसो रसज्ञो सर्वज्ञः सर्वसत्त्वावलम्बनः ॥१३१॥ एवं नाम्नां सहस्रेण तुष्टाव हि हरं हरिः । प्रार्थयामास शम्भुं वै पूजयामास पङ्कजः ॥१३२॥ ततः स कौतुकी शम्भुश्चकार चरितं द्विजाः । महाद्भुतं सुखकरं तदेव श्रृणुतादरात् ॥१३ ॥

## ४७. भैरवस्तवनम्

( कूर्म, पूर्वार्द्ध, १६ )

अन्धक उवाच—

नमामि मूर्ध्ना भगवन्तमेकं समाहितो यं विदुरीशतत्त्वम् ॥
पुरातनं पुण्यमनन्तरूपं कालं कविं योगवियोगहेतुम् ॥९४॥
दंष्ट्राकरालं दिवि नृत्यमानं हुताशवक्त्रं ज्वलनार्करूपम् ॥
सहस्रपादाक्षिशिरोऽभियुक्तं भवन्तमेकं प्रणमामि रुद्रम् ॥९५॥

अयाविदेवामरपूजिताङ्घ्रे विभागहीनामलतत्त्वरूप ॥
त्वमग्निरेको बहुधाभिपूज्यो बाह्यादिभेदैरखिलात्मरूपः ॥१९६॥
त्वामेकमाहुः पुरुषं पुराणमादित्यवर्णं तमसः परस्तात् ॥
त्वं पश्यसीदं परिपास्यजस्रं त्वमन्तको योगिगणानुजुष्टः ॥१९७॥
एकोऽन्तरात्मा बहुधा निविष्टो देहेषु देहादिविशेषहीनः ॥
त्वमात्मतत्त्वं परमात्मशब्दं भवन्तमाहुः शिवमेव केचित् ॥१९८॥
त्वमक्षरं ब्रह्म परं पवित्रमानन्दरूप प्रणवाभिधानम् ॥
त्वमीश्वरो वेदविदां प्रसिद्धः स्वायम्भुवोऽशेषविशेषहीनः ॥१९९॥
त्वमिन्द्ररूपो वरुणोऽग्निरूपो हंस. प्राणो मृत्युरन्तोऽसि यज्ञः ॥
प्रजापतिर्भगवानेकरूपो नीलग्रीवः स्तूयसे वेदविद्भिः ॥२००॥
नारायणस्त्वं जगतामनादि : पितामहस्त्वं प्रपितामहश्च ॥
वेदान्तगुह्योपनिषत्सु गीतः सदाशिवस्त्वं परमेश्वरोऽसि ॥ १ ॥
नमः परस्मै तमसः परस्तात्परात्मने पञ्चनवान्तराय ॥
त्रिशक्त्यतीताय निरञ्जनाय सहस्रशक्त्यासनसंस्थिताय ॥२॥
त्रिमूर्त्तयेऽनन्तपदात्ममूर्त्तये जगन्निवासाय जगन्मयाय ॥
नमो जनानां हृदि संस्थिताय फणीन्द्रहाराय नमोऽस्तु तुभ्यम् ॥३॥
मुनीन्द्रसिद्धार्चितपादपद्म, ऐश्वर्यधर्मासनसंस्थिताय ॥
नमः परान्ताय भवोद्भवाय सहस्रचन्द्रार्कसहस्रमूर्त्ते ॥४॥
नमोऽस्तु सोमाय सुमध्यमाय नमोऽस्तु देवाय हिरण्यबाहो ॥
नमोऽग्निचन्द्रार्कविलोचनाय नमोऽम्बिकायाः पतये मृडाय ॥५॥
नमोऽस्तु गुह्याय गुहान्तराय वेदान्तविज्ञानविनिश्चिताय ॥
त्रिकालहीनामलधामधाम्ने नमो महेशाय नमः शिवाय ॥६॥

## ४८. कालभैरवाष्टकम्

( स्कान्द, आवन्त्यखण्ड, अवन्तीक्षे.मा., ६४ )

सनत्कुमार उवाच—

सकलकलुषहारी धूर्तदुष्टान्तकारी सुचिरचरितचारी मुण्डमौञ्जीप्रचारी ॥
करकलितकपाली कुण्डली दण्डपाणिः स भवतु सुखकारी भैरवो भावहारी ॥

विविधरासविलासविलासितं नववधूरवधूतपराक्रमम् ॥
मदविघूर्णितगोष्पदगोष्पदं भवपदं सततं सततं स्मरे ॥१७॥
अमलकमलनेत्रं चारुचन्द्रावतंसं सकलगुणगरिष्ठं कामिनीकामरूपम् ॥
परिहृतपरितापं डाकिनीनाशहेतुं भज जन शिवरूपं भैरवं भूतनाथम् ॥१८॥
सबलबलविघातं क्षेत्रपालैकपालं विकटकटिकरालं ह्यट्टहासं विशालम् ॥
करगतकरवालं नागयज्ञोपवीतं भज जन शिवरूपं भैरवं भूतनाथम् ॥१९॥
भवभयपरिहारं योगिनीत्रासकारं सकलसुरगणेशं चारुचन्द्रार्कनेत्रम् ॥
मुकुटरुचिरभालं मुक्तमालं विशालं भज जन शिवरूपं भैरवं भूतनाथम् ॥२०॥

चतुर्भुजं शङ्खगदाधराऽऽयुधं पीताम्बरं सान्द्रपयोदसौभगम् ॥
श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं शीलप्रदं शङ्कररक्षणं भजे ॥२१॥
लोकाऽभिरामं भुवनाभिरामं प्रियाभिरामं यशसाभिरामम् ॥
कीर्त्याभिरामं तपसाऽभिरामं तं भूतनाथं शरणं प्रपद्ये ॥२२॥

आद्यं ब्रह्म सनातनं शुचिपरं सिद्धिप्रदं कामदं
सेव्यं भक्तसमन्वित हरिहरैः सृष्ट्यासह(ः)साधुभिः ॥
योग्यं योगविचारितं युगधरं योग्याननं योगिनं
वन्देऽहं सकलं कलङ्करहितं सत्सेवितं भैरवम् ॥२३॥

[ भैरवाष्टकमिदं पुण्यं प्रातःकाले पठेन्नरः ॥
दुःस्वप्ननाशनं तस्य वाञ्छितार्थफलं भवेत् ॥२४॥
राजद्वारे विवादे च सङ्ग्रामे सङ्कटे तथा ॥
राज्ञा क्रुद्धेन चाऽऽज्ञप्ते शत्रुबन्धगते तथा ॥२५॥
दारिद्र्यदुःखनाशाय पठितव्यं समाहितैः ॥
न तेषां जायते किञ्चिद्दुर्लभं भुवि वाञ्छितम् ॥२६॥ ]

## ४९. अपराजितास्तवनम्

( मार्कण्डेय, अ. ८२ )

देवा ऊचुः–

नमो देव्यै महादेव्यै शिवायै सततं नमः ॥
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥७॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ॥
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥८॥
ज्योत्स्नायै चन्द्ररूपिण्यै सुखायै सततं नमः ॥
कल्याण्यै प्रणतामृध्यै सिद्धयै कूर्म्यै नमो नमः ॥९॥
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥
दुर्गायै दुर्गपारायै सारायै सर्वकारिणि ॥
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥१०॥
अतिसौम्यातिरौद्रायै नमस्तस्यै नमो नमः ॥
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥११॥
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१२॥
या देवी सर्वभूतेषु चेतनेत्यभिधीयते ॥ नमस्तस्यै० ॥१३॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ॥ नमस्तस्यै० ॥१४॥
या देवी सर्वभूतेषु मनोरूपेण संस्थिता ॥ नमस्तस्यै० ॥१५॥
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ॥ नमस्तस्यै० ॥१६॥
या देवी सर्वभूतेषु छायारूपेण संस्थिता ॥ नमस्तस्यै० ॥१७॥
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥ नमस्तस्यै० ॥१८॥
या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ॥ नमस्तस्यै० ॥१९॥
या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ॥ नमस्तस्यै० ॥२०॥
या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ॥ नमस्तस्यै० ॥२२॥
या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ॥ नमस्तस्यै० ॥२३॥
या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ॥ नमस्तस्यै० ॥२४॥
या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ॥ नमस्तस्यै० ॥२५॥
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ॥ नमस्तस्मै० ॥२६॥
या देवी सर्वभूतेषु धृतिरूपेण संस्थिता ॥ नमस्तस्यै० ॥२७॥
या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ॥ नमस्तस्यै० ॥२८॥
या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ॥ नमस्तस्यै० ॥२९॥
या देवी सर्वभूतेषु दयारूपेण संस्थिता ॥ नमस्तस्यै० ॥३०॥

या देवी सर्वभूतेषु नीतिरूपेण संस्थिता ॥ नमस्तस्यै० ॥३१॥
या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ॥ नमस्तस्यै० ॥३२॥
या देवी सर्वभूतेषु पुष्टिरूपेण संस्थिता ॥ नमस्तस्यै० ॥३३॥
या देवी सर्वभुतेषु मातृरूपेण संस्थिता ॥ नमस्तस्यै० ॥३४॥
या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ॥ नमस्तस्यै० ॥३५॥
इन्द्रियाणामधिष्ठात्री भूतानामखिलेषु या ॥
भूतेषु सततव्याप्त्यै तस्यै देव्यै नमो नमः ॥३६॥
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३७॥

स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेन्द्रेशदिनेशसेविता ॥
करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः ॥३८॥
या सांप्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते ॥
या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तविनम्रमूर्तिभिः ॥३९॥

## ५०. अम्बिकास्तोत्रम्

( शिव, रुद्रसं., पा. खं., ३ )

देवा ऊचुः—

देव्यमे जगतामम्ब शिवलोकनिवासिनि ॥
सदा शिवप्रिये दुर्गे त्वां नमाम महेश्वरि ॥२६॥
श्रीशक्ति पावनां शान्तां पुष्टि परमपावनीम् ॥
वयं नमामहे भक्त्या महदव्यक्तरूपिणीम् ॥२७॥
शिवां शिवकरां शुद्धां स्थूलां सूक्ष्मां परायणाम् ॥
अंतर्विद्यासुविद्याभ्यां सुप्रीतां त्वां नमामहे ॥२८॥
त्वं श्रद्धा त्वं धृतिस्त्वं श्रीस्त्वमेव सर्वगोचरा ॥
त्वं दीधितिसूर्यगता स्वप्रपञ्चप्रकाशिनी ॥२९॥
या च ब्रह्माण्डसंस्थाने जगज्जीवेषु या जगत् ॥
आप्याययति ब्रह्मादितृणान्तं तां नमामहे ॥३०॥
गायत्री त्वं वेदमाता त्वं सावित्री सरस्वती ॥
त्वं वार्ता सर्वजगतां त्वं त्रयीधर्मरूपिणी ॥३१॥

निद्रा त्वं सर्वभूतेषु क्षुधा तृप्तिस्त्वमेव हि ॥
तृष्णा कान्तिश्छविस्तुष्टिस्सर्वानन्दकरी सदा ॥३२॥
त्वं लक्ष्मीः पुण्यकर्तृणां त्व ज्येष्ठा पापिनां सदा ॥
त्वं शान्तिः सर्वजगतां त्वं धात्री प्राणपोषिणी ॥३३॥
त्वं तत्त्वरूपा भूतानां पञ्चानामपि सारकृत् ॥
त्वं हि नीतिभृतां नीतिर्व्यवसायस्वरूपिणी ॥३४॥
गीतिस्त्वं सामवेदस्य ग्रन्थिस्त्वं यजुषां हुतिः ॥
ऋग्वेदस्य तथा मात्राथर्वणस्य परा गतिः ॥३५॥
समस्तगीर्वाणगणस्य शक्तिस्तमोमयी धातृगुणैकदृष्या ॥
रजः प्रपंचात्तु भवैकरूपा या न श्रुता भव्यकरी स्तुतेह ॥३६॥
संसारसागरकरालभवाङ्गदुःखनिस्तारकारितरणिश्च निवीतहीनाः ॥
अष्टाङ्गयोगपरिपालनकेलिदक्षां विन्ध्यागवासनिरतां प्रणमाम तां वै ॥
नासाक्षिवक्त्रभुजवक्षसि मानसे च धृत्या सुखानि वितनोषि सदैव जंतोः॥
निद्रेति यातिसुभगा जगती भवानां सा नः प्रसीदतु भवस्थितिपालनाय ॥३८॥

## ५१. कात्यायनीस्तोत्रम् (सर्वसङ्कटकाले)

( मार्कण्डेय, अ. ८८ )

[ बालरविद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम् ॥
स्मेरमुखीं वरदाङ्कुशपाशाभीतिकरां प्रभुजे भुवनेशीम् ॥ ]

ऋषिरुवाच–

ॐ देव्या हते तत्र महासुरेन्द्रे सेन्द्राः सुरा वह्निपुरोगमास्ताम् ॥
कात्यायनीं तुष्टुवुरिष्टलाभाद्विकाशिवक्त्राब्जविकाशिताशाः ॥१॥

देवा ऊचुः–

देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ॥
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥२॥
आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि ॥
अपां स्वरूपस्थितया त्वयैतदाप्याय्यते कृत्स्नमलंघ्यवीर्ये ॥३॥
त्वं वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं परमासि माया ॥
संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥४॥

विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकलं जगच्च ॥
त्वयैकया पूरितमम्बयैतत्का ते स्तुतिः स्तव्यपरा परोक्तिः ॥५॥

सर्वभूता यदा देवि भुक्तिमुक्तिप्रदायिनी ॥
त्वं स्तुता स्तुतये का वा भवन्ति परमोक्तयः ॥६॥
सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ॥
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥७॥
कलाकाष्ठादिरूपेण परिणामप्रदायिनि ॥
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥८॥
सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ॥
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥९॥
सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ॥
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥१०॥
शरणागतदीनार्त्तपरित्राणपरायणे ॥
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥११॥
हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ॥
कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते ॥१२॥
त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ॥
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥१३॥
मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ॥
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥१४॥
शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे ॥
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥१५॥
गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे ॥
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥१६॥
नृसिंहरूपेणोग्रेण हन्तुं दैत्यान्कृतोद्यमे ॥
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥१८॥
शिवदूतीस्वरूपेण हतदैत्ये महाबले ॥
घोररूपे महारावे नारायणि नमोऽस्तु ते ॥१९॥

दंष्ट्राकरालवदने शिरोमालाविभूषणे ॥
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥२०॥
लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टे स्वधे ध्रुवे ॥
महारात्रे महामाये नारायणि नमोऽस्तु ते ॥२१॥
मेधे सरस्वति वरे भूति बाभ्रवि तामसि ॥
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥२२॥
सर्वतः पाणिपादान्ते सर्वतोऽक्षिशिरोमुखे ॥
सर्वतः श्रवणघ्राणे नारायणि नमोऽस्तु ते ॥२३॥
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥२४॥
एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥२५॥
ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥ ६॥
हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव ॥२७॥
असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः ॥
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम ॥२८॥

रोगानशेषानपहंसि तुष्टा ददासि कामान्सकलानभीष्टान् ॥
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥२९॥
एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणाम् ॥
रूपैरनेकैर्बहुधात्ममूर्ति कृत्वाम्बिके तत्प्रकरोति कान्या ॥३०॥
विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ॥
ममत्वगर्तेतिमहान्धकारे विभ्रामयस्येतदतीव विश्वम् ॥३१॥
रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र ॥
दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम् ॥३२॥
विश्वेश्वरी त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम् ॥
विश्वेशवन्द्या भवती भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः ॥३३॥

देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः ॥
पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ॥३४॥

प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ॥
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥३५॥

## ५२. कामाक्षीस्तोत्रम् ( ललिता )

( ब्रह्माण्ड, उत्तर भाग, १३ )

देवा ऊचुः-

जय देवि जगन्मातर्जय देवि परात्परे ॥
जय कल्याणनिलये जय कामकलात्मिके ॥१॥
जयकारि च वामाक्षि जय कामाक्षि सुन्दरि ॥
जयाखिलसुराराध्ये जय कामेशि मानदे ॥२॥
जय ब्रह्ममये देवि ब्रह्मात्मकरसात्मिके ॥
जय नारायणि परे नंदिताशेषविष्टपे ॥३॥
जय श्रीकण्ठदयिते जय श्रीललितेम्बिके ॥
जय श्रीविजये देवि विजयश्रीसमृद्धिदे ॥४॥
जातस्य जायमानस्य इष्टापूर्तस्य हेतवे ॥
नमस्तस्यै त्रिजगतां पालयित्र्यै परात्परे ॥५॥
कलामुहूर्तकाष्ठाहर्मासर्तुशरदात्मने ॥
नमः सहस्रशीर्षायै सहस्रमुखलोचने ॥६॥
नमः सहस्रहस्ताब्जपादपङ्कजशोभिते ॥
अणोरणुतरे देवि महतोऽपि महीयसि ॥७॥
परात्परतरे मातस्तेजस्तेजीयसामपि ॥
अतलं तु भवेत्पादौ वितलं जानुनी तव ॥८॥
रसातलं कटीदेशः कुक्षिस्ते धरणी भवेत् ॥
हृदयं तु भुवर्लोकः स्वस्ते मुखमुदाहृतम् ॥९॥
दृशश्चन्द्रार्कदहना दिशस्ते बाहवोऽम्बिके ॥
मरुतस्तु तवोच्छ्वासा वाचस्ते श्रुतयोऽखिलाः ॥१०॥

क्रीडा ते लोकरचना सखा ते चिन्मयः शिवः ॥
आहारस्ते सदानन्दो वासस्ते हृदये सताम् ॥११॥
दृश्यादृश्यस्वरूपाणि रूपाणि भुवनानि ते ॥
शिरोरुहा घनास्ते तु तारकाः कुसुमानि ते ॥१२॥
धर्माद्या बाहवस्ते स्युरधर्माद्यायुधानि ते ॥
यमाश्च नियमाश्चैव करपादरुहास्तथा ॥१३॥
स्तनौ स्वाहास्वधाकारौ लोकोज्जीवनकारकौ ॥
प्राणायामस्तु ते नासा रसना ते सरस्वती ॥१४॥
प्रत्याहारस्त्विन्द्रियाणि ध्यानं ते धीस्तु सत्तमा ॥
मनस्ते धारणाशक्तिर्हृदयं ते समाधिकः ॥१५॥
महीरुहास्तेऽङ्गरुहाः प्रभातं वसनं तव ॥
भूतं भव्यं भविष्यच्च नित्यं च तव विग्रहः ॥१६॥
यज्ञरूपा जगद्धात्री विश्वरूपा च पावनी ॥
आदौ या तु दयाभूता ससर्ज निखिलाः प्रजाः ॥१७॥
हृदयस्थापि लोकानामदृश्या मोहनात्मिका ॥
नामरूपविभागं च या करोति स्वलीलया ॥१८॥
तान्यधिष्ठाय तिष्ठन्ति तेष्वसक्तार्थकामदा ॥
नमस्तस्यै महादेव्यै सर्वशक्त्यै नमोनमः ॥१९॥
यदाज्ञया प्रवर्तन्ते वह्निसूर्येन्दुमारुताः ॥
पृथिव्यादीनि भूतानि तस्यै देव्यै नमोनमः ॥२०॥
नमोनमस्ते रजसे भवायै नमोनमः सात्त्विकसंस्थितायै ॥
नमोनमस्ते तमसे हरायै नमोनमो निर्गुणतः शिवायै ॥ ४॥
नमोनमस्ते जगदेकमात्रे नमो नमस्ते जगदेकपित्रे ॥
नमोनमस्तेऽखिलरूपतन्त्रे नमो नमस्तेऽखिलयन्त्ररूपे ॥२५॥
नमोनमो लोकगुरुप्रधाने नमोनमस्तेऽखिलवाग्विभूत्यै ॥
नमोऽस्तु लक्ष्म्यै जगदेकतुष्ट्यै नमोनमः शांभवि सर्वशक्त्यै ॥२६॥
अनादिमध्यान्तमपाञ्चभौतिकं ह्यवाङ्मनोगम्यमतर्क्यवैभवम् ॥
अरूपमद्वन्द्वमदृष्टिगोचरं प्रभावमग्र्यं कथमम्ब वर्णये ॥२७॥

प्रसीद विश्वेश्वरि विश्ववन्दिते प्रसीद विद्येश्वरि वेदरूपिणि ॥
प्रसीद मायामयि मंत्रविग्रहे प्रसीद सर्वेश्वरि सर्वरूपिणि ॥२८॥

## ५३. काली-शिवदूती-स्तवनम्

(पद्म, सृष्टिखण्ड, अ. २६)

जयस्व देवि चामुण्डे जय भूतापहारिणि ॥
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥१३३॥
विश्वमूर्ते शुभे शुद्धे विरूपाक्षि त्रिलोचने ॥
भीमरूपे शिवे विद्ये महामाये महोदये ॥१३४॥
मनोजये जये जम्भे भीमाक्षि क्षुभितक्षये ॥
महामारि विचित्रांगि गेयनृत्यप्रिये शुभे ॥१३५॥
विकरालि महाकालि कालिके पापहारिणि ॥
पाशहस्ते दण्डहस्ते भीमरूपे भयानके ॥१३६॥
चामुण्डे ज्वलमानास्ये तीक्ष्णदंष्ट्रे महाबले ॥
सर्वयानस्थिते देवि प्रेतासनगते शिवे ॥१३७॥
भीमाक्षि भीषणे देवि सर्वभूतभयङ्करि ॥
करालि विकराले च महाकालि करालिनि ॥१३८॥
कालि करालवक्त्रान्ते कालरात्रि नमोऽस्तु ते ॥
सर्वशस्त्रभृते देवि सर्वदेवनमस्कृते ॥१३९॥

## ५४. गंगास्तवनम्

(ब्रह्म, गौ. मा., ४८)

किं वाऽभविष्यन्भववर्तिनो जना नानाघसंगाभिभवोत्थदुःखाः ॥
न चाऽऽगमिष्यद्भुवती भुवं चेत्पुण्योदके गौतमि शंभुकान्ते ॥९॥
को वेत्ति भाग्यं नरदेहभाजां महीगतानां सरितामधीशे ॥
एषां महापातकसङ्घहन्त्री त्वमम्ब गङ्गे सुलभा सदैव ॥१०॥
न ते विभूतिं ननु वेत्ति कोऽपि त्रैलोक्यवन्द्ये जगदम्ब गङ्गे ॥
गौरी समालिंगितविग्रहोऽपि धत्ते स्मरारिः शिरसाऽपि यत्त्वाम् ॥११॥
नमोऽस्तु ते मातरभीष्टदायिनि नमोऽस्तु ते ब्रह्ममयेऽघनाशिनि ॥
नमोऽस्तु ते विष्णुपदाब्जनिःसृते नमोऽस्तु ते शंभुजटाविनिःसृते ॥१२॥

# ५५. चण्डिकास्तोत्रम्

( मार्कण्डेय, ८१ )

ऋषिरुवाच—

[ततः सुरगणाः सर्वे देव्या इन्द्रपुरोगमाः ॥
स्तुतिमारेभिरे कर्त्तुं निहते महिषासुरे ॥१॥

शक्रादयः सुरगणा निहतेतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या ॥
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥२॥]

देवा ऊचुः—

देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या ॥
तामम्बिकामखिलदेवमहर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि सा नः ॥
यस्याः प्रभावमतुलं भगवाननन्तो ब्रह्मा हरश्च न हि वक्तुमलं बलं च ॥
सा चण्डिकाखिलजगत्परिपालनाय नाशाय चाशुभभयस्य मतिं करोतु ॥४॥
या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः ॥
श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम् ॥
किं वर्णयाम तव रूपमचिन्त्यमेतत्किं चातिवीर्यमसुरक्षयकारि भूरि ॥
किं चाहवेषु चरितानि तवाद्भुतानि सर्वेषु देव्यसुरदेवगणादिकेषु ॥६॥
हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा ॥
सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥७॥
यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयान्ति सकलेषु मखेषु देवि ॥
स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च ॥८॥
या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ॥
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासि सा भगवती परमा हि देवि ॥९॥
शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नाम् ॥
देवि त्रयी भगवतीभवभावनाय वार्त्तासि सर्वजगतां परमार्त्तिहन्त्री ॥१०॥
मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसङ्गा ॥
श्रीः कैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥११॥
ईषत्सहासममलं परिपूर्णचन्द्रबिम्बानुकारि कनकोत्तमकान्ति कान्तम् ॥
अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ॥१२॥

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशांकसदृशच्छवि यन्न सद्यः ॥
प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥१३॥
देवि प्रसीद परमा भवती भवाय सद्यो विनाशयसि कोपवती कुलानि ॥
विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य ॥१४॥
ते संमता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति बन्धुवर्गः ॥
धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना ॥१४॥
धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति ॥
स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥१६॥
दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥
दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥१७॥
एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वन्तु नाम नरकाय चिराय पापम् ॥
संग्राममृत्युमधिगम्य दिवं प्रयान्तु मत्वेति नूनमहितान्विनिहंसि देवि ॥१८॥
दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ॥
लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वहितेषु साध्वी ॥
खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ॥
यन्नागता विलयमंशुमदिन्दुखण्डयोग्याननं तव विलोकयतां तदेतत् ॥२०॥
दुर्वृत्तवृत्तशमन तव देवि शीलं रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ॥
वीर्यं च हन्तृ हृतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥२१॥
केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहारि कुत्र ॥
चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥२२॥
त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्द्धनि तेऽपि हत्वा ॥
नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते ॥२३॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥
घण्टास्वनेन नः पाहि चापज्यनिःस्वनेन च ॥२४॥
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥२५॥
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ॥
यानि चात्यन्तघोराणि तै रक्षास्मांस्तथा भुवम् ॥२६॥

खड्गशूलगदादीनि यानि चास्त्राणि चाम्बिके ॥
करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्वतः ॥२७॥

## ५६. गायत्रीस्तवः

(पद्म, सृष्टिखण्ड, अ. १७॰)

नमोऽस्तु वेदमातरष्टाक्षरविशोधिते ॥
गायत्री दुर्गतरणी वाणी सप्तविधा तथा ॥११॥
अक्षराणि च सर्वाणि लक्षणानि तथैव च ॥
भाष्याणि सर्वशास्त्राणि त्वं तु देवि नमोऽस्तु ते ॥१२॥
श्वेता त्वं श्वेतरूपासि शशाङ्केन समानना ॥
बिभ्रती विपुलौ बाहू कदलीगर्भकोमलौ ॥१३॥
एणशृङ्गं करे गृह्य पङ्कजं च सुनिर्मलम् ॥
वसाना वसने क्षौमे रक्तेनोत्तरवाससा ॥१४॥
शशिरश्मिप्रकाशेन हारेणोरसि राजिता ॥
दिव्यकुण्डलपूर्णाभ्यां कर्णाभ्यां सुविभूषिता ॥१५॥
चन्द्रसापत्न्यभूतेन मुखेन त्वं विराजसे ॥
मुकुटेनातिशुद्धेन केशबन्धेन शोभिता ॥१६॥
भुजगाभोगसदृशौ भुजौ ते भूषणं दिवः ॥
स्तनौ ते रुचिरौ देवि वर्तुलौ समचूचुकौ ॥१७॥
जघनेनातिशुभ्रेण त्रिवलीभङ्गदर्पिता ॥
सुमध्यवर्तिनी नाभिर्गम्भीरा शुभदर्शिनी ॥१८॥
विस्तीर्णजघना देवी सुश्रोणी च वरानने ॥
सुजातवृत्तोरुयुगा सुजानुचरणा तथा ॥१९॥
त्रैलोक्यधारिणी सा त्वं भुवि सत्योपयाचना ॥
भविष्यसि महाभागे वरदा वरवर्णिनी ॥२०॥
पुष्करे च कृता यात्रा दृष्ट्वा त्वां संभविष्यति ॥
ज्येष्ठे मासे पौर्णमास्यामग्र्यां पूजां च लप्स्यसे ॥२१॥

## ५७. तुलसीस्तवः

(ब्रह्मवैवर्त, प्रकृतिखण्ड, अ. २१)

श्रीभगवानुवाच–

वृन्दारूपाश्च वृक्षाश्च यदैकत्र भवन्ति च ॥
विदुर्बुधास्तेन वृन्दां मत्प्रियां तां भजाम्यहम् ॥१८॥

पुरा बभूव या देवी ह्यादौ वृन्दावने वने ॥
तेन वृन्दावनी ख्याता सुभगां तां० ॥१९॥
असंख्येषु च विश्वेषु पूजिता या निरन्तरम् ॥
तेन विश्वपूजिताख्यां जगत्पूज्यां भजाम्यहम् ॥२०॥

असंख्यानि च विश्वानि पवित्राणि यया सदा ॥
तां विश्वपावनीं देवीं विरहेण स्मराम्यहम् ॥२१॥
देवा न तुष्टाः पुष्पाणां समूहेन यया विना ॥
तां पुष्पसारां शुद्धां च द्रष्टुमिच्छामि शोकतः ॥२२॥
विश्वे यत्प्राप्तिमात्रेण भक्त्यानन्दो भवेद्ध्रुवम् ॥
नन्दिनी तेन विख्याता सा प्रीता भविता हि मे ॥ ३॥
यस्या देव्यास्तुला नास्ति विश्वेषु निखिलेषु च ॥
तुलसी तेन विख्याता तां यामि शरणं प्रियाम् ॥२४॥
कृष्णजीवनरूपा या शश्वत्प्रियतमा सती ॥
तेन कृष्णजीवनीति मम रक्षतु जीवनम् ॥२५॥
[ कार्तिकीपूर्णिमायां च तुलस्या जन्म मङ्गलम् ॥
तत्र तस्याश्च पूजा च विहिता हरिणा पुरा ॥३४॥]

## ५८. त्रिपुरसुन्दरीस्तोत्रम्

( ब्रह्माण्ड, उत्तरभाग, ४० )

पादाग्रलंबिपरमाभरणाभिरामे मञ्जीररत्नरुचिमञ्जुलपादपद्मे ॥
पीताम्बरस्फुरितपेशलहेमकाञ्चि केयूरकङ्कणपरिष्कृतबाहुवल्लि ॥१२४॥
पुण्ड्रेक्षुचापविलसन्मृदुवामपाणे रत्नोर्मिकासुमशराञ्चितदक्षहस्ते ॥
वक्षोजमण्डलविलासिवलक्षहारि पाशांकुशांगदलसद्भुजशोभितांगि ॥१२५॥

वक्त्रश्रियाविजितशारदचन्द्रबिम्बे ताटंकरत्नकरमण्डितगण्डभागे ॥
वामे करे सरसिजं सुबिसं दधाने कारुण्यनिर्झरदपाङ्गयुते महेशि ॥१२६॥
माणिक्यसूत्रमणिभासुरकम्बुकण्ठि भालस्थचन्द्रशकलोज्ज्वलितालकाढ्ये ॥
मन्दस्मितस्फुरणशालिनि मञ्जुनासे नेत्रश्रिया विजितनीलसरोजपत्रे ॥१२७॥
सुभ्रूलते सुवदने सुललाटचित्रे योगीन्द्रमानससरोजनिवासहंसि ॥
रत्नानुबद्धतपनीयमहाकिरीटे सर्वांगसुन्दरि समस्तसुरेन्द्रवन्द्ये ॥१२८॥
कांक्षानुरूपवरदे करुणार्द्रचित्ते साम्राज्यसम्पदभिमानिनि चक्रनाथे ॥
इन्द्रादिदेवपरिसेवितपादपद्मे सिंहासनेश्वरि परे मयि सन्निदध्याः ॥१२९॥

## ५९. दुर्गास्तुतिः (वज्रपञ्जरसंज्ञिका)

(स्कान्द, काशीखण्ड, ७२)

मातस्त्वयाद्य विनिहत्य महासुरेन्द्रं दुर्गं निसर्गविबुधार्पितदैत्यसैन्यम् ॥
त्राताः स्म देवि सततं नमतां शरण्ये त्वत्तोऽपरः क इह यं शरणं व्रजामः ॥
लोके त एव धनधान्यसमृद्धिभाजस्ते पुत्रपौत्रसुकलत्रसुमित्रवन्तः ॥
तेषां यशः प्रसरचन्द्रकरावदातं विश्वं भवेद्भवसि येषु सुदृक्त्वमीशे ॥५१॥
त्वद्भक्ति चेतसि जनेन विपत्तिलेशः क्लेशः क्व वानुभवतो नतिकृत्पुंसु ॥
त्वन्नामसंस्मृतिजुषां सकलायुषां क्व भूयः पुनर्जनिरिह त्रिपुरारिपत्नि ॥५२॥
चित्रं यदत्र समरे स हि दुर्गदैत्यस्त्वद्दृष्टिपातमधिगम्य सुधानिधानम् ॥
मृत्योर्वशत्वमगमद्विदितं भवानि दुष्टोऽपि ते दृशिगतः कुगतिं न याति ॥५३॥
त्वच्छस्त्रवह्निशलभत्वमिता अपीह दैत्याः पतङ्गरुचिमाप्य दिवं व्रजन्ति ॥
सन्तः खलेष्वपि न दुष्टधियो यतः स्युः साधुष्विव प्रणयिनः स्वपथं विशन्ति ॥
प्राच्यां मृडानि परिपाहि सदा नतान्नो याम्यामवप्रतिपदं विपदो भवानि ॥
प्रत्यग्दिशि त्रिपुरतापनपत्नि रक्ष त्व पाह्युदीचिनिजभक्तजनान्महेशि ॥५५॥
ब्रह्माणि रक्ष सततं नतमौलिदेशं त्व वैष्णवि प्रतिकुल परिपालयाधः ॥
रुद्राग्निनैर्ऋतिसदागतिदिक्षु पान्तु मृत्युञ्जया त्रिनयना त्रिपुरा त्रिशक्त्यः ॥
पातु त्रिशूलममले तव मौलिजान्नो भालस्थलं शशिकला मृदुमाभ्रुवौ च ॥
नेत्रे त्रिलोचनवधूर्गिरिजा च नासामोष्ठं जया च विजया त्वधरप्रदेशम् ॥
श्रोत्रद्वयं श्रुतिरवा दशनावलिं श्रीश्चण्डीकपोलयुगलं रसनां च वाणी ॥
पायात्सदैव चिबुकं जय मङ्गला नः कात्यायनी वदनमण्डलमेव सर्वम् ॥५८॥

कण्ठप्रदेशमवतादिह नीलकण्ठी भूदारशक्तिरनिशं च कृकाटिकायाम् ॥
कौर्म्यं सदेशमनिशं भुजदण्डमैन्द्री पद्मा च पाणिफलकं नतिकारिणां नः ॥
हस्ताङ्गुलीः कमलजा विरजा नखांश्च कक्षान्तरं तरणिमण्डलगा तमोघ्नी ॥
वक्षःस्थलं स्थलचरीहृदयं धरित्री कुक्षिद्वयं त्ववतु नः क्षणदाचरघ्नी ॥६०॥
अव्यात्सदोदरदरीं जगदीश्वरी नो नाभिं नभोगतिरजा त्वथ पृष्ठदेशम् ॥
पायात्कटिं च विकटा परमा स्फिचौ नो गुह्यं गुहारणिरपानमपायहंत्री ॥६१॥
ऊरुद्वयं च विपुला ललिता च जानुजङ्घे जवाऽवतु कठोरतरांत्रगुल्फौ ॥
पादौ रसातलचराङ्गुलिदेशमुग्रा चान्द्रीनखान्पदतलं तलवासिनी च ॥६२॥

गृह रक्षतु नो लक्ष्मीः क्षेत्रं क्षेमकरी सदा ॥
पातु पुत्रान्प्रियकरी पायादायुः सनातनी ॥६३॥
यशः पातु महादेवी धर्मं पातु धनुर्धरी ॥
कुलदेवी कुलं पातु सद्गतिं सद्गतिप्रदा ॥६४॥
रणे राजकुले द्यूते सङ्ग्रामे शत्रुसङ्कटे ॥
गृहे वने जलादौ च शर्वाणी सर्वतोऽवतु ॥६५॥

## ६०. नवदुर्गास्तवः

(भविष्य, उत्तरपर्व, ६१)

[ दुर्गा चामुण्डया सार्धं नवदुर्गासमन्विता ॥
आद्या तावन्महालक्ष्मीर्नन्दा क्षेमङ्करी तथा ॥९॥
शिवदूती महारुण्डा भ्रामरी चन्द्रमङ्गला ॥
रेवती हरसिद्धिस्तु नवैताः परिकीर्त्तिताः ॥
एतासां ते स्तुतिं चक्रुस्त्रिदशाः प्रणताननाः ॥१०॥ ]

अमरपतिमुकुटचुम्बितचरणाम्बुजसकलभुवनसुखजननी ॥
जयति जगदीशवन्दिता सकलामलनिष्कला दुर्गा ॥११॥
विकृतनखदशनभूषणरुधिरवशाच्छुरितक्षतखड्गहस्ता ॥
जयति नरमुण्डमुण्डितपिशितसुराहाररक्तचण्डी ॥१२॥
प्रच्छादितशिखिगणोद्वलविकटजटाबद्धचन्द्रमणिशोभा ॥
जयति दिगम्बरभूषा सिद्धवटेषा महालक्ष्मीः ॥१३॥

करकमलजनितशोभा पद्मासनबद्धपद्मवदना च ॥
जयति कमण्डलुहस्ता नन्दा देवी नतार्तिहरा ॥१४॥
दिग्वसना विकृतमुखा फेत्कारोद्दामपूरितदिशोघा ॥
जयति विकरालदेहा क्षेमङ्करी रौद्रभावस्था ॥१५॥
क्रोशितब्रह्माण्डोदसुरवरहुंकृतनिनादा ॥
जयति मदातिमितहस्ता शिवदूती प्रथमशिवशक्तिः ॥१६॥
मुक्ताट्टहासभैरवदुःसहतरचकितसकलदिक्चक्रा ॥
जयति भुजगेन्द्रमणिशोभितकर्णा महातुण्डा ॥१७॥
पटुपटहमुरजमर्दलझल्लरिझङ्कारनर्तितावयवा ॥
जयति मधुव्रतरूपा दैत्यहरी भ्रामरी देवी ॥१८॥
शान्ता प्रशान्तवदना सिंहवरा ध्यानयोगतन्निष्ठा ॥
जयति चतुर्भुजदेहा चन्द्रकला चन्द्रमण्डला देवी ॥१९॥
पक्षपुटचञ्चुघातैः संचूर्णितविविधशत्रुसंघाता ॥
जयति शितशूलहस्ता बहुरूपा रेवती भद्रा ॥२०॥
पर्यटति जगति हृष्टा पितृवननिलयेषु योगिनीसहिता ॥
जयति हरसिद्धिनाम्नी हरसिद्धिर्वन्दिता सिद्धैः ॥२१॥

## ६१. पार्वतीस्तवनम्

( मत्स्य, अ. १५८ )

वीरक उवाच—

[शिरसा तु ततो वन्द्य मातरं पूर्णमानसः ॥
उवाचोदितपूर्णेन्दुद्युतिं च हिमशैलजाम् ॥१०॥]

नतसुरासुरमौलिमिलन्मणिप्रचयकान्तिकरालनखांकिते (त्रिके इ पा.)
नगसुते शरणागतवत्सले तव नतोऽस्मि नतार्त्तिविनाशिनि ॥११॥
तपनमण्डलमण्डितकन्धरे पृथुसुवर्णसुवर्णनगद्युते ॥
विषभुजङ्गनिषङ्गविभूषिते गिरिसुते भवतीमहमाश्रये ॥१२॥
जगति कः प्रणताभिमतं ददौ झटिति सिद्धनुते भवती यथा ॥
जगति कां च न वाञ्छति शङ्करो भुवनधृत्तनये भवतीं यथा ॥१३॥

विमलयोगविनिर्मितदुर्जयस्वतनुतुल्यमहेश्वरमण्डले ॥
विदलितान्धकबान्धवसंहतिः सुरवरैः प्रथमं त्वमभिष्टुता ॥१४॥
सितसटापटलोद्धतकन्धराभरमहामृगराजरथस्थिता ॥
विमलशक्तिमुखानलपिङ्गलायतभुजौघविपिष्टमहासुरा ॥१५॥
निगदिता भुवनैरिति चण्डिका जननि शुम्भनिशुम्भनिषूदनी ॥
प्रणतचिन्तितदानवदानवप्रमथनैकरतिस्तरसा भुवि ॥१६॥
वियति वायुपथे ज्वलनोज्ज्वलेऽवनितले तव देवि च यद्वपुः ॥
तदजितेऽप्रतिमे प्रणमाम्यहं भुवनभाविनि ते भवबल्लभे ॥१७॥
जलधयो ललितोद्धतवीचयो हुतवहद्युतयश्च चराचरम् ॥
फणसहस्रभृतश्च भुजङ्गमास्त्वदभिधास्यति मय्यभयङ्कराः ॥१८॥
भगवति स्थिरभक्तजनाश्रये प्रतिगतो भवतीचरणाश्रयम् ॥
करणजातमिहास्तु ममाचलं नुतिलवाप्तिफलाशयहेतुतः ॥
प्रशममेहि ममाऽऽत्मजवत्सले तव नमोऽस्तु जगत्त्रयसंश्रये ॥१९॥
त्वयि ममास्तु मतिः सततं शिवे शरणगोऽस्मि नतोऽस्मि नमोऽस्तु ते ॥२०॥

## ६२. भद्रकालीस्तोत्रम्

( ब्रह्माण्ड, मध्यभाग, ३९ )

[ बभूव पुष्पमालां च तच्छूलं नृपतेर्गले ॥
ददर्श च पुरस्तस्य भद्रकालीं जगत्प्रसूम् ॥३३॥
वहन्तीं मुण्डमालां च विकटास्यां भयङ्करीम् ॥
सिंहस्थां च त्रिनेत्रां च त्रिशूलवरधारिणीम् ॥
दृष्ट्वा विहाय शस्त्रास्त्रं नमस्कृत्य समैडत ॥३४॥ ]

परशुराम उवाच—

नमोऽस्तु ते शंकरवल्लभायै जगत्सवित्र्यै समलङ्कृतायै ॥३५॥
नानाविभूषाभिरिभारिगायै प्रपन्नरक्षाविहितोद्यमायै ॥
दक्षप्रसूत्यै हिमवद्भवायै महेश्वरार्द्धांगसमास्थितायै ॥३६॥
काल्यै कलानाथकलाधरायै भक्तप्रियायै भुवनाधिपायै ॥
ताराभिधायै शिवतत्परायै गणेश्वराराधितपादुकायै ॥३७॥

परात्परायै परमेष्ठिदायै तापत्रयोन्मूलनचिन्तनायै ॥
जगद्धितायास्तपुरत्रयायै बालादिकायै त्रिपुराभिधायै ॥३८॥
समस्तविद्यासु विलासदायै जगज्जनन्यै निहिताहितायै ॥
बकाननायै बहुसौख्यदायै विध्वस्तनानासुरदानवायै ॥३९॥
वराभयालङ्कृतदोर्लतायै समस्तगीर्वाणनमस्कृतायै ॥
पीताम्बरायै पवनाशुगायै शुभप्रदायै शिवसंस्तुतायै ॥४०॥
नागारिगायै नवखण्डपायै नीलाचलाभांगलसत्प्रभायै ॥
लघुक्रमायै ललिताभिधायै लेखाधिपायै लवणाकरायै ॥४१॥
लोलेक्षणायै लयवर्जितायै लाक्षारसालङ्कृतपङ्कजायै ॥
रमाभिधायै रतिसुप्रियायै रोगापहायै रचिताखिलायै ॥४२॥
राज्यप्रदायै रमणोत्सुकायै रत्नप्रभायै रुचिराम्बरायै ॥
नमो नमस्ते परतः पुरस्तात् पार्श्वाधरोर्ध्वं च नमो नमस्ते ॥४३॥
सदा च सर्वत्र नमो नमस्ते नमो नमस्तेऽखिलविग्रहायै ॥
प्रसीद देवेशि मम प्रतिज्ञां पुरा कृतां पालय भद्रकालि ॥४४॥
त्वमेव माता च पिता त्वमेव जगत्त्रयस्यापि नमो नमस्ते ॥४५॥

## ६३. मङ्गलाष्टकम् (मङ्गलागौर्याः)

( स्कान्द, काशीखण्ड, ४९ )

रविरुवाच—

देवि त्वदीयचरणाम्बुजरेणुगौरीं भालस्थलीं वहति यः प्रणतिप्रवीणः ॥
जन्मान्तरेऽपि रजनीकरचारुलेखा तां गौरयत्यतितरां किल तस्य पुंसः ॥५५॥
श्रीमङ्गले सकलमङ्गलजन्मभूमे श्रीमङ्गले सकलकल्मषतूलवह्ने ॥
श्रीमङ्गले सकलदानवदर्पहंत्रि श्रीमङ्गलेऽखिलमिदं परिपाहि विश्वम् ॥५६॥
विश्वेश्वरि त्वमसि विश्वजनस्य कर्त्री त्वं पालयित्र्यसि तथा प्रलयेऽपि हंत्री ॥
त्वन्नामकीर्तनसमुल्लसदच्छपुण्या स्रोतस्विनी हरति पातककूलवृक्षान् ॥५७॥
मातर्भवानि भवती भवतीव्रदुःखसंभारहारिणि शरण्यमिहास्ति नान्या ॥
धन्यास्त एव भुवनेषु त एव मान्या येषु स्फुरेत्तव शुभः करुणाकटाक्षः ॥५८॥
ये त्वां स्मरन्ति सततं सहजप्रकाशां काशीपुरीस्थितिमतीं नतमोक्षलक्ष्मीम् ॥
तान्संस्मरेत्स्मरहरोधृतशुद्धबुद्धीन्निर्वाणरक्षणविचक्षणपात्रभूतान् ॥५९॥

मातस्तवांघ्रियुगलं विमलं हृदिस्थं यस्यास्ति तस्य भुवनं सकलं करस्थम् ॥
यो नाम ते जपति मङ्गलगौरि नित्यं सिद्ध्यष्टकं न परिमुञ्चति तस्य गेहम्॥
त्वं देवि वेदजननी प्रणवस्वरूपा गायत्र्यसि त्वमसि वै द्विजकामधेनुः ॥
त्वं व्याहृतित्रयमिहाऽखिलकर्मसिद्ध्यै स्वाहा स्वधासि सुमनः पितृतृप्तिहेतुः ॥
गौरि त्वमेव शशिमौलिनि वेधसि त्वं सावित्र्यसि त्वमसि चक्रिणि चारुलक्ष्मीः
काश्यां त्वमस्यमलरूपिणि मोक्षलक्ष्मीस्त्वं मे शरण्यमिह मङ्गलगौरिमातः ॥
[ स्तुत्वेति तां स्मरहरार्द्धशरीरशोभां श्रीमङ्गलाष्टकमहास्तवनेन भानुः ॥
देवीं च देवमसकृत्परितः प्रणम्य तूष्णीं बभूव सविता शिवयोः पुरस्तात् ॥ ]

## ६४. यमुनागङ्गास्तवः

( पद्म, उत्तरखण्ड, २३ )

त्वद्वार्तां प्रयतो ब्रवीमि यदहं साऽस्तु स्तुतिस्ते प्रभो
यद्भुञ्जे तव संनिवेदनमथो यद्यामि सा प्रेष्यता ॥
यच्छ्रान्तः स्वपिमि त्वदंघ्रियुगुले दण्डप्रणामोऽस्तु मे
स्वामिन्यच्च करोमि तेन स भवान्विश्वेश्वरः प्रीयताम् ॥१५॥

दृष्टेन वन्दितेनापि स्पृष्टेन च धृतेन च ॥
नरा येन विमुच्यन्ते तदेतद्यामुनं जलम् ॥१६॥

तावद्भ्रमन्ति भुवने मनुजा भवोत्थदारिद्र्यरोगमरणव्यसनाभिभूताः ॥
यावज्जलं तव महानदि नीलनीलं पश्यन्ति नो दधाति मूर्धसु सूर्यपुत्रि॥

यत्संस्मृतिः सपदि कृन्तति दुष्कृतौघं
पापावलीं जयति योजनलक्षतोऽपि ॥
यन्नाम नाम जगदुच्चरितं पुनाति
दिष्ट्या हि सा पथि दृशोर्भविताऽद्य गङ्गा ॥१८॥

आलोकोत्कण्ठितेन प्रमुदितमनसा वर्त्म यस्याः प्रयातं
सत्यस्मिन्कृत्यमेतामथ प्रथमकृती जज्ञिवान्स्वर्गसिन्धुम् ॥
स्नानं सन्ध्या निवापः सुरयजनमपि श्राद्धविप्राशनाद्यं
सर्वं संपूर्णमेतद्भवति भगवतः प्रीतिदं नात्र चित्रम् ॥१९॥

देवि भूतं परं ब्रह्म परमानन्ददायिनि ॥
अर्घ्यं गृहाण मे गङ्गे पापं हर नमोऽस्तु ते ॥२०॥

साक्षाद्धर्मद्रवोधं मुररिपुचरणाम्भोजपीयूषसारं
दुःखस्याब्धेस्तरित्रं सुरदनुजनुतं स्वर्गसोपानमार्गम् ॥
सर्वांहोहारि वारि प्रवरगुणगणं भासि या संवहन्ती
तस्यै भागीरथि श्रीमति मुदितमना देवि कुर्वे नमस्ते ॥२१॥
स्वःसिन्धो दुरिताब्धिमग्नजनतासंतारणि प्रोल्लस-
त्कल्लोलामलकान्तिनाशिततमस्तोमे जगत्पावनि ॥
गङ्गे देवि पुनीहि दुष्कृतभयक्रान्तं कृपाभाजनं
मातर्मां शरणागतं शरणदे रक्षाद्य भो भीषितम् ॥२२॥
हुंहो मानस कम्पसे किमु सखे त्रस्तो भयान्नारकात्
किं ते भीतिरिति श्रुतिर्दुरितकृत्सञ्जायते नारकी ॥
मा भैषीः शृणु मे मतिं यदि गया पापाचलस्पर्धिनी
प्राप्ता ते निरयः कथ किमपरं किं मे न धर्मं धनम् ॥२३॥
स्वर्वासाधिप्रशंसामुदमनुभवनं मज्जनं यत्र चोक्तं
स्वर्नार्यो वीक्ष्य हृष्टा विबुधसुरपतिप्राप्तिसंभावनेन ॥
नीरे श्रीजह्नुकन्ये यमनियमरताः स्नान्ति ये ताव हीने
देवत्वं ते लभन्ते स्फुटमशुभकृतोऽप्यत्र वेदाः प्रमाणम् ॥२४॥
बुद्धे सद्बुद्धिरेवं भवतु तव सखे मानस स्वस्ति तेऽस्तु
प्रास्तां पादौ पदस्थौ सततमिह युवां साधुदृष्टी च दृष्टी ॥
वाणि प्राणप्रियेऽधिप्रकटगुणवपुः प्राप्नुहि प्राणपुष्टिं
यस्मात्सर्वैर्भवद्भिः सुखमतुलमहं प्राप्नुयां तीर्थपुण्यम् ॥२५॥

## ६५. राधास्तोत्रम्

( ब्रह्मवैवर्त, द्वि. भा., ९२ )

उद्धव उवाच—

वन्दे राधापदाम्भोजं ब्रह्मादिसुरवन्दितम् ॥
यत्कीर्तिः कीर्तनेनैव पुनाति भुवनत्रयम् ॥६४॥
नमो गोकुलवासिन्यै राधिकायै नमोनमः ॥
शतशृङ्गनिवासिन्यै चन्द्रावत्यै न० ॥६५॥
तुलसीवनवासिन्यै वृन्दारण्यै न० ॥ रासमण्डलवासिन्यै रासेश्वर्यै न० ॥६६॥
विरजातीरवासिन्यै वृन्दायै च न०॥ वृन्दावनविलासिन्यै कृष्णायै च न०॥६७॥

नमः कृष्णप्रियायै च शान्तायै च न०।। कृष्णवक्षःस्थितायै च तत्प्रियायै न० ।।
नमो वैकुण्ठवासिन्यै महालक्ष्म्यै न०।। विद्याधिष्ठातृदेव्यै च सरस्वत्यै न० ।।
सर्वैश्वर्याधिदेव्यै च कमलायै न० ।। पद्मनाभप्रियायै च पद्मायै च न० ।।७०।।
नमः सिन्धुसुतायै च मर्त्यलक्ष्म्यै न०।। महाविष्णोश्च मात्रे च पराद्यायै न० ।।
नारायणप्रियायै च नारायण्यै न० ।। नमोऽस्तु विष्णुमायायै वैष्णव्यै च न० ।।
महामायास्वरूपायै संपदायै न० ।। नमः कल्याणरूपिण्यै शुभायै च न० ।।
मात्रे चतुर्णां वेदानां सावित्र्यै च न० ।। नमोऽस्तु बुद्धिरूपायै ज्ञानदायै न० ।।
नमो दुर्गविनाशिन्यै दुर्गादेव्यै न० ।। तेजःसु सर्वदेवानां पुरा कृतयुगे मुदा ।।
अधिष्ठानकृतायै च प्रकृत्यै च न० ।। नमस्त्रिपुरहारिण्यै त्रिपुरायै न० ।।७६।।
सुन्दरीषु च रम्यायै निर्गुणायै न० ।। ममो निद्रास्वरूपायै निर्गुणायै न० ।।७७।।
नमो दक्षसुतायै च नमः सत्यै न० ।। नमः शैलसुतायै च पार्वत्यै च न० ।।
नमो नमस्तपस्विन्यै ह्युमायै च न० ।। निराहारस्वरूपायै ह्यपर्णायै न० ।।
गौरीलोकविलासिन्यै नमो गौर्यै न० ।। नमः कैलासवासिन्यै माहेश्वर्यै न० ।।
निद्रायै च दयायै च श्रद्धायै च न० ।। नमो धृत्यै क्षमायै च लज्जायै च न०।।
तृष्णायै क्षुत्स्वरूपायै स्थितिकर्त्र्यै न० ।। नमः संहाररूपिण्यै महामायै न० ।।
भयायै चाभयायै च मुक्तिदायै न०।। नमः स्वधायै स्वाहायै शान्त्यै कान्त्यै न०।।
नमस्तुष्ट्यै च पुष्ट्यै च दयायै च न० ।। नमो निद्रास्वरूपायै श्रद्धायै च न० ।।
क्षुत्पिपासास्वरूपायै लज्जायै च न० ।। नमो धृत्यै क्षमायै च चेतनायै न० ।।
सर्वशक्तिस्वरूपिण्यै सर्वमात्रे न०।। अग्नौ दाहस्वरूपायै भद्रायै च न० ।।८६।।
शोभायै पूर्णचन्द्रे च शरत्पद्मे न०।। नास्ति भेदो यथा देवि दुग्धधावल्ययोः सदा ।।
यथैव गन्धभूम्योश्च यथैव जलशैत्ययोः ।। यथैव शब्दनभसोर्ज्योतिः सूर्यकयोर्यथा।।
लोके वेदे पुराणे च राधामाधवयोस्तथा।। चेतनं कुरु कल्याणि देहि मामुत्तरं सति

इत्युक्त्वा चोद्धवस्तत्र प्रणनाम पुनः पुनः ।।
इत्युद्धवकृतं स्तोत्रं यः पठेद्भक्तिपूर्वकम् ।।९०।।
इह लोके सुखं भुक्त्वा यात्यन्ते हरिमन्दिरम् ।।
न भवेद्बन्धुविच्छेदो रोगः शोकः सुदारुणः ।।९१।।
प्रोषिता स्त्री लभेत्कान्तं भाषाभेदी लभेत्प्रियाम् ।।
अपुत्रो लभते पुत्रान्निर्धनो लभते धनम् ।।९२।।
निर्भूमिर्लभते भूमिं प्रजाहीनो लभेत्प्रजाम् ।।
रोगाद्विमुच्यते रोगी बद्धो मुच्येत बन्धनात् ।।९३।।

भयान्मुच्येत भीतस्तु मुच्येताऽऽपन्न आपदः ॥
अस्पष्टकीर्त्तिः सुयशा मूर्खो भवति पण्डितः ॥९४॥

## ६६. अगस्त्यकृत–कोल्हापुरस्था–लक्ष्मीस्तवनम्

( स्कान्द, काशीखण्ड, ५ )

अगस्तिरुवाच—

मातर्नमामि कमले कमलायताक्षि श्रीविष्णुहृत्कमलवासिनि विश्वमातः ॥
क्षीरोदजे कमलकोमलगर्भगौरि लक्ष्मि प्रसीद सततं नमतां शरण्ये ॥८०॥
त्वं श्रीरुपेन्द्रसदने मदनैकमातर्ज्योत्स्नासि चन्द्रमसि चन्द्रमनोहरास्ये ॥
सूर्ये प्रभासि च जगत्त्रितये प्रभासि लक्ष्मि प्रसीद सततं नमतां शरण्ये ॥८१॥
त्वं जातवेदसि सदा दहनात्मशक्तिर्वेधास्त्वया जगदिदं विविधं विदध्यात् ॥
विश्वंभरोऽपि बिभृयादखिलं भवत्या लक्ष्मि प्रसीद सततं नमतां शरण्ये ॥८२॥
त्वत्त्यक्तमेतदमले हरते हरोऽपि त्वं पासि हंसि विदधासि परावरासि ॥
ईड्यो बभूव हरिरप्यमले त्वदाप्त्या लक्ष्मि प्रसीद सततं नमतां शरण्ये ॥८३॥
शूरः स एव स गुणी स बुधः स धन्यो मान्यः स एव कुलशीलकलाकलापैः ॥
एकः शुचिः स हि पुमान्सकलेऽपि लोके यत्रापतेत्तव शुभे करुणाकटाक्षः ॥
यस्मिन्वसेः क्षणमहो पुरुषे गजेऽश्वे स्त्रैणे तृणे सरसि देवकुले गृहेऽन्ने ॥
रत्ने पतत्त्रिणि पशौ शयने धरायां सश्रीकमेव सकले तदिहास्ति नान्यत् ॥
त्वत्स्पृष्टमेव सकलं शुचितां लभेत त्वत्त्यक्तमेव सकलं त्वशुचीह लक्ष्मि ॥
त्वन्नाम यत्र च सुमङ्गलमेव तत्र श्रीविष्णुपत्नि कमले कमलालयेऽपि ॥८६॥
लक्ष्मीं श्रियं च कमलां कमलालयां च पद्मां रमां नलिनयुग्मकरां च मां च ॥
क्षीरोदजाममृतकुम्भकरामिरां च विष्णुप्रियामिति सदा जपतां क्व दुःखम् ॥

## ६७. सरस्वतीस्तवनम्

( वराह, ९१ )

पितामह उवाच—

जयस्व सत्यसम्भूते ध्रुवे देवि धरेऽक्षरे ॥९॥
सर्वगे सर्वजननि सर्वभूतमहेश्वरि ॥
सर्वज्ञा त्वं वरारोहे सर्वसिद्धिप्रदायिनी ॥१०॥
सिद्धिबुद्धिकरे देवि प्रसूतिः परमेश्वरी ॥
त्वं स्वाहा त्वं स्वधा देवि त्वमुत्पत्तिर्वरानने ॥११॥

त्वमोङ्कारः स्थिता देवि वेदोत्पत्तिस्त्वमेव च ॥
देवानां दानवानां च यक्षगन्धर्वरक्षसाम् ॥१२॥
पशूनां वीरुधां चापि त्वमुत्पत्तिर्वरानने ॥
विद्या विद्येश्वरी सिद्धा प्रसिद्धाहं सुरेश्वरी ॥१३॥
सर्वज्ञा त्वं वरारोहे सर्वसिद्धिविधायिनी ॥
सर्वगा गतसन्देहा सर्वशत्रुनिबर्हिणी ॥१४॥
सर्वविद्येश्वरी देवि नमस्ते स्वस्तिकारिणि ॥
ऋतुस्नातां स्त्रियं गच्छेद्यस्त्वां स्मृत्वा वरानने ॥१५॥
तस्यावश्यं भवेत्सृष्टिस्त्वत्प्रसादात्प्रजेश्वरि ॥
स्वरूपा विजया भद्रे सर्वशत्रुविनाशिनी ॥१६॥

## ६८. सावित्रीस्तवः

( स्कान्द, प्र. क्षे. मा., १६५ )

नमोऽस्तु ते महादेवि भूर्भुवः स्वस्त्रयीमयि ॥
सावित्रि दुर्गतरिणि त्वं वाणी सप्तधा स्मृता ॥११५॥
सर्वाणि स्मृतिशास्त्राणि लक्षणानि तथैव च ॥
भविष्या सर्वशास्त्राणां त्वं तु देवि नमोऽस्तु ते ॥११६॥
श्वेता त्वं श्वेतरूपासि शशाङ्केन समानना ॥
शशिरश्मिप्रकाशेन हरिणोरसि राजसे ॥
दिव्यकुण्डलपूर्णाभ्यां श्रवणाभ्यां विभूषिता ॥११७॥
त्वं सिद्धिस्त्वं तथा ऋद्धिः कीर्तिः श्री संततिर्मतिः ॥
संध्यारात्रिप्रभातस्त्वं कालरात्रिस्त्वमेव च ॥११८॥
कर्षुकाणां यथा सीता भूतानां धारिणी तथा ॥
एवं स्तुवन्तं सावित्री विष्णुं प्रोवाच सुव्रता ॥११९॥

## ६९. देवीसहस्रनामस्तोत्रम्

( कूर्मपुराण, १२. )

हिमवानुवाच—

शिवोमा परमा शक्तिरनन्ता निष्कलामला । शान्ता माहेश्वरी नित्या शाश्वती परमाक्षरा ॥६२॥ अचिन्त्या केवलानन्त्या शिवात्मा परमात्मिका ।

अनादिरव्यया शुद्धा देवात्मा सर्वगाचला ॥६३॥ एकानेकविभागस्था मायातीता सुनिर्मला । महामाहेश्वरी सत्या महादेवी निरञ्जना ॥६४॥ काष्ठा सर्वान्तरस्था च चिच्छक्तिरतिलालसा । नन्दा सर्वात्मिका विद्या ज्योतीरूपामृताक्षरा ॥६५॥ शान्तिः प्रतिष्ठा सर्वेषां निवृत्तिरमृतप्रदा । व्योममूर्तिर्व्योमलया व्योमा धाराच्युतामरा ॥६६॥ अनादिनिधनामोघा कारणात्माकुलाकुला । स्वतः प्रथमजा नाभिरमृतस्यात्मसंश्रया ॥६७॥ प्राणेश्वरप्रिया माता महामहिषवाहिनी । प्राणेश्वरी प्राणरूपा प्रधानपुरुषेश्वरी ॥ ६८ ॥ महामाया सुदुष्पूरा मूलप्रकृतिरीश्वरी । सर्वशक्तिकलाकारा ज्योत्स्ना द्यौर्महिमास्पदा ॥६९॥ सर्वकार्यनियन्त्री च सर्वभूतेश्वरेश्वरी । संसारयोनिः सकला सर्वशक्तिसमुद्भवा ॥७०॥ संसारपोता दुर्वारा दुर्निरीक्ष्या दुरासदा । प्राणशक्तिः प्राणविद्या योगिनी परमा कला ॥ ७१ ॥ महाविभूतिर्दुर्द्धर्षा मूलप्रकृतिसम्भवा । अनाद्यनन्तविभवा परमाद्यापकर्षिणी ॥७२॥ सर्गस्थित्यन्तकरणी सुदुर्वाच्या दुरत्यया । शब्दयोनिः शब्दमयी नादाख्या नादविग्रहा ॥७३॥ अनादिरव्यक्तगुणा महानन्दा सनातनी । आकाशयोनिर्योगस्था महायोगेश्वरेश्वरी ॥७४॥ महामाया सुदुष्पारा मूलप्रकृतिरीश्वरी । प्रधानपुरुषातीता प्रधानपुरुषात्मिका ॥७५॥ पुराणा चिन्मयी पुंसामादिपुरुषरूपिणी । भूतान्तरस्था कूटस्था महापुरुषसंज्ञिता ॥७६॥ जन्ममृत्युजरातीता सर्वशक्तिसमन्विता । व्यापिनी चानवच्छिन्ना प्रधानानुप्रवेशिनी ॥७७॥ क्षेत्रज्ञशक्तिरव्यक्तलक्षणा मलवर्जिता । अनादिमाया सम्भिन्ना त्रितत्त्वा प्रकृतिग्रहा ॥७८॥ महामायासमुत्पन्ना तामसी पौरुषी ध्रुवा । व्यक्ताव्यक्तात्मिका कृष्णा रक्ता शुक्ला प्रसूतिका ॥७९॥ अकार्या कार्यजननी नित्यं प्रसवधर्मिणी । सर्गप्रलयनिर्मुक्ता सृष्टिस्थित्यन्तधर्म्मिणी ॥८०॥ ब्रह्मगर्भा चतुर्विशा पद्मनाभाच्युतात्मिका । वैद्युती शाश्वती योनिर्जगन्मातेश्वरप्रिया ॥८१॥ सर्वाधारा महारूपा सर्वैश्वर्यसमन्विता । विश्वरूपा महागर्भा विश्वेशेच्छानुवर्तिनी ॥८२॥ महीयसी ब्रह्मयोनिः महालक्ष्मीसमुद्भवा ॥ महाविमानमध्यस्था महानिद्रात्महेतुका ॥८३॥ सर्वसाधारणी सूक्ष्मा ह्यविद्या पारमार्थिका । अनन्तरूपानन्तस्था देवी पुरुषमोहिनी ॥८४॥ अनेकाकारसंस्थाना कालत्रयविवर्जिता । ब्रह्मजन्मा हरेर्मूर्तिर्ब्रह्मविष्णुशिवात्मिका ॥८५॥ ब्रह्मेशविष्णुजननी ब्रह्माख्या ब्रह्मसंश्रया । व्यक्ता प्रथमजा ब्राह्मी महती

ब्रह्मरूपिणी ॥८६॥ वैराग्यैश्वर्यधर्मात्मा ब्रह्ममूर्तिर्हृदि स्थिता। अपां योनिः स्वयम्भूतिर्मानसी तत्त्वसम्भवा ॥८७॥ ईश्वराणी च शर्वाणी शङ्करार्द्धशरीरिणी। भवानी चैव रुद्राणी महालक्ष्मीरथाम्बिका ॥८८॥ महेश्वरसमुत्पन्ना भुक्तिमुक्तिफलप्रदा। सर्वेश्वरी सर्ववन्द्या नित्यं मुदितमानसा ॥८९॥ ब्रह्मेन्द्रोपेन्द्रनमिता शङ्करेच्छानुवर्तिनी। ईश्वरार्द्धासनगता महेश्वरपतिव्रता ॥९०॥ सकृद्विभाता सर्वार्त्तिसमुद्रपरिशोषिणी। पार्वती हिमवत्पुत्री परमानन्ददायिनी ॥९१॥ गुणाढ्या योगजा योग्या ज्ञानमूर्तिर्विकासिनी। सावित्री कमला लक्ष्मीः श्रीरनन्तोरसि स्थिता ॥९२॥ सरोजनिलया गङ्गा योगनिद्रा सुरार्दिनी। सरस्वती सर्वविद्या जगज्ज्येष्ठा सुमङ्गला ॥९३॥ वाग्देवी वरदा वाच्या कीर्तिः सर्वार्थसाधिका। योगीश्वरी ब्रह्मविद्या महाविद्या सुशोभना ॥९४॥ गुह्यविद्यात्मविद्या च धर्मविद्यात्मभाविता। स्वाहा विश्वम्भरा सिद्धिः स्वधा मेधा धृतिः श्रुतिः ॥९५॥ नीतिः सुनीतिः सुकृतिर्माधवी नरवाहिनी। पूज्या विभावती सौम्या भोगिनी भोगशायिनी ॥९६॥ शोभा च शङ्करी लोला मालिनी परमेष्ठिनी। त्रैलोक्यसुन्दरी नम्या सुन्दरी कामचारिणी ॥९७॥ महानुभावा सत्त्वस्था महामहिषमर्द्दिनी। पद्मनाभा पापहरा विचित्रमुकुटाङ्गदा ॥९८॥ कान्ता चित्राम्बरधरा दिव्याभरणभूषिता। हंसाख्या व्योमनिलया जगत्सृष्टिविवर्द्धिनी ॥९९॥ नियन्त्री यन्त्रमध्यस्था नन्दिनी भद्रकालिका॥ आदित्यवर्णा कौबेरी मयूरवरवाहना ॥१००॥ वृषासनगता गौरी महाकाली सुरार्चिता॥ अदितिर्नियता रौद्रा पद्मगर्भा विवाहना ॥१०१॥ विरूपाक्षी लेलिहाना महासुरविनाशिनी। महाफलानवद्याङ्गी कामरूपा विभावरी ॥१०२॥ विचित्ररत्नमुकुटा प्रणतार्त्तिप्रभञ्जनी। कौशिकी कर्षणी रात्रिस्त्रिदशार्त्तिविनाशिनी ॥१०३॥ बहुरूपा स्वरूपा च विरूपा रूपवर्जिता। भक्तार्त्तिशमनी भव्या भवतापविनाशिनी ॥१०४॥ निर्गुणा नित्यविभवा निःसारा निरपत्रपा॥ तपस्विनी सामगीतिर्भवाङ्कनिलयालया ॥१०५॥ दीक्षा विद्याधरी दीप्ता महेन्द्रविनिपातिनी। सर्वातिशायिनी विश्वा सर्वसिद्धिप्रदायिनी ॥ १०६ ॥ सर्वेश्वरप्रिया भार्या समुद्रान्तरवासिनी। अकलङ्का निराधारा नित्यसिद्धा निरामया ॥१०७॥ कामधेनुर्बृहद्गर्भा धीमती मोहनाशिनी। निःसङ्कल्पा निरातङ्का विनया

विनयप्रिया ॥१०८॥ ज्वालामालासहस्राढ्या देवदेवी मनोमयी । महाभगवती भर्गा वासुदेवसमुद्भवा ॥१०९॥ महेन्द्रोपेन्द्रभगिनी भक्तिगम्या परावरा । ज्ञानज्ञेया जरातीता वेदान्तविषया गतिः ॥११०॥ दक्षिणा दहती दीर्घा सर्वभूतनमस्कृता । योगमाया विभागज्ञा महामोहा गरीयसी ॥१११॥ सन्ध्या सर्वसमुद्भूतिर्ब्रह्मविद्याश्रयादिभिः । बीजाङ्कुरसमुद्भूतिर्महाशक्तिर्महामतिः ॥११२॥ क्षान्तिः प्रज्ञा चितिः सच्चिन्महाभोगीन्द्रशायिनी । विकृतिः शाङ्करी शास्तिर्गणगन्धर्वसेविता ॥११३॥ वैश्वानरी महाशाला महासेना गुहप्रिया । महारात्रिः शिवानन्दा शची दुःस्वप्ननाशिनी ॥११४॥ इज्या पूज्या जगद्धात्री दुर्विनेया सुरूपिणि । तपस्विनी समाधिस्था त्रिनेत्रा दिवि संस्थिता ॥ ११५ ॥ गुहाम्बिका गुणोत्पत्तिर्महापीठा मरुत्सुता । हव्यवाहान्तरागादिः हव्यवाहसमुद्भवा ॥११६॥ जगद्योनिर्जगन्माता जन्ममृत्युजरातिगा । बुद्धि-र्महाबुद्धिमती पुरुषान्तरवासिनी ॥११७॥ तरस्विनी समाधिस्था त्रिनेत्रा दिवि संस्थिता । सर्वेन्द्रियमनोमाता सर्वभूतहृदि स्थिता ॥ ११८ ॥ संसार-तारिणी विद्या ब्रह्मवादिमनोलया । ब्रह्माणी बृहती ब्राह्मी ब्रह्मभूता भवारणी ॥११९॥ हिरण्मयी महारात्रिः संसारपरिवर्तिका । सुमालिनी सुरूपा च भाविनी हारिणी प्रभा ॥१२०॥ उन्मीलनी सर्वसहा सर्वप्रत्ययसाक्षिणी । सुसौम्या चन्द्रवदना ताण्डवासक्तमानसा ॥१२१॥ सत्त्वशुद्धिकरी शुद्धिर्मलत्रयविना-शिनी । जगत्प्रिया जगन्मूर्तिस्त्रिमूर्त्तिरमृताश्रया ॥१२२॥ निराश्रया निराहारा निरङ्कुशपदोद्भवा । चन्द्रहस्ता विचित्राङ्गी स्रग्विणी पद्मधारिणी ॥१२३॥ परावरविधानज्ञा महापुरुषपूर्वजा । विश्वेश्वरप्रिया विद्युद्विद्युज्जिह्वा जित-श्रमा ॥१२४॥ विद्यामयी सहस्राक्षी सहस्रवदनात्मजा । सहस्ररश्मिः सत्त्वस्था महेश्वरपदाश्रया ॥१२५॥ क्षालिनी मृण्मयी व्याप्ता तैजसी पद्मबोधिका । महामायाश्रया मान्या महादेवमनोरमा ॥१२६॥ व्योमलक्ष्मीः सिंहरथा चेकितानामितप्रभा । वीरेश्वरी विमानस्था विशोकाशोकनाशिनी ॥१२७॥ अनाहता कुण्डलिनी नलिनी पद्मभासिनी । सदानन्दा सदाकीर्तिः सर्वभूता-श्रयस्थिता ॥१२८॥ वाग्देवता ब्रह्मकला कलातीता कलारणी । ब्रह्मश्रीर्ब्रह्म-हृदया ब्रह्मविष्णुशिवप्रिया ॥१२९॥ व्योमशक्तिः क्रियाशक्तिर्ज्ञानशक्तिः परा गतिः । क्षोभिका बन्धिका भेद्या भेदाभेदविवर्जिता ॥१३०॥ अभिन्ना

भिन्नसंस्थाना वशिनी वंशहारिणी । गुह्यशक्तिर्गुणातीता सर्वदा सर्वतोमुखी ॥१३१॥ भगिनी भगवत्पत्नी सकला कालहारिणी । सर्ववित् सर्वतोभद्रा गुह्यातीता गुहावलिः ॥१३२॥ प्रक्रिया योगमाता च गङ्गा विश्वेश्वरेश्वरी । कलिला कपिला कान्ता कमलाभा कलान्तरा ॥१३३॥ पुण्या पुष्करिणी भोक्त्री पुरन्दरपुरस्सरा । पोषिणी परमैश्वर्यभूतिदा भूतिभूषणा ॥१३४॥ पञ्चब्रह्मसमुत्पत्तिः परमार्थार्थविग्रहा । धर्मोदया भानुमती योगिज्ञेया मनोजवा ॥१३५॥ मनोरमा मनोरस्का तापसी वेदरूपिणी । वेदशक्तिर्वेदमाता वेदविद्याप्रकाशिनी ॥१३६॥ योगेश्वरेश्वरी माता महाशक्तिर्मनोमयी । विश्वावस्था वियन्मूर्त्तिर्विद्युन्माला विहायसी ॥१३७॥ किन्नरी सुरभी विद्या नन्दिनी नन्दिवल्लभा । भारती परमानन्दा परापरविभेदिका ॥ १३८ ॥ सर्वप्रहरणोपेता काम्या कामेश्वरेश्वरी । अचिन्त्यानन्तविभवा भूलेखा कनकप्रभा ॥१३९॥ कूष्माण्डी धनरत्नाढ्या सुगन्धा गन्धदायिनी । त्रिविक्रमपदोद्भूता धनुष्पाणिः शिवोदया ॥ १४० ॥ सुदुर्लभा धनाध्यक्षा धन्या पिङ्गललोचना । शान्तिः प्रभावती दीप्तिः पङ्कजायतलोचना ॥१४१॥ आद्या भूः कमलोद्भूता गवां माता रणप्रिया । सत्क्रिया गिरिशा शुद्धिर्नित्यपुष्टा निरन्तरा ॥१४२॥ दुर्गा कात्यायनी चण्डी चर्चितताङ्गा सुविग्रहा । हिरण्यवर्णा जगती जगद्यन्त्रप्रवर्तिका ॥१४३॥ मन्दराद्रिनिवासा च गरहा स्वर्णमालिनी । रत्नमाला रत्नगर्भा पुष्टिर्विश्वप्रमाथिनी ॥१४४॥ पद्मनाभा पद्मनिभा नित्यरुष्टामृतोद्भवा । धुन्वती दुष्प्रकम्पा च सूर्यमाता दृषद्वती ॥१४५॥ महेन्द्रभगिनी सौम्या वरेण्या वरदायिका । कल्याणी कमलावासा पञ्चचूडा वरप्रदा ॥१४६॥ वाचग्रामरेश्वरी विद्या दुर्जया दुरतिक्रमा । कालरात्रिर्महावेगा वीरभद्रप्रिया हिता ॥१४७॥ भद्रकाली जगन्माता भक्तानां भद्रदायिनी । कराला पिङ्गलाकारा कामभेदा महास्वना ॥१४८॥ यशस्विनी यशोदा च षडध्वपरिवर्त्तिका । शंखिनी पद्मिनी सांख्या सांख्ययोगप्रवर्त्तिका ॥१४९॥ चैत्रा संवत्सरारूढा जगत्सम्पूरणी ध्वजा । शुम्भारिः खेचरी स्वस्था कम्बुग्रीवा कलिप्रिया ॥१५०॥ खगध्वजा खगारूढा वाराही पूगमालिनी । ऐश्वर्यपद्मनिलया विरक्ता गरुडासना ॥१५१॥ जयन्ती हृद्गुहागम्या गह्वरेष्ठा गणाग्रणीः । सङ्कल्पसिद्धा साम्यस्था सर्वविज्ञानदायिनी

॥ १५२ ॥ कलिः कल्कविहन्त्री च गुह्योपनिषदुत्तमा । निष्ठा दृष्टिः स्मृतिर्व्याप्तिः पुष्टिस्तुष्टिः क्रियावती ॥१५३॥ विश्वामरेश्वरेशाना भुक्तिर्मुक्तिः शिवामृता । लोहिता सर्पमाला च भीषणी वनमालिनी ॥१५४॥ अनन्तशयनानन्ता नरनारायणोद्भवा । नृसिंही दैत्यमथनी शङ्खचक्रगदाधरा ॥१५५॥ सङ्कर्षणी समुत्पत्तिरम्बिका पादसंश्रया । महाज्वाला महाभूतिः सुमूर्त्तिः सर्वकामधुक् ॥१५६॥ शुभ्रा च सुस्तना सौरी धर्मकार्यार्थमोक्षदा । भ्रूमध्यनिलया पूर्वा पुराणपुरुषारणिः ॥१५७॥ महाविभूतिदा मध्या सरोजनयना समा । अष्टादशभुजानाद्या नीलोत्पलदलप्रभा ॥१५८॥ सर्वशक्त्यासनारूढा धर्माधर्मविवर्जिता । वैराग्यज्ञाननिरता निरालोका निरिन्द्रिया ॥१५९॥ विचित्रगहनाधारा शाश्वतस्थानवासिनी । स्थानेश्वरी निरानन्दा त्रिशूलवरधारिणी ॥१६०॥ अशेषदेवतामूर्त्तिर्देवता वरदेवता । गणाम्बिका गिरेः पुत्री निशुम्भविनिपातिनी ॥१६१॥ अवर्णा वर्णरहिता त्रिवर्णा जीवसम्भवा । अनन्तवर्णानन्यस्था शङ्करी शान्तमानसा ॥ १६२ ॥ अगोत्रा गोमती गोप्त्री गुह्यरूपा गुणोत्तरा । गौर्गीर्गव्यप्रिया गौणी गणेश्वरनमस्कृता ॥ १६३ ॥ सत्यभामा सत्यसन्धा त्रिसन्ध्या सन्धिवर्जिता । सर्ववादाश्रया सांख्या सांख्ययोगसमुद्भवा ॥१६४॥ असंख्येयाप्रमेयाख्या शून्या शुद्धकुलोद्भवा । बिन्दुनादसमुत्पत्तिः शम्भुवामा शशिप्रभा ॥१६५॥ पिशङ्गा भेदरहिता मनोज्ञा मधुसूदनी । महाश्रीः श्रीसमुत्पत्तिस्तमःपारे प्रतिष्ठिता ॥१६६॥ त्रितत्त्वमाता त्रिविधा सुसूक्ष्मपदसंश्रया । शान्ता भीता मलातीता निर्विकारा शिवाश्रया ॥१६७॥ शिवाख्या चित्तनिलया शिवज्ञानस्वरूपिणी । दैत्यदानवनिर्माथी काश्यपी कालकर्णिका ॥१६८॥ शास्त्रयोनिः क्रियामूर्तिश्चतुर्वर्गप्रदर्शिका । नारायणी नरोत्पत्तिः कौमुदी लिङ्गधारिणी ॥१६९॥ कामुकी कलिताभावा परावरविभूतिदा । पराङ्गजातमहिमा वडवा वामलोचना ॥१७०॥ सुभद्रा देवकी सीता वेदवेदाङ्गपारगा । मनस्विनी मन्युमाता महामन्युसमुद्भवा ॥१७१॥ अमन्युरमृतास्वादा पुरुहूता पुरुष्टुता । अशोच्या भिन्नविषया हिरण्यरजतप्रिया ॥१७२॥ हिरण्यरजनी हैमा हेमाभरणभूषिता । विभ्राजमाना दुर्ज्ञेया ज्योतिष्टोमफलप्रदा ॥ १७३ ॥ महानिद्रासमुद्भूतिरनिद्रा सत्यदेवता । दीर्घा ककुद्मिनी हृद्या शान्तिदा शान्तिवर्द्धिनी

॥१७४॥ लक्ष्म्यादिशक्तिजननी शक्तिचक्रप्रवर्तिका । त्रिशक्तिजननी जन्या षडूर्मिपरिवर्जिता ॥१७५॥ सुधौता कर्मकरणी युगान्तदहनात्मिका । सङ्कर्षणी जगद्धात्री कामयोनिः किरीटिनी ॥१७६॥ ऐन्द्री त्रैलोक्यनमिता वैष्णवी परमेश्वरी । प्रद्युम्नदयिता दात्री युग्मदृष्टिस्त्रिलोचना ॥१७७॥ मदोत्कटा हंसगतिः प्रचण्डा चण्डविक्रमा । वृषावेशा वियन्माता विन्ध्यपर्वतवासिनी ॥१७८॥ हिमवन्मेरुनिलया कैलासगिरिवासिनी । चाणूरहन्तृतनया नीतिज्ञा कामरूपिणी ॥१७९॥ वेदविद्या व्रतस्नाता ब्रह्मशैलनिवासिनी । वीरभद्रप्रजा वीरा महाकामसमुद्भवा ॥१८०॥ विद्याधरप्रिया सिद्धा विद्याधरनिराकृतिः । आप्यायनी हरन्ती च पावनी पोषणी कला ॥१८१॥ मातृका मन्मथोद्भूता वारिजा वाहनप्रिया । करीषिणी सुधावाणी वीणावादनतत्परा ॥१८२॥ सेविता सेविका सेव्या सिनीवाली गरुत्मती । अरुन्धती हिरण्याक्षी मृगाङ्का मानदायिनी ॥१८३॥ वसुप्रदा वसुमती वसोर्द्धारा वसुन्धरा । धाराधरा वरारोहा परावाससहस्रदा ॥१८३॥ श्रीफला श्रीमती श्रीशा श्रीनिवासा शिवप्रिया । श्रीधरा श्रीकरी कल्या श्रीधरार्द्धशरीरिणी ॥१८५॥ अनन्तदृष्टिरक्षुद्रा धात्रीशा धनदप्रिया । निहन्त्री दैत्यसङ्घानां सिंहिका सिंहवाहना ॥१८६॥ सुवर्चला च सुश्रोणी सुकीर्त्तिश्छिन्नसंशया । रसज्ञा रसदा रामा लेलिहानामृतस्रवा ॥१८७॥ नित्योदिता स्वयंज्योतिरुत्सुका मृतजीवना । वज्रदण्डा वज्रजिह्वा वैदेही वज्रविग्रहा ॥१८८॥ मङ्गल्या मङ्गला माला निर्मला मलहारिणी । गान्धर्वी करुका चान्द्री कम्बलाश्वतरप्रिया ॥१८९॥ सौदामिनी जनानन्दा भ्रुकुटीकुटिलानना । कर्णिकारकरा कक्षा कंसप्राणापहारिणी ॥१९०॥ युगन्धरा युगावर्त्ता त्रिसन्ध्या हर्षवर्द्धनी । प्रत्यक्षदेवता दिव्या दिव्यगन्धा दिवः परा ॥१९१॥ शक्रासनगता शाक्री साध्या चारुशरासना । इष्टा विशिष्टा शिष्टेष्टा शिष्टाशिष्टप्रपूजिता ॥१९२॥ शतरूपा शतावर्त्ता विनता सुरभिः सुरा । सुरेन्द्रमाता सुद्युम्ना सुषुम्ना सूर्यसंस्थिता ॥१९३॥ समीक्ष्या सत्प्रतिष्ठा च निवृत्तिर्ज्ञानपारगा । धर्मशास्त्रार्थकुशला धर्मज्ञा धर्मवाहना ॥१९४॥ धर्माधर्मविनिर्मात्री धार्मिकाणां शिवप्रदा । धर्मशक्तिर्धर्ममयी विधर्मा विश्वधर्मिणी ॥१९५॥ धर्मान्तरा धर्ममयी धर्मपूर्वा धनावहा । धर्मोपदेष्ट्री धर्मात्मा धर्मगम्या धराधरा ॥१९६॥ कपाली शकला मूर्त्तिः

कलाकलितविग्रहा । सर्वशक्तिविनिर्मुक्ता सर्वशक्त्याश्रयाश्रया ॥१९७॥ सर्वा सर्वेश्वरी सूक्ष्मा सूक्ष्मज्ञानस्वरूपिणी । प्रधानपुरुषेशेषा महादेवैकसाक्षिणी ॥१९८॥ सदाशिवा वियन्मूर्त्तिर्वेदमूर्त्तिरमूर्त्तिका । [ एवं नाम्नां सहस्रेण स्तुत्वासौ हिमवान्गिरिः ॥१९९॥ ]

## ७०. अगस्त्यकृत–स्कन्दस्तवः

(स्कान्द, काशीखण्ड, २५.)

अगस्तिरुवाच—

नमोऽस्तु वृन्दारकवृन्दवन्द्यपादारविन्दाय सुधाकराय ॥
षडाननायामितविक्रमाय गौरीहृदानन्दसमुद्भवाय ॥१०॥

नमोऽस्तु तुभ्यं प्रणतार्तिहंत्रे कर्त्रे समस्तस्य मनोरथानाम् ॥
दात्रे रथानां परतारकस्य हंत्रे प्रचण्डासुरतारकस्य ॥११॥

अमूर्तमूर्ताय सहस्रमूर्तये गुणाय गुण्याय परात्पराय ॥
अपारपाराय परापराय नमोऽस्तु तुभ्य शिखिवाहनाय ॥१२॥

नमोऽस्तु ते ब्रह्मविदां वराय दिगम्बरायाम्बरसंस्थिताय ॥
हिरण्यवर्णाय हिरण्यबाहवे नमो हिरण्याय हिरण्यरेतसे ॥१३॥

तपःस्वरूपाय तपोधनाय तप.फलानां प्रतिपादकाय ॥
सदा कुमाराय हि मारमारिणे तृणीकृतैश्वर्यविरागिणे नमः ॥१४॥

नमोऽस्तु तुभ्यं शरजन्मने विभो प्रभातसूर्यारुणदन्तपंक्तये ॥
बालाय चाबालपराक्रमाय षाण्मातुरायालमनातुराय ॥१५॥

मीढुष्टमायोत्तरमीढुषे नमो नमो गणानां पतये गणाय ॥
नमोऽस्तु ते जन्मजरातिगाय नमो विशाखाय सुशक्तिपाणये ॥१६॥

सर्वस्य नाथस्य कुमारकाय क्रौञ्चारये तारकमारकाय ॥
स्वाहेय गाङ्गेय च कार्त्तिकेय शैवेय तुभ्यं सततं नमोऽस्तु ॥१७॥

[ इत्थं परिष्टुत्य स कार्त्तिकेयं नमो नमस्त्वित्यभिभाषमाणः ॥
त्रिस्त्रिः परिक्रम्य पुरो विवेश स्थितो मुनीशोपविशेति चोक्तः ॥१८॥]

## ७१. स्कन्दस्तोत्रम्

( शिव, रुद्रसं., कु.खं., ६ )

पार्वतीनन्दनस्कन्दः परमेकः परंतपः ॥
परमात्माऽऽत्मदस्स्वामी सतां च शरणार्थिनाम् ॥१०॥

दीननाथ महेश शंकरसुत त्रैलोक्यनाथ प्रभो
मायाधीश समागतोऽस्मि शरणं मां पाहि विप्रप्रिय ॥
त्वं सर्वप्रभुरानताखिलविदब्रह्मादिदेवैस्स्तुत—
स्त्वं मायाकृतिरात्मभक्तसुखदो रक्षापरो मायिकः ॥११॥
भक्तप्राणगुणाकरस्त्रिगुणतो भिन्नोऽसि शंभुप्रियः
शंभुः शंभुसुतः प्रसन्नसुखदस्सच्चित्स्वरूपो महान् ॥
सर्वज्ञस्त्रिपुरघ्नशंकरसुतः सत्प्रेमवश्यस्सदा
षड्वक्त्रः प्रियसाधुरानतप्रियस्सर्वेश्वरश्शङ्करः ॥
साधुद्रोहकरघ्न शङ्करगुरो ब्रह्माण्डनाथः प्रभुः
सर्वेषाममरादिसेवितपदो मां पाहि सेवाप्रिय ॥१२॥

वैरिभयंकर शंकर जनशरणस्य वन्दे तव पदपद्मं सुखकरणस्य ॥
विज्ञप्तिं मम कर्णे स्कन्द निधेहि निजभक्तिं जनचेतसि सदा विधेहि ॥
करोति किं तस्य बली विपक्षो दक्षोऽपि पक्षोभयपार्श्वगुप्तः ॥
किं तक्षकोऽप्यामिषभक्षको वा त्वं रक्षको यस्य सदक्षमानः ॥१४॥

विबुधगुरुरपि त्वां स्तोतुमीशो नहि स्या—
त्कथय कथमहं स्यां मन्दबुद्धिर्वराचर्यः ॥
शुचिरशुचिरनार्यो यादृशस्तादृशो वा
पदकमलपरागं स्कन्द ते प्रार्थयामि ॥१५॥
हे सर्वेश्वर भक्तवत्सल कृपासिन्धो त्वदीयोऽस्म्यहं
भृत्यस्स्वस्य न सेवकस्य गणपस्याऽऽगश्शतं सत्प्रभो ॥
भक्तिं क्वापि कृतां मनागपि विभो जानासि भृत्यार्तिहा
त्वत्तो नास्त्यपरोऽविता न भगवन् मत्तो नरः पामरः ॥१६॥

कल्याणकर्ता कलिकल्मषघ्नः कुबेरबन्धुः करुणार्द्रचित्तः ॥
त्रिषट्कनेत्रो रसवक्त्रशोभी यज्ञं प्रपूर्णं कुरु मे गुह त्वम् ॥१७॥

रक्षकस्त्वं त्रिलोकस्य शरणागतवत्सल: ॥
यज्ञकर्त्ता यज्ञभर्त्ता हरसे विघ्नकारिणाम् ॥१८॥

विघ्नवारण साधूनां सर्गकारण सर्वतः ॥
पूर्णं कुरु ममेशान सुतयज्ञ नमोऽस्तु ते ॥१९॥

सर्वत्राता स्कन्द हि त्वं सर्वज्ञाता त्वमेव हि ॥
सर्वेश्वरस्त्वमीशानो निवेशसकलाऽवनः ॥२०॥

सङ्गीतज्ञस्त्वमेवासि वेदविज्ञः परः प्रभुः ॥
सर्वस्थाता विधाता त्वं देवदेवस्सतां गतिः ॥२१॥

भवानीनन्दनश्शंभुतनयो वयुनः स्वराट् ॥
ध्याता ध्येयः पितॄणां हि पिता योनिः सदात्मनाम् ॥२२॥

## ७२. स्कन्द–कुमार–स्तवः

( मत्स्य, १५९. )

देवा ऊचुः—

नमः कुमाराय महाप्रभाय स्कन्दाय च स्कन्दितदानवाय ॥
नवार्कविद्युद्द्युतये नमोऽस्तु ते नमोऽस्तु ते षण्मुख कामरूप ॥१३॥

पिनद्धनानाभरणाय भर्त्रे नमो रणे दानवदारणाय ॥
नमोऽस्तु तेऽर्कप्रतिमप्रभाय नमोऽस्तु गुह्याय गुहाय तुभ्यम् ॥१४॥

नमोऽस्तु त्रैलोक्यभयापहाय नमोऽस्तु ते बालकृपापराय ॥
नमो विशालामललोचनाय नमो विशाखाय महाव्रताय ॥१५॥

नमो नमस्तेऽस्तु मनोहराय नमो नमस्तेऽस्तु रणोत्कटाय ॥
नमो मयूरोज्ज्वलवाहनाय नमोऽस्तु केयूरधराय तुभ्यम् ॥१६॥

नमो धृतोदग्रपताकिने नमो नमः प्रभावप्रणताय तेऽस्तु ॥
नमो नमस्ते वरवीर्यशालिने कृपापरो नो भव भव्यमूर्ते ॥१७॥

क्रियापरा यज्ञपतिं च स्तुत्वा विनेमुरेवं त्वमराधिपाद्याः ॥
[एवं तदा षड्वदनस्तु सेन्द्रानुवाच तुष्टश्च गुहस्ततस्तान् ॥
निरीक्ष्य नेत्रैरमलैः सुरेशाञ्शत्रून्हनिष्यामि गतज्वराः स्थ ॥१८॥]

ततश्चिन्ताकुलो दैत्यः शुश्राव कटुकाक्षरम् ॥
सिद्धबन्दिभिरुद्घुष्टमिदं हृदयदारुणम् ॥१९॥

अथ गाथाः—

जयातुलशक्तिदीधितिपिञ्जर भुजदण्डचण्डरणरभस । सुरवदन कुमुदकानन विकासनेन्दो कुमार जय दितिजकुलमहोदधिवडवानल ॥
षण्मुख मधुररवमयूररथ सुरमुकुटकोटिघट्टितचरणनखाङ्कुरमहासन ॥
जय ललितचूडाकलापनवविमलदलकमलकान्त दैत्यवंशदुःसहदावानल ॥४१॥

जय विशाख विभो जय सकललोकतारक जय देवसेनानायक ॥
स्कन्द जय गौरीनन्दन घण्टाप्रिय प्रिय विशाख विभो धृतपताकप्रकीर्णपटल ॥
कनकभूषण भासुरदिनकरच्छय ॥४२॥

जय जनितसंभ्रम लीलालूनाखिलाराते जय सकललोकतारक दितिजासुरवर-तारकान्तक । स्कन्द जय बाल सप्तवासर जय भुवनावलिशोकविनाशन ॥४३॥

## ७३. मार्कण्डेयकृत-स्कन्दस्तवः

( महाभारत, वनपर्व, २३२ )

[ इत्युक्तः पाण्डवेयेन महात्मा ऋषिसन्निधौ ॥
उवाच भगवांस्तत्र मार्कण्डेयो महातपाः ॥२॥]
आग्नेयश्चैव स्कन्दश्च दीप्तकीर्त्तिरनामयः ॥
मयूरकेतुर्धर्मात्मा भूतेशो महिषार्दनः ॥३॥
कामजित्कामदः कान्तः सत्यवाग्भुवनेश्वरः ॥
शिशुः शीघ्रः शुचिश्चण्डो दीप्तवर्णः शुभाननः ॥४॥
अमोघस्त्वनघो रौद्रः प्रियश्चन्द्राननस्तथा ॥
दीप्तशक्तिः प्रशान्तात्मा भद्रकृत्कूटमोहनः ॥५॥
षष्ठीप्रियश्च धर्मात्मा पवित्रो मातृवत्सलः ॥
कन्याभर्ता विभक्तश्च स्वाहेयो रेवतीसुतः ॥६॥
प्रभुर्नेता विशाखश्च नैगमेयः सुदुश्चरः ॥
सुव्रतो ललितश्चैव बालक्रीडनकप्रियः ॥७॥
खचारी ब्रह्मचारी च शूरः शरवणोद्भवः ॥

विश्वामित्रप्रियश्चैव देवसेनाप्रियस्तथा ॥
वासुदेवप्रियश्चैव प्रियः प्रियकृदेव तु ॥८॥

मार्कण्डेय उवाच—

सहस्रशीर्षस्त्वमनन्तरूपः सहस्रपात्त्वं गुहशक्तिधारी ॥
गङ्गासुतस्त्वं स्वमतेन देव स्वाहामहीकृत्तिकानां तथैव ॥१५॥
त्वं क्रीडसे षण्मुख कुक्कुटेन यथेष्टनानाविधकामरूपी ॥
दीक्षाऽसि सोमो मरुतः सदैव धर्मोऽसि वायुरचलेन्द्र इन्द्रः ॥१६॥
सनातनानामपि शाश्वतस्त्वं प्रभुः प्रभूणामपि चोग्रधन्वा ॥
ऋतस्य कर्ता दितिजान्तकस्त्वं जेता रिपूणां प्रवर : सुराणाम् ॥१७॥
सूक्ष्मं तपस्तत्परमं त्वमेव परावरज्ञोऽसि परावरस्त्वम ॥
धर्मस्य कामस्य परस्य चैव त्वत्तेजसा कृत्स्नमिदं महात्मन् ॥१८॥
व्याप्तं जगत्सर्वं सुरप्रवीर शक्त्यानया संस्तुत लोकनाथ ॥
नमोऽस्तु ते द्वादशनेत्रबाहो अतः परं वेद्मि गतिं न तेऽहम् ॥१९॥

## ७४. गणेशस्तोत्रम्

( ब्रह्म, गौ.मा., ४४ )

देवा ऊचुः —

यः सर्वकार्येषु सदा सुराणामपीशविष्णवम्बुजसंभवानाम् ॥
पूज्यो नमस्यः परिचिन्तनीयस्तं विघ्नराजं शरणं व्रजामः ॥६॥
न विघ्नराजेन समोऽस्ति कश्चिद्देवो मनोवाञ्छितसंप्रदाता ॥
निश्चित्य चैतत्त्रिपुरान्तकोऽपि तं पूजयामास वधे पुराणाम् ॥७॥
करोतु सोऽस्माकमविघ्नमस्मिन्महाक्रतौ सत्वरमाम्बिकेयः ॥
ध्यातेन येनाखिलदेहभाजां पूर्णा भविष्यन्ति मनोऽभिलाषाः ॥८॥
महोत्सवोऽभूदखिलस्य देव्या जातः सुतश्चिन्तितमात्र एव ॥
अतोऽवदन्सुरसंघाः कृतार्थाः सद्योजातं विघ्नराजं नमन्तः ॥९॥
यो मातुरुत्सङ्गगतोऽथ मात्रा निवार्यमाणोऽपि बलाच्च चन्द्रम् ॥
संगोपयामास पितुर्जटासु गणाधिनाथस्य विनोद एषः ॥१०॥
पपौ स्तनं मातुरथापि तृप्तो यो भ्रातृमात्सर्यकषायबुद्धिः ॥
लम्बोदरस्त्वं भव विघ्नराजो लम्बोदरं नाम चकार शंभुः ॥११॥

संवेष्टितो देवगणैर्महेशः प्रवर्त्ततां नृत्यमितीत्युवाच ॥
संतोषितो नूपुररावमात्राद्गणेश्वरस्त्वेऽभिषिषेच पुत्रम् ॥१२॥
यो विघ्नपाशं च करेण बिभ्रत्स्कन्धे कुठारं च तथा परेण ॥
अपूजितो विघ्नमथोऽपि मातुः करोति को विघ्नपतेः समोऽन्यः ॥१३॥
धर्मार्थकामादिषु पूर्वपूज्यो देवासुरैः पूज्यत एव नित्यम् ॥
यस्यार्चनं नैव विनाशमस्ति तं पूर्वपूज्यं प्रथमं नमामि ॥१४॥
यस्यार्चनात्प्रार्थनयाऽनुरूपां दृष्ट्वा तु सर्वस्य फलस्य सिद्धिम् ॥
स्वतन्त्रसामर्थ्यकृतातिगर्वं भ्रातृप्रियं त्वाखुरथं नमीडे ॥१५॥
यो मातरं सुरसैर्नृत्यगीतैस्तथाऽभिलाषैरखिलैर्विनोदैः ॥
संतोषयामास तदाऽतितुष्टं तं श्रीगणेशं शरणं प्रपद्ये ॥१६॥
सुरोपकारैरसुरैश्च युद्धैः स्तोत्रैर्नमस्कारपरैश्च मन्त्रैः ॥
पितृप्रसादेन सदा समृद्धं तं श्रीगणेशं शरणं प्रपद्ये ॥१७॥
जये पुराणामकरोत्प्रतीपं पित्राऽपि हर्षात्प्रतिपूजितो यः ॥
निर्विघ्नतां चापि पुनश्चकार तस्मै गणेशाय नमस्करोमि ॥१८॥

## ७५. गणेशाष्टकम्

( गणेशपुराण, उपासनाखण्ड. )

श्रीगणेशाय नमः ॥ सर्वे ऊचुः-

यतोऽनन्तशक्तेरनन्ताश्च जीवा यतो निर्गुणादप्रमेया गुणास्ते ॥
यतो भाति सर्वं त्रिधा भेदभिन्नं सदा तं गणेशं नमामो भजामः ॥१॥
यतश्चाविरासीज्जगत्सर्वमेतत् तथाब्जासनो विश्वगो विश्वगोप्ता ॥
तथेन्द्रादयो देवसंघा मनुष्याः सदा तं गणेशं न. ००० ॥२॥
यतो वह्निभानू भवो भूर्जलं च यतः सागराश्चन्द्रमा व्योम वायुः ॥
यतः स्थावरा जङ्गमा वृक्षसंघाः सदा तं गणेशं न. ००० ॥३॥
यतो दानवाः किन्नरा यक्षसंघा यतश्चारणा वारणाः श्वापदाश्च ॥
यतः पक्षिकीटा यतो विरुधश्च सदा तं गणेशं न. ००० ॥४॥
यतो बुद्धिरज्ञाननाशो मुमुक्षोर्यतः संपदो भक्तसंतोषिकाः स्युः ॥
यतो विघ्ननाशो यतः कार्यसिद्धिः सदा तं गणेशं न. ००० ॥५॥

यतः पुत्रसंपद्यतो वाञ्छितार्थो यतोऽभक्तविघ्नास्तथाऽनेकरूपाः ॥
यतः शोकमोहौ यतः काम एव सदा तं गणेशं न. ००० ॥६॥

यतोऽनन्तशक्तिः स शेषो बभूव धराधारणेऽनेकरूपे च शक्तः ॥
यतोऽनेकधा स्वर्गलोका हि नाना सदा तं गणेशं न. ००० ॥७॥

यतो वेदवाचोऽतिकुण्ठा मनोभिः सदा नेति नेतीति यत्ता गृणन्ति ॥
परब्रह्मरूपं चिदानन्दभूतं सदा तं गणेशं न. ००० ॥८॥

## ७६. गणेशकवचम्

( गणेशपुराणम् )

मुनिरुवाच—

ध्यायेत्सिंहगतं विनायकममुं दिग्बाहुमाद्ये युगे
त्रेतायां तु मयूरवाहनममुं षड्बाहुकं सिद्धिदम् ॥
द्वापारे तु गजाननं युगभुजं रक्ताङ्गरागं विभुम्
तुर्ये तु द्विभुजं सिताङ्गरुचिरं सर्वार्थदं सर्वदा ॥३॥

विनायकः शिखां पातु परमात्मा परात्परः ॥
अतिसुन्दरकायस्तु मस्तकं सुमहोत्कटः ॥४॥
ललाटं कश्यपः पातु भ्रूयुगं तु महोदरः ॥
नयने भालचन्द्रस्तु गजास्यस्त्वोष्ठपल्लवौ ॥५॥
जिह्वां पातु गणक्रीडश्चिबुकं गिरिजासुतः ॥
वाचं विनायकः पातु दन्तान् रक्षतु दुर्मुखः ॥६॥
श्रवणौ पाशपाणिस्तु नासिकां चिन्तितार्थदः ॥
गणेशस्तु मुखं कण्ठं पातु देवो गणंजयः ॥७॥
स्कन्धौ पातु गजस्कन्धः स्तनौ विघ्नविनाशनः ॥
हृदयं गणनाथस्तु हेरम्बो जठरं महान् ॥८॥
धराधरः पातु पार्श्वौ पृष्ठं विघ्नहरं शुभः ॥
लिङ्गं गुह्यं सदा पातु वक्रतुण्डो महाबलः ॥९॥
गणक्रीडो जानुजङ्घे ऊरू मङ्गलमूर्तिमान् ॥
एकदन्तो महाबुद्धिः पादौ गुल्फौ सदाऽवतु ॥१०॥

क्षिप्रप्रसादनो बाहू पाणी आशाप्रपूरकः ॥
अङ्गुलीश्च नखान्पातु पद्महस्तोऽरिनाशनः ॥११॥
सर्वांगानि मयूरेशो विश्वव्यापी सदाऽवतु ॥
अनुक्तमपि यत्स्थानं धूम्रकेतुः सदाऽवतु ॥१२॥
आमोदस्त्वग्रतः पातु प्रमोदः पृष्ठतोऽवतु ॥
प्राच्यां रक्षतु बुद्धीश आग्नेय्यां सिद्धिदायकः ॥१३॥
दक्षिणस्यामुमापुत्रो नैर्ऋत्यां तु गणेश्वरः ॥
प्रतीच्यां विघ्नहर्ताऽव्याद्वायव्यां गजकर्णकः ॥१४॥
कौबेर्यां निधिपः पायादीशान्यामीशनन्दनः ॥
दिवाऽव्यादेकदन्तस्तु रात्रौ संध्यासु विघ्नहृत् ॥१५॥
राक्षसासुरवेतालग्रहभूतपिशाचतः ॥
पाशाङ्कुशधरः पातु रजःसत्त्वतमःस्मृतीः ॥१६॥
ज्ञानं धर्मं च लक्ष्मीं च लज्जां कीर्तिं तथा कुलम् ॥
वपुर्धनं च धान्यं च गृहदारान्सुतान्सखीन् ॥१७॥
सर्वायुधधरः पौत्रान् मयूरेशोऽवतात्सदा ॥
कपिलोऽजाविकं पातु गजाश्वान्विकटोऽवतु ॥१८॥
[ भूर्जपत्रे लिखित्वेदं यः कण्ठे धारयेत्सुधीः ॥
न भयं जायते तस्य यक्षरक्षःपिशाचतः ॥१९॥]

## ७७. नन्दीस्तोत्रम्

( गरुड, अ. ७१ )

देवा ऊचुः—

नमस्ते रुद्रभक्ताय रुद्रजाप्यरताय च ॥१५४॥
रुद्रभक्तार्तिनाशाय रौद्रकर्मरताय ते ॥
कूष्माण्डगणनाथाय योगिनां पतये नमः ॥१५५॥
सर्वज्ञाय शरण्याय सर्वज्ञायार्तिहारिणे ॥
वेदानां पतये चैव वेदवेद्याय ते नमः ॥१५६॥
वज्रिणे वज्रदंष्ट्राय वज्रिवज्रनिवारिणे ॥
वज्रालङ्कृतदेहाय वज्रिणाराधिताय ते ॥१५७॥

रक्ताय रक्तनेत्राय रक्ताम्बरधराय ते ॥
रक्तानां भवपादाब्जे रुद्रलोकप्रदायिने ॥१५८॥
नमः सेनाधिपतये रुद्राणां पतये नमः ॥
भूतानां भुवनेशानां पतये पापहारिणे ॥१५९॥
रुद्राय रुद्रपतये रौद्रपापहराय ते ॥
नमः शिवाय सौम्याय रुद्रभक्ताय ते नमः ॥१६०॥

## ७८. (षष्टि) क्षेत्रपालस्तवः

( स्कान्द, मा. खं , कौ. खं., ६३ )

[ Śiva creates the Kṣetrapālas from his mouth. ]

ॐ ऊर्ध्वकेशा विरूपाक्षा नित्यं ये घोररूपिणः ॥
रक्तनेत्राश्च पिङ्गाक्षाः क्षेत्रपालान्नमामि तान् ॥२५॥
अह्वरो ह्यापकुम्भश्च इडाचारस्तथैव यः ॥
इन्द्रमूर्तिश्च कोलाक्ष उपपाद ऋतुंसनः ॥२६॥
सिद्धेयश्चैव वलिको नीलपादेकदंष्ट्रिकः ॥
इरापतिश्चाघहारी विघ्नहारी तथान्तकः ॥२७॥
ऊर्ध्वपादः कम्बलश्च खंजनः खर एव च ॥
गोमुखश्चैव जंघालो गणनाथश्च वारणः ॥२८॥
जटालोप्यजटालश्च नौमि स्वःक्षेत्रपालकान् ॥
ऋकारो हठकारी च टंकपाणिः खणिस्तथा ॥२९॥
ठंठकणो जंबरश्च स्फुलिङ्गास्यस्तडिद्रुचिः ॥
दन्तुरो घननादश्च नन्दकश्च तथा परः ॥३०॥
फेत्कारकारी पञ्चास्यो बर्बरी भीमरूपवान् ॥
भग्नपक्षः कालमेघो युवान्तो भास्करस्तथा ॥३१॥
रौरवश्चापि लम्बोष्ठो बणिजः सुजटालिकः ॥
सुगन्धो हुहुकश्चैव नौमि पातालरक्षकान् ॥३२॥
सर्वलिङ्गेषु हुंकारः स्मशानेषु भयावहः ॥
महालक्षो वने घोरे ज्वालाक्षो वसतौ स्थितः ॥३३॥

एकवृक्षश्च वृक्षेषु करालवदनो निशि ॥
घण्टारवो गुहावासी पद्मखञ्जो जले स्थितः ॥३४॥
चत्वरेषु दुरारोहः पर्वते कुरवस्तथा ॥
निर्झरेषु प्रवाहाख्यो मणिभद्रो निधिष्वपि ॥३
रसक्षेत्रे रसाध्यक्षो यज्ञवाटेषु कोटनः ॥
चतुर्दशभुवं व्याप्य स्थिताश्चैवं नमामि तान् ॥३६॥

## ७९. वीरभद्रवर्णनम्

( शिव, वायवीयसं., पू. खं., १९. )

[ देव्या संचोदितो देवो दक्षाध्वरजिघांसया ॥
ससर्ज सहसा वीरं वीरभद्रं गणेश्वरम् ॥२४॥ ]
सहस्रवदनं देवं सहस्रकमलेक्षणम् ॥
सहस्रमुद्गरधरं सहस्रशरपाणिकम् ॥२५॥
शूलटङ्कगदाहस्तं दीप्तकार्मुकधारिणम् ॥
चक्रवज्रधरं घोरं चन्द्रार्द्धकृतशेखरम् ॥२६॥
कुलिशोद्योतितकरं तडिज्ज्वलितमूर्द्धजम ॥
दंष्ट्राकरालं बिभ्राणं महावक्त्रं महोदरम् ॥२७॥
विद्युज्जिह्वं प्रलम्बोष्ठं मेघसागरनिःस्वनम् ॥
वसानं चर्म वैयाघ्रमहद्रुधिरनिःस्रवम् ॥२८॥
गण्डद्वितयसंसृष्टमण्डलीकृतकुण्डलम् ॥
वरामरशिरोमालावलीकलितशेखरम् ॥२९॥
रणन्नूपुरकेयूरमहाकनकभूषितम् ॥
रत्नसञ्चयसंदीप्तं तारहारावृतोरसम् ॥३०॥
महाशरभशार्दूलसिंहैः सदृशविक्रमम् ॥
प्रशस्तमत्तमातङ्गसमानगमनालसम् ॥३१॥
शङ्खचामरकुन्देन्दुमृणालसदृशप्रभम् ॥
सतुषारमिवाद्रीन्द्र साक्षाज्जङ्गमतां गतम् ॥३२॥
ज्वालामालापरिक्षिप्तं दीप्तमौक्तिकभूषणम् ॥
तेजसा चैव दीव्यन्तं युगान्त इव पावकम् ॥३३॥

## ८०. सूर्यस्तोत्रम्

( भविष्योत्तरपुराणम् )

अजाय लोकत्रयपावनाय भूतात्मने गोपतये वृषाय ।।
सूर्याय सर्वप्रलयान्तकाय नमो महाकारुणिकोत्तमाय ।।१३३।।
विवस्वते ज्ञानभृदन्तरात्मने जगत्प्रदीपाय जगद्धितैषिणे ।।
स्वयम्भुवे दीप्तसहस्रचक्षुषे सुरोत्तमायामिततेजसे नमः ।।१३४।।
सुरैरनेकैः परिसेविताय हिरण्यगर्भाय हिरण्मयाय ।।
महात्मने मोक्षपदाय नित्यं नमोऽस्तु ते वासरकारणाय ।।१३५।।

आदित्यश्चार्चितो देव आदित्यः परमं पदम् ।।
आदित्यो मातृको भूत्वा आदित्यो वाङ्मयं जगत् ।।१३६।।
आदित्यं पश्यते भक्त्या मां पश्यति ध्रुवं नरः ।।
नादित्यं पश्यते भक्त्या न स पश्यति मां नरः ।।१३७।।
त्रिगुणं च त्रितत्त्वं च त्रयो देवास्त्रयोऽग्नयः ।।
त्रयाणां च त्रिमूर्तिस्त्वं तुरीयस्त्वं नमोस्तु ते ।।१३८।।

नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ।।
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायणशङ्करात्मने ।।१३९।।
यस्योदयेनेह जगत्प्रबुद्ध्यते प्रवर्त्तते चाखिलकर्मसिद्धये ।।
ब्रह्मेन्द्रनारायणरुद्रवन्दितः स नः सदा यच्छतु मङ्गलं रविः ।।१४०।।
नमोऽस्तु सूर्याय सहस्ररश्मये सहस्रशाखान्वितसंभवात्मने ।।
सहस्रयोगोद्भवभावभागिने सहस्रसंख्यायुगधारिणे नमः ।।१४१।।
यन्मडलं दीप्तिकरं विशालं रत्नप्रभं तीव्रमनादिरूपम् ।।
दारिद्रयदुःखक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम् ।।१४२।।
यन्मंडलं देवगणैः सुपूजितं विप्रैः स्तुतं भावनमुक्तिकोविदम् ।।
तं देवदेवं प्रणमामि सूर्यं पुनातु......... ।।१४३।।
यन्मंडलं ज्ञानघनं त्वगम्यं त्रैलोक्यपूज्यं त्रिगुणात्मरूपम् ।।
समस्ततेजोमयदिव्यरूपं पुनातु ०००...... ।।१४४।।
यन्मंडलं गूढमतिप्रबोधं धर्मस्य वृद्धिं कुरुते जनानाम् ।।
यत्सर्वपापक्षयकारणं च पुनातु ००० ...... ।।१४५।।

यन्मंडलं व्याधिविनाशदक्षं यदृग्यजुःसामसु संप्रगीतम् ॥
प्रकाशितं येन च भूर्भुवःस्वः पुनातु ०००...... ॥१४६॥
यन्मंडलं वेदविदो वदन्ति गायन्ति यच्चारणसिद्धसंघाः ॥
यद्योगिनो योगजुषां च सङ्घाः पुनातु ०००...... ॥१४७॥
यन्मंडलं सर्वजनेषु पूजितं ज्योतिश्च कुर्यादिह मर्त्यलोके ॥
यत्कालकालादिमनादिरूपं पुनातु ००० ........ ॥१४८॥
यन्मडलं विष्णुचतुर्मुखाख्यं यदक्षरं पापहरं जनानाम् ॥
यत्कालकल्पक्षयकारणं च पुनातु ०००...... ॥१४९॥
यन्मंडलं विश्वसृजां प्रसिद्धमुत्पत्तिरक्षाप्रलयप्रगल्भम् ॥
यस्मिञ्जगत्संहरतेऽखिलं च पुनातु ०००...... ॥१५०॥
यन्मंडलं सर्वगतस्य विष्णोरात्मा परं धाम विशुद्धतत्त्वम् ॥
सूक्ष्मांतरैर्योगपथानुगम्यं पुनातु ०००...... ॥१५१॥
यन्मंडलं ब्रह्मविदो वदन्ति गायन्ति यच्चारणसिद्धसंघाः ॥
यन्मंडलं वेदविदः स्मरन्ति पुनातु ००० ...... ॥१५२॥
यन्मडलं वेदविदोपगीतं यद्योगिनां योगपथानुगम्यम् ॥
तत्सर्ववेदं प्रणमामि सूर्यं पुनातु ०००......॥१५३॥
मंडलाष्टमिदं पुण्यं यः पठेत्सततं नरः ॥
सर्वपापविशुद्धात्मा सूर्यलोके महीयते ॥१५४॥

ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसंनिविष्टः ॥
केयूरवान्मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः ॥
सशंखचक्रं रविमंडले स्थितं कुशेशयाक्रान्तमनन्तमच्युतम् ॥
भजामि बुद्धया तपनीयमूर्तिं सुरोत्तमं चित्रविभूषणोज्ज्वलम् ॥

एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः ॥
कीर्तयन्ति सुरश्रेष्ठं देवं नारायणं विभुम् ॥१५७॥
वेदवेदाङ्गशरीरं दिव्यदीप्तिकरं परम् ॥
रक्षोघ्नं रक्तवर्णं च सृष्टिसंहारकारकम् ॥१५८॥
एकचक्रो रथो यस्य दिव्यः कनकभूषितः ॥
स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥१५९॥

आदित्यः प्रथमं नाम द्वितीयं तु दिवाकरः ॥
तृतीयं भास्करः प्रोक्तं चतुर्थं तु प्रभाकरः ॥१६०॥
पञ्चमं तु सहस्रांशुः षष्ठं चैव त्रिलोचनः ॥
सप्तमं हरिदश्वश्च अष्टमं तु विभावसुः ॥१६१॥
नवमं दिनकृत्प्रोक्तं दशमं द्वादशात्मकम् ॥
एकादशं त्रयीमूर्तिर्द्वादशं सूर्य एव च ॥१६२॥
द्वादशादित्यनामानि प्रातःकाले पठेन्नरः ॥
दुःस्वप्ननाशनं चैव सर्वदुःखं च नश्यति ॥१६३॥

## ८१. रविस्तवः

( पद्म, सृष्टिखण्ड, ४३ )

यस्तूदयाद्रिशिखरे मुकुटायमानलीलागभस्तिभिरलं कुसुमप्रकाशैः ॥
व्याप्य स्वदीधितिगणैः प्रदिशो दिशश्च देदीप्यते स सविता विभवाय लोके ॥
ब्रह्मेन्द्ररुद्रमरुदच्युतवह्निपाथोनाथप्रयोगनिपुणैश्च ऋषीन्द्रसङ्घैः
श्रेयोर्थिभिः प्रतिदिनं दिवसाङ्गरागैर्दिव्याङ्गरागपरिलिप्तसमस्तदेहैः ॥
पूज्यं वपुस्तव सदा प्रलये हि वेदैर्गीर्भिर्विचित्रपदमण्डलमण्डिताभिः ॥
ये त्वां (न) स्तुवन्ति परसद्मनि सद्महीना नित्यं प्रसारितकरा भुवि ते भवन्ति
ये दुष्टकुष्ठपिटिकादिभिरर्दिताङ्गाः शीर्णत्वचः कुनखिनश्च्युतकेशनासाः ॥
देवेश तेऽपि तव पादनता भवन्ति सद्यो द्विरष्टशरदाकृतयो मनुष्याः ॥५७॥
सामेति सामगगणा हि मखार्थकं त्वामध्वर्यवः ऋगिति बह्वृचमुख्यपूगाः ॥
त्वामेवमार्यमतिकार्यविदोऽधिगन्तुं नागाश्च वेत्ति पितरोऽप्यथ सर्वगन्धम् ॥
मायेति चोपनिषदर्क षडेव देवा मर्त्यास्तथा वधमिवेह उपासतेऽमी ॥
गन्धर्वकिन्नरगणाः सहचारणैस्तु रूपं तथा च भगवन्प्रतिपद्यसे त्वम् ॥५९॥
ये नार्चयन्ति सततं भवतोऽर्च्यमर्चिस्तेऽर्चिष्प्रतापितदिगम्बरवित्तहीनाः ॥
क्षुत्क्षामकण्ठजठरा घटखर्परेण भिक्षामटन्ति परवेश्मसु तेऽर्थहीनाः ॥६०॥
उत्फुल्लकोकनदकोषविशालनेत्रमीषद्विलासललितालकपोलतारम् ॥
कामं प्रशस्ततरसुन्दरहाररम्यमुत्तुङ्गपीवरपयोधरभारखिन्नम् ॥६१॥
रम्भोपमोरुपृथुपीननितम्बबिम्बानद्धक्वणन्मणिरणद्रसनाकलापम् ॥
वृन्दं ललाटतटकोटिपटान्तलम्बिहेमाञ्चलाञ्चितमुखं कुलपालिकानाम् ॥

कान्तं गृहेषु कलगद्गदभाषितानां झंकारनूपुररवेण विराजितानाम् ॥
तेषां कृशानुकरमिन्दुसमानकान्तं यैरर्चितोऽसि भगवन्भवमोचनस्त्वम् ॥
ब्रह्मा त्वमेव हरिरस्यनिलोऽनलोऽसि रुद्रोऽन्तकोऽसि वरुणोऽस्यमराधिपोऽसि ॥
सोमोऽसि वायुरसि भूरसि चेश्वरोऽसि यज्ञोऽसि वित्तपतिरस्यपराजितोऽसि ॥
ये सप्तसप्तिसुरवाहरणेन मुक्ता भूमावथेति तरसोत्तरं तरीताः ॥
व्योमैतदन्तरहितं परितो हि गत्वा गच्छन्ति न श्रमपदं हि मनागपीमे ॥६५॥
ध्यानैकयोगनिरताश्च समाधिभावाद्ध्यात्वा पदं तव तुरीयमनन्तमूर्ते ॥
मुक्तामयास्तनुभृतो न भियाऽभियुक्तास्तद्ब्रह्म शाश्वतमचिन्त्यमनाद्यनन्तम् ॥
जन्माधिरोगरहितं परमं पुराणमीशं जरामरणशोकभयातिरिक्तम् ॥
स्थूलानुभावनगणागणितं विशुद्धं वेदान्तवादिभिरलं परिपठ्यते यत् ॥६७॥
त्वामग्निपुञ्जवपुषं तपसां निवासं याता दिवं सुचिरकालमुपास्य भक्ताः ॥
भानो सुरासुरसमूहशिरोनिघृष्टपादारविन्दयुगुलामलचारुमूर्ते ॥६८॥
भूतेश भूतवरदाप्रकृदव्ययात्मन्व्योमाट्टहाससवितर्भुवनैकदीप ॥
ऋक्साममन्त्रयजुषामधिवास नामसृष्टिस्थितिप्रलयकारण लोकपाल ॥
दीनस्य देव कृपणस्य भवे भवेह मग्नस्य चारुदविचारमनोरथानि ॥
शश्वद्यतीश्वर ससीकरकङ्कघोरोत्पातैर्जरामरणशोकरुगान्तरस्य ॥७०॥

यः प्रातः सायमिदं मध्याह्ने वा पठेच्च दीप्तांशोः ॥
सालोक्यं याति रवेः प्राप्नोति धर्मार्थकामांश्च ॥७१॥

## ८२. सूर्यस्तवनम्

( मार्कण्डेय, अ. १०४ ).

[ लिख्यमाने ततो भानौ विश्वकर्मा प्रजापतिः ॥
उद्भूतपुलकः स्तोत्रमिदं चक्रे विवस्वतः ॥१॥ ]

मार्कण्डेय उवाच —

विवस्वते प्रणतहितानुकम्पिने महात्मने समजवसप्तसप्तये ॥
सुतेजसे कमलकुलावबोधिने नमस्तमःपटलपटावपाटिने ॥२॥
पावनातिशयपुण्यकर्मणं नैककामविषयप्रदायिने ॥
भास्वरानलमयूखशायिने सर्वलोकहितकारिणे नमः ॥३॥
अजाय लोकत्रयकारणाय भूतात्मने गोपतये वृषाय ॥

नमो महाकारुणिकोत्तमाय सूर्याय चक्षुष्प्रभवालयाय ॥४॥
विवस्वते ज्ञानभृतेऽन्तरात्मने जगत्प्रतिष्ठाय जगद्धितैषिणे ॥
स्वयम्भुवे लोकसमस्तचक्षुषे सुरोत्तमायामिततेजसे नमः ॥५॥
क्षणमुदयाचलमौलिमणिः सुरगणमहितहितो जगतः ॥
त्वमु मयूखसहस्रवपुर्जगति विभासि तमांसि नुदन् ॥६॥
भवतिमिरासवपानमदाद्भवति विलोहितविग्रहता ॥
मिहिर विभासि यतः सुतरां त्रिभुवनभावन भानिकरैः ॥७॥
रथमधिरुह्य समावयवं चारुविकम्पितमुरुरुचिरम् ॥
सततमखिन्नहयैर्भगवंश्चरसि जगद्धिताय विततम् ॥८॥
अमृतमयेन रसेन समं विबुधपितॄनपि तर्पयसे ॥
अरिगणसूदन तेन तव प्रणतिमुपेत्य लिखामि वपुः ॥९॥
शुकसमवर्णहयप्रथितं तव पादपांसुपवित्रतमम् ॥
नतजनवत्सल मां प्रणतं त्रिभुवनपावन पाहि रवे ॥१०॥
इति सकलजगत्प्रदीपभूतं त्रिभुवनभावनधामहेतुमेकम् ॥
रविमखिलजगत्प्रदीपभूतं त्रिदशवर प्रणतोऽस्मि सर्वदा त्वाम् ॥११॥

## ८३. श्रीसूर्याष्टोत्तरशतनामस्तोत्रम्

( स्कान्द, प्र.क्षे.मा., २७९ )

धौम्येन तु यथा पूर्वं पार्थाय सुमहात्मने ॥४॥
नामाष्टशतमाख्यातं तच्छृणुष्व महामते ॥
सूर्योऽर्यमा भगस्त्वष्टा पूषाऽर्कः सविता रविः ॥५॥
गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः ॥
पृथिव्यापश्च तेजश्च खं वायुश्च परायणः ॥६॥
सोमो बृहस्पतिः शुक्रो बुधोऽङ्गारक एव च ॥
इन्द्रो विवस्वान्दीप्तांशुः शुचिः शौरिः शनैश्चरः ॥७॥
ब्रह्मा रुद्रश्च विष्णुश्च स्कन्दो वैश्रवणो यमः ॥
वैद्युतो जाठरश्चाग्निरिन्धनस्तेजसां पतिः ॥८॥
धर्मध्वजो वेदकर्ता वेदाङ्गो वेदवाहनः ॥

कृतं त्रेता द्वापरश्च कलिः सर्वामराश्रयः ॥९॥
कलाकाष्ठामुहूर्त्ताश्च पक्षा मासा अहर्निशाः ॥
संवत्सरकरोऽश्वत्थः कालचक्रो विभावसुः ॥१०॥
पुरुषः शाश्वतो योगी व्यक्ताव्यक्तः सनातनः ॥
लोकाध्यक्षः प्रजाध्यक्षो विश्वकर्मा तमोनुदः ॥११॥
वरुणः सागरोंऽशुश्च जीवन्तो जीवनोऽरिहा ॥
भूताश्रयो भूतपतिः सर्वभूतनिषेवितः ॥
समः सुवर्णो भूतादिः शीघ्रगः प्राणधारकः ॥१४॥
धन्वन्तरिर्धूमकेतुरादिदेवोऽदितेः सुतः ॥
द्वादशात्माऽरविन्दाक्षः पिता माता पितामहः ॥१५॥
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥
देहकर्त्ता प्रशान्तात्मा विश्वात्मा विश्वतोमुखः ॥
चराचरात्मा सूक्ष्मात्मा मैत्रेण वपुषाऽन्वितः ॥१६॥

## ८४. श्रीचन्द्राष्टोत्तरशतनामस्तोत्रम्

( बृहद्धर्म, उ. खं., ११ )

चन्द्रोऽमृतमयः श्वेता विधुर्विमलरूपवान् ॥
विशालमण्डलः श्रीमान् पीयूषकिरणः करी ॥२१॥
द्विजराजः शशधरः शशी शिवशिरोगृहः ॥
क्षीराब्धितनयो दिव्यो महात्मामृतवर्षणः ॥२२॥
रात्रिनाथो ध्वान्तहर्त्ता निर्म्मलो लोकलोचनः ॥
चक्षुराह्लादजनकस्तारापतिरखण्डितः ॥२३॥
षोडशात्मा कलानाथो मदनः कामवल्लभः ॥
हंसस्वामी क्षीणवृद्धो गौरः सततसुन्दरः ॥२४॥
मनोहरो देवभोग्यो ब्रह्मकर्म्मविवर्द्धनः ॥
वेदप्रियो वेदकर्म्मकर्त्ता हर्त्ता हरो हरिः ॥२५॥
ऊर्ध्ववासी निशानाथः शृङ्गारभावकर्मणः ॥
मुक्तिद्वारं शिवात्मा च तिथिकर्त्ता कलानिधिः ॥२६॥

ओषधीपतिरब्जश्च सोमो जैवातृकः शुचिः ।।
मृगाङ्को ग्लौः पुण्यनामा चित्रकर्म्मा सुरार्चितः ।।२७।।
रोहिणीशो बुधपिता आत्रेयः पुण्यकीर्त्तकः ।।
निरामयो मन्त्ररूपः सत्यो राजा धनप्रदः ।।२८।।
सौन्दर्यदायको दाता राहुग्रासपराङ्मुखः ।।
शरण्यः पार्वतीभालभूषणं भगवानपि ।।२९।।
पुण्यारण्यप्रियः पूर्णः पूर्णमण्डलमण्डितः ।।
हास्यरूपो हास्यकर्त्ता शुद्धः शुद्धस्वरूपकः ।।३०।।
शरत्कालपरिप्रीतः शारदः कुमुदप्रियः ।।
द्युमणिर्दक्षजामाता यक्ष्मारिः पापमोचनः ।।३१।।
इन्दुः कलङ्कनाशी च सूर्यसङ्गमपण्डितः ।।
सूर्योद्भूतः सूर्यगतः सूर्यप्रियकरः परः ।।३२।।
स्निग्धरूपः प्रसन्नश्च मुक्ताकर्पूरसुन्दरः ।।
जगदाह्लादसन्दर्शो ज्योतिःशास्त्रप्रमाणकः ।।३३।।
सूर्य्याभावदुःखहर्त्ता वनस्पतिगतः कृती ।।
यज्ञरूपो यज्ञभागी वैद्यो विद्याविशारदः ।।३४।।
रश्मिकोटिर्दीप्तिकारी गौरभानुरिति द्विज ।।
नाम्नामष्टोत्तरशतं चन्द्रस्य पापनाशनम् ।।३५।।

## ८५. शनिस्तवः

( स्कान्द, प्र. क्षे. मा. अ. ६९ )

नमो नीलमयूखाय नीलोत्पलनिभाय च ।।
नमो निर्मांसदेहाय दीर्घश्मश्रुजटाय च ।।३४।।
नमो विशालनेत्राय शुष्कोदरभयानक ।।
नमः परुषगात्राय स्थूलरोमाय वै नमः ।।३५।।
नमो नित्यं क्षुधार्त्ताय नित्यतृप्ताय वै नमः ।।
नमः कालाग्निरूपाय कृतान्तक नमोऽस्तु ते ।।३६।।
नमो दीर्घाय शुष्काय कालदृष्टे नमोऽस्तु ते ।।
नमस्ते कोटराक्षाय दुर्निरीक्ष्याय वै नमः ।।३७।।

नमो घोराय रौद्राय भीषणाय करालिने ॥
नमस्ते सर्वभक्षाय वलीमुख नमोऽस्तु ते ॥३८॥
सूर्यपुत्र नमस्तेऽस्तु भास्करे भयदायके ॥
अधोदृष्टे नमस्तुभ्यं वपुःश्याम नमोऽस्तु ते ॥३९॥
नमो मन्दगते तुभ्यं निर्स्त्रिशाय नमो नमः ॥
नमस्ते उग्ररूपाय चण्डतेजाय वै नमः ॥४०॥
तपसा दग्धदेहाय नित्यं योगरताय च ॥
नमस्ते ज्ञाननेत्राय कश्यपात्मज सूनवे ॥४१॥
तुष्टो ददासि वै राज्यं रुष्टो हरसि तत्क्षणात् ॥
देवासुरमनुष्याश्च पशुपक्षिसरीसृपाः ॥४२॥

## ८६. दत्तात्रेयस्तोत्रम्

(नारदपुराणम्.)

श्रीगणेशाय नमः ॥

जटाधरं पाण्डुरङ्गं शूलहस्तं कृपानिधिम् ॥
सर्वरोगहरं देवं दत्तात्रेयमहं भजे ॥१॥

अस्य श्रीदत्तात्रेयस्तोत्रमंत्रस्य भगवान्नारद ऋषिः । अनुष्टुप्छन्दः । श्रीदत्तः परमात्मा देवता । श्रीदत्तप्राप्त्यर्थं जपे विनियोगः ॥

जगदुत्पत्तिकर्त्रे च स्थितिसंहारहेतवे ॥
भवपाशविमुक्ताय दत्तात्रेय नमोऽस्तु ते ॥१॥

जराजन्मविनाशाय देहशुद्धिकराय च । दिगम्बर दयामूर्ते ००० ॥२॥
कर्पूरकान्तिदेहाय ब्रह्ममूर्तिधराय च । वेदशास्त्रपरिज्ञाय ००० ॥३॥
ह्रस्वदीर्घकृशस्थूलनामगोत्रविवर्जित । पंचभूतकदीप्ताय ००० ॥४॥
यज्ञभोक्त्रे च यज्ञाय यज्ञरूपधराय च । यज्ञप्रियाय सिद्धाय ००० ॥५॥
आदौ ब्रह्मा मध्ये विष्णुरन्ते देवः सदाशिवः । मूर्तित्रयस्वरूपाय ००० ॥६॥
भोगालयाय भोगाय योग्ययोग्याय धारिणे । जितेन्द्रियजितज्ञाय ००० ॥७॥
दिगम्बराय दिव्याय दिव्यरूपधराय च । सदोदितपरब्रह्म ००० ॥८॥
जम्बूद्वीपे महाक्षेत्रे मातापुरनिवासिने । जयमानसतां देव ००० ॥९॥
भिक्षाटनं गृहे ग्रामे पात्रं हेममयं करे । नानास्वादमयी भिक्षा ००० ॥१०॥

ब्रह्मज्ञानमयी मुद्रा वस्त्रे चाकाशभूतले । प्रज्ञानघनबोधाय ००० ॥११॥
अवधूत सदानन्द परब्रह्मस्वरूपिणे । विदेहदेहरूपाय ००० ॥१२॥
सत्यरूप सदाचार सत्यधर्मपरायण । सत्याश्रय परोक्षाय ००० ॥१३॥
शूलहस्त गदापाणे वनमालासुकुंधर । यज्ञसूत्रधर ब्रह्मन् ००० ॥१४॥
क्षराक्षरस्वरूपाय परात्परतराय च । दत्तमुक्तिपरस्तोत्र ००० ॥१५॥
दत्तविद्या तु लक्ष्मीश दत्तस्वात्मस्वरूपिणे । गुणनिर्गुणरूपाय ००० ॥१६॥
शत्रुनाशकरं स्तोत्रं ज्ञानविज्ञानदायकम् । सर्वपापं शमं याति ०००॥१७॥
इदं स्तोत्रं महद्दिव्यं दत्तप्रत्यक्षकारकम् । दत्तात्रेयप्रसादाच्च नारदेन प्रकीर्त्तितम्॥

## ८७. हनुमत्स्तवः

( नारदीय, पूर्वखण्ड, ७८ )

ऋग्यजुः सामरूपश्च प्रणवस्त्रिवृदध्वरः ॥
तस्मै स्वस्मै च सर्वस्मै ततोऽस्म्यात्मसमाधिना ॥३०॥
अनेकान्तब्रह्माण्डधृते ब्रह्मस्वरूपिणे ॥
समीरणात्मने तस्मै नतोऽस्म्यात्मस्वरूपिणे ॥३१॥
नमो हनुमते तस्मै नमो मारुतसूनवे ॥
नमः श्रीरामभक्ताय श्यामाय महते नमः ॥३२॥
नमो वानरवीराय सुग्रीवसख्यकारिणे ॥
लङ्काविदहनायाथ महासागरतारिणे ॥३३॥
सीताशोकविनाशाय राममुद्राधराय च ॥
रावणान्तनिदानाय नमः सर्वोत्तरात्मने ॥३४॥
मेघनादमखध्वंसकारणाय नमो नमः ॥
अशोकवनविध्वंसकारिणे जयदायिने ॥३५॥
वायुपुत्राय वीराय आकाशोदरगामिने ॥
वनपालशिरश्छेत्रे लंकाप्रासादभंजिने ॥३६॥
ज्वलत्कांचनवर्णाय दीर्घलांगूलधारिणे ॥
सौमित्रिजयदात्रे च रामदूताय ते नमः ॥३७॥
अक्षस्य वधकर्त्रे च ब्रह्मशस्त्रनिवारिणे ॥
लक्ष्मणाङ्गमहाशक्तिजातक्षतविनाशिने ॥३८॥

रक्षोघ्नाय रिपुघ्नाय भूतघ्नाय नमो नमः ॥
ऋक्षवानरवीरौघप्रासादाय नमो नमः ॥३९॥
परसैन्यबलघ्नाय शस्त्रास्त्रघ्नाय ते नमः ॥
विषघ्नाय द्विषघ्नाय भयघ्नाय नमो नमः ॥४०॥
महारिपुभयघ्नाय भक्तत्राणैककारिणे ॥
परप्रेरितमन्त्राणां मन्त्राणां स्तम्भकारिणे ॥४१॥
पयःपाषाणतरणकारणाय नमो नमः ॥
बालार्कमण्डलग्रासकारिणे दुःखहारिणे ॥४२॥
नखायुधाय भीमाय दन्तायुधधराय च ॥
विहङ्गमाय शर्वाय वज्रदेहाय ते नमः ॥४३॥
प्रतिग्रामस्थितायाथ भूतप्रेतवधार्थिने ॥
करस्थशैलशस्त्राय रामशस्त्राय ते नमः ॥४४॥
कौपीनवाससे तुभ्यं रामभक्तिरताय च ॥
दक्षिणाशाभास्कराय सतां चन्द्रोदयात्मने ॥४५॥
कृत्याक्षतव्यथाघ्नाय सर्वक्लेशहराय च ॥
स्वाम्याज्ञापार्थसंग्रामसंख्यासंजयकारिणे ॥४६॥
भक्तानां दिव्यवादेषु संग्रामे जयकारिणे ॥
किल्किलाबुबकाराय घोरशब्दकराय च ॥४७॥
सर्वाग्निव्याधिसंस्तम्भकारिणे भयहारिणे ॥
सदा वनफलाहारसंतृप्ताय विशेषतः ॥
महार्णवशिलाबद्धसेतुबन्धाय ते नमः ॥४८॥

## ८८. शान्तिकृत–अग्निस्तोत्रम्

(मार्कण्डेय, ९६.)

त्वमक्षयो वह्निरचिन्त्यरूपः समृद्धिमान्दुष्प्रसहोऽतितीव्रः ॥
तवाव्ययं भीममशेषलोकसंवर्धकं हन्त्यथ वातिवीर्यम् ॥६२॥
त्वमुत्तमं सत्त्वमशेषसत्त्वहृत्पुण्डरीकस्थमनन्तमीड्यम् ॥
त्वया ततं विश्वमिदं चराचरं हुताशनैको बहुधा त्वमत्र ॥६३॥

त्वमक्षयः सगिरिवना वसुन्धरा नभः ससोमार्कमहर्दिवाखिलम् ॥
महोदधेर्जठरगतश्च वाडवो भवान्विभुः पिबति पयांसि पावक ॥६४॥
हुताशनस्त्वमिति सदाभिपूज्यसे महाक्रतौ नियमपरैर्महर्षिभिः ॥
अभिष्टुतः पिबसि च सोममध्वरे वषट्कृतान्यपि च हवींषि भूतये ॥६५॥
त्वं विप्रैः सततमिहेज्यसे फलार्थं वेदाङ्गेष्वथ सकलेषु गीयसे त्वम् ॥
त्वद्धेतोर्यजनपरायणा द्विजेन्द्रा वेदाङ्गान्यधिगमयन्ति सर्वकाले ॥६६॥
त्वं ब्रह्मा यजनपरस्तथैव विष्णुर्भूतेशः सुरपतिरर्यमा जलेशः ॥
सूर्येन्दू सकलसुरासुराश्च हव्यैः सन्तोष्याभिमतफलान्यथाप्नुवन्ति ॥६७॥
अर्चिर्भिः परममहोपघातदुष्टं संस्पृष्टं तव शुचि जायते समस्तम् ॥
स्नानानां परममतीव भस्मना सत्सन्ध्यायां मुनिभिरतीव सेव्यसे तत् ॥
तत्कृत्वा त्रिदिवमवाप्नुवन्ति लोकाः सद्भक्त्या सुखनियताः समूहगीतम् ॥
प्रसीद वह्ने शुचिनामधेय प्रसीद वायवे विमलादिदीप्ते ॥
प्रसीद मे पावक वैद्युताभ प्रसीद हव्याशन पाहि मां त्वम् ॥७०॥

यत्ते वह्ने शिवं रूपं ये च ते सप्त हेतयः ॥
तैः पाहि नः स्तुतो देव पिता पुत्रमिवात्मजम् ॥७१॥

## ८९. कल्किस्तोत्रम्

### ( कल्किपुराणम् )

सुशान्तोवाच—

जय हरेऽमराधीशसेवितं तव पदाम्बुजं भूरिभूषणम् ॥
कुरु ममाग्रतः साधुसत्कृतं त्यज महामते मोहमात्मनः ॥१॥
तव वपुर्जगद्रूपसंपदा विरचितं सतां मानसे स्थितम् ॥
रतिपतेर्मनोमोहदायकं कुरु विचेष्टितं कामलम्पटम् ॥२॥
तव यशो जगच्छोकनाशनं मृदुकथामृतं प्रीतिदायकम् ॥
स्मितसुधोक्षितं चन्द्रवन्मुखं तव करोत्यलं लोकमङ्गलम् ॥३॥
मम पतिस्त्वयं सर्वदुर्जयो यदि तवाप्रियं कर्मणाऽऽचरेत् ॥
जहि तदात्मनः शत्रुमुद्यतं कुरु कृपां न चेदीदृगीश्वरः ॥४॥

महदहंयुतं पञ्चमात्रया प्रकृतिजायया निर्मितं वपुः ॥
तव निरीक्षणाल्लीलया जगत्स्थितिलयोदयं ब्रह्मकल्पितम् ॥५॥
भूवियन्मरुद्वारितेजसां राशिभिः शरीरेन्द्रियाश्रितैः ॥
त्रिगुणया स्वया मायया विभो कुरु कृपां भवत्सेवनार्थिनाम् ॥६॥
तव गुणालयं नाम पावनं कलिमलापहं कीर्तयन्ति ये ॥
भवभयक्षयं तापतापिता मुहुरहो जनाः संसरन्ति ते ॥७॥
तव जनुः सतां मानवर्धनं जिनकुलक्षयं देवपालकम् ॥
कृतयुगार्पकं धर्मपूरकं कलिकुलान्तकं शं तनोतु मे ॥८॥
मम गृहं पतिपुत्रनप्तृकं गजरथैर्ध्वजैश्चामरैर्धनैः ॥
मणिवरासनं सत्कृतिं विना तव पदाब्जयोः शोभयन्ति किम् ॥९॥
तव जगद्वपुः सुन्दरस्मितं मुखमनिन्दितं सुन्दरारवम् ॥
यदि न मे प्रियं वल्गुचेष्टितं परिकरोत्यहो मृत्युरस्त्विह ॥१०॥
हयचर भयहरकरहरशरणखरतरवरशर दशबलदमन ॥
जय हतपरभर भववरनाशन शशधरशतसमरसभरमदन ॥११॥

## व्यासस्तोत्रम्

(ब्रह्म, १३८)

मुनय ऊचुः–

प्रोक्तं त्वया मुनिश्रेष्ठ पुराणं श्रुतिसंमितम् ॥
सर्वाभिप्रेतफलदं सर्वपापहरं परम् ॥६॥
सर्वज्ञस्त्वं महाभाग देवेष्विव बृहस्पतिः ॥
नमस्यामो महाप्राज्ञं ब्रह्मिष्ठं त्वां महामुनिम् ॥८॥
येन त्वया तु वेदार्था भारते प्रकटीकृताः ॥
कः शक्नोति गुणान्वक्तुं तव सर्वान्महामुने ॥९॥
नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ॥
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥११॥
अज्ञानतिमिरान्धानां भ्रामितानां कुदृष्टिभिः ॥
ज्ञानाञ्जनशलाकेन त्वया चोन्मीलिता दृशः ॥१२॥

चतुर्थो भागः ।

# परमार्थयोगः ।

## १. परमेशस्थानवर्णनम्

न यत्र वाचो न मनो न सत्त्वं तमो रजो वा महदादयोऽमी ।।
न प्राणबुद्धीन्द्रियदेवता वा न सन्निवेशः खलु लोककल्पः ।।२०।।
न स्वप्नजाग्रन्न च तत्सुषुप्तं न खं जलं भूरनिलोऽग्निरर्कः ।।
संसुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमामनन्ति ।।२१।।

भागवत, १२, ४.

## २. सगुणनिर्गुणभक्तियोगः (१)

यं सर्वदेवं परमेश्वरं हि निष्केवलं ज्ञानमयं प्रधानम् ।।
वदन्ति नारायणमादिसिद्धं सिद्धेश्वरं तं शरणं प्रपद्ये ।।३५।।

पद्म, भूमिखण्ड, अ. १८.

नमामि गोविन्दपदारविन्दं सदेन्दिरानन्दनमुत्तमाढ्यम् ।।
जगज्जनानां हृदि संनिविष्टं महाजनैकायनमुत्तमोत्तमम् ।।१।।

पद्म, आदिखण्ड, १.

श्रीकृष्णरूपगुणवर्णनशास्त्रवर्गबोधाधिकार इह चेदलमन्यपाठैः ।।
तत्प्रेमभावरसभक्तिविलासनामहारेषु चेत्खलु मनः किमु कामिनीभिः ।।६७।।
तं चेतसा प्रभजतां व्रजबालकेन्द्रं वृन्दावनं क्षितितलं यमुनाजलं च ।।
तल्लोकनाथपदपङ्कजधूलिमिश्रे लिप्तं वपुः किल वृथाऽगरुचन्दनाद्यैः ।।६८।।

*Ibid*, अ. ८०.

यावज्जनो न शृणुते भुवि विष्णुभक्तिं साक्षात्सुधारसमशेषरसैकसारम् ।।
तावज्जरामरणजन्मशताभिघातदुःखानि तानि लभते बहुदेहजानि ।।२६।।
सञ्चिन्तितः कीर्तित एव नित्यं महानुभावो भगवाननन्तः ।।
समन्ततोऽघं विनिहन्ति मेघं वायुर्यथा भानुरिवान्धकारम् ।।२७।।
न भूप देवार्चनयज्ञतीर्थस्नानव्रताचारतपः क्रियाभिः ।।
तथा विशुद्धिं लभतेऽन्तरात्मा यथा हृदिस्थे भगवाननन्ते ।।२८।।

कथा विशुद्धा नरनाथ तथ्यास्ता एव पथ्या हरिभक्तकथ्याः ॥
सङ्कीर्त्यते यासु पवित्रकीर्तिर्विशुद्धमूर्तिर्निजदत्तभक्तिः ॥२९॥
धन्योऽसि धीर धरणीधर धर्मधुर्य ध्यानैकतानहृदयः पुरुषोत्तमस्य ॥
यन्नैष्ठिकी मतिरसौ तव सौभगश्रीः श्रीकृष्णचन्द्रसुकृतश्रवणे प्रवृत्ता ॥३०॥
नातःपरं परमतोषविशेषपोषं पश्यामि पुण्यमुचितं च परस्परेण ॥
सन्तः प्रसज्य यदनन्तगुणाननन्तश्रेयोनिधीनधिकभावजुषो भजन्ति ॥३४॥

*Ibid*, अ. ८५.

यत्कृष्णप्रणिपातधूलिधवलं तद्वर्ष्म तद्वच्छुभं
नेत्रे चेत्तपसोर्जिते सुरुचिरे याभ्यां हरिर्दृश्यते ॥
सा बुद्धिर्विमलेन्दुशङ्खधवला या माधवव्यापिनी
सा जिह्वा मृदुभाषिणी नृप मुहुर्या स्तौति नारायणम् ॥

*Ibid*, ९०.

भजध्वं गोविन्दं नमत हरिमेकं सुरवरं
गमिष्यध्वं लोकानतिविमलभोगानतितराम् ॥
शृणुध्वं हे लोका वदत हरिनामैकमतुलं
यदीच्छावीचीनां सुखतरणमिष्टानि लभत ॥२६॥

*Ibid*, आदिखण्ड, अ. २८

एतावताऽलमघनिर्हरणाय पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नाम् ॥
विक्रुश्य पुत्रमघवान्यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिम् ॥

*Ibid*, ३१.

ध्यायन्तो ध्याननिष्ठाः सुरनरमनवो योगिनो योगरूढाः
सन्तः स्वप्नेऽपि सन्तं कतिकतिजनिभिर्यं न पश्यन्ति तप्त्वा ॥
ध्याये स्वेच्छामयं तं त्रिगुणपरमहो निर्विकारं निरीहं
भक्त्या ध्यानैकहेतोर्निरुपमरुचिरश्यामरूपं दधानम् ॥३॥

ब्रह्मवैवर्त, ब्रह्मखण्ड, १.

## श्रीरघुनाथवर्णनम्

पद्मकोश इव शोभनं मुखं पङ्कजाभनयने सुदीर्घके ॥
उन्नतापृथुमनोहरानसं वल्गुसंगतमनोहरे भ्रुवौ ॥३६॥

जानुलम्बितमनोहरौ भुजौ कम्बुशोभिगलक्रोडह्रस्वकः ॥
सत्कपाटतलविस्तृतश्रिकं वक्ष एतदमलं सलक्ष्मकम् ॥३७॥
शोभनोरुकटिशोभया युतं जानुयुग्ममलं स्वसेवितम् ॥
पादपद्ममखिलैर्निजैः सदा सेवितं रघुपतेः सुशोभनम् ॥३८॥

*Ibid*, पातालखण्ड, अ. ५७.

## भक्तियोगः (२)—योगीन्द्रहारिस्तवः

(पद्म, भूमिखण्ड, अ. २०).

सुव्रत उवाच—

ध्यायन्ति देवाः सततं मुरारिं यस्याङ्गमध्ये सकलं निविष्टम् ॥
योगेश्वरं पापविनाशनं च भजे शरण्यं मधुसूदनाख्यम् ॥१६॥
लोकेषु यो हि सकलेषु विबोधितोऽपि यो लोकगश्च गुणिनो निवसन्ति यत्र ॥
दोषैर्विहीनमखिलैः परमेश्वरं तं सञ्चिन्त्य पादयुगलं सततं नमामि ॥१७॥
नारायणं गुणनिधानमनन्तवीर्यं वेदान्तशुद्धमतयः प्रपठन्ति नित्यम् ॥
संसारसागरमपारमनन्तदुर्गमुत्तारणार्थमखिलं शरणं प्रपद्ये ॥१८॥
योगीन्द्रमानससरोवरराजहंसं शुद्धं प्रभावमखिलं सततं हि यस्य ॥
तस्यैव पादयुगलं ह्यमलं नमामि दीनस्य मेऽशुभभयात्कुरु देव रक्षाम् ॥१९॥
लोकस्य पालनकृते परिणीतधर्मं सत्यान्वितं सकललोकगुरुं सुरेशम् ॥
गायाम्यहं सुरसगीतकतालमानैः श्रीवत्समेकमखिलं भुवनस्य देवम् ॥२०॥
ध्यायेऽखिलस्य भुवनस्य पतिं च देवं दुःखान्धकारदलनार्थमिहैव चन्द्रम् ॥
अज्ञाननाशक(म)मलं च दिनेशतुल्यमानन्दकन्दमखिलं महिमासमेतम् ॥
संपूर्णमेवममृतस्य कलानिधानं तं गीतकौशलमनन्यरसैः प्रगाये ॥२१॥
युक्तं सुयोगकरणैः परमार्थदृष्टिं विश्वं स पश्यति चराचरमेकमित्थम् ॥
पश्यन्ति नैव यमिहाथ सुपापलोकास्तं केशवं शरणमेकमुपैमि नित्यम् ॥२२॥

## भक्तियोगः (३).

(भागवत, ११, १४)

कृष्ण उवाच—

मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः ॥
मयाऽऽत्मना सुखं यत्तत्कुतः स्याद् विषयात्मनाम् ॥१२॥

अकिञ्चनस्य दान्तस्य शान्तस्य समचेतसः ॥
मया संतुष्टमनसः सर्वाः सुखमया दिशः ॥१३॥
न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम् ॥
न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत् ॥१४॥
न तथा मे प्रियतम आत्मयोनिर्न शङ्करः ॥
न च सङ्कर्षणो न श्रीर्नैवात्मा च यथा भवान् ॥१५॥
निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम् ॥
अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिः ॥१६॥
निष्किञ्चना मय्यनुरक्तचेतसः शान्ता महान्तोऽखिलजीववत्सलाः ॥
कामैरनालब्धधियो जुषन्ति यत् तन्नैरपेक्ष्यं न विदुः सुखं मम ॥१७॥
बाध्यमानोऽपि मद्भक्तो विषयैरजितेन्द्रियः ॥
प्रायः प्रगल्भया भक्त्या विषयैर्नाऽभिभूयते ॥१८॥
यथाग्निः सुसमृद्धार्चिः करोत्येधांसि भस्मसात् ॥
तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः ॥१९॥
न साधयति मां योगो न सांख्यं धर्म उद्धव ॥
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥२०॥
भक्त्याहमेकया ग्राह्यः श्रद्धयाऽऽत्मा प्रियः सताम् ॥
भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सम्भवात् ॥२१॥
धर्मः सत्यदयोपेतो विद्या वा तपसान्विता ॥
मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हि ॥२२॥
कथं विनारोमहर्षं द्रवता चेतसा विना ॥
विनाऽऽनन्दाश्रुकलया शुद्ध्येद्भक्त्या विनाऽऽशयः ॥२३॥
वाग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च ॥
विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥२४॥
यथाग्निना हेममलं जहाति ध्मातं पुनः स्वं भजते च रूपम् ॥
आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भजत्यथो माम् ॥२५॥
यथा यथाऽऽत्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः ॥
तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसंप्रयुक्तम् ॥२६॥

विषयान् ध्यायतश्चित्तं विषयेषु विषज्जते ॥
मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ॥२७॥
तस्मादसदभिध्यानं यथा स्वप्नमनोरथम् ॥
हित्वा मयि समाधत्स्व मनो मद्भावभावितम् ॥२८॥
स्त्रीणां स्त्रीसङ्गिनां सङ्गं त्यक्त्वा दूरत आत्मवान् ॥
क्षेमे विविक्त आसीनश्चिन्तयेन्मामतन्द्रितः ॥२९॥
न तथास्य भवेत्क्लेशो बन्धश्चान्यप्रसङ्गतः ॥
योषित्सङ्गाद् यथा पुंसो यथा तत्सङ्गिसङ्गतः ॥३०॥

## ३. योगसाधनम्

( कालवञ्चनशिवप्राप्तिवर्णनम्–शिव, उत्तरा. उमासं, २७ )

देव्युवाच—

वायोस्तु पदमाप्नोति योगाकाशसमुद्भवम् ॥
तन्मे सर्वं समाचक्ष्व प्रसन्नस्त्वं यदि प्रभो ॥१॥

शंकर उवाच—

पुरा मे सर्वमाख्यातं योगिनां हितकाम्यया ॥
कालं जिगाय यस्सम्यग्वायोर्लिङ्गं यथा भवेत् ॥२॥
तेन ज्ञात्वा दिनं योगी प्राणायामपरास्थितः ॥
स जयत्यागतं कालं मासार्द्धेनैव सुन्दरि ॥३॥
हृत्स्थो वायुस्सदा वह्नेर्दीपकस्सोऽनुपावकः ॥
स बाह्याभ्यन्तरो व्यापी वायुस्सर्वगतो महान् ॥४॥
ज्ञानविज्ञानमुत्साहः सर्वं वायोः प्रवर्तते ॥
येनेह निर्जितो वायुस्तेन सर्वमिदं जगत् ॥५॥
धारणायां सदा तिष्ठेज्जरामृत्युजिघांसया ॥
योगी योगरतः सम्यग्धारणाध्यानतत्परः ॥६॥
लोहकारो यथा भस्त्रामापूर्य मुखतो मुने ॥
साधयेद्वायुना कर्म तद्वद्योगी समभ्यसेत् ॥७॥
देवस्सहस्रके नेत्रपादहस्तसहस्रकः ॥
ग्रन्थीन्हि सर्वमावृत्य सोऽग्रे तिष्ठेद्दशाङ्गुलम् ॥८॥

गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकाम् ॥
त्रिवारमायतप्राणाः प्राणायामस्स उच्यते ॥९॥
गतागता निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः ॥
अद्यापि न निवर्तन्ते योगध्यानपरायणाः ॥१०॥
शतमब्दं तपस्तप्त्वा कुशाग्रापः पिबेद्द्विजः ॥
तदाप्नोति फलं देवि विप्राणां धारणैकया ॥११॥
यो द्विजः कल्यमुत्थाय प्राणायामैकमाचरेत् ॥
सर्वं पापं निहन्त्याशु ब्रह्मलोकं स गच्छति ॥१२॥
योऽतन्द्रितस्सदैकान्ते प्राणायामपरो भवेत् ॥
जरां मृत्युं विनिर्जित्य वायुगा खेचरीति सः ॥१३॥
सिद्धस्य भजते रूपं कान्ति मेधां पराक्रमम् ॥
शौर्यं वायुसमो गत्या सौख्यं श्लाघ्यं परं सुखम् ॥१४॥

एतत्कथितमशेषं वायोस्सिद्धिं यदाप्नुते योगी ॥
यत्तेजसोऽपि लभते तत्ते वक्ष्यामि देवेशि ॥१५॥
स्थित्वा सुखासने स्वे शेते जनवचनहीने तु ॥
शशिरवियुतया तेजः प्रकाशयन्मध्यमे देशे ॥१६॥
वह्निगतं भ्रूमध्ये प्रकाशते यस्त्वतन्द्रितो योगी ॥
दीपैर्हीनध्वान्ते पश्येन्नूनमसंशयं लोके ॥१७॥
नेत्रे करशाखाभिः किञ्चित्संपीड्य यत्नतो योगी ॥
तारं पश्यन्ध्यायेन्मुहूर्तमर्द्धं तमेकभावोऽपि ॥१८॥

ततस्तु तमसि ध्यायन्पश्यते ज्योतिरैश्वरम् ॥
श्वेतं रक्तं तथा पीतं कृष्णमिन्द्रधनुष्प्रभम् ॥१९॥
भ्रुवोर्मध्ये ललाटस्थं बालार्कसमतेजसम् ॥
तं विदित्वा तु कामाङ्गी क्रीडते कामरूपधृक् ॥२०॥
कारणप्रशमावेशं परकायप्रवेशनम् ॥
अणिमादिगुणावाप्तिर्मनसा चावलोकनम् ॥२१॥
दूरश्रवणविज्ञानमदृश्यं बहुरूपधृक् ॥
सन्तताभ्यासयोगेन खेचरत्वं प्रजायते ॥२२॥

श्रुताध्ययनसंपन्ना नानाशास्त्रविशारदाः ॥
ज्ञानिनोऽपि विमुह्यन्ते पूर्वकर्मवशानुगाः ॥२३॥
पश्यन्तोऽपि न पश्यन्ति श्रृण्वाना बधिरा यथा ॥
यथान्धा मानुषा लोके मूढाः पापविमोहिताः ॥२४॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ॥
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यते प्रायणाय ॥२५॥

एष ते कथितः सम्यक्तेजसो विधिरुत्तमा ॥
कालं जित्वा यथा योगी चामरत्वं प्रपद्यते ॥२६॥
पुनः परतरं वक्ष्ये यथा मृत्युर्न जायते ॥
सावधानतया देवि श्रृणुष्वैकाग्रमानसः ॥२७॥
तुरीया देवि भूतानां योगिनां ध्यानिनां तथा ॥
सुखासने यथास्थानं योगी नियतमानसः ॥२८॥
समुन्नतशरीरोऽपि स बद्धकरसंपुटम् ॥
चञ्चवाकारेण वक्त्रेण पिबन्वायुं शनैश्शनैः ॥२९॥
प्रस्रवन्ति क्षणादापस्तालुस्था जीवदायिकाः ॥
ता जिघ्रेद्वायुनादायामृतं तच्छीतलं जलम् ॥३०॥
पिबन्ननुदिनं योगी न मृत्युवशगो भवेत् ॥
दिव्यकायो महातेजाः पिपासाक्षुद्विवर्जितः ॥३१॥

बलेन नागस्तुरगो जवेन दृष्ट्या सुपर्णस्सुश्रुतिस्तु दूरात् ॥
आकुञ्चिताकुण्डलिकृष्णकेशो गन्धर्वविद्याधरतुल्यवर्णः ॥३२॥
जीवेन्नरो वर्षशतं सुराणां सुमेधसा वाक्पतिना समत्वम् ॥
एवं चरन्खेचरतां प्रयाति यथेष्टचारी सुखितस्सदैव ॥३३॥

पुनरन्यत्प्रवक्ष्यामि विधानं यत्सुरैरपि ॥
गोपितं तु प्रयत्नेन तच्छृणुष्व वरानने ॥३४॥
समाकुञ्च्याभ्यसेद्योगी रसनां तालुकं प्रति ॥
किञ्चित्कालान्तरेणैव क्रमात्प्राप्नोति लम्बिकाम् ॥३५॥
ततः प्रस्रवते सा तु संस्पृष्टा शीतलां सुधाम् ॥
पिबन्नेव सदा योगी सोऽमरत्वं हि गच्छति ॥३६॥

रेफाग्रं लम्बकाग्रं करतलघटनं शुभ्रपद्मस्य बिन्बो-
स्तेनाकृष्टा सुधेयं पतति परपदे देवतानन्दकारी ॥
सारं संसारतारं कृतकलुषतरं कालतारं सतारं
येनेदं प्लावितान्ङ्गं स भवति न मृतः क्षुत्पिपासाविहीनः ॥३७॥
येभिर्युक्ता चतुर्भिः क्षितिधरतनये योगिभिर्वै धरेषा
धैर्य्याच्नित्यं कुतोऽन्तः सकलमपि जगद्यत्सुखप्रापणाय ॥
स्वप्ने देही विधत्ते सकलमपि सदा मानयन्यच्च दुःखं
स्वर्गे ह्येवं धरित्र्याः प्रभवति च ततो वा स किञ्चिच्चतुर्णाम् ॥३८॥
तस्मान्मन्त्रैस्तपोभिर्व्रतनियमयुतैरौषधैर्योगयुक्ता
धात्री रक्ता मनुष्यैर्नयविनययुतैर्धर्मविद्भिः क्रमेण ॥
भूतानामादिदेवो न हि भवति चलः संयुतो वै चतुर्णां
तस्मादेवं प्रवक्ष्ये विधिमनुगदिनं छायिकं यच्छिवाख्यम् ॥३९॥

## ४. स्वर्गद्वाराणि

( मत्स्य, ३९ )

ययातिरुवाच—

तपश्च दानं च शमो दमश्च ह्रीरार्जवं सर्वभूतानुकम्पा ॥
स्वर्गस्य लोकस्य वदन्ति सन्तो द्वाराणि सप्तैव महान्ति पुंसाम् ॥
सर्वाणि चैतानि यथोदितानि तपः प्रधानान्यभिमर्षकेण ॥
नश्यन्ति मानेन तमोऽभिभूताः पुंसः सदैवेति वदन्ति सन्तः ॥२३॥
अधीयानः पण्डितंमन्यमानो यो विद्यया हन्ति यशः परस्य ॥
तस्यान्तवन्तः पुरुषस्य लोका न चास्य तद्ब्रह्मफलं ददाति ॥२४॥
चत्वारि कर्माणि भयंकराणि भयं प्रयच्छन्त्ययथाकृतानि ॥
मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञः ॥२५॥
न मान्यमानो मुदमाददीत न संतापं प्राप्नुयाच्चावमानात् ॥
सन्तः सतः पूजयन्तीह लोके नासाधवः साधुबुद्धिं लभन्ते ॥२६॥
इति दद्यादिति यजेदित्यधीयीत मे श्रुतम् ॥
इत्येतान्यभयान्याहुस्तान्यवर्ज्यानि नित्यशः ॥२७॥
येनाऽऽश्रयं वेदयन्ते पुराणं मनीषिणो मानसे मानयुक्तम् ॥
तन्निःश्रेयस्तेन संयोगमेत्य परां शान्तिं प्राप्नुयुः प्रेत्य चेह ॥२८॥

## ५. मदालसासन्देशः – अलर्कं प्रति

( मार्कण्डेय, अ. ३३–३४ )

मदालसोवाच—

यदा दुःखमसह्यं ते प्रियबन्धुवियोगजम् ॥
शत्रुबाधोद्भवं वापि वित्तनाशात्मसंभवम् ॥६॥
भवेत्तत्कुर्वतो राज्यं गृहधर्मावलम्बिनः ॥
दुःखायतनभूतो हि ममत्वालम्बनो गृही ॥७॥
तदास्मात्पुत्र निष्कृष्य मद्दत्ताङ्गुलीयकात् ॥
वाच्यं ते शासनं पट्टे सूक्ष्माक्षरनिवेशितम् ॥३३. ८॥

---

आर्ति स परमां प्राप्य तत्सस्माराङ्गुलीयकम् ॥
यदुद्दिश्य पुरा प्राह माता तस्य मदालसा ॥२०॥
ततः स्नातः शुचिर्भूत्वा वाचयित्वा द्विजोत्तमान् ॥
निष्कृष्य शासनं तस्माद्ददृशे प्रस्फुटाक्षरम् ॥२१॥
तत्रैव लिखितं मात्रा वाचयामास पार्थिवः ॥
प्रकाशपुलकाङ्गोऽसौ प्रहर्षोत्फुल्ललोचनः ॥२२॥
सङ्गः सर्वात्मना त्याज्यः स चेत्त्यक्तु न शक्यते ॥
स सद्भिः सह कर्तव्यः सतां सङ्गो हि भेषजम ॥२२॥
कामः सर्वात्मना हेयो हातुं चेच्छक्यते न सः ॥
मुमुक्षां प्रति तत्कार्यं सैव तस्यापि भेषजम् ॥३४.२३॥

## ६. मदालसासन्देशः–पुत्रान्प्रति

( मार्कण्डेय, अ. २३ )

सा वै मदालसा पुत्रं बालमुत्तानशायिनम् ॥१०॥
उल्लापनच्छलेनाह रुदमानमविस्वरम् ॥११॥

शुद्धोऽसि रे तात न तेऽस्ति नाम कृतं च ते कल्पनयाधुनैव ॥
पञ्चात्मकं देहमिदं न तेऽस्ति नैवास्य त्वं रोदिषि कस्य हेतोः ॥१२॥
न वा भवान् रोदिति वै स्वजन्मा शुद्धोऽयमासाद्य महीसमूहम् ॥
विकल्प्यमानो विविधैर्गुणार्थैर्गुणाश्च भौताः सकलेन्द्रियेषु ॥१३॥

भूतानि भूतैः परिदुर्बलानि वृद्धिं समायाति यथेह पुंसः ॥
अश्नाम्बुपानादिभिरेव कस्य न तेऽस्ति वृद्धिर्न च तेऽस्ति हानिः ॥१४॥
त्वं कञ्चुके शीर्यमाणे निजेऽस्मिंस्तस्मिंश्च देहे मूढतां मा व्रजेथाः ॥
शुभाशुभैः कर्मभिर्देहमेतन्मदादिमूढैः कञ्चुकस्ते पिनद्धः ॥१५॥
तातेति किंचित्तनयेति किंचिदम्बेति किंचिद्दयितेति किंचित् ॥
ममेति किंचिन्न ममेति किंचिद्भौतं संघं बहुधा मालपेथाः ॥१६॥
दुःखानि दुःखोपगमाय भोगान्सुखाय जानाति विमूढचेताः ॥
तान्येव दुःखानि पुनः सुखानि जानाति विद्वानविमूढचेताः ॥१७॥
हासोऽस्थिसंदर्शनमक्षियुग्ममत्युज्ज्वलं यत्कलुषं वसायाः ॥
कुचादिपीनं पिशितं घनं तत्स्थानं रतेः किं नरको न योषित् ॥१८॥
यानं क्षितौ यानगतश्च देहो देहेऽपि चान्यः पुरुषो निविष्टः ॥
ममत्वमुर्व्यां न तथा यथा स्वे देहेतिमात्रं च विमूढतैषा ॥१९॥
त्यज धर्ममधर्मं च उभे सत्यानृते त्यज ॥
उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज ॥२०॥
वर्धमानं सुतं सा तु राजपत्नी दिने दिने ॥
तमुल्लापादिना बोधमनयन्निर्मलात्मकम् ॥२१॥
यथा यथा बलं लेभे यथा लेभे मतिं पितः ॥
तथा तथात्मबोधं च सोऽवापन्मातृभाषितैः ॥२२॥

## ७. वासुदेवमाहात्म्यम्

(भागवत, १२, १२)

संकीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम् ॥
प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः ॥४७॥
मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद् भगवानधोक्षजः ॥
तदेव सत्यं तदु हैव मङ्गलं तदेव पुण्यं भगवद्गुणोदयम् ॥४८॥
तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवम् ॥
तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोऽनुगीयते ॥४९॥
न तद् वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥
तद् ध्वाङ्क्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमलाः ॥५०॥

स वाग्विसर्गो जनताघसम्प्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥
नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः ॥५१॥
नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ॥
कुतः पुनः शश्वदभद्रमीश्वरे न ह्यर्पितं कर्म यदप्यनुत्तमम् ॥५२॥
यशः श्रियामेव परिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु ॥
अविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ॥५३॥
अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति च ॥
सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम् ॥५४॥
यूयं द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतम् ॥
नारायणं देवमदेवमीशमजस्रभावा भजताविवेश्य ॥५५॥
अहं च संस्मारित आत्मतत्त्वं श्रुतं पुरा मे परमर्षिवक्त्रात् ॥
प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वताम् ॥५६॥

एतद्वः कथितं विप्राः कथनीयोरुकर्मणः ॥
माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनम् ॥५७॥
य एवं श्रावयेन्नित्यं यामक्षणमनन्यधीः ॥
श्रद्धावान् योऽनुश्रुणुयात् पुनात्यात्मानमेव सः ॥५८॥

## ८. विष्णुभक्तवर्णनम्

(विष्णु, ३, ७)

यम उवाच—

न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे ॥
न हरति न च हन्ति किञ्चिदुच्चैः सितमनसं तमवेहि विष्णुभक्तम् ॥२०॥
कलिकलुषमलेन यस्य नात्मा विमलमतेर्मलिनीकृतस्तमेनम् ॥
मनसि कृतजनार्दनं मनुष्यं सततमवेहि हरेरतीवभक्तम् ॥२१॥
कनकमपि रहस्यवेक्ष्य बुद्ध्या तृणमिव यस्समवैति वै परस्वम् ॥
भवति च भगवत्यनन्यचेताः पुरुषवरं तमवेहि विष्णुभक्तम् ॥२२॥
स्फटिकगिरिशिलामलः क्व विष्णुर्मनसि नृणां क्व च मत्सरादिदोषः ॥
न हि तुहिनमयूखरश्मिपुञ्जे भवति हुताशनदीप्तिजः प्रतापः ॥२३॥
विमलमतिरमत्सरः प्रशान्तश्शुचिचरितोऽखिलसत्त्वमित्रभूतः ॥
प्रियहितवचनोऽस्तमानमायो वसति सदा हृदि तस्य वासुदेवः ॥२४॥

वसति हृदि सनातने च तस्मिन् भवति पुमाञ्जगतोऽस्य सौम्यरूपः ॥
क्षितिरसमतिरम्यमात्मनोऽन्तः कथयति चारुतयैव शालपोतः ॥२५॥
यमनियमविधूतकल्मषाणामनुदिनमच्युतसक्तमानसानाम् ॥
अपगतमदमानमत्सराणां त्यज भट दूरतरेण मानवानाम् ॥२६॥
हृदि यदि भगवाननादिरास्ते हरिरसिशङ्खगदाधरोऽव्ययात्मा ॥
तदघमघविघातकर्तृभिन्नं भवति कथं सति चान्धकारमर्के ॥२७॥
हरति परधनं निहन्ति जन्तून् वदति तथानृतनिष्ठुराणि यश्च ॥
अशुभजनितदुर्मदस्य पुंसः कलुषमतेर्हृदि तस्य नास्त्यनन्तः ॥२८॥
न सहति परसम्पदं विनिन्दां कलुषमतिः कुरुते सतामसाधुः ॥
न यजति न ददाति यश्च सन्तं मनसि न तस्य जनार्दनोऽधमस्य ॥२९॥
परमसुहृदि बान्धवे कलत्रे सुततनयापितृमातृभृत्यवर्गे ॥
शठमतिरुपयाति योऽर्थतृष्णां तमधमचेष्टमवेहि नास्य भक्तम् ॥३०॥
अशुभमतिरसत्प्रवृत्तिसक्तस्सततमनार्यकुशीलसङ्गमत्तः ॥
अनुदिनकृतपापबन्धयुक्तः पुरुषपशुर्न हि वासुदेवभक्तः ॥३१॥
सकलमिदमहं च वासुदेवः परमपुमान्परमेश्वरस्स एकः ॥
इति मतिरचला भवत्यनन्ते हृदयगते व्रज तान्विहाय दूरात् ॥३२॥
कमलनयन वासुदेव विष्णो धरणिधराच्युत शङ्खचक्रपाणे ॥
भव शरणमितीरयन्ति ये वै त्यज भट दूरतरेण तानपापान् ॥३३॥
वसति मनसि यस्य सोऽव्ययात्मा पुरुषवरस्य न तस्य दृष्टिपाते ॥
तव गतिरथवा ममास्ति चक्रप्रतिहतवीर्यबलस्य सोऽन्यलोक्यः ॥३४॥

कालिङ्ग उवाच—

इति निजभटशासनाय देवो रवितनयस्स किलाह धर्मराजः ॥
मम कथितमिदं च तेन तुभ्यं कुरुवर सम्यगिदं मयापि चोक्तम् ॥३५॥

## ९. फलश्रुतिः

(विष्णु, ६, ८)

यस्त्वेतत्सकलं शृणोति पुरुषः कृत्वा मनस्यच्युतं
सर्वं सर्वमयं समस्तजगतामाधारमात्माश्रयम् ॥

ज्ञानज्ञेयमनादिमन्तरहितं सर्वामराणां हितं
स प्राप्नोति न संशयोऽस्त्यविकलं यद्वाजिमेधे फलम् ॥५४॥
यत्रादौ भगवांश्चराचरगुरुर्मध्ये तथान्ते च सः
ब्रह्मज्ञानमयोऽच्युतोऽखिलजगन्मध्यान्तसर्गप्रभुः ॥
तत्सर्वं पुरुषं पवित्रममलं शृण्वन्पठन्वाचयन्
प्राप्नोत्यस्ति न तत्फलं त्रिभुवनेष्वेकान्तसिद्धिर्हरिः ॥५५॥
यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने ॥
विघ्नो यत्र निवेशितात्ममनसो ब्राह्मोऽपि लोकोऽल्पकः ॥
मुक्ति चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः
किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्तिते ॥५६॥
यज्ञैर्यज्ञविदो यजन्ति सततं यज्ञेश्वरं कर्मिणो
यं वै ब्रह्ममयं परावरमयं ध्यायन्ति च ज्ञानिनः ॥
य सञ्चिन्त्य न जायते न म्रियते नो वर्द्धते हीयते
नैवासन्न च सद्भवत्यति ततः किं वा हरेः श्रूयताम् ॥५७॥
कव्यं यः पितृरूपधृग्विधिहुतं हव्यं च भुङ्क्ते विभु-
र्देवत्वे भगवाननादिनिधनः स्वाहास्वधासंज्ञिते ॥
यस्मिन्ब्रह्मणि सर्वशक्तिनिलये मानानि नो मानिनां
निष्ठायै प्रभवन्ति हन्ति कलुषं श्रोत्रं स यातो हरिः ॥५८॥
नान्तोऽस्ति यस्य न च यस्य समुद्भवोऽस्ति वृद्धिर्न यस्य परिणामविवर्जितस्य॥
नापक्षयं च समुपैत्यविकारि वस्तु यस्तं नतोऽस्मि पुरुषोत्तममीशमीड्यम् ॥
तस्यैव योऽनु गुणभुग्बहुधैक एव शुद्धोऽप्यशुद्ध इव भाति हि मूर्तिभेदैः ॥
ज्ञानान्वितः सकलसत्त्वविभूतिकर्ता तस्मै नमोऽस्तु पुरुषाय सदाव्ययाय ॥६०॥
ज्ञानप्रवृत्तिनियमैक्यमयाय पुंसो भोगप्रदानपटवे त्रिगुणात्मकाय ॥
अव्याकृताय भवभावनकारणाय वन्दे स्वरूपभवनाय सदाजराय ॥६१॥
व्योमानिलाग्निजलभूरचनामयाय शब्दादिभोग्यविषयोपनयक्षमाय ॥
पुंसः समस्तकरणैरुपकारकाय व्यक्ताय सूक्ष्मबृहदात्मवते नतोऽस्मि ॥६२॥
इति विविधमजस्य यस्य रूपं प्रकृतिपरात्ममयं सनातनस्य ।
प्रदिशतु भगवानशेषपुंसां हरिरपजन्मजरादिकां स सिद्धिम् ॥६३॥

## परिशिष्टानि

# (अ) अवशिष्टसुभाषितानि

### १. ( नारदीय, पूर्वखण्ड, ७–८ )

नास्ति शान्तिसमो बन्धुर्नास्ति सत्यात्परं तपः ।।
नास्ति मोक्षात्परो लाभो नास्ति गङ्गासमा नदी ।।६.६०।।
यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता ।।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ।।७.१५।।
असूयाविष्टमनसि यदि संपत्प्रवर्त्तते ।।
तुषाग्नि वायुसंयोगमिव जानीहि सुव्रत ।।१७।।
असूयोपेतमनसां दम्भाचारवतां तथा ।।
परुषोक्तिरतानां च सुखं नेह परत्र च ।।१८।।
असूयाविष्टचित्तानां सदा निष्ठुरभाषिणाम् ।।
प्रिया वा तनया वापि बान्धवा अप्यरातयः ।।१९।।
मनोऽभिलाषं कुरुते यः समीक्ष्य परस्त्रियम् ।।
स स्वसंपद्विनाशाय कुठारो नात्र संशयः ।।२०।।
तावत्पुत्राश्च पौत्राश्च धनधान्यगृहादयः ।।
यावद्वीक्षेत लक्ष्मीशः कृपापाङ्गेन नारद ।।२५।।
अपि मूर्खान्धबधिरजडाः शूरा विवेकिनः ।।
श्लाघ्या भवन्ति विप्रेन्द्र प्रेक्षिता माधवेन ये ।।२६।।
असूया वर्द्धते यस्य तस्य विष्णुः पराङ्मुखः ।।
धनं धान्यं मही संपद्विनश्यति ततो ध्रुवम् ।।२९।।
विवेकं हन्त्यहंकारस्त्वविवेकात्तु जीविनाम् ।।
आपदः संभवन्त्येवेत्यहंकारं त्यजेत्ततः ।।३०।।
अपकीर्त्तिसमो मृत्युर्लोकेष्वन्यो न विद्यते ।।३९।।
नास्त्यकीर्तिसमो मृत्युर्नास्ति क्रोधसमो रिपुः ।।
नास्ति निन्दासमं पापं नास्तिमोहसमासवः ।।४१।।
नास्त्यसूयासमाऽकीर्तिर्नास्ति कामसमोऽनलः ।।
नास्ति रागसमः पाशो नास्ति सङ्गसमं विषम् ।।४२।।

पण्डिते वापि मूर्खे वा दरिद्रे वा श्रियान्विते ॥
दुर्वृत्ते वा सुवृत्ते वा मृत्योः सर्वत्र तुल्यता ॥५९॥
एतच्छरीरं दुःखानां व्याधीनामयुतैर्वृतम् ॥
सुखाभासं बहुक्लेशं कर्मपाशेन यन्त्रितम् ॥६५॥
अन्यदुःखेन यो दुःखी योऽन्यहर्षेण हर्षितः ॥
स एव जगतामीशो नररूपधरो हरिः ॥६९॥
यत्र सन्तः प्रवर्तन्ते तत्र दुःखं न बाधते ॥
वर्तते यत्र मार्तण्डः कथं तत्र तमो भवेत् ॥७१॥
महापातकयुक्ता वा युक्ता वा चोपपातकैः ॥
परं पदं प्रयान्त्येव महद्भिरवलोकिताः ॥७४॥
जडोऽपि याति पूज्यत्वं सत्सङ्गाज्जगतीतले ॥
कलामात्रोऽपि शीतांशुः शंभुना स्वीकृतो यथा ॥८.६॥
चन्द्रहीना यथा रात्रिः पद्महीनं यथा सरः ॥
पतिहीना यथा नारी पितृहीनस्तथा शिशुः ॥२१॥
सत्यहीनं यथा वाक्यं साधुहीना यथा सभा ॥
तपो यथा दयाहीनं तथा पित्रा विनार्भकः ॥२३॥
वृक्षहीनं यथाऽरण्यं जलहीना यथा नदी ॥
वेगहीनो यथा वाजी तथा पित्रा विनार्भकः ॥२४॥
उपेक्षेत समर्थः सन्धर्मस्य परिपन्थिनः ॥
स एव सर्वनाशाय हेतुभूतो न संशयः ॥४२॥
बान्धवं प्रथमं मत्वा दुर्जनाः सकलं जगत् ॥
त एव बालहीनाश्चेद्भजन्तेऽत्यन्तसाधुताम् ॥४३॥
दासभावं च शत्रूणां वारस्त्रीणां च सौहृदम् ॥
साधुभावं च सर्पाणां श्रेयस्कामो न विश्वसेत् ॥४५॥
प्रहासं कुर्वते नित्यं यान्वन्तान्दर्शयन्खलाः ॥
तानेव दर्शयन्त्याशु स्वसामर्थ्यविपर्यये ॥४६॥
पिशुना जिह्वया पूर्वं परुषं प्रवदन्ति च ॥
अतीव करुणं वाक्यं वदन्त्येव तथाबलाः ॥४७॥

श्रेयस्कामो भवेद्यस्तु नीतिशास्त्रार्थकोविदः ।।
साधुत्वं समभावं च खलानां नैव विश्वसेत् ।।४८।।
दुर्जनं प्रणतिं यान्तं मित्रं कैतवशीलिनम् ।।
दुष्टां भार्यां च विश्वस्तो मृत एव न संशयः ।।४९।।
ऐश्वर्यमदमत्तानां क्षुधितानां च कामिनाम् ।।
अहंकारविमूढानां विवेको नैव जायते ।।१०३।।
निधेराधारमात्रेण मही ज्वलति सर्वदा ।।
तदेव मानवा भुक्त्वा ज्वलन्तीति किमद्भुतम् ।।४।।
किमत्र चित्रं सुजनं बाधन्ते यदि दुर्जनाः ।।
महीरुहांश्चानुतटे पातयन्ति नदीरयाः ।।५।।
यत्राश्रीर्यौवनं वापि शारदा वापि तिष्ठति ।।
तत्राश्रीर्वृद्धता नित्यं मूर्खत्वं चापि जायते ।।६।।
अहो कनकमाहात्म्यमाख्यातुं केन शक्यते ।।
नामसाम्यादहो चित्रं धत्तूरोऽपि मदप्रदः ।।७।।
भवेद्यदि खलस्य श्रीः सैव लोकविनाशिनी ।।
यथा सखाग्नेः पवनः पन्नगस्य यथा विषम् ।।८।।
अहो धनमदान्धस्तु पश्यन्नपि न पश्यति ।।
यदि पश्यत्यात्महितं स पश्यति न संशयः ।।९।।
माता वा जनको वापि भ्राता वा तनयोऽपि वा ।।
अधर्मं कुरुते यस्तु स एव रिपुरिष्यते ।।११५।।
यस्त्वधर्मेषु निरतः सर्वलोकविरोधकृत् ।।
तं रिपुं परमं विद्याच्छास्त्राणामेष निर्णयः ।।१६।।
परोपकारनिरताः क्षमासारा हि साधवः ।।२२।।
दुर्जनेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः ।।२३।।
बाध्यमानोऽपि सुजनः सर्वेषां सुखकृद्भवेत् ।।
ददाति परमां तुष्टिं भक्ष्यमाणोऽमरैः शशी ।।२४।।
वारितश्छिन्न एवापि ह्यामोदेनैव चन्दनः ।।
सौरभं कुरुते सर्वं तथैव सुजनो जनः ।।१२५।।

( २ )

मातापितृभ्यां न करोति कामान्बन्धूनशोकान्न करोति यो वा ॥
कीर्ति हि वा नार्जयते हिमाभां पुमान्स जातोऽपि मृतो मतं मे ॥३६॥

मत्स्य, १४८.

आत्मार्थं जीवलोकेऽस्मिन्को न जीवति मानवः ॥
परं परोपकारार्थं यो जीवति स जीवति ॥३६॥

स्कान्द, काशीखण्ड, ४७.

नात्युच्चं मेरुशिखरं नातिनीचं रसातलम् ॥
व्यवसायः सखा यस्य नास्ति दूरे महोदधिः ॥

*Ibid*, आवन्त्यखण्ड, च.लि.मा., ६३.

## परिशिष्टम् (ब)

# ललितासहस्रनामस्तोत्रम्

( नारदीय, पूर्वखण्ड, ८९ )

अथ नाम्नां सहस्त्रं ते वक्ष्ये सावरणार्चनम् । षोडशानामपि मुने स्वस्वक्रमगतात्मकम् ॥३९॥ ललिता चापि वा कामेश्वरी च भगमालिनी । नित्यक्लिन्ना च भेरुण्डा कीर्तिता वह्निवासिनी ॥४०॥ वज्रेश्वरी तथा दूती त्वरिता कुलसुन्दरी । नित्या संवित्तथा नीलपताका विजयाह्वया ॥४१॥ सर्वमङ्गलिका चापि ज्वालामालिनिसंज्ञिता । चित्रा चेति क्रमान्नित्याः षोडशापीष्टविग्रहाः ॥४२॥ कुरुकुल्ला च वाराही द्वे एते चेष्टविग्रहे । वशिनी चापि कामेशी मोहिनी विमलारुणा ॥४३॥ तपिनी च तथा सर्वेश्वरी चाप्यथ कौलिनी । मुद्राणंतनुरिष्वर्णरूपा चापार्णविग्रहा ॥४४॥ पाशवर्णशरीरा चाकुर्वर्णसुवपुर्द्धरा । त्रिखण्डा स्थापनी सन्निरोधनी चावगुण्ठनी ॥४५॥ सन्निधानेषु चापाख्या तथा पाशाङ्कुशाभिधा । नमस्कृतिस्तथा संक्षोभणी विद्रावणी तथा ॥४६॥ आकर्षणी च विख्याता तथैवावेशकारिणी । उन्मादिनी महापूर्वा कुशाथो खेचरी मता ॥४७॥ बीजा शक्त्युत्थापना च स्थूलसूक्ष्मपराभिधा । अणिमा लघिमा चैव महिमा गरिमा तथा ॥४८॥ प्राप्तिः प्रकामिता चापि चेशिता वशिता तथा । भुक्तिः सिद्धिस्तथैवेच्छा सिद्धिरूपा

च कीर्तिता ॥४९॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराहीन्द्राणी चामुण्डा महालक्ष्मीस्वरूपिणी ॥५०॥ कामा बुद्धिरहंकार-शब्दस्पर्शस्वरूपिणी । रूपरूपा रसाह्वा च गन्धवित्तधृतिस्तथा ॥५१॥ नाभबीजामृताख्या च स्मृतिदेहात्मरूपिणी। कुसुमा मेखला चापि मदना मदनातुरा ॥५२॥ रेखा संवेगिनी चैव ह्यङ्कुशा मालिनीति च। संक्षोभिणी तथा विद्राविण्याकर्षणरूपिणी ॥५३॥ आह्लादिनीति च प्रोक्ता तथा संमोहिनीति च। स्तंभिनी जंभिनी चैव वशंकर्यथ रञ्जिनी ॥५४॥ उन्मादिनी तथैवार्थसाधिनीति प्रकीर्तिता। संपत्तिपूर्णा सा मन्त्रमयी द्वंद्वक्षयंकरी ॥५५॥ सिद्धिः संपत्प्रदा चैव प्रियमङ्गलकारिणी। कामप्रदा निगदिता तथा दुःखविमोचिनी ॥५६॥ मृत्युप्रशमनी चैव तथा विघ्ननिवारिणी। अंगसुन्दरिका चैव तथा सौभाग्यदायिनी ॥५७॥ ज्ञानैश्वर्यप्रदा ज्ञानमयी चैव च पंचमी। विन्ध्यवासनका घोरस्वरूपा पापहारिणी ॥५८॥ तथानन्दमयी रक्षा रूपेप्सित-फलप्रदा। जयिनी विमला चाथ कामेशी वज्रिणी भगा ॥५९॥ त्रैलोक्यमोहना स्थाना सर्वाशापरिपूरणी। सर्वसंक्षोभणगता सौभाग्य-प्रदसंस्थिता ॥६०॥ सर्वार्थसाधकागारा सर्वरोगहरास्थिता। सर्वरक्षाकरास्थाना सर्वसिद्धिप्रदस्थिता ॥६१॥ सर्वानन्दमयाधारबिन्दुस्थानशिवात्मिका। प्रकृष्टा च तथा गुप्ता ज्ञेया गुप्ततरापि च ॥६२॥ संप्रदायस्वरूपा च कुलकौल-निगर्भगा। रहस्यापरापरप्राकृत्तथैवातिरहस्यका ॥६३॥ त्रिपुरा त्रिपुरेशी च तथैव पुरवासिनी। श्रीमालिनी च सिद्धान्ता महात्रिपुरसुन्दरी ॥६४॥ नवरत्नमयद्वीपनवखण्डविराजिता। कल्पकोद्यानसंस्था च ऋतुरूपेन्द्रियार्चका ॥ कालमुद्रा मातृकाख्या रत्नदेशोपदेशिका। तत्त्वाग्रहाभिधा मूर्तिस्तथैव विषयद्विपा ॥६६॥ देशकालाकारशब्दरूपा संगीतयोगिनी। समस्तगुप्तप्रकट-सिद्धयोगिनिचक्रयुक् ॥६७॥ वह्निसूर्येन्दुभूताह्वा तथात्माष्टाक्षराह्वया। पंचधार्चास्वरूपा च नानाव्रतसमाह्वया ॥६८॥ निषिद्धाचाररहिता सिद्धचिह्न-स्वरूपिणी। चतुर्द्धा कूर्मभागस्था नित्याद्यर्चास्वरूपिणी ॥६९॥ दमनादिसम-भ्यर्चा षट्कर्मा सिद्धिदायिनी। तिथिवारपृथग्द्रव्यसमर्चनशुभावहा ॥७०॥ वायोऽश्यनङ्गकुसुमा तथैवानङ्गमेखला। अनङ्गमदनानङ्गमदनातुरसाह्वया ॥ मददेगिनिका चैव तथा भुवनपालिनी। शशिलेखा समुद्दिष्टा गतिलेखाह्वया मता ॥७२॥ श्रद्धा प्रीती रतिश्चैव धृतिः कान्तिर्मनोरमा। मनोहरा समाख्याता

तथैव हि मनोरथा ॥७३॥ मदनोन्मादिनी चैव मोदिनी शंखिनी तथा । शोषिणी चैव शंकारी सिञ्जिनी सुभगा तथा ॥७४॥ पूषा चेद्वा सुमनसा रतिः प्रीतिर्धृतिस्तथा । ऋद्धिः सौम्या मरीचिश्च तथैव ह्यंशुमालिनी ॥७५॥ शशिनी चांगिरा छाया तथा संपूर्णमण्डला । तुष्टिस्तथामृताख्या च डाकिनी साथ लोकपा ॥७६॥ बटुकेभास्वरूपा च दुर्गा क्षेत्रेशरूपिणी । कामराजस्वरूपा च तथा मन्मथरूपिणी ॥७७॥ कन्दर्परूपिणी चैव तथा मकरकेतना । मनोभवस्वरूपा च भारती वर्णरूपिणी ॥७८॥ मदना मोहिनी लीला जम्भिनी चोद्यमा शुभा । ह्लादिनी द्राविणी प्रीती रती रक्ता मनोरमा ॥७९॥ सर्वोन्मादा सर्वमुखा ह्यभङ्गा चामितोद्यमा । अनल्पाव्यक्तविभवा विविधाक्षोभविग्रहा ॥८०॥ रागशक्तिर्द्वेषशक्तिस्तथा शब्दादिरूपिणी । नित्या निरञ्जना क्लिन्ना क्लेदिनी मदनातुरा ॥८१॥ मदद्रवा द्राविणी च द्रविणी चेति कीर्तिता। मदाविला मङ्गला च मन्मथानी मनस्विनी ॥८२॥ मोहा मोदा मानमयी माया मन्दा मितावती । विजया विमला चैव शुभा विश्वा तथैव च ॥८३॥ विभूतिर्विनता चैव विविधा विनता क्रमात् । कमला कामिनी चैव किराता कीर्तिरूपिणी ॥८४॥ कुट्टिनी च समुद्दिष्टा तथैव कुलसुन्दरी । कल्याणी कालकोला च डाकिनी शाकिनी तथा ॥८५॥ लाकिनी काकिनी चैव पाकिनी राकिनी तथा । इच्छाज्ञाना कियाख्या चाप्यायुधाष्टकधारिणी ॥८६॥ कपर्दिनी समुद्दिष्टा तथैव कलसुन्दरी । ज्वालिनी विस्फुलिंगा च मङ्गला सुमनोहरा ॥८८॥ कनका किनवा विद्या विविधा च प्रकीर्तिता । मेषा वृषाह्वया चैव मिथुना कर्कटा तथा ॥८८॥ सिंहा कन्या तुला कीटा चापा च मकरा तथा ॥ कुम्भा मीना च सारा च सर्वभक्षा तथैव च ॥८९॥ विश्वात्मा विविधोद्भूतचित्ररूपा च कीर्तिता । निःसपत्ना निरातंका याचनाचिन्त्यवैभवा ॥९०॥ रक्ता चैव ततः प्रोक्ता विद्याप्राप्तिस्वरूपिणी । हृल्लेखा क्लेदिनी क्लिन्ना क्षोभिणी मदनातुरा ॥९१॥ निरञ्जना रागवती तथैव मदनावती । मेखला द्राविणी वेगवती चैव प्रकीर्तिता ॥९२॥ कमला कामिनी कल्पा कला च कलिताद्भुता । किराता च तथा काला कदना कौशिका तथा ॥९३॥ कम्बुवादनिका चैव कातरा कपटा तथा । कीर्तिश्चापि कुमारी च कुङ्कुमा परिकीर्तिता ॥९४॥ भञ्जिनी वेगिनी नागा चपला पेशला सती । रतिः श्रद्धा भोगलोला मदोन्मत्ता मनस्विनी ॥९५॥ विह्वला कर्षिणी लोला

तथा मदनमालिनी । विनोदा कौतुका पुण्या पुराणा परिकीर्तिता ॥९६॥ वागीशी वरदा विश्वा विभवा विघ्नकारिणी । बीजविघ्नहरा विद्या सुमुखी सुन्दरी तथा ॥९७॥ सारा च सुमना चैव तथा प्रोक्ता सरस्वती । समया सर्वगा विद्धा शिवा वाणी च कीर्तिता ॥९८॥ दूरसिद्धा तथा प्रोक्ताथो विग्रहवती मता । नादा मनोन्मनी प्राणप्रतिष्ठारुणवैभवा ॥९९॥ प्राणापाना समाना च व्यानोदाना च कीर्तिता । नागा कूर्मा च कृकला देवदत्ता धनञ्जया ॥१००॥ फट्कारी किंकराराध्या जया च विजया तथा । हुंकारी खेचरी चण्डा छेदिनी क्षपिणी तथा ॥१०१॥ स्त्रीहुंकारी क्षेमकारी चतुरक्षररूपिणी । श्रीविद्यामतवर्णाङ्गी काली याम्या नृपार्णका ॥१०२॥ भाषा सरस्वती वाणी संस्कृता प्राकृता परा । बहुरूपा चित्तरूपा रम्यानन्दा च कौतुका ॥१०३॥ त्रयाख्या परमात्माख्याप्यमेयविभवा तथा । वाक्स्वरूपा बिन्दुसर्गरूपा विश्वात्मिका तथा ॥१०४॥ तथा त्रैपुरकन्दाख्या ज्ञात्रादित्रिविधात्मिका । आयुर्लक्ष्मीकीर्तिभोगसौन्दर्यारोग्यदायिका ॥ ऐहिकामुष्मिकज्ञानमयी च परिकीर्तिता । जीवाख्या विजयाख्या च तथैव विश्वविन्मयी ॥ हृदादिविद्या रूपादिभानुरूपा जगद्वपुः । विश्वमोहनिका चैव त्रिपुरामृतसंज्ञिका ॥१०७॥ सर्वाप्यायनरूपा च मोहिनी क्षोभणी तथा । क्लेदिनी च समाख्याता तथैव च महोदया ॥१०८॥ संपत्करी हलक्षार्णा सीमामातृतनू रतिः । प्रीतिर्मनोभवा वापि प्रोक्ता वाराधिपा तथा ॥१०९॥ त्रिकूटा चापि षट्कूटा पञ्चकूटा विशुद्धगा । अनाहतगता चैव मणिपूरकसंस्थिता ॥ स्वाधिष्ठानसमासीनाधारस्थाज्ञासमास्थिता । षट्त्रिंशत्कूटरूपा च पञ्चाशन्मिथुनात्मिका ॥१११॥ पादुकादिकसिद्धीशा तथा विजयदायिनी । कामरूपप्रदा वेतालरूपा च पिशाचिका ॥११२॥ विचित्रा विभ्रमा हंसी भीषणी जनरञ्जिका । विशाला मदना तुष्टा कालकण्ठी महाभया ॥११३॥ माहेन्द्री शंखिनी चैन्द्री मङ्गला वटवासिनी । मेखला सकला लक्ष्मीर्मालिनी विश्वनायिका ॥११४॥ सुलोचना सुशोभा च कामदा च विलासिनी । कामेश्वरी नन्दिनी च स्वर्णरेखा मनोहरा ॥११५॥ प्रमोदा रागिणी सिद्धा पद्मिनी च रतिप्रिया । कल्याणदा कलादक्षा ततश्च सुरसुन्दरी ॥११६॥ विभ्रमा वाहका वीरा विकला कोरका कविः । सिंहनादा महानादा सुग्रीवा मर्कटा शठा ॥११७॥ बिडालाक्षा बिडालास्या कुमारी खेचरी भवा । मयूरा

मङ्गला भीमा द्विपवक्त्रा खरानना ॥११८॥ मातंगी च निशाचारा वृषग्राहा वृकानना । सैरिभास्या गजमुखा पशुवक्त्रा मृगानना ॥११९॥ क्षोभका मणिभद्रा च क्रीडका सिंहचक्रका । महोदरा स्थूलशिखा विकृतास्या वरानना ॥१२०॥ चपला कुक्कुटास्या च पाविनी मदनालसा । मनोहरा दीर्घजङ्घा स्थूलदन्ता दशानना ॥१२१॥ सुमुखा पण्डिता क्रुद्धा वराहास्या सटामुखा । कपटा कौतुका काला किंकरा कितवा खला ॥१२२॥ भक्षका भयदा सिद्धा सर्वगा च प्रकीर्तिता । जया च विजया दुर्गा भद्रा भद्रकरी तथा ॥१२३॥ अम्बिका वामदेवी च महामायास्वरूपिणी । विदारिका विश्वमयी विश्वा विश्वविभञ्जिता ॥१२४॥ वीरा विक्षोभिणी विद्या विनोदा बीजविग्रहा । वीतशोका विषग्रीवा विपुला विजयप्रदा ॥१२५॥ विभवा विविधा विप्रा तथैव परिकीर्तिता । मनोहरा मङ्गला च मदोत्सिक्ता मनस्विनी ॥१२६॥ मानिनी मधुरा माया मोहिनी च तथा स्मृता । भद्रा भवानी भव्या च विशालाक्षी शुचिस्मिता ॥१२७॥ ककुभा कमला कल्पा कलाथो पूरणी तथा । नित्या चाप्यमृता चैव जीविता च तथा दया ॥१२८॥ अशोका ह्यमला पूर्णा पूर्णा भाग्योद्यता तथा । विवेका विभवा विश्वा वितता च प्रकीर्तिता ॥१२९॥ कामिनी खेचरी गर्वा पुराणा परमेश्वरी । गौरी शिवा ह्यमेया च विमला विजया परा ॥१३०॥ पवित्रा पद्मिनी विद्या विश्वेशी शिववल्लभा । अशेषरूपा ह्यानन्दाम्बुजाक्षी चाप्यनिन्दिता ॥१३१॥ वरदा वाक्यदा वाणी विविधा वेदविग्रहा । विद्या वागीश्वरी सत्या संयता च सरस्वती ॥१३२॥ निर्मलानन्दरूपा च ह्यमृता मानदा तथा । पूषा चैव तथा पुष्टिस्तुष्टिश्चापि रतिर्धृतिः ॥१३३॥ शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा । पूर्णा पूर्णामृता कामदायिनीन्दुकलात्मिका ॥१३४॥ तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः । सुषुम्णा भोगदा विश्वा बाधिनी धारिणी क्षमा ॥ १३५॥ धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिंगिनी । सुश्रीः स्वरूपा कपिला हव्यकव्यवहा तथा ॥१३६॥ घस्मरा विश्वकवला लोलाक्षी लोलजिह्विका । सर्वभक्षा सहस्राक्षी निःसङ्गा च गतिप्रिया ॥१३७॥ अचिन्त्या चाप्रमेया च पूर्णरूपा दुरासदा । सर्वा संसिद्धिरूपा च पावनीत्येकरूपिणी ॥१३८॥ तथा यामलवेधाख्या शाक्ते वेदस्वरूपिणी । तथा शाम्भववेधा च भावनासिद्धिसूचिनी ॥१३९॥

वह्निरूपा तथा दस्रा ह्युमा विघ्ना भुजङ्गमा । षण्मुखा रविरूपा च माता दुर्गा दिशा तथा ॥१४०॥ धनदा केशवा चापि यमी चैव हरा शशा । अश्विनी च यमी वह्निरूपा धात्रीति कीर्तिता ॥१४१॥ चन्द्रा शिवादिति-र्जीवा सर्पिणी पितृरूपिणी । अर्यम्णा च भगा सूर्या त्वाष्ट्रिमारुतिसंज्ञिका ॥१४२॥ इन्द्राग्निरूपा मित्रा चापीन्द्राणी निर्ऋतिर्जला । वैश्वदेवी हरित-भूर्वासवी वरुणा जया ॥१४३॥ अहिर्बुध्न्या पूषणी च तथा कारस्करामला । उदुम्बरा जम्बुका च खदिरा कृष्णरूपिणी ॥१४४॥ वंशा च पिप्पला नागा रोहिणा च पलाशका । पक्षका च तथाम्बष्ठा बिल्वा चार्जुनरूपिणी ॥१४५॥ विकङ्कता च ककुभा सरला चापि सर्जिका । वञ्जुला पनसार्का च शमी हलिप्रियाम्रका ॥१४६॥ निम्बा मधूकसंज्ञा चाप्यश्वत्था च गजाह्वया । नागिनी सर्पिणी चैव शुनी चापि बिडालिकी ॥१४७॥ छागी मार्जारिका मूषी वृषभा माहिषी तथा । शार्दूली सैरिभी व्याघ्री हरिणी च मृगी शुनी ॥१४८॥ कपिरूपा च गोघण्टा वानरी च नराश्विनी । नगा गौर्हस्तिनी चेति तथा षट्चक्रवासिनी ॥१४९॥ त्रिखण्डा तीरपालाख्या भ्रामणी द्रविणी तथा । सोमा सूर्या तिथिर्वारा योगार्क्षा करणात्मिका ॥१५०॥ यक्षिणी तारणा व्योमशब्दाद्या प्राणिनी च धीः । क्रोधिनी स्तंभिनी चण्डोच्चण्डा ब्राह्म्यादिरूपिणी ॥१५१॥ सिंहस्था व्याघ्रगा चैव गजाश्वगरुडस्थिता । भौमाप्या तैजसी वायुरूपिणी नाभसा तथा ॥१५२॥ एकवक्त्रा चतुर्वक्त्रा नववक्त्रा कलानना । पञ्चविंशतिवक्त्रा च षड्विंशद्वदना (?) तथा ॥१५३॥ ऊनपञ्चाशदास्या च चतुःषष्टिमुखा तथा । एकाशीतिमुखा चैव शताननसमन्विता ॥१५४॥ स्थूलरूपा सूक्ष्मरूपा तेजोविग्रहधारिणी । वृणावृत्तिस्वरूपा च नाथावृत्तिस्वरूपिणी ॥१५५॥ तत्त्वावृत्तिस्वरूपापि नित्या-वृत्तिवपुर्द्धरा ॥१५६॥ अङ्गावृत्तिस्वरूपा चाप्यायुधावृत्तिरूपिणी । गुरुपक्ति-स्वरूपा च विद्यावृत्तितनुस्तथा ॥१५७॥ ब्रह्माद्यावृत्तिरूपा च परा पश्यन्तिका तथा । मध्यमा वैखरी शीर्षकण्ठताल्वोष्ठदन्तगा ॥१५८॥ जिह्वामूलगता नासागतोरःस्थलगामिनी । पदवाक्यस्वरूपा च वेदभाषास्वरूपिणी ॥१५९॥ सेकाख्या वीक्षणाख्या चोपदेशाख्या तथैव च । व्याकुलाक्षरसंकेता गायत्री प्रणवादिका ॥१६०॥ जपहोमार्चनध्यानयन्त्रतर्पणरूपिणी । सिद्धसारस्वता मृत्युञ्जया च त्रिपुरा तथा ॥१६१॥ गारुडा चान्नपूर्णा चाप्यश्वारूढा

नवात्मिका । गौरी च देवी हृदया लक्षदा च मतंगिनी ॥१६२॥ निष्कत्रयपदा चेष्टा वादिनी च प्रकीर्तिता । राजलक्ष्मीर्महालक्ष्मीः सिद्धलक्ष्मीर्गवानना ॥१६३॥ इति ललितादेवीसहस्रनामस्तोत्रं सम्पूर्णम् ।

## परिशिष्टम् (क)

# राधाकृष्णसहस्रनामस्तोत्रम्

(नारदीय, पूर्वखण्ड, ८२)

सनत्कुमार उवाच—

ततस्त्वं नारद पुनः पृष्टवान्वै सदाशिवम् ॥३४॥ नाम्नां सहस्रं तच्चापि प्रोक्तवांस्तच्छृणुष्व मे । ध्यात्वा वृन्दावने रम्ये यमुनातीरसंगतम् ॥३५॥ कल्पवृक्षं समाश्रित्य तिष्ठन्तं राधिकायुतम् । पठेन्नामसहस्रं तु युगलाख्यं महामुने ॥३६॥— देवकीनन्दनः शौरिर्वासुदेवो बलानुजः । गदाग्रजः कंसमोहः कंससेवकमोहनः ॥३७॥ भिन्नार्गलो भिन्नलोहः पितृबाह्यः पितृस्तुतः । मातृस्तुतः शिवध्येयो यमुनाजलभेदनः ॥३८॥ व्रजवासी व्रजानन्दी नन्दबालो दयानिधिः । लीलाबालः पद्मनेत्रो गोकुलोत्सव ईश्वरः ॥३९॥ गोपिकानन्दनः कृष्णो गोपानन्दः सतां गतिः । बकप्राणहरो विष्णुर्बकमुक्तिप्रदो हरिः ॥४०॥ बलदोलाशयशयः श्यामलः सर्वसुन्दरः । पद्मनाभो हृषीकेशः क्रीडामनुजबालकः ॥४१॥ लीलाविध्वस्तशकटो वेदमन्त्राभिषेचितः । यशोदानन्दनः कान्तो मुनिकोटिनिषेवितः ॥४२॥ नित्यं मधुवनावासी वैकुण्ठः संभवः क्रतुः । रमापतिर्यदुपतिर्मुरारिर्मधुसूदनः ॥४३॥ माधवो मानहारी च श्रीपतिर्भूधरः प्रभुः । बृहद्वनमहालीलो नन्दसूनुर्महासनः ॥४४॥ तृणावर्तप्राणहारी यशोदाविस्मयप्रदः । त्रैलोक्यवक्त्रः पद्माक्षः पद्महस्तः प्रियंकरः ॥४५॥ ब्रह्मण्यो धर्मगोप्ता च भूपतिः श्रीधरः स्वराट् । अजाध्यक्षः शिवाध्यक्षो धर्माध्यक्षो महेश्वरः ॥४६॥ वेदान्तवेद्यो ब्रह्मस्थः प्रजापतिरमोघदृक् । गोपीकरावलम्बी च गोपबालकसुप्रियः ॥४७॥ बालानुयायी बलवान् श्रीदामप्रिय आत्मवान् । गोपीगृहाङ्गणरतिर्भद्रः सुश्लोकमङ्गलः ॥४८॥ नवनीतहरो बालो नवनीतप्रियाशनः । बालवृन्दी मर्कवृन्दी चकिताक्षः पलायितः ॥४९॥ यशोदातर्जितः कंपी मायारुदितशोभनः । दामोदरोऽप्रमेयात्मा दयालुर्भक्तवत्सलः ॥५०॥ सुबद्धोलूखले नम्रशिरा गोपीकदर्थितः ।

वृक्षभंगी शोकभंगी धनदात्मजमोक्षणः ॥५१॥ देवर्षिवचनश्लाघी भक्तवात्सल्यसागरः । व्रजकोलाहलकरो व्रजानन्दविवर्द्धनः ॥५२॥ गोपात्मा प्रेरकः साक्षी वृन्दावननिवासकृत् । वत्सपालो वत्सपतिर्गोपदारकमण्डनः ॥५३॥ बालक्रीडो बालरतिर्बालकः कनकाङ्गदी । पीताम्बरो हेममाली मणिमुक्ताविभूषणः ॥५४॥ किंकिणीकटकी सूत्री नूपुरी मुद्रिकान्वितः । वत्सासुरपतिध्वंसी बकासुरविनाशनः ॥५५॥ अघासुरविनाशी च विनिद्रीकृतबालकः । आद्य आत्मप्रदः सङ्गी यमुनातीरभोजनः ॥५६॥ गोपालमण्डलीमध्यः सर्वगोपालभूषणः । कृतहस्ततलग्रासो व्यञ्जनाश्रितशाखिकः ॥५७॥ कृतबाहुशृङ्गयष्टिर्गुञ्जालङ्कृतकण्ठकः । मयूरपिच्छमुकुटो वनमालाविभूषितः ॥५८॥ गैरिकाचित्रितवपुर्नवमेघवपुः स्मरः । कोटिकन्दर्पलावण्यो लसन्मकरकुण्डलः ॥५९॥ आजानुबाहुर्भगवान्निद्रारहितलोचनः । कोटिसागरगाम्भीर्यः कालकालः सदाशिवः ॥६०॥ विरञ्चिमोहनवपुर्गोपवत्सवपुर्द्धरः । ब्रह्माण्डकोटिजनको ब्रह्ममोहविनाशकः ॥६१॥ ब्रह्मा ब्रह्मेडितः स्वामी शक्रदर्पविनाशनः । गिरिपूजोपदेष्टा च धृतगोवर्द्धनाचलः ॥६२॥ पुरन्दरेडितः पूज्यः कामधेनुप्रपूजितः । सर्वतीर्थाभिषिक्तश्च गोविन्दो गोपरक्षकः ॥६३॥ कालियार्तिकरः क्रूरो नागपत्नीडितो विराट् । धेनुकारिः प्रलम्बारिर्वृषासुरविमर्दनः ॥६४॥ मायासुरात्मजध्वंसी केशिकण्ठविदारकः । गोपगोप्ता धेनुगोप्ता दावाग्निपरिशोषकः ॥६५॥ गोपकन्यावस्त्रहारी गोपकन्यावरप्रदः । यज्ञपत्न्यन्नभोजी च मुनिमानापहारकः ॥६६॥ जलेशमानमथनो नन्दगोपालजीवनः । गन्धर्वशापमोक्ता च शङ्खचूडशिरोहरः ॥६७॥ वंशी वटी वेणुवादी गोपीचिन्तापहारकः । सर्वगोप्ता समाह्वानः सर्वगोपीमनोरथः ॥६८॥ व्यङ्गधर्मप्रवक्ता च गोपीमण्डलमोहनः । रासक्रीडारसास्वादी रसिको राधिकाधवः ॥६९॥ किशोरी प्राणनाथश्च वृषभानुसुताप्रियः । सर्वगोपीजनानन्दी गोपीजनविमोहनः ॥७०॥ गोपिकागीतचरितो गोपीनर्तनलालसः । गोपीस्कन्धाश्रितकरो गोपिकाचुम्बनप्रियः ॥७१॥ गोपिकामार्जितमुखो गोपीव्यञ्जनवीजितः । गोपिकाकेशसंस्कारी गोपिकापुष्पसंस्तरः ॥७२॥ गोपिकाहृदयालम्बी गोपीवहनतत्परः । गोपिकामदहारी च गोपिकापरमार्जितः ॥७३॥ गोपिकाकृतसंनीलो गोपिकासंस्मृतप्रियः । गोपिकावन्दितपदो गोपिकावशवर्तनः ॥७४॥ राधापराजितः श्रीमान्निकुञ्जे सुविहारवान् ।

कुञ्जप्रियः कुञ्जवासी वृन्दावनविकासनः ॥७५॥ यमुनाजलसिक्ताङ्गो यमुनासौख्यदायकः । शशिसंस्तम्भनः शूरः कामी कामविमोहनः ॥७६॥ कामाद्याः कामनाथश्च काममानसभेदनः । कामदः कामरूपश्च कामिनीकामसंचयः ॥७७॥ नित्यक्रीडो महालीलः सर्वः सर्वगतस्तथा । परमात्मा पराधीशः सर्वकारणकारणः (म्) ॥७८॥ गृहीतनारदवचा ह्यक्रूरपरिचिन्तितः । अक्रूरवन्दितपदो गोपिकातोषकारकः ॥७९॥ अक्रूरवाक्यसङ्ग्राही मथुरावासकारणः (म्) ॥ अक्रूरतापशमनो रजकायुःप्रणाशनः ॥८०॥ मथुरानन्ददायी च कंसवस्त्रविलुण्ठनः । कंसवस्त्रपरीधानो गोपवस्त्रप्रदायकः ॥८१॥ सुदामगृहगामी च सुदामपरिपूजितः । तन्तुवायकसप्रीतः कुब्जाचन्दनलेपनः ॥८२॥ कुब्जारूपप्रदो विज्ञो मुकुन्दो विष्टरश्रवाः । सर्वज्ञो मथुरालोकी सर्वलोकाभिनन्दनः ॥८३॥ कृपाकटाक्षदर्शी च दैत्यारिर्देवपालकः । सर्वदुःखप्रशमनो धनुर्भङ्गी महोत्सवः ॥८४॥ कुवलयापीडहन्ता दन्तस्कन्धबलाग्रणीः । कल्परूपधरो धीरो दिव्यवस्त्रानुलेपनः ॥८५॥ मल्लरूपो महाकालः कामरूपी बलान्वितः । कंसत्रासकरो भीमो मुष्टिकान्तश्च कंसहा ॥८६॥ चाणूरघ्नो भयहरः शलारिस्तोशलान्तकः । वैकुण्ठवासी कंसारिः सर्वदुष्टनिषूदनः ॥८७॥ देवदुन्दुभिनिर्घोषी पितृशोकनिवारणः । यादवेन्द्रः सतां नाथो यादवारिप्रमर्द्दनः ॥८८॥ शौरिशोकविनाशी च देवकीतापनाशनः । उग्रसेनपरित्राता उग्रसेनाभिपूजितः ॥८९॥ उग्रसेनाभिषेकी च उग्रसेनदयापरः । सर्वसात्वतसाक्षी च यदूनामभिनन्दनः ॥९०॥ सर्वमाथुरसंसेव्यः करुणो भक्तबान्धवः । सर्वगोपालधनदो गोपीगोपाललालसः ॥९१॥ शौरिदत्तोपवीती च उग्रसेनदयाकरः । गुरुभक्तो ब्रह्मचारी निगमाध्ययने रतः ॥९२॥ सङ्कर्षणसहाध्यायी सुदामसुहृदेव च । विद्यानिधिः कलाकोशो मृतपुत्रप्रदस्तथा ॥९३॥ चक्री पाञ्चजनी चैव सर्वनारकिमोचनः । यमार्चितः परो देवो नामोच्चारवशोऽच्युतः ॥९४॥ कुब्जाविलासी सुभगो दीनबन्धुरनूपमः । अक्रूरगृहगोप्ता च प्रतिज्ञापालकः शुभः ॥९५॥ जरासन्धजयी विद्वान्यवनान्तो द्विजाश्रयः । मुचुकुन्दप्रियकरो जरासन्धपलायितः ॥९६॥ द्वारकाजनको गूढो ब्रह्मण्यः सत्यसङ्गरः । लीलाधरः प्रियकरो विश्वकर्मा यशःप्रदः ॥९७॥ रुक्मिणीप्रियसन्देशो रुक्मशोकविवर्द्धनः । चैद्यशोकालयः श्रेष्ठो दुष्टराजन्यनाशनः ॥९८॥ रुक्मिवैरूप्यकरणो रुक्मिणीवचने रतः । बलभद्रवचोग्राही मुक्तरुक्मी जनार्दनः ॥९९॥ रुक्मिणी-

प्राणनाथश्च सत्यभामापतिः स्वयम् । भक्तपक्षी भक्तिवश्यो ह्यक्रूरमणिदायकः ॥१००॥ शतधन्वाप्राणहारी ऋक्षराजसुताप्रियः । सत्राजित्तनयाकान्तो मित्रविन्दापहारकः ॥१०१॥ सत्यापतिर्लक्ष्मणाजित्पूज्यो भद्राप्रियंकरः । नरकासुरघाती च लीलाकन्याहरो जयी ॥२॥ मुरारिर्मदनेशोऽपि धरित्रीदुःखनाशनः । वैनतेयी स्वर्गगामी अदित्यै कुण्डलप्रदः ॥३॥ इन्द्रार्चितो रमाकान्तो वज्रिभार्याप्रपूजितः । पारिजातापहारी च शक्रमानापहारकः ॥४॥ प्रद्युम्नजनकः साम्बतातो बहुसुतो विधुः । गर्गाचार्यः सत्यगतिर्धर्माधारो धराधरः ॥५॥ द्वारकामण्डनः श्लोक्यः सुश्लोको निगमालयः । पौण्ड्रकप्राणहारी च काशीराजशिरोहरः ॥६॥ अवैष्णवविप्रदाही सुदक्षिणभयावहः । जरासन्धविदारी च धर्मनन्दनयज्ञकृत् ॥७॥ शिशुपालशिरश्छेदी दन्तवक्त्रविनाशनः । विदूरथान्तकः श्रीशः श्रीदो द्विविदनाशनः ॥८॥ रुक्मिणीमानहारी च रुक्मिणीमानवर्द्धनः । देवर्षिशापहर्ता च द्रौपदीवाक्यपालकः ॥९॥ दुर्वासो भयहारी च पाञ्चालीस्मरणागतः । पार्थदूतः पार्थमन्त्री पार्थदुःखौघनाशनः ॥१०॥ पार्थमानापहारी च पार्थजीवनदायकः । पाञ्चालीवस्त्रदाता च विश्वपालकपालकः ॥११॥ श्वेताश्वसारथिः सत्यः सत्यसाध्यो भयापहः । सत्यसन्धः सत्यरतिः सत्यप्रिय उदारधीः ॥१२॥ महासेनजयी चैव शिवसैन्यविनाशनः । बाणासुरभुजच्छेत्ता बाणबाहुवरप्रदः ॥१३॥ तार्क्ष्यमानापहारी च तार्क्ष्यतेजोविवर्द्धनः । रामस्वरूपधारी च सत्यभामामुदावहः ॥१४॥ रत्नाकरजलक्रीडो व्रजलीलाप्रदर्शकः । स्वप्रतिज्ञापरिध्वंसी भीष्माज्ञापरिपालकः ॥१५॥ वीरायुधहरः कालः कालिकेशो महाबलः । वर्वरीषशिरोहारी वर्परीषशिरःप्रदः ॥१६॥ धर्मपुत्रजयी शूरदुर्योधनमदान्तकः । गोपिकाप्रीतिनिर्बन्धनित्यक्रीडो व्रजेश्वरः ॥१७॥ राधाकुण्डरतिर्धन्यः सदान्दोलसमाश्रितः । सदा मधुवनानन्दी सदा वृन्दावनप्रियः ॥१८॥ अशोकवनसन्नद्धः सदा तिलकसङ्गतः । सदा गोवर्द्धनरतिः सदा गोकुलवल्लभः ॥१९॥ भाण्डीरवटसंवासी नित्यं वंशीवटस्थितः । नन्दग्रामकृतावासो वृषभानुगृहप्रियः ॥१२०॥ गृहीतकामिनीरूपो नित्यं रासविलासकृत् । बल्लवीजनसंगोप्ता बल्लवीजनवल्लभः ॥२१॥ देवशर्मकृपाकर्ता कल्पपादपसंस्थितः । शिलानुगन्धनिलयः पादचारी घनच्छविः ॥२२॥ अतसीकुसुमप्रख्यः सदा लक्ष्मीकृपाकरः । त्रिपुरारिप्रियकरो ह्युग्रधन्वापराजितः ॥२३॥ षड्धुरध्वंसकर्ता च निकुम्भप्राणहारकः । वज्रनाभपुरध्वंसी

पौण्ड्रकप्राणहारकः ॥२४॥ बहुलाश्वप्रीतिकर्ता द्विजवर्यप्रियङ्करः । शिवसङ्कटहारी च वृकासुरविनाशनः ॥२५॥ भृगुसत्कारकारी च शिवसात्त्विकताप्रदः । गोकर्णपूजकः साम्बकुष्ठविध्वंसकारणः ॥२६॥ वेदस्तुतो वेदवेत्ता यदुवंशविवर्द्धनः । यदुवंशविनाशी च उद्धवोद्धारकारकः ॥२७॥ राधा च राधिका चैव आनन्दा वृषभानुजा । वृन्दावनेश्वरी पुण्या कृष्णमानसहारिणी ॥२८॥ प्रगल्भा चतुरा कामा कामिनी हरिमोहिनी । ललिता मधुरा माध्वी किशोरी कनकप्रभा ॥२९॥ जितचन्द्रा जितमृगा जितसिंहा जितद्विपा । जितरम्भा जितपिका गोविन्दहृदयोद्भवा ॥१३०॥ जितबिम्बा जितशुका जितपद्मा कुमारिका । श्रीकृष्णाकर्षणा देवी नित्यं युग्मस्वरूपिणी ॥३१॥ नित्यं विहारिणी कान्ता रसिका कृष्णवल्लभा । आमोदिनी मोदवती नन्दनन्दनभूषिता ॥३२॥ दिव्याम्बरा दिव्यहारा मुक्तामणिविभूषिता । कुञ्जप्रिया कुञ्जवासा कुञ्जनायकनायिका ॥३३॥ चारुरूपा चारुवक्त्रा चारुहेमाङ्गदा शुभा । श्रीकृष्णवेणुसंगीता मुरलीहारिणी शिवा ॥३४॥ भद्रा भगवती शान्ता कुमुदा सुन्दरी प्रिया । कृष्णक्रीडा कृष्णरतिः श्रीकृष्णसहचारिणी ॥३५॥ वंशीवटप्रियस्थाना युग्मायुग्मस्वरूपिणी । भाण्डीरवासिनी शुभ्रा गोपीनाथप्रिया सखी ॥३६॥ श्रुतिनिःश्वसिता दिव्या गोविन्दरसदायिनी । श्रीकृष्णप्रार्थनीशाना महानन्दप्रदायिनी ॥३७॥ वैकुण्ठजनसंसेव्या कोटिलक्ष्मीसुखावहा । कोटिकन्दर्पलावण्या रतिकोटिरतिप्रदा ॥३८॥ भक्तिग्राह्या भक्तिरूपा लावण्यसरसी उमा । ब्रह्मरुद्रादिसंराध्या नित्यं कौतूहलान्विता ॥३९॥ नित्यलीला नित्यकामा नित्यशृङ्गारभूषिता । नित्यवृन्दावनरसा नन्दनन्दनसंयुता ॥१४०॥ गोपिकामण्डलीयुक्ता नित्यं गोपालसङ्गता । गोरसक्षेपणी शूरा सानन्दा नन्ददायिनी ॥४१॥ महालीलाप्रकृष्टा च नागरी नगचारिणी । नित्यमाघूर्णिता पूर्णा कस्तूरीतिलकान्विता ॥४२॥ पद्मा श्यामा मृगाक्षी च सिद्धिरूपा रसावहा । कोटिचन्द्रानना गौरी कोटिकोकिलसुस्वरा ॥४३॥ शीलसौन्दर्यनिलया नन्दनन्दनलालिता । अशोकवनसंवासा भाण्डीरवनसङ्गता ॥४४॥ कल्पद्रुमतलाविष्टा कृष्णा विश्वा हरिप्रिया । अजागम्या भवागम्या गोवर्द्धनकृतालया ॥४५॥ यमुनातीरनिलया शश्वद्गोविन्दजल्पिनी । शश्वन्मानवती स्निग्धा श्रीकृष्णपरिवन्दिता ॥४६॥ कृष्णस्तुता कृष्णवृता श्रीकृष्णहृदयालया । देवद्रुमफला सेव्या वृन्दावनरसालया ॥४७॥ कोटितीर्थ-

मयी सत्या कोटितीर्थफलप्रदा । कोटियोगसुदुष्प्राप्या कोटियज्ञदुराश्रया ॥४८॥ मनसा शशिलेखा च श्रीकोटिसुभगाऽनघा । कोटिमुक्तसुखा सौम्या लक्ष्मी-कोटिविलासिनी ॥४९॥ तिलोत्तमा त्रिकालस्था त्रिकालज्ञाप्यधीश्वरी । त्रिवेदज्ञा त्रिलोकज्ञा तुरीयान्तनिवासिनी ॥१५०॥ दुर्गाराध्या रमाराध्या विश्वाराध्या चिदात्मिका । देवाराध्या पराराध्या ब्रह्माराध्या परात्मिका ॥५१॥ शिवाराध्या प्रेमसाध्या भक्ताराध्या रसात्मिका । कृष्णप्राणार्पिणी भामा शुद्धप्रेमविलासिनी ॥५२॥ कृष्णाराध्या भक्तिसाध्या भक्तवृन्दनिषे-विता । विश्वाधारा कृपाधारा जीवधारातिनायिका ॥५३॥ शुद्धप्रेममयी लज्जा नित्यसिद्धा शिरोमणिः । दिव्यरूपा दिव्यभोगा दिव्यवेषा मुदान्विता ॥५४॥ दिव्याङ्गनावृन्दसारा नित्यनूतनयौवना । परब्रह्मावृता ध्येया महारूपा महोज्ज्वला ॥५५॥ कोटिसूर्यप्रभा कोटिचन्द्रबिम्बाधिकच्छविः । कोमलामृत-वागाद्या वेदाद्या वेददुर्लभा ॥५६॥ कृष्णासक्ता कृष्णभक्ता चन्द्रावलिनि-षेविता । कलाषोडशसम्पूर्णा कृष्णदेहार्द्धधारिणी ॥५७॥ कृष्णबुद्धिः कृष्णसारा कृष्णरूपविहारिणी । कृष्णकान्ता कृष्णधना कृष्णमोहनकारिणी ॥५८॥ कृष्णदृष्टिः कृष्णगोत्री कृष्णदेवी कुलोद्वहा । सर्वभूतस्थितात्मा सर्वलोक-नमस्कृता ॥५९॥ कृष्णदात्री प्रेमधात्री स्वर्णगात्री मनोरमा । नगधात्री यशोदात्री महादेवी शुभङ्करी ॥१६०॥ श्रीशेषदेवजननी अवतारगणप्रसूः । उत्पलांकारविन्दांका प्रसादांका द्वितीयका ॥६१॥ रथांका कुञ्जरांका च कुण्डलांकपदस्थिता । छत्रांका विद्युदंका च पुष्पमालांकितापि च ॥६२॥ दण्डांका मुकुटांका च पूर्णचन्द्रा शुकांकिता । कृष्णान्नाहारपाका च वृन्दाकुञ्ज-विहारिणी ॥६३॥ कृष्णप्रबोधनकरी कृष्णशेषान्नभोजिनी । पद्मकेसरमध्यस्था संगीतागमवेदिनी ॥६४॥ कोटिकल्पान्तभ्रूभङ्गा अप्राप्तप्रलयाच्युता । सर्व-सत्त्वनिधिः पद्मशंखादिनिधिसेविता ॥६५॥ अणिमादिगुणैश्वर्या देववृन्दवि-मोहिनी । सर्वानन्दप्रदा सर्वा सुवर्णलतिकाकृतिः ॥६६॥ कृष्णाभिसारसङ्केता मालिनी नृत्यपण्डिता । गोपीसिन्धुसकाशाह्वा गोपमण्डपशोभिनी ॥६७॥ श्रीकृष्णप्रीतिदा भीता प्रत्यङ्गपुलकाञ्चिता । श्रीकृष्णालिङ्गनरता गोविन्द-विरहाक्षमा ॥६८॥ अनन्तगुणसंपन्ना कृष्णकीर्तनलालसा । बीजत्रयमयी मूर्तिः कृष्णानुग्रहवाञ्छिता ॥६९॥ विमलादिनिषेव्या च ललिताद्यर्चिता सती । पद्मवृन्दस्थिता हृष्टा त्रिपुरापरिसेविता ॥१७०॥ वृन्तावत्यर्चिता श्रद्धा दुर्ज्ञेया

भक्तवल्लभा । दुर्लभा सान्द्रसौख्यात्मा श्रेयोहेतुः सुभोगदा ॥७१॥ सारङ्गा शारदा बोधा सद्वृन्दावनचारिणी । ब्रह्मानन्दा चिदानन्दा ध्यानानन्दार्द्धमात्रिका ॥७२॥ गन्धर्वा सुरतज्ञा च गोविन्दप्राणसङ्गमा । कृष्णाङ्गभूषणा रत्नभूषणा स्वर्णभूषिता ॥७३॥ श्रीकृष्णहृदयावासमुक्ताकनकनासिका । सद्रत्नकङ्कणयुता श्रीमन्नीलगिरिस्थिता ॥७४॥ स्वर्णनूपुरसंपन्ना स्वर्णकिंकिणिमण्डिता । अशेषरासकुतुका रम्भोरूस्तनुमध्यमा ॥७५॥ पराकृतिः परानन्दा परस्वर्गविहारिणी । प्रसूनकबरी चित्रा महासिन्दूरसुन्दरी ॥७६॥ कैशोरवयसा बाला प्रमदाकुलशेखरा । कृष्णाधरसुधास्वादा श्यामप्रेमविनोदिनी ॥७७॥ शिखिपिच्छलसच्चूडा स्वर्णचम्पकभूषिता । कुंकुमालक्तकस्तूरीमण्डिता चापराजिता ॥७८॥ हेमहारान्विता पुष्पाहाराढ्या रसवत्यपि । माधुर्य्यमधुरा पद्मा पद्महस्ता सुविश्रुता ॥७९॥ भ्रूभङ्गाभङ्गकोदण्डकटाक्षशरसन्धिनी । शेषदेवशिरस्था च नित्यस्थलविहारिणी ॥१८०॥ कारुण्यजलमध्यस्था नित्यमत्ताधिरोहिणी । अष्टभाषावती चाष्टनायिका लक्षणान्विता ॥८१॥ सुनीतिज्ञा श्रुतिज्ञा च सर्वज्ञा दुःखहारिणी । रजोगुणेश्वरी चैव शरच्चन्द्रनिभानना ॥८२॥ केतकीकुसुमाभासा सदा सिन्धुवनस्थिता । हेमपुष्पाधिककरा पञ्चशक्तिमयी हिता ॥८३॥ स्तनकुम्भी नराढ्या च क्षीणापुण्या यशस्विनी । वैराजसूयजननी श्रीशा भुवनमोहिनी ॥८४॥ महाशोभा महामाया महाकान्तिर्महास्मृतिः । महामोहा महाविद्या महाकीर्तिर्महारतिः ॥८५॥ महाधैर्या महावीर्या महाशक्तिर्महाद्युतिः । महागौरी महासंपन्महाभोगविलासिनी ॥८६॥ समया भक्तिदाशोका वात्सल्यरसदायिनी । सुहृद्भक्तिप्रदा स्वच्छा माधुर्यरसवर्षिणी ॥८७॥ भावभक्तिप्रदा शुद्धप्रेमभक्तविधायिनी । गोपरामाभिरामा च क्रीडारामा परेश्वरी ॥८८॥ नित्यरामा चात्मरामा कृष्णरामा रमेश्वरी । एकानेकजगद्व्याप्ता विश्वलीलाप्रकाशिनी ॥८९॥ सरस्वतीशा दुर्गेशा जगदीशा जगद्विधिः । विष्णुवंशनिवासा च विष्णुवंशसमुद्भवा ॥१९०॥ विष्णुवंशस्तुता कर्त्री विष्णुवंशावनी सदा । आरामस्था वनस्था च सूर्य्यपुत्र्यवगाहिनी ॥९१॥ प्रीतिस्था नित्ययन्त्रस्था गोलोकस्था विभूतिदा । स्वानुभूतिस्थिताव्यक्ता सर्वलोकनिवासिनी ॥९२॥ अमृता ह्यद्भुता श्रीमन्नारायणसमीडिता । अक्षरापि च कूटस्था महापुरुषसंभवा ॥९३॥ औदार्यभावसाध्या च स्थूलसूक्ष्मातिरूपिणी । शिरीषपुष्पमृदुला गाङ्गेयमुकुरप्रभा ॥९४॥ नीलोत्पलजिताक्षी च

सद्रत्नकवरान्विता । प्रेमपर्यङ्कनिलया तेजोमण्डलमध्यगा ॥९५॥ कृष्णाङ्गगोपनाऽभेदा लीलावरणनायिका । सुधासिन्धुसमुल्लासामृतास्यन्दविधायिनी ॥९६॥ कृष्णचित्ता रासचित्ता प्रेमचित्ता हरिप्रिया । अचिन्तनगुणग्रामा कृष्णलीला मलापहा ॥९७॥ राससिन्धुशशाङ्का च रासमण्डलमण्डिनी । नतव्रता सिंहरीच्छा सुमूर्तिः सुरवन्दिता ॥९८। गोपी चूडामणिर्गोपी गणेड्या विरजाधिका । गोपप्रेष्ठा गोपकन्या गोपनारी सुगोपिका ॥९९॥ गोपधामा सुदामाम्बा गोपाली गोपमोहिनी । गोपभूषा कृष्णभूषा श्रीवृन्दावनचन्द्रिका ॥२००॥ वीणादिघोषनिरता रासोत्सवविकासिनी । कृष्णचेष्टा परिज्ञाता कोटिकन्दर्पमोहिनी ॥२०१॥ श्रीकृष्णगुणनागाढ्या देवसुन्दरिमोहिनी । कृष्णचन्द्रमनोज्ञा च कृष्णदेवसहोदरी ॥२॥ कृष्णाभिलाषिणी कृष्णप्रेमानुग्रहवाञ्छिता । क्षेमा च मधुरालापा भ्रुवोमाया सुभद्रिका ॥३॥ प्रकृतिः परमानन्दा नीपद्रुमतलस्थिता । कृपाकटाक्षा बिम्बोष्ठी रम्भा चारुनितम्बिनी ॥४॥ स्मरकेलिनिधाना च गण्डताटंकमण्डिता । हेमाद्रिकान्तिरुचिरा प्रेमाढ्या मदमन्थरा ॥५॥ कृष्णचिन्ता प्रेम चिन्ता रतिचिन्ता च कृष्णदा । रासचिन्ता भावचिन्ता शुद्धचिन्ता महारसा ॥६॥ कृष्णादृष्टित्रुटियुगा दृष्टिपक्ष्मविनिन्दिनी । कन्दर्पजननी मुख्या वैकुण्ठगतिदायिनी ॥७॥ रासभावा प्रियाश्लिष्टा प्रेष्ठा प्रथमनायिका । शुद्धा सुधादेहिनी च श्रीरामा रसमञ्जरी ॥८॥ सुप्रभावा शुभाचारा स्वर्णदी नर्मदाम्बिका । गोमती चन्द्रभागेड्या सरयूस्ताम्रपर्णिसूः ॥९॥ निष्कलङ्कचरित्रा च निर्गुणा च निरञ्जना । एतन्नामसहस्रं तु युग्मरूपस्य नारद ॥२१०॥ पठनीयं प्रयत्नेन वृन्दावनरसावहे । पापापहं वैरिहरं राधामाधवभक्तिदम् ॥१२॥ नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे । राधासङ्गसुधासिन्धो नमो नित्यविहारिणे ॥२१३॥

## परिशिष्टम् (ङ)

# गङ्गासहस्रनामस्तोत्रम्

(स्कान्द, काशीखण्ड, २९)

स्कन्द उवाच—

ॐ नमो गङ्गादेव्यै ॐकाररूपिण्यजराऽतुलाऽमृतस्रवा । अत्युदाराऽभयाऽशोकाऽलकनन्दाऽमृताऽमला ॥१७॥ अनाथवत्सलाऽमोघाऽपां योनिरमृतप्रदा ।

अव्यक्तलक्षणाऽक्षोभ्याऽनवच्छिन्नाऽपराजिता ॥१८॥ अनाथनाथाऽभीष्टार्थ-
सिद्धिदाऽनङ्गवर्धिनी । अणिमादिगुणाऽऽधाराऽग्रगण्याऽलीकहारिणी ॥१९॥
अचिन्त्यशक्तिरनघाऽद्भुतरूपाऽघहारिणी । अद्रिराजसुताऽष्टाङ्गयोगसिद्धि-
प्रदाऽच्युता ॥२०॥ अक्षुण्णशक्तिरसुदाऽनन्ततीर्थाऽमृतोदका । अनन्तमहिमाऽ-
पाराऽनन्तसौख्यप्रदाऽन्नदा ॥२१॥ अशेषदेवतामूर्तिरघोराऽमृतरूपिणी । अवि-
द्याजालशमनी ह्यप्रतर्क्यगतिप्रदा ॥२२॥ अशेषविघ्नसंहर्त्री त्वशेषगुणगुंफिता ।
अज्ञानतिमिरज्योतिरनुग्रहपरायणा ॥२३॥ अभिरामाऽनवद्यांग्यनन्तसाराऽ-
कलंकिनी । आरोग्यदाऽऽनन्दवल्ली त्वापन्नार्तिविनाशिनी ॥२४॥ आश्चर्य-
मूर्तिरायुष्या ह्याढ्याऽऽद्याऽऽप्राऽऽर्यसेविता । आप्यायिन्याप्तविद्याऽऽख्या
त्वानन्दाऽऽश्वासदायिनी ॥२५॥ आलस्यघ्न्यापदां हन्त्री ह्यानन्दामृतवर्षिणी ।
इरावतीष्टदात्रीष्टा त्विष्टापूर्तफलप्रदा ॥२६॥ इतिहासश्रुतीड्यार्था त्विहा-
मुत्रशुभप्रदा । इज्याशीलसमिज्ज्येष्ठा त्विन्द्रादिपरिवन्दिता ॥२७॥ इलाल-
ङ्कारमालेद्धा त्विन्दिरा रम्यमन्दिरा । इदिन्दिरादिसंसेव्या त्वीश्वरीश्वर-
वल्लभा ॥२८॥ ईतिभीतिहरेड्या च त्वीडनीयचरित्रभृत् । उत्कृष्टशक्ति-
रुत्कृष्टोडुपमण्डलचारिणी ॥२९॥ उदिताम्बरमार्गोस्त्रोरगलोकविहारिणी ।
उक्षोर्वरोत्पलोत्कुम्भा उपेन्द्रचरणद्रवा ॥३०॥ उदन्वत्पूर्तिहेतुश्चोदारोत्साह-
प्रवर्धिनी । उद्वेगघ्न्युष्णशमनी उष्णरश्मिसुता प्रिया ॥३१॥ उत्पत्तिस्थिति-
संहारकारिण्युपरिचारिणी । ऊर्जं वहत्यूर्जधरोर्जावती चोर्मिमालिनी ॥३२॥
ऊर्ध्वरेतःप्रियोर्ध्वाध्वा ह्यूर्मिलोर्ध्वगतिप्रदा । ऋषिवृन्दस्तुतर्द्धिश्च ऋणत्रय-
विनाशिनी ॥३३॥ ऋतम्भरर्द्धिदात्री च ऋक्स्वरूपा ऋजुप्रिया । ऋक्षमार्ग-
वहर्क्षार्चिरृजुमार्गप्रदर्शिनी ॥३४॥ एधिताऽखिलधर्मार्था त्वेकैकामृतदायिनी ।
एधनीयस्वभावैज्या त्वेजिताशेषपातका ॥३५॥ ऐश्वर्यदैश्वर्यरूपा ह्यैतिह्यं
ह्यैन्दवी द्युतिः । ओजस्विन्योषधीक्षेत्रमोजोदौदनदायिनी ॥३६॥ ओष्ठामृतौ-
न्नत्यदात्री त्वौषधं भवरोगिणाम् । औदार्यचञ्चुरौपेन्द्री त्वौग्री ह्यौमेयरूपिणी
॥३७॥ अम्बराध्ववहांऽम्बष्ठाम्बरमालाम्बुजेक्षणा । अम्बिकाम्बुमहायोनिरन्धो-
दान्धकहारिणी ॥३८॥ अंशुमाला ह्यंशुमती त्वङ्गीकृतषडानना । अन्धतामि-
स्रहन्त्र्यंधुरञ्जना ह्यञ्जनावती ॥३९॥ कल्याणकारिणी काम्या कमलोत्पल-
गन्धिनी । कुमुद्वती कमलिनी कान्तिः कल्पितदायिनी ॥४०॥ काञ्चनाक्षी
कामधेनुः कीर्तिकृत्क्लेशनाशिनी । क्रतुश्रेष्ठा क्रतुफला कर्मबन्धविभेदिनी

॥४१॥ कमलाक्षी क्लमहरा कृशानुतपनद्युतिः । करुणार्द्रा च कल्याणी कलिकल्मषनाशिनी ॥४२॥ कामरूपा क्रियाशक्तिः कमलोत्पलमालिनी । कूटस्था करुणा कान्ता कूर्मयाना कलावती ॥४३॥ कमला कल्पलतिका काली कलुषवैरिणी । कमनीयजला कम्रा कपर्दिसुकपर्दगा ॥४४॥ कालकूटप्रशमनी कदम्बकुसुमप्रिया । कालिन्दीकेलिललिता कलकल्लोलमालिका ॥४५॥ क्रान्तलोकत्रयाकण्डूः कण्डूतनयवत्सला । खड्गिनी खड्गधाराभा खगा खण्डेन्दु-धारिणी ॥४६॥ खेखेलगामिनी खस्था खण्डेन्दुतिलकप्रिया । खेचरी खेचरीवन्द्या ख्यातिः ख्यातिप्रदायिनी ॥४७॥ खण्डितप्रणताघौघा खलबुद्धि-विनाशिनी । खातैनः कन्दसन्दोहा खड्गखट्वाङ्गखेटिनी ॥४८॥ खरसन्ताप-शमनी खनिः पीयूषपाथसाम् । गङ्गा गन्धवती गौरी गन्धर्वनगरप्रिया ॥४९॥ गम्भीराङ्गी गुणमयी गतातङ्का गतिप्रिया । गणनाथाम्बिका गीता गद्यपद्यपरिष्टुता ॥५०॥ गान्धारीगर्भशमनी गतिभ्रष्टगतिप्रदा । गोमती गुह्यविद्या गौर्गोप्त्री गगनगामिनी ॥५१॥ गोत्रप्रवर्धिनी गुण्या गुणातीता गुणाग्रणीः । गुहाम्बिका गिरिसुता गोविन्दांघ्रिसमुद्भवा ॥५२॥ गुणनीयचरित्रा च गायत्री गिरिशप्रिया । गूढरूपा गुणवती गुर्वी गौरववर्धिनी ॥५३॥ ग्रहपीडा-हरा गुंद्रागरघ्नी गानवत्सला । घर्महन्त्री घृतवती घृततुष्टिप्रदायिनी ॥५४॥ घण्टारवप्रिया घोराऽघौघविध्वंसकारिणी । घ्राणतुष्टीकरी घोषा घनानन्दा घनप्रिया ॥५५॥ घातुका घूर्णितजला घृष्टपातकसन्ततिः । घटकोटिप्रपीतापा घटिताशेषमङ्गला ॥५६॥ घृणावती घृणनिधिर्घस्मरा घूकनादिनी । घुसृणापि-ञ्जरतनुर्घर्घरा घर्घरस्वना ॥५७॥ चन्द्रिका चन्द्रकान्ताम्बुश्चञ्चदापा चलद्युतिः। चिन्मयी चितिरूपा च चन्द्रायुतशतानना ॥५८॥ चाम्पेयलोचना चारुश्चार्वङ्गी चारुगामिनी । चार्याचारित्रनिलया चित्रकृच्चित्ररूपिणी ॥५९॥ चम्पूश्चन्दन-शुच्यंबुश्चर्चनीया चिरस्थिरा । चारुचम्पकमालाढ्या चमिताशेषदुष्कृता ॥६०॥ चिदाकाशवहाचिन्त्या चञ्चच्चामरवीजिता । चोरिताशेषवृजिना चरिताशेष-मण्डला ॥६१॥ छेदिताखिलपापौघा छद्मघ्नी छलहारिणी । छन्नत्रिविष्टपतला छोटिताशेषबन्धना ॥६२॥ छुरितामृतधारौघा छिन्नैनाश्छन्दगामिनी । छत्री-कृतमरालौघा छटीकृतनिजामृता ॥६३॥ जाह्नवीज्या जगन्माता जप्या जंघाल-वीचिका । जया जनार्दनप्रीता जुषणीया जगद्धिता ॥६४॥ जीवनं जीवनप्राणा जगज्ज्येष्ठा जगन्मयी । जीवजीवातु लतिका जन्मिजन्मनिबर्हिणी ॥६५॥

जाड्यविध्वंसनकरी जगद्योनिर्जलाविला । जगदानन्दजननी जलजा जलजेक्षणा ॥६६॥ जनलोचनपीयूषा जटातटविहारिणी । जयन्ती जंजपूकघ्नी जनितज्ञानविग्रहा ॥६७॥ झल्लरीवाद्यकुशला झलज्झालजलावृता । झिंटीशवन्द्या झाङ्कारकारिणी झर्झरावती ॥६८॥ टीकिताशेषपाताला टंकिकैनोद्रिपाटने । टंकारनृत्यत्कल्लोला टीकनीयमहातटा ॥६९॥ डम्बरप्रवहा डीनराजहंसकुलाकुला । डमडुमरुहस्ता च डामरोक्तमहाण्डका ॥७०॥ ढौकिताशेषनिर्वाणा ढक्कानादचलज्जला । ढुण्ढिविघ्नेशजननी ढणड्ढुणितपातका ॥७१॥ तर्पणीतीर्थतीर्था च त्रिपथा त्रिदशेश्वरी । त्रिलोकगोप्त्री तोयेशी त्रैलोक्यपरिवन्दिता ॥७२॥ तापत्रितयसंहर्त्री तेजोबलविवर्धिनी । त्रिलक्ष्या तारणी तारा तारापतिकरार्चिता ॥७३॥ त्रैलोक्यपावनी पुण्या तुष्टिदा तुष्टिरूपिणी । तृष्णाछेत्त्री तीर्थमाता त्रिविक्रमपदोद्भवा ॥७४॥ तपोमयी तपोरूपा तपःस्तोमफलप्रदा । त्रैलोक्यव्यापिनी तृप्तिस्तृप्तिकृत्तत्त्वरूपिणी ॥७५॥ त्रैलोक्यसुन्दरी तुर्या तुर्यातीतपदप्रदा । त्रैलोक्यलक्ष्मीस्त्रिपदी तथ्या तिमिरचन्द्रिका ॥७६॥ तेजोगर्भा तपःसारा त्रिपुरारिशिरोगृहा । त्रयीस्वरूपिणी तन्वी तपनांगजभीतिनुत ॥७७॥ तरिस्तरणिजामित्रं तर्पिताशेषपूर्वजा । तुलाविरहिता तीव्रपापतूलतनूनपात् ॥७८॥ दारिद्र्यदमनी दक्षा दुष्प्रेक्षा दिव्यमण्डना । दीक्षावती दुरावाप्या द्राक्षामधुरवारिभृत् ॥७९॥ दर्शितानेककुतुका दुष्टदुर्जयदुःखहृत् । दैन्यहृद् दुरितघ्नी च दानवारिपदाब्जजा ॥८०॥ दंदशूकविषघ्नी च दारिताघौघसंततिः । द्रुता देवद्रुमच्छन्ना दुर्वाराघविघातिनी ॥८१॥ दमग्राह्या देवमाता देवलोकप्रदर्शिनी । देवदेवप्रिया देवी दिक्पालपददायिनी ॥८२॥ दीर्घायुःकारिणी दीर्घा दोग्ध्री दूषणवर्जिता । दुग्धाम्बुवाहिनी दोह्या दिव्या दिव्यगतिप्रदा ॥८३॥ द्युनदी दीनशरणं देहिदेहनिवारिणी । द्राघीयसी दाघहन्त्री दितपातकसन्ततिः ॥८४॥ दूरदेशान्तरचरी दुर्गमा देववल्लभा । दुर्वृत्तघ्नी दुर्विगाह्या दयाधारा दयावती ॥८५॥ दुरासदा दानशीला द्राविणी द्रुहिणस्तुता । दैत्यदानवसंशुद्धिकर्त्री दुर्बुद्धिहारिणी ॥८६॥ दानसारा दयासारा द्यावाभूमिविगाहिनी । दृष्टादृष्टफलप्राप्तिर्देवतावृन्दवन्दिता ॥८७॥ दीर्घव्रता दीर्घदृष्टिर्दीप्ततोया दुरालभा । दण्डयित्री दण्डनीतिर्दुष्टदण्डधरार्चिता ॥८८॥ दुरोदरघ्नी दावार्चिर्द्रवद्द्रव्यैकशेवधिः । दीनसन्तापशमनी दात्री दवथुवैरिणी ॥८९॥ दरीविदारणपरा दान्ता दान्तजनप्रिया । दारिताद्रितटा दुर्गा दुर्गारण्यप्रचारिणी

॥९०॥ धर्मद्रवा धर्मधुरा धेनुर्धीरा धृतिर्ध्रुवा । धेनुदानफलस्पर्शा धर्मकामार्थ-मोक्षदा ॥९१॥ धर्मोर्मिवाहिनी धुर्या धात्री धात्रीविभूषणम् । धर्मिणी धर्म-शीला च धन्विकोटिकृतावना ॥९२॥ ध्यातृपापहरा ध्येया धावनी धूतकल्मषा । धर्मधारा धर्मसारा धनदा धनवर्धिनी ॥९३॥ धर्माधर्मगुणच्छेत्री धत्तूरकुसुम-प्रिया । धर्मेशी धर्मशास्त्रज्ञा धनधान्यसमृद्धिकृत् ॥९४॥ धर्मलभ्या धर्मजला धर्मप्रसवधर्मिणी । ध्यानगम्यस्वरूपा च धरणी धातृपूजिता ॥९५॥ धूर्धूर्जटि-जटासंस्था धन्याधीर्धारणावती । नन्दा निर्वाणजननी नन्दिनी नुन्नपातका ॥८६॥ निषिद्धविघ्ननिचया निजानन्दप्रकाशिनी । नभोङ्गणचरी नूतिर्नम्या नारायणीनुता ॥९७॥ निर्मला निर्मलाख्याना नाशिनी तापसम्पदाम् । नियता नित्यसुखदा नानाश्चर्यमहानिधिः ॥९८॥ नदीनदसरोमाता नायिका नाक-दीर्घिका । नष्टोद्धरणधीरा च नन्दनानन्ददायिनी ॥९९॥ निर्णिक्ताशेषभुवना निःसङ्गा निरुपद्रवा । निरालम्बा निष्प्रपञ्चा निर्णाशितमहामला ॥१००॥ निर्मलज्ञानजननी निःशेषप्राणितापहृत् । नित्योत्सवा नित्यतृप्ता नमस्कार्या निरञ्जना ॥१॥ निष्ठावती निरातंका निर्लेपा निश्चलात्मिका । निरवद्या निरीहा च नीललोहितमूर्धगा ॥२॥ नन्दिभृङ्गिगणस्तुत्या नागानन्दा नगात्मजा । निष्प्रत्यूहा नाकनदी निरयार्णवदीर्घनौः ॥३॥ पुण्यप्रदा पुण्यगर्भा पुण्यापुण्य-तरंगिणी । पृथुः पृथुफला पूर्णा प्रणतार्तिप्रभञ्जिनी ॥४॥ प्राणदा प्राणिजननी प्राणेशी प्राणरूपिणी । पद्मालया पराशक्तिः पुरजित्परमप्रिया ॥५॥ परापर-फलप्राप्तिः पावनी च पयस्विनी । परानन्दा प्रकृष्टार्था प्रतिष्ठा पालनी परा ॥६॥ पुराणपठिता प्रीता प्रणवाक्षररूपिणी । पार्वतीप्रेमसंपन्ना पशुपाश-विमोचनी ॥७॥ परमात्मस्वरूपा च परब्रह्मप्रकाशिनी । परमानन्दनिष्पन्दा प्रायश्चित्तस्वरूपिणी ॥८॥ पानीयरूपनिर्वाणा परित्राणपरायणा । पापेन्धन-दवज्वाला पापारिः पापनामनुत् ॥९॥ परमैश्वर्यजननी प्रज्ञा प्राज्ञा परापरा । प्रत्यक्षलक्ष्मीः पद्माक्षी परव्योमाऽमृतस्रवा ॥११०॥ प्रसन्नरूपा प्रणिधिः पूता प्रत्यक्षदेवता । पिनाकिपरमप्रीता परमेष्ठिकमण्डलुः ॥११॥ पद्मनाभपदार्घ्येण प्रसूता पद्ममालिनी । परर्द्धिदा पुष्टिकरी पथ्या पूर्तिः प्रभावती ॥१२॥ पुनाना पीतगर्भघ्नी पापपर्वतनाशिनी । फलिनी फलहस्ता च फुल्लाम्बुजविलोचना ॥१३॥ फालितैनोमहाक्षेत्रा फणिलोकविभूषणम् । फेनच्छलप्रणुन्नैनाः फुल्ल-कैरवगन्धिनी ॥१४॥ फेनिलाच्छाम्बुधाराभा फुडुच्चाटितपातका । फाणित-

स्वादुसलिला फांटपथ्यजलाविला ॥१५॥ विश्वमाता च विश्वेशी विश्वा-विश्वेश्वरप्रिया । ब्रह्मण्या ब्रह्मकृद्ब्राह्मी ब्रह्मिष्ठा विमलोदका ॥१६॥ विभा-वरी च विरजा विक्रान्तानेकविष्टपा । विश्वमित्रं विष्णुपदी वैष्णवी वैष्णव-प्रिया ॥१७॥ विरूपाक्षप्रियकरी विभूतिर्विश्वतोमुखी । विपाशा वैबुधी वेद्या वेदाक्षररसस्रवा ॥१८॥ विद्या वेगवती वन्द्या बृंहणी ब्रह्मवादिनी । वरदा विप्रकृष्टा च वरिष्ठा च विशोधनी ॥१९॥ विद्याधरी विशोका च वयोवृन्द-निषेविता । बहूदका बलवती व्योमस्था विबुधप्रिया ॥१२०॥ वाणी वेदवती वित्ता ब्रह्मविद्यातरंगिणी । ब्रह्माण्डकोटिव्याप्ताम्बुर्ब्रह्महत्यापहारिणी ॥२१॥ ब्रह्मेशविष्णुरूपा च बुद्धिर्विभववर्धिनी । विलासिसुखदा वैश्या व्यापिनी च वृषारणिः ॥२२॥ वृषाङ्कमौलिनिलया विपन्नार्त्तिप्रभञ्जिनी । विनीता विनता ब्रध्नतनया विनयान्विता ॥२३॥ विपञ्चीवाद्यकुशला वेणुश्रुति-विचक्षणा । वर्चस्करी बलकरी बलोन्मूलितकल्मषा ॥२४॥ विपाप्मा विगता-तङ्का विकल्पपरिवर्जिता । वृष्टिकर्त्री वृष्टिजला विधिर्विच्छिन्नबन्धना ॥२५॥ व्रतरूपा वित्तरूपा बहुविघ्नविनाशकृत् । वसुधारा वसुमती विचित्राङ्गी विभावसुः ॥२६॥ विजया विश्वबीजं च वामदेवी वरप्रदा । वृषाश्रिता विषघ्नी च विज्ञानोर्म्यंशुमालिनी ॥२७॥ भव्या भोगवती भद्रा भवानी भूत-भाविनी । भूतधात्री भयहरा भक्तदारिद्र्यघातिनी ॥२८॥ भुक्तिमुक्तिप्रदा भेशी भक्तस्वर्गापवर्गदा । भागीरथी भानुमती भाग्यं भोगवती भृतिः ॥२९॥ भवप्रिया भवद्वेष्ट्री भूतिदा भूतिभूषणा । भाललोचनभावज्ञा भूतभव्यभवत्प्रभुः ॥१३०॥ भ्रान्तिज्ञानप्रशमनी भिन्नब्रह्माण्डमण्डपा । भूरिदा भक्तिसुलभा भाग्यवद्दृष्टिगोचरी ॥३१॥ भञ्जितोपप्लवकुला भक्ष्यभोज्यसुखप्रदा । भिक्षणीया भिक्षुमाता भावाभावस्वरूपिणी ॥३२॥ मन्दाकिनी महानन्दा माता मुक्तितरंगिणी । महोदया मधुमती महापुण्या मुदाकरी ॥३३॥ मुनि-स्तुता मोहहंत्री महातीर्था मधुस्रवा । माधवी मानिनी मान्या मनोरथपथातिगा ॥३४॥ मोक्षदा मतिदा मुख्या महाभाग्यजनाश्रिता । महावेगवती मेध्या महामहिमभूषणा ॥३५॥ महाप्रभावा महती मीनचञ्चललोचना । महा-कारुण्यसंपूर्णा महर्द्धिश्च महोत्पला ॥३६॥ मूर्तिमन्मुक्तिरमणी मणिमाणिक्य-भूषणा । मुक्ताकलापनेपथ्या मनोनयननन्दिनी ॥३७॥ महापातकराशिघ्नी महादेवार्द्धहारिणी । महोर्मिमालिनी मुक्ता महादेवी मनोन्मनी ॥३८॥

महापुण्योदयप्राप्या मायातिमिरचन्द्रिका । महाविद्या महामाया महामेधा महौषधम् ॥३९॥ मालाधरी महोपाया महोरगविभूषणा । महामोहप्रशमनी महामङ्गलमङ्गलम ॥१४०॥ मार्तण्डमण्डलचरी महालक्ष्मीर्मदोज्झिता । यशस्विनी यशोदा च योग्या युक्तात्मसेविता ॥४१॥ योगसिद्धिप्रदा याज्या यज्ञेशपरिपूरिता । यज्ञेशी यज्ञफलदा यजनीया यशस्करी ॥४२॥ यमिसेव्या योगयोनिर्योगिनी युक्तबुद्धिदा । योगज्ञानप्रदा युक्ता यमाद्यष्टाङ्गयोगयुक् ॥४३॥ यन्त्रिताघौघसंचारा यमलोकनिवारिणी । यातायातप्रशमनी यातनानामकृन्तनी ॥४४॥ यामिनीशहिमाच्छोदा युगधर्मविवर्जिता । रेवती रतिकृद्रम्या रत्नगर्भा रमा रतिः ॥४५॥ रत्नाकरप्रेमपात्रं रसज्ञा रसरूपिणी । रत्नप्रासादगर्भा च रमणीयतरंगिणी ॥४६॥ रत्नार्ची रुद्ररमणी रागद्वेषविनाशिनी । रमा रामा रम्यरूपा रोगिजीवानुरूपिणी ॥४७॥ रुचिकृद्रोचनी रम्या रुचिरा रोगहारिणी । राजहंसा रत्नवती राजत्कल्लोलराजिका ॥४८॥ रामणीयकरेखा च रुजारी रोगरोषिणी । राका रङ्कार्तिशमनी रम्या रोलंबराविणी ॥४९॥ रागिणी रञ्जितशिवा रूपलावण्यशेवधिः । लोकप्रसूर्लोकवन्द्या लोलत्कल्लोलमालिनी ॥१५०॥ लीलावती लोकभूमिर्लोकलोचनचन्द्रिका । लेखस्रवन्ती लटभा लघुवेगा लघुत्वहृत् ॥५१॥ लास्यत्तरंगहस्ता च ललितालयभंगिगा । लोकबन्धुर्लोकधात्री लोकोत्तरगुणोर्जिता ॥५२॥ लोकत्रयहितालोका लक्ष्मीर्लक्षणलक्षिता । लीलालक्षितनिर्वाणा लावण्यामृतवर्षिणी ॥५३॥ वैश्वानरी वासवेड्या वन्ध्यत्वपरिहारिणी । वासुदेवांघ्रिरेणुघ्नी वज्रिवज्रनिवारिणी ॥५४॥ शुभावती शुभफला शान्तिः शान्तनुवल्लभा । शूलिनी शैशववयाः शीतलाऽमृतवाहिनी ॥५५॥ शोभावती शीलवती शोषिताशेषकिल्बिषा । शरण्या शिवदा शिष्टा शरजन्मप्रसूः शिवा ॥५६॥ शक्तिः शशाङ्कविमला शमनस्वसृसंमता । शमा शमनमार्गघ्नी शितिकण्ठमहाप्रिया ॥५७॥ शुचिः शुचिकरी शेषा शेषशायिपदोद्भवा । श्रीनिवासश्रुतिः श्रद्धा श्रीमती श्रीः शुभव्रता ॥५८॥ शुद्धविद्या शुभावर्ता श्रुतानन्दा श्रुतिस्तुतिः । शिवेतरघ्नी शबरी शाम्बरीरूपधारिणी ॥५९॥ श्मशानशोधनी शान्ता शश्वच्छतधृतिस्तुता । शालिनी शालिशोभाढ्या शिखिवाहनगर्भभृत् ॥१६०॥ शंसनीयचरित्रा च शातिताशेषपातका । षड्गुणैश्वर्यसंपन्ना षडङ्गश्रुतिरूपिणी

॥६१॥ षण्डताहारिसलिला छ्टचायन्नदनदीशता । सरिद्वरा च सुरसा सुप्रभा सुरदीर्घिका ॥६२॥ स्वःसिंधुः सर्वदुःखघ्नी सर्वव्याधिमहौषधम् । सेव्या सिद्धिः सती सूक्तिः स्कन्दसूश्च सरस्वती ॥६३॥ संपत्तरंगिणी स्तुत्या स्थाणुमौलि-कृतालया । स्थैर्यदा सुभगा सौख्या स्त्रीषु सौभाग्यदायिनी ॥६४॥ स्वर्गनिःश्रे-णिका सूक्ष्मा स्वधा स्वाहा सुधाजला । समुद्ररूपिणी स्वर्ग्या सर्वपातकवैरिणी ॥६५॥ स्मृताघहारिणी सीता संसाराब्धितरण्डिका । सौभाग्यसुन्दरी सन्ध्या सर्वसारसमन्विता ॥६६॥ हरप्रिया हृषीकेशी हंसरूपा हिरण्मयी । हृताघ-संघाहितकृद्धेलाहेलाघगर्वहृत् ॥६७॥ क्षेमदा क्षालिताघौघा क्षुद्रविद्राविणी क्षमा । इति नामसहस्रं हि गङ्गायाः कलशोद्भव । कीर्तयित्वा नरः सम्य-ग्गङ्गास्नानफलं लभेत् ॥६८॥ सर्वपापप्रशमनं सर्वविघ्नविनाशनम् । सर्व-स्तोत्रजपाच्छ्रेष्ठं सर्वपावनपावनम् ॥१६९॥

इति श्रीज्ञानदेवार्पणमस्तु ।

## शुद्धिपत्रम् (continued from page xii)

| | | | |
|---|---|---|---|
| ६–११ | तदर्जितं | १७४–६ | धर्म |
| २९–२३ | स्वस्रा | १७६–१२ | शब्दचरः |
| ३०–२० | गूहेत् | १७७–९ | खरध्वंसी |
| ५६–१ | शब्द... | १९६–२७ | योऽभ्यर्च्यते |
| ९३–२२ | शब्द... | २३५–१८ | दधति |
| ९९–२१ | अस्रै... | २३८–१० | दहना.... |
| १२६–१८ | चापाभां | २३८–१४ | बुधः स |
| १३३–२१ | संसृष्टैः | २६०–६ | सहस्र.... |
| १३९–१ | सुधियो | २७७–६ | ममेति |
| १४१–२४ | दीर्घिका | २७८–१० | नारायणं |
| १४३–९ | अजस्र... | २९६–२३ | एकानेक... |

On page 284, add :

**एको मुनिः कुम्भकुशाग्रहस्तः आम्रस्य मूले सलिलं ददानः ।।**
**आम्रश्च सिक्तः पितरश्च तृप्ता एका क्रिया द्व्यर्थकरी प्रसिद्धा ।।३७।।**
**वायु, १११.**

**नास्ति सौख्यं च मूर्खेषु नास्ति सौख्यं च रोगिषु ।।**
**पराधीने न सौख्यं तु स्त्रीजिते च विशेषतः ।।६१।। स्कान्द, रे.खं., ६७.**